अर्हम्

श्रीवृद्धिचन्द्रगुरुभ्यो नमः ।

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्य्यप्रणीतं

योगशास्त्रम् ।

स्वोपज्ञविवरणसहितम् ।

द्भुतयोगसम्पदे श्रीवीरनाथाय विमुक्तिशालिने ।
विशेषणनिर्णयो भव्यावबोधाय मया विधास्यते ॥१॥

अत्र शास्त्रमादिश्लोकः—

नमो दुर्वाररागादिवैरिवारनिवारिणे ।
अर्हते योगिनाथाय महावीराय तायिने ॥

अत्र महावीरायेति विशेष्यपदम् । विशेषेण ई
कर्माणीति वीरः ।

विदारयति यत्कर्म तपसा च विरा
तपोवीर्येण युक्तश्च तस्माद्वीर

इति लक्षणाद्वा वीरः मह
महावीरः इदं च जन्म
अत्र गर्भापहारे सो

चरणाङ्गुष्ठनिपीडितसुमेरुशिखरप्रकम्पमानमहीतलोच्छलितसरित्-पतिक्षोभशङ्कितशक्राकाशोदरदर्शनप्रयुक्तावधिज्ञानज्ञातप्रभावा-तिशयविस्मितेन वास्तोष्पतिना नाम निर्ममे महावीरोऽयमिति । तत्पुनरनादिप्रभवप्ररूढप्रौढकर्मसमुन्मूलनबलेन यथार्थीकृतञ्च भगवता । वर्द्धमान इति तु नाम मातरपितराभ्यां कृतम् । श्रमणो देवार्य इति च जनपदेन । तस्मै नम इति सम्बन्धः । शेषाणि विशेषणानि । तैस्तु सद्भूतार्थप्रतिपादनपरैश्चत्वारो भगवदतिशयाः प्रकाश्यन्ते तत्र पूर्वार्द्धेनापायापगमातिशयः । अपाय रागादयस्तदपगमेन भगवतः स्वरूपलाभः । १ । अर्हते इ सकलसुरासुरमनुजजनितपूजाप्रकर्षवाचिना पूजाति योगिनाथायेत्यनेन तु ज्ञानातिशयः योगिनोऽवधि नाथो विमलकेवलकलावलोकितलोकालोकस्वभा । तायिने इत्यनेन त । ४ । ताय । रक्षितॄणां पालकः । पालकत्वं च सकलभुवनाभयदानसमर्थ परिणामिधर्मदेशनाद्वारेण भगवत एव । पालकत्व आदेर्ब्रह्मादीनामपि सम्भवति । तदेवं चतुर भगवतो महावीरस्य पारमार्थिकी

गर्भां स्तुतिमाह—

ण॰

चागत्य ॰

चक्रिरे तितउप्रा॰

मत्वमेषां कियदेतदि॰

वेदनामधिसेहे तां दुःसहां

वराको मास्म पीड्यन्त स्वल्प॰

इत्यचीचलदङ्गं न मनागपि म॰

सिक्त: कृपासुधावृष्ट्या दृष्ट्या भगव

पश्चान्ते पञ्चतां प्राप्य सहस्रारदिवं

विदधति विविधोपसर्गबाधां

फणिभृति दृष्टिविषे हरौ तु भ

इति तुल्यमनस्कता ममंसे

चरमजिनस्य जगत्त्रयैकबन्धो: ॥

प्रकारान्तरेण पुनर्योगगर्भामिव स्तुतिम्

कृतापराधेऽपि जने कृपामन्थरतारयो.

ईषद्बाष्पार्द्रयोर्भद्रं श्रीवीरजिननेत्रयो: ॥ ः

विहितविप्रियेऽपि जने सङ्गमकादौ कृपया मन्थरे ईषद्

कनीनिके ययो: ईषद्बाष्पस्तुजलं स च करुणाकृत एव तेन आर्द्रे

क्लिन्ने भगवतो नेत्रे तयोर्भद्रमिति सामर्थ्यान्नमस्कारप्रतीति: ।

तथाहि—

॥ २४ ॥

।

मासुः ॥ २५ ॥

वितन्वतः ।

यं पूर्व्वजन्मनाम् ॥ २६ ॥

तनश्च परमेश्वरम् ।

ऽनशनं प्रत्यपद्यत ॥ २७ ॥

निष्कर्म्माणं महोरगम् ।

सौदन्वग्नासीच्च तं प्रभुः ॥ २८ ॥

यासीद्दृष्टिर्मे विषभीषणा ।

लि च्छित्वा पपौ स ममताम्रतम् ॥ २९ ॥

तत्रैव स्वामी तदनुकम्पया ।

राय महतां हि प्रवृत्तयः ॥ ३० ॥

था दृष्ट्वा विस्मयस्मेरलोचनाः ।

वत्सपालाश्च तत्रोपसस्रुपुर्द्रुतम् ॥ ३१ ॥

न्तरे तिरोभूय यथेष्टं ग्रावलोष्टुभिः ।

जघ्नुरनिशास्ते पन्नगस्य महात्मनः ॥ ३२ ॥

तथाप्यविचलन्तं तं वीक्ष्य विश्रब्धभाजिनः ।

यष्टिभिर्घट्टयामासुर्निकटीभूय तत्तनुम् ॥ ३३ ॥

भाख्यन् जनानां ते गोपास्ततस्तत्रागमन् जनाः ।

ववन्दिरे महावीरममहंश्च महोरगम् ॥ ३४ ॥

पन्नगे च सुरेन्द्रे च कौशिके पादसंस्पृशि।
निर्विशेषमनस्काय श्रीवीरस्वामिने नमः॥ २॥

पन्नगस्य कौशिकत्वं पूर्वभवस्थितकौशिकगोत्रत्वेन। बुध्यस्व कौशिकेति भगवता तथैव भाषितत्वेन च सुरेन्द्रस्य तु कौशिकत्वं कौशिकाभिधानात्। पादस्पर्शश्च पन्नगस्य दशनबुद्धा सुरेन्द्रस्य च भक्त्यतिशयेन। निर्विशेषमनस्कत्वं च भगवतो द्वेषरागविशेषरहितत्वेन माध्यस्थ्यात्॥

सम्प्रदायगम्यश्चायमर्थस्तथाहि—

श्रीवीरः प्राणतस्वर्गपुष्पोत्तरविमानतः।
पूर्वजन्मार्जितोजस्वितीर्थकृन्नामकर्मकः॥ १॥
ज्ञानत्रयपवित्रात्मा सिद्धार्थनृपवेश्मनि।
त्रिशलाकुक्षौ सरस्यां राजहंस इवागमत्॥ २॥ (युग्मं)
सिंहो गजो वृषः साभिषेकश्रीः स्रक् शशी रविः।
महाध्वजः पूर्णकुम्भः पद्मसरः सरित्पतिः॥ ३॥
विमानं रत्नपुञ्जश्च निर्धूमाग्निरिति क्रमात्।
देवी चतुर्दशस्वप्नानपश्यत्तत्र गर्भगे॥ ४॥
त्रैलोक्योद्योतकृद्देवदानवासनकम्पकृत्।
अपि नारकजन्तूनां जनितक्षणसुखासिकम्॥ ५॥
प्रभुः सुखं सुखेनैव जन्म प्राप शुभे दिने।
तत्कालं दिक्कुमार्यश्च सूतिकर्माणि चक्रिरे॥ ६॥

---

(१) ख ग -भूत-।

अथ जन्माभिषेकाय कृत्वोत्सङ्गे जगत्प्रभुम् ।
मेरुमूर्ध्नि सुधर्म्मेन्द्रः सिंहासनमशिश्रियत् ॥ ७ ॥
इयन्तं वारिसम्भारं कथं स्वामी सहिष्यते ।
इत्याशशङ्के शक्रेण भक्तिकोमलचेतसा ॥ ८ ॥
तदाशङ्कानिरासाय लीलया परमेश्वरः ।
मेरुशैलं वामपादाङ्गुष्ठाग्रेण न्यपीडयत् ॥ ९ ॥
शिरांसि मेरोरनमन्नमस्कर्तुमिव प्रभुम् ।
तदन्तिकमिवायातुमचलंश्च कुलाचलाः ॥ १० ॥
अतुच्छमुच्छलन्तिस्म स्नातं कर्तुमिवार्णवाः ।
विवेपे सत्वरं तत्र नर्त्तनाभिमुखेव भूः ॥ ११ ॥
किमेतदिति सञ्चिन्त्यावधिज्ञानप्रयोगतः ।
लीलायितं भगवतो विदाञ्चक्रे बिडौजसा ॥ १२ ॥
स्वामिन्ननन्यसामान्यं सामान्यो मादृशो जनः ।
विदाङ्करोतु माहात्म्यं कथङ्कारं तवेदृशम् ॥ १३ ॥
तन्मिथ्यादुष्कृतं भूयाच्चिन्तितं यन्मयाऽन्यथा ।
इतीन्द्रेण ब्रुवाणेन प्रणेमे परमेश्वरः ॥ १४ ॥
सानन्दं वादितातोद्यं चक्रे शक्रैर्जगद्गुरोः ।
तीर्थगन्धोदकैः पुण्यैरभिषेकमहोत्सवः ॥ १५ ॥
अभिषेकजलं तत्तु सुरासुरनरोरगाः ।
ववन्दिरे मुहुः सर्वाङ्गीणं च परिचिक्षिपुः ॥ १६ ॥
प्रभुस्नातजलालीढा वन्दनीया मृदप्यभूत् ।
गुरूणां किल संसर्गाद्गौरवं स्याल्लघोरपि ॥ १७ ॥

निवेश्येशानशक्राङ्के सौधर्म्मेन्द्रोऽप्यथ प्रभुम् ।
स्नपयित्वाऽर्चयित्वारात्रिकं कृत्वेति तुष्टुवे ॥ १८ ॥
नमोऽर्हते भगवते स्वयम्बुद्धाय वेधसे ।
तीर्थङ्कारायादिकृते पुरुषोत्तमाय ते ॥ १९ ॥
नमो लोकप्रदीपाय लोकप्रद्योतकारिणे ।
लोकोत्तमाय लोकाधीशाय लोकहिताय ते ॥ २० ॥
नमस्ते पुरुषवरपुण्डरीकाय शम्भवे ।
पुरुषसिंहाय पुरुषैकगन्धद्विपाय ते ॥ २१ ॥
चक्षुर्दायाभयदाय बोधिदायाध्वदायिने ।
धर्म्मदाय धर्म्मदेष्ट्रे नमः शरणदाय ते ॥ २२ ॥
धर्म्मसारथये धर्म्मनेत्रे धर्म्मैकचक्रिणे ।
व्यावृत्तच्छद्मने सम्यक्ज्ञानदर्शनधारिणे ॥ २३ ॥
जिनाय ते जापकाय तीर्णाय तारकाय च ।
विमुक्ताय मोचकाय नमो बुद्धाय बोधिने ॥ २४ ॥
सर्व्वज्ञाय नमस्तुभ्यं स्वामिने सर्वदर्शिने ।
सर्व्वातिशयपात्राय कर्म्माष्टकनिषूदिने ॥ २५ ॥
तुभ्यं चैत्याय पात्राय तीर्थाय परमात्मने ।
स्याद्वादवादिने वीतरागाय मुनये नमः ॥ २६ ॥
पूज्यानामपि पूज्याय महद्भ्योऽपि महीयसे ।
आचार्य्याणामाचार्याय ज्येष्ठानां ज्यायसे नमः ॥ २७ ॥

---

(१) क ख ग अर्च्चयित्वाथ कृत्वारात्रिकमस्तवीत् ।

नमो विश्वभुवे तुभ्यं योगिनाथाय योगिने ।
पावनाय पवित्रायानुत्तरायोत्तराय च ॥ २८ ॥
योगाचार्याय संप्रक्षालनाय प्रवराय च ।
अग्र्याय वाचस्पतये [1]माङ्गल्याय नमोऽस्तु ते ॥ २९ ॥
नमः पुरस्तादुदितायैकवीराय भास्वते ।
ॐ भूर्भुवःस्वरिति वाक्स्तवनीयाय ते नमः ॥ ३० ॥
नमः सर्वजनीनाय सर्वार्थायामृताय च ।
उदितब्रह्मचर्यायाप्ताय पारगताय ते ॥ ३१ ॥
नमस्ते दक्षिणीयाय निर्विकाराय तायिने ।
वज्रर्षभनाराचवपुषे तत्त्वदृश्वने ॥ ३२ ॥
नमः कालत्रयज्ञाय जिनेन्द्राय स्वयंभुवे ।
ज्ञानबलवीर्यतेजःशक्त्यैश्वर्यमयाय ते ॥ ३३ ॥
आदिपुंसे नमस्तुभ्यं नमस्ते परमेष्ठिने ।
नमस्तुभ्यं महेशाय ज्योतिस्तत्त्वाय ते नमः ॥ ३४ ॥
तुभ्यं सिद्धार्थराजेन्द्रकुलक्षीरोदधीन्दवे ।
महावीराय धीराय त्रिजगत्स्वामिने नमः ॥ ३५ ॥
इति स्तुत्वा नमस्कृत्य गृहीत्वा परमेश्वरम् ।
आनीय तत्पार्श्वं मातुरर्पयामास वासवः ॥ ३६ ॥
स्ववंशवृद्धिकरणाद्यथार्थं पितरौ तदा ।
नामधेयं विदधतुर्वर्द्धमान इति प्रभोः ॥ ३७ ॥

---

(१) ख माङ्गल्याय ।

सोऽहंपूर्व्विकया भक्तैः सेव्यमानः सुरासुरैः ।
दृष्ट्या पीयूषवर्षिण्या सिञ्चन्निव वसुन्धराम् ॥ ३८ ॥
अष्टोत्तरसहस्रेण लक्षणैरुपलक्षितः ।
निसर्गेण गुणैर्वृद्धो वयसा ववृधे क्रमात् ॥ ३९ ॥
राजपुत्रैः सवयोभिः समं निःसीमविक्रमः ।
वयोऽनुरूपक्रीडाभिः कदाचित्क्रीडितुं ययौ ॥ ४० ॥
तदा ज्ञात्वावधिज्ञानान्मध्येसुरसभं हरिः ।
[1]धीरा धनुर्महावीरमिति वीरमवर्णयत् ॥ ४१ ॥
क्षोभयिष्यामि तं [2]धीरमेषोऽहमिति मत्सरी ।
आजगामामरः कोऽपि यत्र क्रीडन्नभूद्विभुः ॥ ४२ ॥
कुर्व्वत्यामलकीक्रीडां राजपुत्रैः सह प्रभौ ।
सो[3]ऽववेष्टद्विटपिनं भुजगीभूय मायया ॥ ४३ ॥
तत्कालं राजपुत्रेषु वित्रस्तेषु दिशोदिशि ।
स्मित्वा रज्जुमिवोत्क्षिप्य तं चिक्षेप क्षितौ विभुः ॥ ४४ ॥
सव्रीडाः क्रीडितुं तत्र कुमाराः पुनराययुः ।
कुमारीभूय सोऽप्यागात्सर्व्वेऽप्याकरडुस्तकम् ॥ ४५ ॥
पादपार्श्वं कुमारेभ्यः प्राप प्रथमतः प्रभुः ।
यद्वा कियदमुष्येदं यो लोकाग्रं गमिष्यति ॥ ४६ ॥
शुशुभे भगवांस्तत्र मेरुशृङ्ग इवार्यमा ।
लम्बमाना बभुः पादास्तस्य छायाद्रुमा इव ॥ ४७ ॥

---

(१) क ख धीरा । (२) ख धीरम् । (३) ख अविवेष्टत् ।

जिग्ये भगवता तत्र कृतश्चासीदयं पणः ।
जयेद्यदत्र स ह्यन्यान् पृष्ठमारुह्य वाहयेत् ॥ ४८ ॥
आरुह्यावाहयद्बालानिव वीरः कुमारकान् ।
आरुरोह सुरस्यापि पृष्ठं पृष्ठो महौजसाम् ॥ ४९ ॥
ततः करालं वैतालरूपमाधाय दुष्टधीः ।
भूधरानप्यधरयन् प्रारब्धो वर्द्धितुं सुरः ॥ ५० ॥
वक्त्रे पातालकल्पेऽस्य जिह्वया तक्षकायितम् ।
पिङ्गैस्तुङ्गैः शिरःशैले केशैर्दावानलायितम् ॥ ५१ ॥
तस्यातिदारुणे दंष्ट्रे बभूतां क्रकचाकृती ।
जाज्वल्यमाने अङ्गारशकट्याविव लोचने ॥ ५२ ॥
घोणारन्ध्रे महाघोरे महीधरगुहे इव ।
भृकुटीभङ्गुरे भीमे महोरग्याविव भ्रुवौ ॥ ५३ ॥
व्यरंसीद्वर्द्धनान्नासौ यावत्तावन्महौजसा ।
आहत्य मुष्टिना पृष्ठे स्वामिना वामनीकृतः ॥ ५४ ॥
एवं च भगवद्धैर्यं[१] साक्षात्[२]कृत्येन्द्रवर्णितम् ।
प्रभुं नत्वात्मरूपेण निजं धाम जगाम सः ॥ ५५ ॥
मातापितृभ्यामन्येद्युः प्रारब्धेऽध्यापनोत्सवे ।
भाः सर्वज्ञस्य शिष्यत्वमितीन्द्रस्तमुपास्थितः ॥ ५६ ॥
उपाध्यायासने तस्मिन्वासवेनोपवेशितः ।
प्रणम्य प्रार्थितः स्वामी शब्दपारायणं जगौ ॥ ५७ ॥

---

(१) क ख ङ वीर्यं । (२) क ख ङ -कृत्ये- ।

इदं भगवतेन्द्राय प्रोक्तं शब्दानुशासनम् ।
उपाध्यायेन तच्छ्रुत्वा लोकेष्वैन्द्रमितीरितम् ॥ ५८ ॥
मातापित्रोरनुरोधादष्टाविंशतिवत्सरीम् ।
कथञ्चिद्गृहवासेऽस्थात्प्रव्रज्योत्कण्ठितः प्रभुः ॥ ५९ ॥
अथ पूर्णायुषोः पित्रोर्देवभूयमुपेयुषोः ।
ईशाञ्चक्रे परिव्रज्यां निरीहो राज्यसम्पदः ॥ ६० ॥
भगवन्मा कृते भारं क्षैप्सीरिति सगद्गदम् ।
भ्रात्रोक्ता ज्यायसा नन्दिवर्द्धनेनोपरोधितः ॥ ६१ ॥
भावतो यतिरेवाहं नानाभरणभूषितः ।
कायोत्सर्गं श्रयंश्चित्रशालिकायामवस्थितः ॥ ६२ ॥
एषणीयप्रासुकान्नपानवृत्तिर्महामनाः ।
वर्षमेकं कथमपि भगवानत्यवाहयत् ॥ ६३ ॥
तीर्थं प्रवर्त्तयेत्यभ्यर्थितो लोकान्तिकामरैः ।
यथाकामीनमर्थिभ्यो दानं दातुं प्रचक्रमे ॥ ६४ ॥
दैनीयोकेन वर्षेण विनिर्मायानृणां भुवम् ।
श्रीवभद्राज्यश्रियं स्वामी मन्यमानस्तृणाय ताम् ॥ ६५ ॥
सर्व्वैर्देवनिकायैश्च कृतनिष्क्रमणोत्सवः ।
सहस्रवाह्यामारुह्य शिबीं चन्द्रप्रभाभिधाम् ॥ ६६ ॥
ज्ञातखण्डवने गत्वा सर्वसावद्यवर्ज्जनात् ।
प्रव्रज्यामग्रहीदह्नश्चतुर्थप्रहरे प्रभुः ॥ ६७ ॥
जगज्जनीनतान् भावान् प्रकाशयदथ प्रभोः ।
ज्ञानं तुरीयं संजज्ञे मनःपर्ययसंज्ञकम् ॥ ६८ ॥

ततश्च गत्वा सन्ध्यायां कर्मारग्रामसन्निधौ ।
गिरीन्द्र इव निष्कम्पः कायोत्सर्गं व्यधाद्विभुः ॥ ६९ ॥
गोपालेनाथ यामिन्यां निष्कारणकृतक्रुधा ।
उपद्रोतुं समारेभे भगवानात्मवैरिणा ॥ ७० ॥
अथेन्द्रेणावधिज्ञानाज्ज्ञात्वे प्रभुमुपद्रवन् ।
स दुःशीलो महाशैलमाखुर्येष निरुध्यिव ॥ ७१ ॥
कल्याणीभक्तिरागाच्च शक्रः प्रभुपदान्तिकम् ।
नष्टो मत्कुणनाशं च स गोपहतकः क्वचित् ॥ ७२ ॥
ततः प्रदक्षिणीकृत्य त्रिर्मूर्ध्ना प्रणिपत्य च ।
इति विज्ञापयाञ्चक्रे प्रभुः प्राचीनबर्हिषा ॥ ७३ ॥
भविष्यति द्वादशाब्दान्युपसर्गपरम्परा ।
तां निषेधितुमिच्छामि भगवन् पारिपार्श्विकः ॥ ७४ ॥
समाधिं पारयित्वेन्द्रं भगवानूचिवानिति ।
नापेक्षाञ्चक्रिरेऽर्हन्तः परसाहायिकं क्वचित् ॥ ७५ ॥
ततो जगद्गुरुः शीतलेश्यः शीतमयूखवत् ।
तपस्तेजोदुरालोकोऽधिपतिस्तेजसामिव ॥ ७६ ॥
शौण्डीर्यवान् गज इव सुमेरुरिव निश्चलः ।
सर्व्वंसहान् सहिष्णुश्च यथैव हि वसुन्धरा ॥ ७७ ॥
पयोधिरिव गम्भीरो मृगेन्द्र इव निर्भयः ।
मिथ्यादृशां दुरालोकः सुहुतो हव्यवाडिव ॥ ७८ ॥
खड्गिशृङ्गमिवैकाकी जातस्थामा महोक्षवत् ।
गुप्तेन्द्रियः कूर्म्म इवाहिरिवैकान्तदत्तदृक् ॥ ७९ ॥

निरञ्जनः शङ्ख इव जातरूपः सुवर्णवत्।
विप्रमुक्तः खग इव जीव इवास्खलद्गतिः॥ ८०॥
व्योमेवानाश्रयो भारुण्डपक्षीवाप्रमद्वरः।
अम्भोजिनीदलमिवोपलेपपरिवर्जितः॥ ८१॥
शत्रौ मित्रे तृणे स्त्रैणे स्वर्णेऽश्मनि मणौ मृदि।
इहामुत्र सुखे दुःखे भवे मोक्षे समाशयः॥ ८२॥
निष्कारणैककारुण्यपरायणमनास्तया।
मज्जद्भवोदधौ मुग्धमुद्दिधीर्षुरिदं जगत्॥ ८३॥
प्रभुः प्रभञ्जन इवाप्रतिबद्धोऽखिलामखिलाम्।
नानाग्रामपुरारण्यां विजहार वसुन्धराम्॥ ८४॥
देशं दक्षिणवाचालमवाप्य प्रभुरन्यदा।
श्वेतम्बीं नगरीं गच्छन्नित्यूचे गोपदारकैः॥ ८५॥
देवार्यायमृजुः पन्थाः श्वेतम्बीमुपतिष्ठते।
किन्त्वन्तरेऽस्य कनकखलाख्यस्तापसाश्रमः॥ ८६॥
स हि दृग्विषसर्पेणाधिष्ठितो वर्त्ततेऽधुना।
वायुमात्रैकसञ्चारोऽप्रचारः पक्षिणामपि॥ ८७॥
विहाय तदमुं मार्गं वक्रेणाप्यमुना व्रज।
सुवर्णेनापि किं तेन कर्णच्छेदो भवेद्यतः॥ ८८॥
तं चाहिं प्रभुरज्ञासीद्यदसौ पूर्वजन्मनि।
क्षपकः पारणार्थं विहर्त्तुं वसतेरगात्॥ ८९॥
गच्छता तेन मण्डूकी पादपाताद्विराधिता।
आलोचनार्थमेतस्य दर्शिता क्षुल्लकेन सा॥ ९०॥

सोऽथ प्रत्युतमण्डूकीदंर्शयन् लोकमारिता: ।
अये क्षुल्लं मया क्षुद्र किमेता अपि मारिता: ॥ ८१ ॥
तूष्णीकोऽभूत्तत: क्षुल्लोऽमंस्त चैवं विशुद्धधी: ।
महानुभावो यदसौ सायमालोचयिष्यति ॥ ८२ ॥
आवश्यकेऽप्यनालोच्य यावदेष निषेदिवान् ।
क्षुल्लकोऽचिन्तयत्तावद्विस्मृताऽस्य विराधना ॥ ८३ ॥
अस्मारयच्च तां भेकीमालोचयसि किं नहि ।
क्षपकोऽपि क्रुधोत्थाय क्षुल्लं हन्मीति धावित: ॥ ८४ ॥
कोपान्धश्च तत: स्तम्भे प्रतिफल्य व्यपद्यत ।
विराधितश्रामण्योऽसौ ज्योतिष्केषूदपद्यत ॥ ८५ ॥
स च्युत्वा कनकखले सहस्रार्द्धतपस्विनाम् ।
पत्यु: कुलपते: पत्न्या: पुत्रोऽभूत्कौशिकाह्वय: ॥ ८६ ॥
तत्र कौशिकगोत्रत्वादासन्नन्येऽपि कौशिका: ।
अत्यन्तकोपनत्वाच्च स ख्यातश्चण्डकौशिक: ॥ ८७ ॥
आयद्दैवातिथित्वं च तस्मिन् कुलपतौ गते ।
असौ कुलपतिस्तत्र तापसानामजायत ॥ ८८ ॥
मूर्च्छया वनखण्डस्य सोऽन्तर्भ्राम्यन्नहर्निशम् ।
अदात्तस्यापि नादातुं पुष्पं मूलं फलं दलम् ॥ ८९ ॥
विशीर्णमपि योऽग्रहीद्वने तत्र फलादिकम् ।
उत्पाद्य परशुं यष्टिं लोष्टं वा तं जघान स: ॥ १०० ॥
फलाद्यलभमानास्तु सीदन्तस्ते तपस्विन: ।
पतिते लगुडे काका इव जग्मुर्दिशोदिशम् ॥ १ ॥

अन्येद्युः कण्टिकाहेतोः कौशिके बहिरीयुषि ।
अभाङ्क्षुर्भङ्क्षु राजन्याः श्वेतव्या एत्य तद्वनम् ॥ २ ॥
अथ व्यावर्त्तमानस्य गोपास्तस्य न्यवीविदन् ।
पश्य पश्य वनं कैश्चिद्भज्यते भज्यते तव ॥ ३ ॥
आज्वल्यमानः क्रोधेन हविषेव हुताशनः ।
अकुण्ठधारमुद्यम्य कुठारं सोऽभ्यधावत ॥ ४ ॥
राजपुत्रास्ततो नेशुः श्येनादिव शकुन्तयः ।
स्खलित्वा च पपातायं यमवक्त्र इवावटे ॥ ५ ॥
पततः पतितस्तस्य सम्मुखः परशुः शितः ।
शिरो द्विधाकृतं तेन ह्वो विपाकः कुकर्म्मणाम् ॥ ६ ॥
स विपद्य वनेऽत्रैव चण्डोऽहिर्दृग्विषोऽभवत् ।
क्रोधस्तीव्रानुबन्धो हि सह याति भवान्तरे ॥ ७ ॥
अवश्यं बोध्य एषोऽहमिति बुद्ध्वा जगद्गुरुः ।
आत्मपीडामगणयन्नृजुनैव पथा ययौ ॥ ८ ॥
अभवत्पदसञ्चारसुखमीभूतवालुकम् ।
उदपानावहत्कुल्यं शुष्कजर्जरपादपम् ॥ ९ ॥
जीर्णपर्णचयास्तीर्णं कीर्णं वल्मीकपर्व्वतैः ।
स्थलीभूतोटजं जीर्णारण्यं व्यविशत प्रभुः ॥ १० ॥
तत्र चाथ जगन्नाथो यक्षमण्डपिकान्तरे ।
तस्थौ प्रतिमया नासाप्रान्तविश्रान्तलोचनः ॥ ११ ॥
ततो दृष्टिविषः सर्प्पः सदर्प्पो भ्रमितुं बहिः ।
बिलान्निरसरज्जिह्वा कालरात्रिमुखादिव ॥ १२ ॥

भ्रमन् सोऽनुवनं रेणुसंक्रामभ्रोगलेखया ।
स्वाज्ञालेखामिव लिखन्नौच्चाद्धक्षे जगद्गुरुम् ॥ १३ ॥
अत मां किमविज्ञाय किमवज्ञाय कोऽप्यसौ ।
अन्तः प्रविष्टो निराशङ्कं निष्कम्पः शङ्कुवत् स्थितः ॥ १४ ॥
तदेनं भस्मसाद्य करोमीति विचिन्तयन् ।
आध्मायमानं कोपेन फटाटोपं चकार सः ॥ १५ ॥
ज्वालामालामुद्वमन्त्या निर्दहन्त्या लताद्रुमान् ।
भगवन्तं दृशापश्यत्स्फारफूत्कारदारुणः ॥ १६ ॥
दृष्टिज्वालास्ततस्तस्य ज्वलन्त्यो भगवत्तनौ ।
विनिपेतुर्दुरालोका उल्का इव दिवो गिरौ ॥ १७ ॥
प्रभोर्महाप्रभावस्य प्रभवन्ति स्म नैव ताः ।
महानपि मरुन्मेरुं किं कम्पयितुमीश्वरः ॥ १८ ॥
दारुदार्ढ्यं न दग्धोऽसावद्यापीति क्रुधा ज्वलन् ।
दर्शं दर्शं दिनकरं दृग्ज्वालाः सोऽमुचत्पुनः ॥ १९ ॥
सम्पन्नासु प्रभौ वारिधाराप्रायासु तास्वपि ।
ददंश दन्दशूकोऽसौ निःशूकः पादपङ्कजे ॥ २० ॥
दष्ट्वा दष्ट्वापचक्राम स्वविषोद्रेकदुर्मदः ।
मत्पतन्मद्विषाक्रान्तो म्लानीयादेष मामपि ॥ २१ ॥
दशतोऽप्यसकृत्तस्य न विषं प्राभवत्प्रभौ ।
गोक्षीरधाराधवलं केवलं रक्तमक्षरत् ॥ २२ ॥
ततश्च पुरतः स्थित्वा किमेतदिति चिन्तयन् ।
वीक्षाञ्चक्रे जगन्नाथं वीक्षापन्नः स पन्नगः ॥ २३ ॥

ततो निरूप्य रूपं तदनुरूपं जगद्गुरोः ।
कान्तिसौम्यतया मङ्क्षु विध्याति तद्विलोचने ॥
उपसन्नं च तं ज्ञात्वा बभाषे भगवानिति ॥ २ ॥
चण्डकौशिक बुध्यस्व बुध्यस्व न[illegible]तिलम् ।
श्रुत्वा तद्भगवद्वाक्यमूहापोहनतविग्रहः ॥ ३ ॥
पन्नगस्य समुत्पेदे स्मर[illegible]निर्निमेषविलोचनः ।
स त्रिः प्रदक्षिणीकृत्य महाप्रतिमया प्रभुः ॥ ४ ॥
निष्कषायः सुमन[illegible]यां सभायां परिवारितः ।
कृतानशनकर्मा[illegible] सामानिकदिवौकसाम् ॥ ५ ॥
प्रशमापन्नस्त्रायस्त्रिंशैः पर्षद्भिस्तिसृभिस्तथा ।
कृत्वाप्यन्यत्र मौज्ञ संख्यातीतैः प्रकीर्णकैः ॥ ६ ॥
इति तुष्टं स्थित्वा सहस्रैरङ्गरक्षकैः ।
तस्थौ तथैव रैः ककुप्सु चतसृष्वपि ॥ ७ ॥
परेषामुपव[illegible]भिः सेनापरिवीतैश्च सप्तभिः ।
भगवन्तं [illegible]ाभियोग्यैः किल्बिषिकादिभिः ॥ ८ ॥
गोपाल[illegible]दभिः कालं विनोदैरतिवाहयन् ।
[illegible]चार्द्धमखलोकार्धं शक्रः सिंहासने स्थितः ॥ ९ ॥
[illegible]धिज्ञानतो ज्ञात्वा भगवन्तं तथास्थितम् ।
उत्थाय पादुके त्यक्त्वोत्तरासङ्गं विधाय च ॥ १० ॥
आस्थसव्यं भुवि न्यस्य सव्यं च न्यस्य किञ्चन ।
मस्तकविनासन्दिष्ट भूतलन्यस्तमस्तकः ॥ ११ ॥

समुत्थाय च सर्व्वाङ्गोद्दच्छद्रोमाञ्चकञ्चुकः ।
शचीपतिरवाचेदमुद्दिश्य सकलां सभाम् ॥ १२ ॥
भो भोः सर्वेऽपि सौधर्म्मवासिनस्त्रिदशोत्तमाः ।
शृणुत श्रीमहावीरस्वामिनो महिमाद्भुतम् ॥ १३ ॥
दधानः पञ्चसमितीर्गुप्तित्रयपवित्रितः ।
क्रोधमानमायालोभानभिभूतो निरास्रवः ॥ १४ ॥
द्रव्ये क्षेत्रे च काले च भावे चाप्रतिबद्धधीः ।
कृतैकपुद्गलन्यस्तनयनो ध्यानमास्थितः ॥ १५ ॥
अमरैरसुरैर्यक्षै रक्षोभिरुरगैर्नरैः ।
त्रैलोक्येनापि शक्येत ध्यानाच्चालयितुं नहि ॥ १६ ॥
इत्याकर्ण्य वचः शाक्रं शक्रसामानिकः सुरः ।
ललाटपट्टघटितभ्रुकुटीभङ्गभीषणः ॥ १७ ॥
कम्पमानाधरः कोपाच्छोणितायितलोचनः ।
अभव्यो गाढमिथ्यात्वसङ्गः सङ्गमकोऽवदत् ॥ १८ ॥
मर्त्यः श्रमणमात्रोऽयं यदेवं देव वर्ण्यते ।
स्वच्छन्दं सदसद्वादे प्रभुत्वं तत्र कारणम् ॥ १९ ॥
देवैरपि न चाल्योऽयं ध्यानादित्युद्भटं प्रभोः ।
कथं धार्य्येत हृदये श्रुते वा श्रोष्यते कथम् ॥ २० ॥
व्याप्ताम्बरैः शिखरैर्मूलैश्च रसातलैः ।
यैः किलोदस्यते दोष्णा सुमेरुर्लोष्टुलीलया ॥ २१ ॥
सकुलाचलमेदिन्याः प्लावनव्यक्तवैभवः ।
येषामेकोऽपि गण्डूषसुकरो मकराकरः ॥ २२ ॥

अप्येकभुजदण्डेन प्रचण्डाण्डबलीलया ।
उद्धरन्ति सद्वानेकभूधरां ये वसुन्धराम् ॥ २३ ॥
तेषामसमशक्तीनां सुराणाममितौजसाम् ।
इच्छासम्पन्नसिद्धीनां मर्त्यमात्रः कियानयम् ॥ २४ ॥
एषोऽहं चालयिष्यामि तं ध्यानादित्युदीर्य्य सः ।
करेण भूमिमाहत्योदस्थादास्थानमण्डपात् ॥ २५ ॥
अर्हन्तः परसाहाय्यात्तपः कुर्वन्त्यखण्डितम् ।
माभासीदिति दुर्बुद्धिः शक्रेण स उपेक्षितः ॥ २६ ॥
ततो वेगानिलोत्पातपतापतघनाघनः ।
रौद्राकृतिर्दुरालोको भयापसरदप्सराः ॥ २७ ॥
विकटोरःस्थलाघातपुञ्जितग्रहमण्डलः ।
स पापस्तत्र गतवान् यत्रासीत्परमेश्वरः ॥ २८ ॥
निष्कारणजगद्बन्धुं निराबाधं तथास्थितम् ।
अवीरं पश्यतस्तस्य मत्सरो वव्रधेऽधिकम् ॥ २९ ॥
गीर्व्वाणपांसनः पांशुवृष्टिं दुष्टोऽतनिष्ट सः ।
अकाण्डघटितारिष्टासुपरिष्टाज्जगत्प्रभोः ॥ ३० ॥
विधुर्विधुन्तुदेनेव दुर्दिनेनेव भास्करः ।
पिदधे पांशुपूरेण सर्व्वाङ्गीणं जगत्प्रभुः ॥ ३१ ॥
समन्ततोऽपि पूर्णानि तथा स्रोतांसि पांशुभिः ।
यथा समभवत्स्वामी निश्वासोच्छ्वासवर्ज्जितः ॥ ३२ ॥
तिलमात्रमपि ध्यानान्न चचाल जगद्गुरुः ।
कुलाचलश्चलति किं गजैः परिणतैरपि ॥ ३३ ॥

अपनीय ततः पांशुं वज्रतुण्डाः पिपीलिकाः ।
स समुत्पादयामास प्रभोः सर्व्वाङ्गपीलिकाः ॥ ३४ ॥
प्राविशन्नेकतोऽङ्गेषु स्वैरं निर्ययुरन्यतः ।
विध्यन्तस्तीक्ष्णतुण्डाग्रैः सूच्यो निवसनेष्विव ॥ ३५ ॥
निर्भाग्यस्येव वाञ्छासु मोघीभूतासु तास्वपि ।
स दंशान् रचयामास नाकृत्यास्तो दुरात्मनाम् ॥ ३६ ॥
तेषामेकप्रहारेण रक्तैर्गोक्षीरसोदरैः ।
चरन्निरभवन्नाथः सनिर्झर इवाद्रिराट् ॥ ३७ ॥
तैरप्यक्षोभ्यमाणेऽथ जगन्नाथे स दुर्मतिः ।
चक्रे प्रचण्डतुण्डाग्रा दुर्निवारा घृतेलिकाः ॥ ३८ ॥
शरीरे परमेशस्य निमग्नमुखमण्डलाः ।
ततस्ताः समलक्ष्यन्त रोमाणीव सहोत्थिताः ॥ ३९ ॥
ततोऽप्यविचलच्चित्ते योगचित्ते जगद्गुरौ ।
स महावृश्चिकांश्चक्रे ध्यानप्रश्ननिश्चयी ॥ ४० ॥
प्रलयाग्निस्फुलिङ्गाभास्तप्ततोमरदारुणैः ।
तेऽभिन्दन् भगवद्देहं लाङ्गूलाङ्कुरकण्टकैः ॥ ४१ ॥
तैरप्यनाकुले नाथे कूटसङ्कल्पसङ्कुलः ।
सोऽनल्पान् कल्पयामास नकुलान् दशनाकुलान् ॥ ४२ ॥
खिखीति रसमानास्ते दंष्ट्राभिर्भगवत्तनुम् ।
खण्डखण्डैस्त्रोटयन्तो मांसखण्डान्यपातयन् ॥ ४३ ॥
तैरप्यक्षतलक्ष्योऽसौ यमदोर्दण्डदारुणान् ।
उत्फुल्लटफटाटोपान् कोपात्प्रायुङ्क्त पन्नगान् ॥ ४४ ॥

आशिरः पादमापीड्य महाघोरं महोरगाः ।
अवेष्टयन्नथाङ्गञ्च कपिकच्छुलता इव ॥ ४५ ॥
प्रजग्मुस्ते तथा तत्र स्फुटन्ति स्म फटा यथा ।
तथा दशन्ति स्म यथाऽभज्यन्त दशना अपि ॥ ४६ ॥
उद्भ्रान्तगरलेष्वेषु लम्बमानेषु रज्जुवत् ।
स वज्रदशनानाशु मूषकानुदपीपदत् ॥ ४७ ॥
स्वाम्युक्तं खनकाश्चक्रुर्नखैर्दन्तैर्मुखैः खरैः ।
मोमूत्रमासास्तत्रैव क्षते क्षारं निचिक्षिपुः ॥ ४८ ॥
तेष्वप्यकिञ्चित्कृतेषु मूर्तीभूत इव क्रुधा ।
उदग्रदन्तमुसलं हस्तिरूपं ससर्ज सः ॥ ४९ ॥
सोऽधावत्पादपातेन मेदिनीं नमयन्निव ।
उद्धून्युदस्तहस्तेन नभस्तत्स्फोटयन्निव ॥ ५० ॥
कराग्रेण गृहीत्वा च दुर्वारेण स वारणः ।
दूरमुल्लालयामास भगवन्तं नभस्तले ॥ ५१ ॥
विशीर्यं कणशो गच्छत्वसाविति दुराशयः ।
दन्ताग्रमस्य स व्योम्नः पतन्तं स्म प्रतीच्छति ॥ ५२ ॥
पतितं दन्तघातेन विध्यति स्म मुहुर्मुहुः ।
वक्षसो वज्रकठिनात् समुत्तस्थुः स्फुलिङ्गकाः ॥ ५३ ॥
न शशाक वराकोऽसौ कर्त्तुं किञ्चिदपि द्विपः ।
यावत्तावत्पुरश्चक्रे कारिणीं वैरिणीमिव ॥ ५४ ॥
प्रस्फुरच्चण्डदन्ताभ्यां भगवन्तं बिभेद सा ।
स्वैरं शरीरनीरेण पिपेषेव सिषेच च ॥ ५५ ॥

करेणौ रेणुसाद्भूते तस्याः सारे सुराधमः ।
पिशाचरूपमकरोन्मकरोत्कटदंष्ट्रकम् ॥ ५६ ॥
ज्वालाजालाकुलं चास्यं व्यायतं वज्रकोटरम् ।
अभवद्भीषणं तस्य वह्निकुण्डमिव ज्वलत् ॥ ५७ ॥
यमौकस्तोरणस्तम्भाविव प्रोत्तम्भितौ भुजौ ।
अभूच्च तस्य जङ्घेव तुङ्गं तालद्रुमोपमम् ॥ ५८ ॥
स साट्टहासः फेत्कुर्वन् स्फूर्ज्जत्किलकिलारवः ।
कृत्तिवासाः कर्तृकाभृद्भगवन्तमुपाद्रवत् ॥ ५९ ॥
तस्मिन्नपि हि विध्याते क्षीणतैलप्रदीपवत् ।
व्याघ्ररूपं क्षुधाघ्रातः शीघ्रं चक्रे स निर्घृणः ॥ ६० ॥
अथ पुच्छच्छटाच्छोटैः पाटयन्निव मेदिनीम् ।
फूत्कारप्रतिशब्दैश्च रोदसीं रोदयन्निव ॥ ६१ ॥
दंष्ट्राभिर्वज्रसाराभिर्नखरैः शूलसोदरैः ।
अव्यग्रं व्यापिपर्त्ति स्म व्याघ्रो भुवनभर्त्तरि ॥ ६२ ॥
तत्र विच्छायतां प्राप्ते दवदग्ध इव द्रुमे ।
सिद्धार्थराजत्रिशलादेव्यो रूपं व्यधत्त सः ॥ ६३ ॥
किमेतद्भवता तात प्रक्रान्तमतिदुष्करम् ।
प्रव्रज्यां मुञ्च माऽस्माकं प्रार्थनामवजीगणः ॥ ६४ ॥
वृद्धावशरणावावां त्यक्तवान्नन्दिवर्द्धनः ।
त्रायस्वेति स्वरैर्दीनैर्व्यलपतां च तौ ॥ ६५ ॥ (युग्मं)
ततस्तयोर्विलापैरप्यलिप्तमनसि प्रभौ ।
आवासितं दुराचारः स्कन्धावारमकल्पयत् ॥ ६६ ॥

तत्रानासाद्य दृषदं सूदः सादरमोदने ।
चुल्लीपदे प्रभोः पादौ कृत्वा स्थालीमकल्पयत् ॥ ६७ ॥
तत्कालं ज्वालितस्तेन जज्वाल ज्वलनोऽधिकम् ।
पादमूले जगद्भर्तुर्गिरेरिव दवानलः ॥ ६८ ॥
तप्तस्यापि प्रभोः स्वर्णस्येव न श्रीरहीयत ।
ततः सुराधमश्चक्रे पक्कणं दारुणाशयम् ॥ ६९ ॥
पक्कणोऽपि प्रभोः कण्ठे कर्णयोर्भुजदण्डयोः ।
जङ्घयोश्च क्षुद्रपक्षिपञ्जराणि व्यलम्बयत् ॥ ७० ॥
खगैश्चञ्चुनखाघातैस्तथा दद्रे प्रभोस्तनुः ।
यथा छिद्रशताकीर्णा तत्पञ्जरनिभाभवत् ॥ ७१ ॥
तत्राप्यसारतां प्राप्ते पक्कणे पक्कपनवत् ।
उत्पादितमहोत्पातं खरवातमजीजनत् ॥ ७२ ॥
अन्तरिक्षे महावृक्षांस्तृणोत्क्षेपं समुत्क्षिपन् ।
विक्षिपन् पांशुविक्षेपं दिक्षु च ग्रावकर्करान् ॥ ७३ ॥
सर्व्वतो रोदसीगर्भं भस्त्रापूरं च पूरयन् ।
उत्पाद्योत्पाद्य वातोऽसौ भगवन्तमपातयत् ॥ ७४ ॥ (युग्मं)
तेनापि खरवातेनापूर्णकामो विनिर्ममे ।
द्युसत्कुलकलङ्कोऽसौ द्राकुलं कलिकानिलम् ॥ ७५ ॥
भूभृतोऽपि भ्रमयितुमलङ्कर्म्मीणविक्रमः ।
भ्रमयामास चक्रस्थमृत्पिण्डमिव स प्रभुम् ॥ ७६ ॥
भ्रम्यमाणोऽर्णवावर्त्तेनेव तेन नभस्वता ।
तदेकतानो न ध्यानं मनागपि जहौ प्रभुः ॥ ७७ ॥

वज्रसारमनल्पोऽयं बहुधाऽपि कदर्थितः ।
न चोभ्यते कथमहं भज्यागूर्यामि तां सभाम् ॥ ७८ ॥
तदस्य प्राणनाशेन ध्यानं नक्ष्यति नान्यथा ।
चिन्तयित्वेति चक्रे स कालचक्रं सुराधमः ॥ ७९ ॥
चक्राय तदयोभारसहस्रघटितं ततः ।
उद्दधार सुरः शैलं कैलासमिव रावणः ॥ ८० ॥
पृथिवीं सम्पुटीकर्त्तुं कृतं मन्ये पुटान्तरम् ।
उत्पाद्य कालचक्रं स प्रचिक्षेपोपरि प्रभोः ॥ ८१ ॥
ज्वालाजालैरच्छलद्भिर्दिशः सर्व्वाः करालयन् ।
उत्पपात जगद्गर्त्तयौर्व्वानल इवार्णवे ॥ ८२ ॥
कुलक्षितिधरक्षोदक्षमस्यास्य प्रभावतः ।
ममज्जाजानुभगवानन्तर्वसुमतीतलम् ॥ ८३ ॥
एवम्भूतोऽपि भगवानशोचदिदमस्य यत् ।
मितारयिषवो विश्वं वयं संसारकारणम् ॥ ८४ ॥
कालचक्रहतोऽप्येष प्रपेदे पञ्चतां न यत् ।
चगोचरस्तदस्याथासुपायः क इहापरः ॥ ८५ ॥
अनुकूलैरुपसर्गैः क्षुभ्येद्यदि कथञ्चन ।
इति बुद्धा विमानस्थः स पुरोऽभ्यादुवाच च ॥ ८६ ॥
महर्षे तव तुष्टोऽस्मि सत्त्वेन तपसौजसा ।
प्राणानपेक्षभावेनारब्धनिर्वहणेन च ॥ ८७ ॥
पर्याप्तं तपसानेन शरीरक्लेशकारिणा ।
ब्रूहि याचस्व आकार्षीः सह्यं यच्छामि किं तव ॥ ८८ ॥

इच्छामात्रेण पूर्य्यन्ते यत्र नित्यं मनोरथाः।
किमनेनैव देहेन त्वां स्वर्गं प्रापयामि तम् ॥ ८९ ॥
अनादिभवसंरूढकर्म्मनिर्मोचलक्षणम्।
एकान्तपरमानन्दं मोक्षं वा त्वां नयामि किम् ॥ ९० ॥
अशेषमण्डलाधीशमौलिलालितशासनम्।
अथवाशेव यच्छामि साम्राज्यं प्राज्यऋद्धिभिः ॥ ९१ ॥
इत्थं प्रलोभनावाक्यैरक्षोभ्यमनसि प्रभौ।
अप्राप्तप्रतिवाक्याप: पुनरेवमचिन्तयत् ॥ ९२ ॥
मोघीकृतमनेनैतन्मम शक्तिविजृम्भितम्।
तदिदानीममोघं स्याद्यद्येकं कामशासनम् ॥ ९३ ॥
यत: कामास्त्रभूताभि: कामिनीभि: कटाक्षिता:।
दृष्टा महापुमांसोऽपि लुम्पन्त: पुरुषव्रतम् ॥ ९४ ॥
इति निश्चित्य चित्तेन निर्दिदेश सुराङ्गनाः।
तद्विभ्रमसहायान् षट् प्रायुङ्क्त स ऋतूनपि ॥ ९५ ॥
कृतप्रस्तावना मत्तकोकिलाकलकूजितैः।
कन्दर्पनाटकनटी वसन्तश्रीरशोभत ॥ ९६ ॥
सुखवासं सृजयन्ती विकसत्कोपरेणुभिः।
सैरन्ध्रीव दिग्वधूनां श्रीमलश्रीरजृम्भत ॥ ९७ ॥
राज्याभिषेके कामस्य मङ्गल्यतिलकानिव।
सर्वाङ्गं बेलकन्याजाल्कुर्व्वती प्राहडावभौ ॥ ९८ ॥
सहस्रनयनीभूय नवनीलोत्पलच्छलात्।
स्वसम्पदभिमोहामां पश्यन्ती शुशुभे [illegible] ॥ ९९ ॥

जयप्रशस्तिं कामस्य श्वेताम्बरसहोदरैः ।
हेमन्तश्रीर्लिलेखेव प्रत्यग्रैः कुन्दकुड्मलैः ॥ १०० ॥
गन्धिकेवोपजीवन्ती हेमन्तसुरभीसमम् ।
कुन्दैश्च सिन्दुवारैश्च शिशिरश्रीरचीयत ॥ १ ॥
एवमुज्जृम्भमाणेषु सर्व्वर्त्तुषु समन्ततः ।
मीनध्वजपताकिन्यः प्रादुरासन् सुराङ्गनाः ॥ २ ॥
सङ्गीतमिव गीताद्याः पुरो भगवतस्ततः ।
ताः प्रचक्रमिरे जैत्रं मन्त्रास्त्रमिव मान्मथम् ॥ ३ ॥
[1]तत्राधिसूत्रितलयं गान्धारग्राम[2]बन्धुरम् ।
काश्चिदुदगीयन्त जातयः शुद्धवेसराः ॥ ४ ॥
क्रमव्युत्क्रमगैस्तानैर्व्यञ्जैर्व्यञ्जनधातुभिः ।
प्रवीणावादयद्वीणां काचित्तकलनिष्कलाम् ॥ ५ ॥
स्फुटत्तकारधोङ्कारप्रकारैर्मेघनिस्वनाम् ।
काश्चिच्च वादयामासुर्मृदङ्गांस्त्रिविधानपि ॥ ६ ॥
नभोभूगतचारीकं विचित्रकरणोद्भटम् ।
दृष्टिभावैर्नवनवैः काश्चिदप्यनरीनृतुः ॥ ७ ॥
द्रढाङ्गहाराभिनयैः सद्यस्त्रुटितकञ्चुका ।
बध्नती श्लथधम्मिल्लं दोर्मूलं काप्यदीदृशत् ॥ ८ ॥
दण्डपादाभिनयनच्छलात्कापि मुहुर्मुहुः ।
चारुणोरोचनागौरमूरुमूलमदर्शयत् ॥ ९ ॥

---

(१) ख तत्रातिसूत्रितवयम् । (२) च बन्धुरम् ।

अथच्छातकामन्विहृष्टीकरणलीलया ।
कापि प्राकाम्यशक्त्यासीत्सकामिं नाभिमण्डलम् ॥ १० ॥
व्यपदिश्यैभदन्ताख्यहस्तकाभिनयं मुहुः ।
गाढमङ्गपरिष्वङ्गसंज्ञा काचिच्च निर्ममे ॥ ११ ॥
सञ्चारयन्त्यन्तरीयं नीवीनिविडनच्छलात् ।
नितम्बबिम्बफलकं काचिदाविरभावयत् ॥ १२ ॥
अङ्गभङ्गापदेशेन वक्षःपीनोन्नतस्तनम् ।
सुचिरं रोचयामास काचिद्रुचिरलोचना ॥ १३ ॥
यदि त्वं वीतरागोऽसि रागं तनस्तनोषि किम् ।
शरीरनिरपेक्षश्चेद्दत्से वक्षोऽपि किं न नः ॥ १४ ॥
दयालुर्यदि वासि त्वं तदानीं विषमायुधात् ।
अकाण्डाकृष्टकोदण्डादस्मान् त्रायसे कथम् ॥ १५ ॥
उपेक्षसे कौतुकेन यदि नः प्रेमलालसाः ।
किञ्चिन्मात्रं हि तद्युक्तं मरणान्तं न युज्यते ॥ १६ ॥
स्वामिन् कठिनतां मुञ्च पूरयास्मन्मनोरथान् ।
प्रार्थनाविमुखो माभूः काश्चिदित्यूचिरे चिरम् ॥ १७ ॥
एवं गीतातोद्यनृत्यैर्विकारैराङ्गिकैरपि ।
चाटुभिश्च सुरस्त्रीणां न चुक्षोभ जगत्प्रभुः ॥ १८ ॥
एवं रात्रौ व्यतीतायां ततो विहरतः प्रभोः ।
निराहारस्य षण्मासान् सुराधम उपाद्रवत् ॥ १९ ॥

भट्टारक सुखं तिष्ठ स्वैरं भ्रम गतोऽस्म्यहम् ।
षण्मासान्ते ब्रुवन्नेवं खिन्नः सङ्गमकोऽगमत् ॥ २० ॥

कर्म्मण्येवंविधेनायं क्व वराको व्रजिष्यति ।
न शक्यते तारयितुमस्माभिरपि तारकैः ॥ २१ ॥

एवं भगवतश्चिन्तां तन्वतस्तत्र गच्छति ।
दृष्टावभूतां कृपयोर्बाष्पे मन्थरतारके ॥ १२२ ॥ ३ ॥

एवं देवतां नमस्कृत्य मुक्तिमार्गं योगमभिधित्सुस्तच्छास्त्रं प्रस्तौति ।

श्रुताम्भोधेरधिगम्य सम्प्रदायाच्च सद्गुरोः ।
स्वसम्वेदनतश्चापि योगशास्त्रं विरच्यते ॥ ४ ॥

इह नानिर्णीतस्य योगस्य पदवाक्यप्रबन्धेन शास्त्रविरचना कर्त्तुमुचितेति । योगस्य त्रिहेतुको निर्णयः ख्याप्यते । शास्त्रतो गुरुपारम्पर्य्यात् स्वानुभवाच्च तं त्रिविधमपि क्रमेणाह । श्रुताम्भोधेः सकाशादधिगम्य निर्णीय योगमिति शेषः । तथा गुरुपारम्पर्य्यात् तथा स्वसम्वेदनादेवं त्रिधा योगं निश्चित्य तच्छास्त्रं विरच्यते । एतदेव निर्व्वहणे वक्ष्यति ।

या शास्त्रात्सुगुरोर्मुखादनुभवाच्चाज्ञायि किञ्चित् क्वचित्
योगस्योपनिषद्विवेकिपरिषच्चेतश्चमत्कारिणी ।
श्रीचौलुक्यकुमारपालनृपतेरत्यर्थमभ्यर्थना-
दाचार्य्येण निवेशिता पथि गिरां श्रीहेमचन्द्रेण सा ॥ १ ॥ ४ ॥

योगस्यैव माहात्म्यमाह—

योगः सर्व्वविपद्वल्लीविताने परशुः शितः।
अमूलमन्त्रतन्त्रं च कार्म्मणं निर्वृतिश्रियः॥ ५॥

सर्व्वा विपद आध्यात्मिक-आधिभौतिक-आधिदैविकलक्षणाः ताश्चातिविततत्वाद्वल्लीरूपास्तासां वितानः समूहस्तत्र तीक्ष्णः परशुर्योग इत्यनर्थपरिहारो योगस्य फलम्। उत्तरार्द्धेनार्थप्राप्ति-मोक्षलक्ष्म्याः परमपुरुषार्थरूपाया मूलमन्त्रतन्त्रपरिहारेण कार्म्मणं संवननं योगः कार्म्मणं हि मूलमन्त्रतन्त्रैर्विधीयते। योगस्तु मूलादिरहित एव मोक्षलक्ष्मीवशीकरणहेतुरिति॥ ५॥

कारणोच्छेदमन्तरेण न विपल्लक्षणस्य कार्य्यस्योच्छेदः शक्यः क्रियत इति विपत्कारणपापनिर्घातहेतुत्वं योगस्याह—

भूयांसोऽपि हि पाप्मानः प्रलयं यान्ति योगतः।
चण्डवाताद्घनघना घनाघनघटा इव॥ ६॥

बहून्यपि पापानि योगात्प्रलयमुपयान्ति प्रचण्डवातोद्धूता अतिघना मेघघटा इव॥ ६॥

स्यादेतदेकजन्मोपार्ज्जितं पापं योगः क्षिणुयादपि अनेकभवपरम्परोपात्तपापस्य तु निर्मूलनं योगादसम्भावनीयमित्याह—

क्षिणोति योगः पापानि चिरकालार्ज्जितान्यपि।
प्रचितानि यथैधांसि क्षणादेवाशुशुक्षणिः॥ ७॥

यथा चिरकालसमेधितान्यपीन्धनानि क्षणमात्रप्रचितोऽप्यग्निः क्षणात् भस्मसात्करोति। एवं योगः क्षणमात्रेणैव चिरसञ्चितपापसंचयक्षमो भवतीति ॥ ७ ॥

योगस्य फलान्तरमाह—

कफविप्रुण्मलामर्शसर्व्वौषधिमहर्द्धयः ।
सम्भिन्नश्रोतोलब्धिश्च यौगं ताण्डवडम्बरम् ॥ ८ ॥

महर्द्धिशब्दः प्रत्येकमपि सम्बध्यते। कफ श्लेष्मा विप्रुड्वारः पुरीषमिति यावत्। मलः कर्णदन्तनासिकानयनजिह्वोद्भवः शरीरसम्भवश्च। आमर्शो हस्तादिना स्पर्शः सर्व्वे विण्मूत्रकेशनखादय एता मनुजस्य औषधयो योगप्रभावान्महर्द्धयो भवन्ति। अथवा महर्द्धयो विभिन्ना एवाणुत्वादयः। तथा श्रोतांसीन्द्रियाणि संभिन्नानि संगतानि एकैकशः सर्व्वविषयैस्तेषां लब्धिर्योगस्येदं यौगं ताण्डवडम्बरं [१]दर्शितम्।

तथाहि योगमाहात्म्याद्योगिनां कफबिन्दवः।
सनत्कुमारादेरिव जायन्ते सर्व्वरुक्छिदः ॥ १ ॥
सनत्कुमारो हि पुरा चतुर्थश्चक्रवर्त्तभूत्।
षट्खण्डपृथिवीभोक्ता नगरे हस्तिनापुरे ॥ २ ॥
कदाचिच्च सुधर्मायां सभायां जातविस्मयः।
रूपं तस्याप्रतिरूपं वर्णयामास वासवः ॥ ३ ॥

---

(१) क ग च विकसितम्।

राज्ञः सनत्कुमारस्य कुरुवंशशिरोमणेः ।
यद्रूपं न तदन्यत्र देवेषु मनुजेषु वा ॥ ४ ॥
इति प्रशंसां रूपस्याश्रद्दधानावुभौ सुरौ ।
विजयो वैजयन्तश्च पृथिव्यामवतेरतुः ॥ ५ ॥
ततस्तौ विप्ररूपेण रूपान्वेषणहेतवे ।
प्रासादद्वारि नृपतेस्तस्थतुर्द्वास्थसंनिधौ ॥ ६ ॥
आसीत् सनत्कुमारोऽपि तदा प्रारब्धमज्जनः ।
मुक्तनिःशेषनेपथ्यः सर्वाङ्गाभ्यङ्गमुद्वहन् ॥ ७ ॥
द्वारस्थौ द्वारपालेन द्विजातौ तौ निवेदितौ ।
न्यायवर्त्ती चक्रवर्त्ती तदानीमप्यवीविशत् ॥ ८ ॥
सनत्कुमारमालोक्य विस्मयस्मेरमानसौ ।
धूनयामासतुर्मौलिं चिन्तयामासतुश्च तौ ॥ ९ ॥
ललाटपट्टः पर्यस्ताष्टमीरजनिजानिकः ।
नेत्रे कर्णान्तविश्रान्ते जितनीलोत्पलत्विषौ ॥ १० ॥
दन्तच्छदौ पराभूतपक्वबिम्बीफलच्छवी ।
निरस्तशुक्तिकौ कर्णौ कण्ठोऽयं पाञ्चजन्यजित् ॥ ११ ॥
करिराजकराकारतिरस्कारकरौ भुजौ ।
स्वर्णशैलशिलालक्ष्मीविलुण्टाकमुरस्थलम् ॥ १२ ॥
मध्यभागो मृगारातिकिशोरोदरसोदरः ।
किमन्यदस्य सर्वाङ्गश्रीर्वाचां न गोचरः ॥ १३ ॥
अहो कोऽप्यस्य लावण्यसरित्पूरो निरर्गलः ।
येनाभ्यङ्गं न जानीमो ज्योत्स्नयोडुप्रभामिव ॥ १४ ॥

यथेन्द्रो वर्णयामास तथेदं भाति नान्यथा ।
मिथ्या न खलु भाषन्ते महात्मानः कदाचन ॥ १५ ॥
किं निमित्तमिहायातौ भवन्तौ द्विजसत्तमौ ।
इत्थं सनत्कुमारेण पृष्टौ तावेवमूचतुः ॥ १६ ॥
लोकोत्तरचमत्कारकारकं सचराचरे ।
भुवने भवतो रूपं नरशार्दूल गीयते ॥ १७ ॥
दूरतोऽपि तदाकर्ण्य तरङ्गितकुतूहलौ ।
विलोकयितुमायातावावामवनिवासव ॥ १८ ॥
वर्ण्यमानं यथा लोके श्रुतवेऽस्माभिरद्भुतम् ।
रूपं नृप ततोऽप्येतत्सविशेषं निरीक्ष्यते ॥ १९ ॥
अथे सनत्कुमारोऽपि स्मितविस्फुरिताधरः ।
इयं हि कियती कान्तिरङ्गेऽभ्यङ्गतरङ्गिते ॥ २० ॥
इतो भूत्वा प्रतीक्षेथां क्षणमात्रं द्विजोत्तमौ ।
यावन्निवर्त्यतेऽस्माभिरेष मज्जनकक्षणः ॥ २१ ॥
विचित्ररचिताकल्पं भूरिभूषणभूषितम् ।
रूपं पुनर्निरीक्षेथां सरत्नमिव काञ्चनम् ॥ २२ ॥
ततोऽवनिपतिः स्नात्वा कल्पिताकल्पभूषणः ।
साडम्बरः सदोऽध्यास्ताम्बररत्नमिवाम्बरम् ॥ २३ ॥
अनुज्ञातौ ततो विप्रौ पुरोभूय महीपतेः ।
निरध्यातुश्च तद्रूपं विषण्णौ दध्यतुश्च तौ ॥ २४ ॥
क्व तद्रूपं क्व सा कान्तिः क्व तल्लावण्यमप्यगात् ।
क्षणेनाप्यस्य मर्त्यानां क्षणिकं सर्वमेव हि ॥ २५ ॥

नृपः प्रोवाच तौ कस्माद्दृष्ट्वा मां मुदितौ पुरा ।
कस्मादकस्मादधुना विषादमलिनाननौ ॥ २६ ॥
ततस्तावूचतुरिदं सुधामधुरया गिरा ।
महाभाग सुरावावां सौधर्म्मस्वर्गवासिनौ ॥ २७ ॥
मध्येसुरसभं शक्रश्चक्रे त्वद्रूपवर्णनम् ।
अश्रद्दधानौ तद्द्रष्टुं मर्त्यमूर्त्त्यागताविह ॥ २८ ॥
शक्रेण वर्णितं यादृक् [1]तादृशं वपुरीक्षितम् ।
रूपं नृप तवेदानीमन्यादृशमजायत ॥ २९ ॥
अधुना व्याधिभिरयं कान्तिसर्व्वस्वतस्करैः ।
देहः समन्तादाक्रान्तो निःश्वासैरिव दर्पणः ॥ ३० ॥
यथार्थमभिधायेति द्राक्तिरोहितयोस्तयोः ।
विच्छायं स्वं नृपोऽपश्यद्धिमग्रस्तमिव द्रुमम् ॥ ३१ ॥
अचिन्तयच्च धिगिदं सदा गदपदं वपुः ।
मुधैव मुग्धाः कुर्व्वन्ति तन्मूर्छां तुच्छबुद्धयः ॥ ३२ ॥
शरीरमन्तरुत्पन्नैर्व्याधिभिर्विविधैरिदम् ।
दीर्य्यते दारुणैर्दारु दारुकीटगणैरिव ॥ ३३ ॥
बहिः कथञ्चिद्यद्येतच्छोभेत तथापि हि ।
नैयग्रोधं फलमिव मध्ये कृमिकुलाकुलम् ॥ ३४ ॥
रुजा लुम्पति कायस्य तत्कालं रूपसम्पदम् ।
महासरोवरस्येव वारिशैवालमञ्जरी ॥ ३५ ॥

---

(१) क ग तादृगेव पुरेक्षितम् ।

शरीरं क्षयते नाशा रूपं याति न पापधीः ।
जरा स्फुरति न ज्ञानं धिग् स्वरूपं शरीरिणाम् ॥ ३६ ॥
रूपं लवणिमा कान्तिः शरीरं द्रविणान्यपि ।
संसारे तरलं सर्वं कुशाग्रजलबिन्दुवत् ॥ ३७ ॥
अद्यश्वीनविनाशस्य शरीरस्य शरीरिणाम् ।
सकामनिर्ज्जरासारं तप एव महत्फलम् ॥ ३८ ॥
इति सञ्जातवैराग्यभावनः पृथिवीपतिः ।
प्रव्रज्यां स्वयमादित्सुः सुतं राज्ये न्यवीविशत् ॥ ३९ ॥
गत्वोद्याने सविनयं विनयन्धरसूरितः ।
सर्व्वसावद्यविरतिप्रधानं सोऽग्रहीत्तपः ॥ ४० ॥
महाव्रतधरस्यास्य दधानस्योत्तरान् गुणान् ।
ग्रामाद्ग्रामं विहरतः समतैकाग्रचेतसः ॥ ४१ ॥
गाढानुरागबन्धेन सर्व्वं प्रकृतिमण्डलम् ।
पृष्ठतोऽगात्करिकुलं महायूथपतेरिव ॥ ४२ ॥ (युग्मं)
निष्कषायमुदासीनं निर्म्ममं निष्परिग्रहम् ।
तं पर्य्युपास्य षण्मासान् कथञ्चित्तन्न्यवर्त्तत ॥ ४३ ॥
यथाविध्यात्तभिक्षाभिरकालापथ्यभोजनैः ।
व्याधयोऽस्य ववृधिरे सम्पूर्णैर्दोहदैरिव ॥ ४४ ॥
कच्छूशोषज्वरश्वासारुचिकुक्ष्यक्षिवेदनाः ।
सप्ताधिषेहे पुण्यात्मा सप्तवर्षशतानि सः ॥ ४५ ॥
दुःसहान् सहमानस्य तस्यामेवपरीषहान् ।
उपायनिरपेक्षस्य समपद्यन्त लब्धयः ॥ ४६ ॥

अत्रान्तरे सुरपतिः समुद्दिश्य दिवौकसः ।
इदि जातचमत्कारश्चकारेत्यस्य वर्णनम् ॥ ४७ ॥
चक्रवर्त्तिश्रियं त्यक्त्वा प्रज्वलत्तृणपूलवत् ।
अहो सनत्कुमारोऽयं तप्यते दुस्तपं तपः ॥ ४८ ॥
तपोमाहात्म्यलब्धासु सर्वास्वपि हि लब्धिषु ।
शरीरनिरपेक्षोऽयं स्वरोगान्न चिकित्सति ॥ ४९ ॥
अश्रद्दधानौ तद्वाक्यं वैद्यरूपधरौ सुरौ ।
विजयो वैजयन्तश्च तत्समीपमुपेयतुः ॥ ५० ॥
ऊचतुश्च महाभाग किं रोगैः परिताम्यसि ।
वैद्यावावां चिकित्सावो विश्वं स्वैरेव भेषजैः ॥ ५१ ॥
यदि त्वमनुजानासि रोगग्रस्तशरीरकः ।
तदङ्गाय निगृह्णीवो रोगानुपचितांस्तव ॥ ५२ ॥
ततः सनत्कुमारोऽपि प्रत्यूचे 'भोश्चिकित्सकौ ।
द्विविधा देहिनां रोगा द्रव्यतो भावतोऽपि च ॥ ५३ ॥
क्रोधमानमायालोभा भावरोगाः शरीरिणाम् ।
जन्मान्तरसहस्रानुगामिनोऽनन्तदुःखदाः ॥ ५४ ॥
तांश्चिकित्सितुमीशौ चेद्युवां तर्हि चिकित्सतम् ।
अथो चिकित्सथो द्रव्यरोगांस्तदत पश्यतम् ॥ ५५ ॥
ततोऽङ्गुलीं गलत्पामां शीर्णां स्वकफविप्रुषा ।
लिप्त्वा शुल्बं रसेनेव द्राक् सुवर्णीचकार सः ॥ ५६ ॥

---

(१) क च तौ ।

ततस्तामङ्गुलीं स्वर्णशलाकामिव भास्वतीम् ।
आलोक्य पादयोस्तस्य पेततुः प्रोचतुश्च तौ ॥ ५७ ॥
निरूरूपयिषू रूपं यौ त्वामायातपूर्व्विणौ ।
तावेव त्रिदशावावां सम्प्रत्यपि समागतौ ॥ ५८ ॥
शिवलब्धिरपि व्याधिबाधां सोढा तपस्यति ।
सनत्कुमारो भगवानितीन्द्रस्त्वामवर्णयत् ॥ ५९ ॥
आवाभ्यां तदिहागत्य प्रत्यक्षेण परीक्षितम् ।
इत्युदित्वा च नत्वा च त्रिदशौ तौ तिरोहितौ ॥ ६० ॥
एतन्निदर्शनमात्रं कफलब्धेः प्रदर्शितम् ।
लब्धान्तरकथा नोक्ता ग्रन्थगौरवभीरुभिः ॥ ६१ ॥
योगिनां योगमाहात्म्यात्पुरीषमपि कल्पते ।
रोगिणां रोगनाशाय कुमुदामोदशालि च ॥ ६२ ॥
मलः किल समाम्नातो द्विविधः सर्व्वदेहिनाम् ।
कर्णनेत्रादिजन्मैको द्वितीयस्तु वपुर्भवः ॥ ६३ ॥
योगिनां योगसम्पत्तिमाहात्म्याद्द्विविधोऽपि सः ।
कस्तूरिकापरिमलो रोगहा सर्व्वरोगिणाम् ॥ ६४ ॥
योगिनां कायसंस्पर्शः सिञ्चन्निव सुधारसैः ।
छिणोति तत्क्षणं सर्व्वानामयानामयाविनाम् ॥ ६५ ॥
नखाः केशा रदाश्चान्यदपि योगिशरीरजम् ।
भजते भेषजीभावमिति सर्व्वौषधिः स्मृता ॥ ६६ ॥
तथाहि तीर्थनाथानां योगभृच्चक्रवर्त्तिनाम् ।
देहास्थिशकलस्तोमः सर्व्वस्वर्गेषु पूज्यते ॥ ६७ ॥

किञ्च—

मेघमुक्तमपि वारि यदङ्गसङ्गमात्राद्यदीयाप्यादिगतमपि सर्वरोगहरं भवति। तथा विषमूर्च्छिता अपि यदीयाङ्गसङ्गिवात-स्पर्शादेव निर्विषा भवन्ति। विषसंपृक्तमप्यन्नं यन्मुखप्रविष्टमविषं भवति। महाविषव्याधिबाधिता अपि यद्वचःश्रवणमात्राद्यद्दर्श-नाच्च वीतविकारा भवन्ति। एष सर्वोऽपि सर्वौषधिप्रकारः। एते कफादयो महर्द्धिरूपाः। अथवा महर्द्धयो विभिन्ना एव। वैक्रियालब्धयोऽनेकधा अणुत्व-महत्त्व-लघुत्व-गुरुत्व-प्राप्ति-प्राकाम्य-ईशित्व-वशित्व-अप्रतिघातित्व-अन्तर्धान-कामरूपित्वादिभेदात्।

अणुत्वमणुशरीरविकरणम्। येन बिसच्छिद्रमपि प्रविशति तत्र च चक्रवर्त्तिभोगानपि भुङ्क्ते। महत्त्वं मेरोरपि महत्तर-शरीरकरणसामर्थ्यम्। लघुत्वं वायोरपि लघुतरशरीरता। गुरुत्वं वज्रादपि गुरुतरशरीरतया इन्द्रादिभिरपि प्रकृष्टबलैर्दुःसहता। प्राप्तिर्भूमिष्ठस्य अङ्गुल्यग्रेण मेरुपर्व्वताग्रमपि प्रभाकरादिस्पर्श-सामर्थ्यम्। प्राकाम्यमप्सु भूमाविव प्रविशतो गमनशक्तिः तथा अप्स्विव भूमावुन्मज्जननिमज्जने। ईशित्वं त्रैलोक्यस्य प्रभुता तीर्थंकरत्रिदशेश्वरऋद्धिविकरणम्। वशित्वं सर्व्वजीववशीकरण-लब्धिः। अप्रतिघातित्वं अद्रिमध्येऽपि निःसङ्गगमनम्। अन्त-र्धानमदृश्यरूपता। कामरूपित्वं युगपदेव नानाकाररूप-विकरणशक्तिः। इत्येवमादयो महर्द्धयः। अथवा प्रकृष्टश्रुतावरण-वीर्यान्तरायक्षयोपशमाविर्भूतासाधारणमहाप्रज्ञर्द्धिलाभा अनधीत-द्वादशाङ्गचतुर्द्दशपूर्वा अपि सन्तो यमर्थं चतुर्द्दशपूर्व्वी निरूपयति

तस्मिन् विचारकष्टेऽप्यर्थेऽतिनिपुणप्रज्ञाः प्राज्ञश्रमणाः। अन्येऽधीत-दशपूर्वा रोहिणीप्रज्ञप्त्यादिमहाविद्यादिभिरङ्गुष्ठप्रसेनिकादिभि-रल्पविद्यादिभिश्चोपनतानां भूयसीनामृद्धीनां वशगा विद्यावेग-धारणात् विद्याधरश्रमणाः। केचिद्बीजकोष्ठपदानुसारिबुद्धिविशेष-र्द्धियुक्ताः। सुकृष्टवसुमतीकृते क्षेत्रे सिल्पुदकाद्यनेककारणविशेषा-पेक्षं बीजमनुपहतं यथानेकबीजकोटीप्रदं भवति तथैव ज्ञानावर-णादिक्षयोपशमातिशयप्रतिलम्भादेकार्थबीजश्रवणे सति अनेकार्थ-बीजानां प्रतिपत्तारो बीजबुद्धयः। कोष्ठागारिकस्थापितानाम-सङ्कीर्णानामविनष्टानां भूयसां धान्यबीजानां यथा कोष्ठेऽवस्थानं तथा परोपदेशावधारितानां श्रौतानामर्थग्रन्थबीजानां भूयसामनु-स्मरणमन्तरेणाविनष्टानामवस्थानात्कोष्ठबुद्धयः। पदानुसारिणोऽनु-श्रोतःपदानुसारिणः प्रतिश्रोतःपदानुसारिण उभयपदानुसारि-णश्च। तत्रादिपदस्यार्थं ग्रन्थं च परत उपश्रुत्य आ अन्त्यपदादर्थग्रन्थ-विचारणासमर्थपटुतरमतयोऽनुश्रोतःपदानुसारिबुद्धयः। अन्त्यपद-स्यार्थं ग्रन्थं च परत उपश्रुत्य ततः प्रातिकूल्येनादिपदादा अर्थग्रन्थविचारपटवः प्रतिश्रोतःपदानुसारिबुद्धयः। मध्यपदस्यार्थं ग्रन्थं च परकीयोपदेशादधिगम्याद्यन्तावधिपरिच्छिन्नपदसमूह-प्रतिनियतार्थग्रन्थोदधिसमुत्तरणसमर्थासाधारणातिशयपटुविज्ञान-नियता उभयपदानुसारिबुद्धयः। बीजबुद्धिरेकपदार्थावगमादने-कार्थानामवगन्ता पदानुसारी त्वेकपदावगमात्पदान्तराणामव-गन्तेति विशेषः। तथा मनोवाक्कायबलिनः। तत्र प्रकृष्टज्ञानावरण-वीर्यान्तरायक्षयोपशमविशेषेण वस्तूत्थान्तर्मुहूर्तेन सकलश्रुतो-

दष्टवशगाद्दमावद्दातमनसो मनोबलिनः । अन्तर्मुहूर्तेन सकलश्रुत-वस्तूच्चारणसमर्था वाग्बलिनः । अथवा पदवाक्यालङ्कारोपेतां वाचमुच्चैरुच्चारयन्तो ऽविरच्छिन्नवाक्क्रमा अहीनकण्ठा वाग्बलिनः । वीर्यान्तरायक्षयोपशमाविर्भूतासाधारणकायबलत्वात्प्रतिमयावतिष्ठ-मानाः श्रमक्लमविरहिता वर्षमात्रप्रतिमाधरा बाहुबलिप्रभृतयः कायबलिनः । तथा क्षीरमधुसर्पिरमृतास्रविणो येषां पात्रपतितं कदन्नमपि क्षीरमधुसर्पिरमृतरसवीर्यविपाकं जायते वचनं वा शरीरमानसदुःखप्राप्तानां देहिनां क्षीरादिवत्सन्तर्पकं भवति ते क्षीरास्रविणो मध्वास्रविणः सर्पिरास्रविणोऽमृतास्रविणश्च । केचिदक्षीणर्द्धियुक्तास्ते च द्विविधा अक्षीणमहानसा अक्षीण-महालयाश्च । येषामसाधारणान्तरायक्षयोपशमाद्भिक्षामात्रमपि पात्रपतितमन्नं गौतमादीनामिव बहुभ्यो दीयमानमपि न क्षीयते तेऽक्षीणमहानसाः । अक्षीणमहालयर्द्धिप्राप्ताश्च यत्र परि-मितभूप्रदेशेऽवतिष्ठन्ते तत्रासंख्याता अपि देवास्तिर्यञ्चो मनुष्याश्च सपरिवाराः परस्परबाधारहितास्तीर्थकरपर्षदीव सुखमासते । इति प्रशमप्रभावादिषु महाप्रश्नाद्यो महर्द्धयो दर्शिताः ।

सर्वेन्द्रियाणां विषयान् गृह्णात्येकमपीन्द्रियम् ।
यत्प्रभावेन सम्भिन्नश्रोतोलब्धिस्तु सा मता ॥ १ ॥ ८ ॥

तथा—

चारणाशीविषावधिमनःपर्यायसम्पदः ।
योगकल्पद्रुमस्यैता विकासिकुसुमश्रियः ॥ ९ ॥

अतिशयचरणाच्चारणा अतिशयगमनादित्यर्थः । तत्सम्पन्नलब्धिरि-
त्यर्थः । आशीविषलब्धिर्निग्रहानुग्रहसामर्थ्यम् । अवधिज्ञानलब्धि-
र्मूर्त्तद्रव्यविषयं ज्ञानम् । मनःपर्य्यायज्ञानलब्धिर्मनोद्रव्यप्रत्यक्षी-
करणशक्तिः । एता लब्धयो योगकल्पवृक्षस्य कुसुमभूताः । फलं
तु केवलज्ञानं मोक्षो वा । भरतमरुदेव्युदाहरणाभ्यां वक्ष्यते ।

तथाहि—

द्विविधाश्चारणा ज्ञेया जङ्घाविद्योत्थशक्तितः ।
तत्राद्या रुचकद्वीपं यान्त्येकोत्पातलीलया ॥ १ ॥
वलन्तो रुचकद्वीपादेकेनोत्पतनेन ते ।
नन्दीश्वरे समायान्ति द्वितीयेन यतो गताः ॥ २ ॥
ते चोर्ध्वगत्यामेकेन समुत्पतनकर्म्मणा ।
गच्छन्ति पाण्डुकवनं मेरुशैलशिरःस्थितम् ॥ ३ ॥
ततोऽपि वलिता एकोत्पातेनायान्ति नन्दनम् ।
उत्पातेन द्वितीयेन प्रथमोत्पातभूमिकाम् ॥ ४ ॥
विद्याचारणास्तु गच्छन्त्येकेनोत्पातकर्म्मणा ।
मानुषोत्तरमन्येन द्वीपं नन्दीश्वराह्वयम् ॥ ५ ॥
तस्मादायान्ति चैकेनोत्पातेनोत्पतिता यतः ।
यान्त्यायान्त्यूर्ध्वमार्गेऽपि तिर्य्यग्यानक्रमेण ते ॥ ६ ॥

अन्येऽपि बहुभेदाश्चारणा भवन्ति । तद्यथा आकाशगामिनः
पर्य्यङ्कावस्थानिषण्णाः कायोत्सर्गशरीरा वा पादोत्क्षेपनिक्षेपक्रमा-
द्विना व्योमचारिणः । केचित्तु जलजङ्घाफलपुष्पपत्रश्रेण्यग्निशिखा-
धूमनीहारावश्यायमेघवारिधारामर्कटकतन्तुज्योतीरश्मिपवनाद्या-

लम्बनमतिपरिणामकुशलाः । जलमुपेत्य वापीनिर्झरासमुद्रादिष्व-प्कायिकजीवानविराधयन्तो जले भूमाविव पादोत्क्षेपनिक्षेप-कुशला जलचारणाः । भुव उपरि चतुरङ्गुलप्रमिते आकाशे जङ्घा-निक्षेपोत्क्षेपनिपुणा जङ्घाचारणाः । नानाद्रुमफलान्युपादाय फला-श्रयप्राण्यविरोधेन फलतले पादोत्क्षेपनिक्षेपकुशलाः फलचारणाः । नानाद्रुमलतागुल्मपुष्पाण्युपादाय पुष्पसूक्ष्मजीवानविराधयन्तः कुसुमतलदलावलम्बनसङ्गतयः पुष्पचारणाः । नानाद्रुमगुल्मवीरुल्लताविताननानाप्रवालतरुणपल्लवालम्बनेन पर्णसूक्ष्मजीवानविरा-धयन्तस्तरणोत्क्षेपनिक्षेपपटवः पत्रचारणाः । चतुर्योजनशतोच्छ्रितस्य निषधस्य नीलस्य चाद्रेष्टङ्कच्छिन्नां श्रेणिमुपादायोपर्यधो वा पाद-पूर्वकमुत्तरणावतरणनिपुणाः श्रेणिचारणाः । अग्निशिखामुपादाय तेजःकायिकानविराधयन्तः स्वयमदह्यमानाः पादविहारनिपुणा अग्निशिखाचारणाः । धूमवर्तिं तिरश्चीनामूर्ध्वगां वा आलम्ब्या-स्खलितगमनास्कन्दिनो धूमचारणाः । नीहारमवष्टभ्याप्कायिक-पीडामजनयन्तो गतिमसङ्गामश्नुवाना नीहारचारणाः । अव-श्यायमाश्रित्य तदाश्रयजीवानुपरोधेन यान्तोऽवश्यायचारणाः । नभोवर्त्मनि प्रविततजलधरपटलपटास्तरणे जीवानुपघातिचङ्क्र-मणप्रभवो मेघचारणाः । प्रावृषेण्यादिजलधरादेर्विनिर्गतवारि-धारावलम्बनेन प्राणिपीडामन्तरेण यान्तो वारिधाराचारणाः । कुजलद्यान्तरालभाविनभःप्रदेशेषु कुजलद्यादिसम्बद्धमर्कटकतन्त्वा-लम्बनपादोद्धरणनिक्षेपावदाता मर्कटकतन्तूनच्छिन्दन्तो यान्तो मर्कटकतन्तुचारणाः । चन्द्रार्कग्रहनक्षत्राद्यन्यतमज्योतीरश्मिसम्ब-

श्चेन भुवीव पादविहारकुशलाः ज्योतीरश्मिचारणाः। पवने-ष्वनेकादिग्मुखोन्मुखेषु प्रतिलोमानुलोमवर्त्तिषु तत्प्रदेशावलीमुपा-दाय गतिमस्खलितचरणविन्यासामाक्रामन्तो वायुचारणाः।

तपश्चरणमाहात्म्यादनुग्राहादितरतोऽपि वा।
आशीविषाः समर्थाः स्युर्निग्रहेऽनुग्रहेऽपि च ॥ १ ॥
द्रव्याणि मूर्त्तिमन्त्येव विषयो यस्य सर्व्वतः।
नैयत्यरहितं ज्ञानं तत्स्यादवधिलक्षणम् ॥ २ ॥
स्यात्मनःपर्य्ययो ज्ञानं मनुष्यक्षेत्रवर्त्तिनाम्।
प्राणिनां समनस्कानां मनोद्रव्यप्रकाशकम् ॥ ३ ॥
ऋजुश्च विपुलश्चेति स्यात्मनःपर्य्ययो द्विधा।
विशुद्ध्यप्रतिपाताभ्यां विपुलस्तु विशिष्यते ॥ ४ ॥ ८ ॥

केवलज्ञानलक्षणफलोपदर्शनेन योगमेव स्तौति—

अहो योगस्य माहात्म्यं प्राज्यं साम्राज्यमुद्वहन्।
अवाप केवलज्ञानं भरतो भरताधिपः ॥ १० ॥

अहो इत्याश्चर्य्यं प्राज्यं पुष्कलं साम्राज्यं चक्रवर्त्तित्वमुद्वहन्नेव न पुनस्त्यक्तराज्यसम्पत्। भरताधिपः षट्खण्डभरतक्षेत्रस्वामी।

तथाहि—

एतस्यामवसर्प्पिण्यामेकान्तसुषमारके।
सागरोपमकोटीनां चतुष्कोटिमिते गते ॥ १ ॥
सागरोपमकोटीनां तिसृभिः कोटिभिर्मिते।
अरके सुषमानाम्नि द्वितीयेऽपि गते सति ॥ २ ॥

तद्विकोटाकोटिमिते सुषमदुःषमारके ।
पल्याष्टमांशशेषे च दक्षिणार्द्धस्य भारते ॥ ३ ॥
सप्ताभूवन् कुलकरा इमे विमलवाहनः ।
चक्षुष्मांश्च यशस्वी चाभिचन्द्रोऽथ प्रसेनजित् ॥ ४ ॥
मरुदेवश्च नाभिश्च तत्र नाभेर्गृहिण्यभूत् ।
मरुदेवेति सच्छीलपवित्रितजगत्त्रया ॥ ५ ॥
तृतीयारस्य शेषेषु पूर्वलक्षेषु संख्यया ।
चतुरशीतौ सार्द्धाष्टमासे वर्षत्रयेऽपि च ॥ ६ ॥
तस्याश्च कुक्षौ सर्वार्थविमानादवतीर्णवान् ।
चतुर्द्दशमहास्वप्नसूचितः प्रथमो जिनः ॥ ७ ॥
नाभेश्च मरुदेव्याश्च तदा सम्यगजानतोः ।
स्वप्नार्थमिन्द्राः सर्वेऽपि व्याचक्रुः प्रमदोन्मदाः ॥ ८ ॥
ततः सुखेन जातस्य शुभेऽह्नि परमेष्ठिनः ।
षट्पञ्चाशत्दिक्कुमार्यः सूतिकर्म्म प्रचक्रिरे ॥ ९ ॥
मेरुमूर्द्धि विभुं नीत्वा कृत्वोत्सङ्गे दिवस्पतिः ।
तीर्थोदकैरभ्यषिञ्चत्सं च हर्षाम्बुवारिभिः ॥ १० ॥
वासवेन ततो मातुरर्पितस्य जगद्गुरोः ।
धात्रीकर्म्माणि सर्व्वाणि विदधुर्विबुधस्त्रियः ॥ ११ ॥
निरीक्ष्य ऋषभाकारं लक्ष्मोरौ दक्षिणे प्रभोः ।
चक्रतुः पितरौ नाम ऋषभेति प्रमोदतः ॥ १२ ॥
चमन्दं ददानन्दं सुधारश्मिरिव प्रभुः ।
त्रिदशाहारयोगेन पोषितो ववृधे क्रमात् ॥ १३ ॥

अन्येद्युर्युसदामीश उपासितुमुपागतः ।
अचिन्तयद्भगवतो वंशः क इह कल्प्यताम् ॥ १४ ॥
अवगत्य तदाकूतमवधिज्ञानतो विभुः ।
तत्करेक्षुलतां लातुं करीव करमक्षिपत् ॥ १५ ॥
तां समर्प्य जगद्भर्तुः प्रणम्य च बिडौजसा ।
इक्ष्वाकुरिति वंशस्य तदा नाम प्रतिष्ठितम् ॥ १६ ॥
बाल्यं कल्यमिवोल्लङ्घ्य मध्यन्दिनमिवार्यमा ।
विभुर्विभक्तावयवं द्वितीयं शिश्रिये वयः ॥ १७ ॥
यौवनेऽपि मृदू रक्तौ कमलोदरसोदरौ ।
उष्णावकम्पावस्वेदौ पादौ समतलौ प्रभोः ॥ १८ ॥
नतार्त्तिच्छेदनायेव प्रपेदे चक्रमीशितुः ।
सदाश्रितश्रीकरेणोरिव दामाङ्कुशध्वजाः ॥ १९ ॥
स्वामिनः पादयोर्लक्ष्मीलीलासदनयोरिव ।
शङ्खकुम्भौ तले पार्ष्ण्यौ स्वस्तिकश्च विरेजिरे ॥ २० ॥
मांसलो वर्तुलस्तुङ्गो भुजङ्गमफणोपमः ।
अङ्गुष्ठः स्वामिनो वत्स इव श्रीवत्सलाञ्छितः ॥ २१ ॥
प्रभोर्निर्वातनिष्कम्पाः स्निग्धदीपशिखोपमाः ।
नीरन्ध्रा ऋजवोऽङ्गुल्यो दलानीव पदाब्जयोः ॥ २२ ॥
नन्द्यावर्त्ता जगद्भर्तुः पादाङ्गुलितलेष्वभान् ।
यद्विम्बानि क्षितौ धर्मप्रतिष्ठाहेतुतां ययुः ॥ २३ ॥
यवाः पर्वस्वङ्गुलीनामभीवापीभिरावभुः ।
उप्ता इव जगल्लक्ष्मीविवाहाय जगत्प्रभोः ॥ २४ ॥

कन्दः पादाम्बुजस्येव पार्ष्णिर्वृत्तायतः पृथुः ।
अङ्गुष्ठाङ्गुलिफणिनां फणामणिनिभा नखाः ॥ २५ ॥
हेमारविन्दमुकुलकर्णिकागोलकश्रियम् ।
गूढौ गुल्फौ वितेनाते नितान्तं स्वामिपादयोः ॥ २६ ॥
प्रभोः पादावुपर्यानुपूर्व्या कूर्मवदुन्नतौ ।
अप्रकाशसिरौ स्निग्धच्छवी लोमविवर्जितौ ॥ २७ ॥
अन्तर्मग्नास्थिपिशितपुष्कले क्रमवर्तुले ।
एणीजङ्घाविडम्बिन्यौ जङ्घे गौर्य्यौ जगत्पतेः ॥ २८ ॥
जानुनी स्वामिनोऽधातां वर्तुले मांसपूरिते ।
तूलपूर्णपिधानान्तःक्षिप्तदर्पणरूपताम् ॥ २९ ॥
ऊरू च मृदुलौ स्निग्धावानुपूर्व्येण पीवरौ ।
बिभराञ्चक्रतुः प्रौढकदलीस्तम्भविभ्रमम् ॥ ३० ॥
स्वामिनः कुञ्जरस्येव मुष्कौ गूढौ समस्थितौ ।
अतिगूढं च पुंश्चिह्नं कुलीनस्येव वाजिनः ॥ ३१ ॥
तत्रासिरमनिम्नोच्चमप्रस्लादीर्घमश्लथम् ।
सरलं मृदु निर्लोम वर्तुलं सुरभीन्द्रियम् ॥ ३२ ॥
शीतप्रदक्षिणावर्त्तशब्दयुक्तैकधारकम् ।
अबीभत्सावर्त्ताकारकोशस्थं पिञ्जरं तथा ॥ ३३ ॥
आयता मांसला स्थूला विशाला कठिना कटिः ।
मध्यभागस्तनुत्वेन कुलिशोदरसोदरः ॥ ३४ ॥
नाभिर्बभार गम्भीरा सरिदावर्तविभ्रमम् ।
कुक्षी स्निग्धौ मांसवन्तौ कोमलौ सरलौ समौ ॥ ३५ ॥

अथाहव:स्थलं स्वर्णशिलापृथुलमुन्नतम् ।
श्रीवत्सरत्नपीठाङ्कं श्रीलीलावेदिकाश्रियम् ॥ ३६ ॥

दृढपीनोन्नतौ स्कन्धौ ककुद्मत्ककुदोपमौ ।
अल्परोमोन्नते कक्षे गन्धस्वेदमलोज्झिते ॥ ३७ ॥

पीनौ पाणिफणिच्छत्रौ भुजावाजानुलम्बितौ ।
चञ्चलाया नियमने नागपाशाविव श्रियः ॥ ३८ ॥

नवाम्रपल्लवाताम्रतलौ निष्कर्मकर्कशौ ।
अस्वेदनावपच्छिद्रावुष्णौ पाणी जगत्पते: ॥ ३९ ॥

दण्डचक्रधनुर्मत्स्यश्रीवत्सकुलिशाङ्कुशै: ।
ध्वजाब्जचामरच्छत्रशङ्खकुम्भाब्धिमन्दरै: ॥ ४० ॥

मकरर्षभसिंहाश्वरथस्वस्तिकदिग्गजै: ।
प्रासादतोरणद्वीपै: पाणी पादाविवाङ्कितौ ॥ ४१ ॥

अङ्गुष्ठाङ्गुलय: शोणा: सरला: शोणपाणिजा: ।
प्ररोहा इव कल्पद्रो: प्रान्तमाणिक्यपुष्पिता: ॥ ४२ ॥

यवा: स्पष्टमशोभन्त स्वामिनोऽङ्गुष्ठपर्वसु ।
यशोवरतुरङ्गस्य पुष्टिवैशिष्ट्यहेतव: ॥ ४३ ॥

अङ्गुलीमूर्द्धसु विभो: सर्वसम्पत्तिशंसिन: ।
दधु: प्रदक्षिणावर्त्ता दक्षिणावर्त्तशङ्खताम् ॥ ४४ ॥

कण्ठादुद्धरणीयानि जगन्ति त्रीण्यपीत्यभात् ।
संख्यालेखा इव तिस्रो लेखा मूले कराब्जयो: ॥ ४५ ॥

वर्त्तुलोऽनतिदीर्घश्च लेखात्रयपवित्रित: ।
गम्भीरध्वनिराधत्ते कण्ठ: कम्बुविडम्बनाम् ॥ ४६ ॥

विमलं वर्त्तुलं कान्तितरङ्गि वदनं विभोः ।
पीयूषदीधितिरिवापरो लाञ्छनवर्जितः ॥ ४७ ॥

मसृणौ मांसलौ स्निग्धौ कपोलफलकौ प्रभोः ।
दर्पणाविव सौवर्णौ वाग्लक्ष्म्योः सहवासयोः ॥ ४८ ॥

अन्तरावर्त्तसुभगौ कर्णौ स्कन्धान्तलम्बितौ ।
प्रभोर्मुखप्रभासिन्धुतीरस्थे शुक्तिके इव ॥ ४९ ॥

ओष्ठौ बिम्बोपमौ दन्ता द्वात्रिंशत्कुन्दसोदराः ।
क्रमस्फारा क्रमोत्तुङ्गवंशा नासा मर्हयितुः ॥ ५० ॥

अङ्गुलदीर्घं चिबुकं मांसलं वर्त्तुलं मृदु ।
मेचकं बहुलं स्निग्धं कोमलं श्मश्रु तायिनः ॥ ५१ ॥

प्रत्यग्रकल्पविटपिप्रवालारुणकोमला ।
प्रभोर्जिह्वामितस्थूला द्वादशाङ्गागमार्थसूः ॥ ५२ ॥

अन्तरा कृष्णधवले प्रान्तरक्ते विलोचने ।
नीलस्फटिकशोणाश्ममणिग्रावमये इव ॥ ५३ ॥

ते च कर्णान्तविश्रान्ते कज्जलश्यामपक्ष्मणी ।
विकस्वरे तामरसे निलीनालिकुले इव ॥ ५४ ॥

बिभराञ्चक्रतुर्भर्त्तुः श्यामले कुटिले भ्रुवौ ।
दृष्टिपुष्करिणीतीरसमुद्भिन्नलताश्रियम् ॥ ५५ ॥

विशालं मांसलं वृत्तं मसृणं कठिनं समम् ।
भालस्थलं जगद्भर्त्तुरष्टमीसोमसोदरम् ॥ ५६ ॥

भुवनस्वामिनो मौलिरानुपूर्व्या समुन्नतः ।
दधावधोमुखीभूतच्छत्रसब्रह्मचारिताम् ॥ ५७ ॥

मौलिश्छत्रे महेशस्य जगदीशत्वशंसिनि ।
व्यक्तमुत्तुङ्गमुष्णीषं शिश्रिये कलशश्रियम् ॥ ५८ ॥
केशाश्चकाशिरे मूर्द्ध्नि प्रभोर्भ्रमरमेचकाः ।
कुञ्चिताः कोमलाः स्निग्धाः कालिन्द्या इव वीचयः ॥५९॥
गोरोचनागर्भगौरी स्निग्धस्वच्छा त्वगाबभौ ।
स्वर्णद्रवविलिप्तेव तनौ त्रिजगदीशितुः ॥ ६० ॥
मृदूनि भ्रमरश्यामान्यद्वितीयोऽत्रमानि च ।
बिसतन्तुतनीयांसि लोमानि स्वामिनस्तनौ ॥ ६१ ॥
उत्फुल्लकुमुदामोदः श्वासो विस्त्रेतरत्पलम् ।
गोक्षीरधाराधवलं रुधिरं च जगत्पतेः ॥ ६२ ॥
इत्यसाधारणैर्नानालक्षणैर्लक्षितः प्रभुः ।
रत्नै रत्नाकर इव सेव्यः कस्येह नाभवत् ॥ ६३ ॥
अन्येद्युः क्रीडया क्रीडद्बालभावानुरूपया ।
मिथो मिथुनकं किञ्चित्तले तालतरोरगात् ॥ ६४ ॥
तदैव दैवदुर्योगात्तस्याधावरमूर्द्धनि ।
तडिद्दण्ड इवैरण्डेऽपतत्तालफलं महत् ॥ ६५ ॥
प्रहृतः काकतालीयन्यायेनाऽस्येव मर्मणि ।
विपन्नो दारकस्तत्र प्रथमेनापमृत्युना ॥ ६६ ॥
कालधर्मं गते तस्मिंस्तद्द्वितीया नितम्बिनी ।
यूथभ्रष्टा कुरङ्गीव किंकर्त्तव्यजडाभवत् ॥ ६७ ॥
अकाण्डमुद्गराघातेनेव तेनापमृत्युना ।
बभूवुर्मूर्च्छितानीव मिथुनान्यपराण्यपि ॥ ६८ ॥

तानि तामयतः क्रत्वा नारीं पुरुषवर्जिताम् ।
चिंकासंख्यविमूढानि श्रीनाभेरुपनिन्यिरे ॥ ६८ ॥
एषा वृषभनाथस्य धर्मपत्नी भवत्विति ।
प्रतिजग्राह तां नाभिर्नेत्रकैरवकौमुदीम् ॥ ७० ॥
अन्यदा तु 'विभोरुद्यद्भोगफलकर्मणः ।
आगादिन्द्रो विवाहार्थं वृन्दारकगणान्वितः ॥ ७१ ॥
ततः स्वर्णमयस्तम्भभ्राजिष्णुमणिपुत्रिकम् ।
धर्मकनिर्गमद्वारमकार्षुर्मण्डपं सुराः ॥ ७२ ॥
श्वेतदिव्यांशुकोल्लोचच्छलेन गगनस्थया ।
गङ्गयेवाश्रितः सोऽभूद्भूरिशोभादिदृक्षया ॥ ७३ ॥
तोरणानि चतुर्दिक्षु सन्तानतरुपल्लवैः ।
तत्राभूवन् धनूंषीव सज्जितानि मनोभुवा ॥ ७४ ॥
चतस्रो रत्नकलशश्रेणयो'ऽभ्रंलिहाग्रगाः ।
पर्य्यस्थाप्यन्त देवीभिर्निधानानि रतेरिव ॥ ७५ ॥
वहृषुर्मण्डपद्वारे चेलोत्क्षेपं पयोमुचः ।
चक्रे मध्ये सुरीभिर्भूः पङ्किला यक्षकर्दमैः ॥ ७६ ॥
वाद्यमानेषु तूर्य्येषु गीयमाने च मङ्गले ।
अवाद्यन्नगायंश्च प्रतिशब्दैर्दिगङ्गनाः ॥ ७७ ॥
सुमङ्गलासुनन्दाभ्यां कुमारीभ्यामकारयत् ।
वासवः परमेशस्य पाणिग्रहमहोत्सवम् ॥ ७८ ॥

---

(१) क छ विभोरभ्युद्यद्भोगफलकर्म्मणः । (२) ख ग अभ्रंलिहाग्रकाः ।

ततः सुमङ्गलादेवी देवैः प्रकृतमङ्गला ।
अपत्ये भरतब्राह्मी युग्मरूपे अजीजनत् ॥ ७९ ॥
त्रैलोक्यजनितानन्दा सुनन्दा सुषुवे युगम् ।
सुबाहुं बाहुबलिनं सुन्दरीं चातिसुन्दरीम् ॥ ८० ॥
पुनरेकोनपञ्चाशत्पुंयुगानि सुमङ्गला ।
असूत बलिनो मूर्त्तान् हैरण्येयेव मारुतान् ॥ ८१ ॥
अन्येद्युरन्याय इति पूत्कारोद्धृतबाहुभिः ।
नाभिर्व्यपि सम्भूय सर्व्वैर्मिथुनकैरिदम् ॥ ८२ ॥
तिस्रो हकारमकारधिक्काराख्याः सुनीतयः ।
न गण्यन्तेऽधुना युग्मैः कुर्व्वद्भिरसमञ्जसम् ॥ ८३ ॥
ततः कुलकरोऽप्यूचे भाताध्यादसमञ्जसात् ।
एष वो वृषभः स्वामी तद्वर्त्तध्वं तदाज्ञया ॥ ८४ ॥
तदा कुलकराज्ञातः कर्त्तुं राज्यस्थितिं स्फुटाम् ।
प्रभुर्ज्ञानत्रयमयो मिथुनान्येवमन्वशात् ॥ ८५ ॥
राजा भवति मर्य्यादाव्यतिक्रमनिरोधकः ।
तस्योच्चासनदानेनाभिषेकः क्रियते जलैः ॥ ८६ ॥
आकर्ण्य वचनं भर्त्तुस्ते सर्व्वे युग्मधर्म्मिणः ।
तच्चिकीर्षया ययुः पद्मपुटैर्जलजिघृक्षया ॥ ८७ ॥
तदा चासनकम्पेनावधिज्ञानप्रयोगतः ।
विज्ञातभगवद्राज्यसमयः शक्र आययौ ॥ ८८ ॥
रत्नसिंहासनेऽध्यास्य वासवः परमेश्वरम् ।
साम्राज्येऽभिषिषेचालञ्चक्रे च मुकुटादिभिः ॥ ८९ ॥

इतश्चाम्भोजिनीपत्रपुटैरञ्जलिधारितैः ।
निजं मन इव स्वच्छमानिन्ये मिथुनैर्जलम् ॥ ९० ॥
उदयाद्रिमिवार्केण मुकुटेनोपशोभितम् ।
अत्यन्तविमलैर्वस्त्रैर्व्योमेव शरदम्बुदैः ॥ ९१ ॥
हंसैरिव शरत्कालं सञ्चरच्चारुचामरैः ।
कृताभिषेकं नाभेयं ददृशुस्तानि विस्मयात् ॥ ९२ ॥ (युग्मं)
नैतद्युक्तं प्रभोर्मूर्ध्नि क्षेप्तुमेवं विमर्शिभिः ।
विनीतैर्मिथुनैर्वारि निदधे पादपद्मयोः ॥ ९३ ॥
योजनान्यथ विस्तीर्णां नव द्वादश चायताम् ।
विनीताख्यां पुरीं कर्तुं श्रीदमुक्त्वा हरिर्ययौ ॥ ९४ ॥
सोऽपि रत्नमयीं भूमेर्माणिक्यमुकुटोपमाम् ।
व्यधात् द्विषामयोध्येति तामयोध्यापराभिधाम् ॥ ९५ ॥
तां च निर्माय निर्मायः पूरयामास यक्षराट् ।
अक्षय्यरत्नवसनधनधान्यैर्निरन्तरम् ॥ ९६ ॥
वज्रेन्द्रनीलवैडूर्यहर्म्यकिर्मीररश्मिभिः ।
भित्तिं विनापि खे तत्र चित्रकर्म विरच्यते ॥ ९७ ॥
तदग्रे दीप्रमाणिक्यकपिशीर्षपरम्पराः ।
अयत्नादर्शतां यान्ति चिरं खेचरयोषिताम् ॥ ९८ ॥
तस्यां गृहाङ्गणभुवि स्वस्तिकन्यस्तमौक्तिकैः ।
स्वैरं कर्करकक्रीडां कुरुते बालिकाजनः ॥ ९९ ॥
तत्रोद्यानोच्चवृक्षाग्रस्खल्यमानान्यहर्निशम् ।
खेचरीणां विमानानि क्षणं यान्ति कुलायताम् ॥ १०० ॥

तत्र दृष्ट्वाऽद्दहर्म्येषु रत्नराशीन् समुच्छ्रितान् ।
तदवकरकूटोऽयं तर्क्यते रोहणाचलः ॥ १ ॥
जलकेलिरतस्त्रीणां त्रुटितैर्हारमौक्तिकैः ।
ताम्रपर्णीश्रियं तत्र दधते गृहदीर्घिकाः ॥ २ ॥
तत्रेभ्याः सन्ति ते येषां कस्याप्येकतमस्य सः ।
व्यवहर्तुं गतो मन्ये वणिक्पुत्रो धनाधिपः ॥ ३ ॥
नक्तमिन्दुदृषन्निर्त्तिमन्दिरस्यन्दिवारिभिः ।
प्रशान्तपांशवो रथ्याः क्रियन्ते तत्र सर्वतः ॥ ४ ॥
वापीकूपसरोलक्षैः सुधासोदरवारिभिः ।
नागलोकं नवसुधाकुण्डं परिबभूव सा ॥ ५ ॥
नगरीं तामलङ्कुर्वन्नरेन्द्रो वृषभध्वजः ।
अपत्यानि निजानीव प्रजाश्चिरमपालयत् ॥ ६ ॥
तत उत्पादयामास लोकानुग्रहकाम्यया ।
एकैकशो विंशतिधा पञ्च शिल्पानि नाभिभूः ॥ ७ ॥
राज्यस्थितिनिमित्तं चाऽग्रहीदासुरगान् गजान् ।
सामाद्युपायसारां च नीतिरीतिमदर्शयत् ॥ ८ ॥
द्वासप्ततिकलाकाण्डं भरतं चाध्यजीगपत् ।
भरतोऽपि निजान् भ्रातृंस्तनयानितरानपि ॥ ९ ॥
नाभेयो बाहुबलिनं भिद्यामामास्यमेकशः ।
लक्षणानि च हस्त्यश्वस्त्रीपुंसानामजिज्ञपत् ॥ १० ॥
अष्टादशलिपीर्ब्राह्म्या अपसव्येन पाणिना ।
दर्शयामास सव्येन सुन्दर्या गणितं पुनः ॥ ११ ॥

वर्णव्यवस्थां रचयन् न्यायमार्गं प्रवर्त्तयन् ।
लब्धकीर्तिं पूर्वलक्षाणि नाभिसूरत्यवाहयत् ॥ १२ ॥
प्रभुः अवज्ञातावासे मधुमासे समेयुषि ।
अगादन्येद्युरुद्याने परिवारानुरोधतः ॥ १३ ॥
गुञ्जद्भिः कुसुमाक्रान्तमकरन्दोन्मदालिभिः ।
मधुलक्ष्मीर्बभूव स्वागतिकेव जगत्प्रभोः ॥ १४ ॥
पूर्वरङ्ग इवारब्धे पञ्चमोच्चारिभिः पिकैः ।
अदर्शयल्लतालास्यं मलयानिललासकः ॥ १५ ॥
प्रतिशाखं विलग्नाभिः पुष्पोच्चयकुतूहलात् ।
स्त्रीभिस्तत्राभवन् वृक्षाः सञ्जातस्त्रीफला इव ॥ १६ ॥
पुष्पवासगृहासीनः पुष्पाभरणभूषितः ।
पुष्पकेन्दुकहस्तोऽभान्मधुर्मूर्त्त इव प्रभुः ॥ १७ ॥
तत्र [1]खेलायमानेषु निर्भरं भरतादिषु ।
दध्यौ स्वामी किमीदृक्षा क्रीडा दृष्टपूर्व्वपि ॥ १८ ॥
अत्रेऽथावधिना स्वामी सःसुखान्युत्तरोत्तरम् ।
अनुत्तरस्वर्गसुखं भुक्तपूर्व्वं स्वयं च तत् ॥ १९ ॥
भूयोऽप्यचिन्तयदिदं विगलन्मोहबन्धनः ।
धिगेष विषयाक्रान्तो वेत्ति नात्महितं जनः ॥ २० ॥
अहो संसारकूपेऽस्मिन् जीवाः कुर्वन्ति कर्मभिः ।
अरघट्टघटीन्यायेनैहिरेयाहिरां क्रियाम् ॥ २१ ॥

---

(१) क हीलायमानेषु ।

कृत्वासीन्मनसा यावद्विभुर्भवपराङ्मुखः ।
तावल्लोकान्तिका देवा एयुः सारस्वतादयः ॥ २२ ॥
बद्धैरञ्जलिभिर्मूर्ध्नि कृताब्जमुकुटा इव ।
प्रणम्य ते व्यज्ञपयन् स्वामिंस्तीर्थं प्रवर्त्तय ॥ २३ ॥
गतेषु तेषु भगवानुद्यानाबन्दनाभिधात् ।
व्यावृत्य गत्वा नगरीमाजुहावावनीपतीन् ॥ २४ ॥
राज्येऽभ्यषिञ्चद्भरतं ज्येष्ठपुत्रं ततो विभुः ।
बाहुबल्यादिपुत्राणां विभज्य विषयान् ददौ ॥ २५ ॥
सांवत्सरिकदानेन ततोऽतर्प्पीत्तथा भुवम् ।
देहीति दीनवाक्यस्य कश्चिदासीद्यथा नहि ॥ २६ ॥
अथासनप्रकम्पेन सर्वेऽप्यभ्येत्य वासवाः ।
अभिषेकं प्रभोश्चक्रुर्गिरेरिव पयोमुचः ॥ २७ ॥
माल्याङ्गरागैर्देवेन्द्रवस्त्रैर्वासितविष्टपैः ।
स्वयशोभिरिवाशोभि परितः परमेश्वरः ॥ २८ ॥
विचित्रैरर्चितो वस्त्रैरलङ्कृतैश्च भूषणैः ।
विभुर्बभासे सन्ध्याभ्रधिष्ण्यैरिव मरुत्पथः ॥ २९ ॥
दिवि दुन्दुभिनादं च कारयामास वासवः ।
जगतो ददद्रानन्दमसम्मान्तमिवात्मनि ॥ ३० ॥
सुरासुरनरोह्यामारोहच्छिबिकां विभुः ।
अर्हल्लोकगतेर्मार्गं जगतो दर्शयन्निव ॥ ३१ ॥
एवं सदेवैर्देवेन्द्रैश्चक्रे निष्क्रमणोत्सवः ।
यं पश्यन्निर्निजदृश्यां नैर्निमेषं कृतार्थितम् ॥ ३२ ॥

मत्वा सिद्धार्थकोद्याने मुमोच परमेश्वरः ।
कुसुमाभरणादीनि कषायानिव सर्वतः ॥ ३३ ॥
चतुर्भिर्मुष्टिभिः केशानुद्दधार जगद्गुरुः ।
जिघृक्षुः पञ्चमीं मुष्टिं वासवेनेति याचितः ॥ ३४ ॥
देवांसयोः स्वर्णवर्णयोर्वातातीतातिशोभते ।
केशवल्लर्य्यसावास्तामिति तां स्वाम्यधारयत् ॥ ३५ ॥
प्रतीच्छतश्च सौधर्म्माधिपतेः सिचयाञ्चले ।
स्वामिकेशा दधुर्दत्तवर्णान्तरगुणश्रियम् ॥ ३६ ॥
क्षीरोदधौ सुधर्मेशः केशान् क्षिप्त्वाभ्युपेत्य च ।
रङ्गाचार्य इवारयत्तुमुलं मुष्टिसंज्ञया ॥ ३७ ॥
सर्व्वं सावद्यं प्रत्याख्यामीति चारित्रमुच्चकैः ।
मोक्षाध्वनो रथमिवाभ्यारुरोह जगत्पतिः ॥ ३८ ॥
सर्वतः सर्वजन्तूनां मनोद्रव्याणि दर्शयत् ।
जज्ञे ज्ञानं प्रभोस्तुर्य्यं मनःपर्य्यंयसंज्ञकम् ॥ ३९ ॥
राज्ञां सहस्राश्चत्वारोऽनुयान्तस्तं निजप्रभुम् ।
व्रतमाददिरे भक्त्या कुलीनानां क्रमो ह्यसौ ॥ ४० ॥
ततः सर्वेष्वपीन्द्रेषु गतेषु स्वं स्वमालयम् ।
व्यहरत्तैर्वृतः स्वामी यूथनाथ इव द्विपैः ॥ ४१ ॥
लोकैर्भिक्षास्वरूपाज्ञैर्भिक्षार्थं भ्रमतः प्रभोः ।
पट्टांशुकानि कन्याश्चादि भिक्षादानस्य अपि क्वचित् ॥ ४२ ॥
श्चाद्याममप्राप्नुवन् भिक्षां सहमानः परीषहान् ।
अदीनमानसः स्वामी मौनव्रतमुपाश्रितः ॥ ४३ ॥

श्रमणानां सहस्रैश्चतुर्भिरपि नाभिभूः ।
क्षुधार्त्तैर्मुमुचे को वा ¹ससत्त्वो भगवानिव ॥ ४४ ॥
वने मूलफलाहारा जज्ञिरे ते तु तापसाः ।
भवाटवीपथक्षुण्णो भिक्षामोक्षपथच्युतान् ॥ ४५ ॥
अथ कच्छमहाकच्छपुत्रावाभ्यागतौ क्वचित् ।
ईयतुर्नमिविनमी स्वामिनं प्रतिमास्थितम् ॥ ४६ ॥
प्रणम्य तौ विज्ञपयाम्बभूवतुरिति प्रभुम् ।
आवयोर्नापरः स्वामी स्वामिन् राज्यप्रदो भव ॥ ४७ ॥
न किञ्चिदूचे भगवांस्तदा तौ सेवकावपि ।
निर्ममा हि न लिप्यन्ते कस्याप्यैहिकचिन्तया ॥ ४८ ॥
तौ कृष्टासी सिषेवाते स्वामिनं पारिपार्श्विकौ ।
अहर्निशं मेरुगिरिं सूर्याचन्द्रमसाविव ॥ ४९ ॥
अथ तौ धरणेन्द्रेण प्रभुं वन्दितुमेयुषा ।
कौ युवामिह को हेतुरित्युक्तावेवमूचतुः ॥ ५० ॥
भृत्यावावामसौ भर्त्ता क्वचिदप्यादिदेश च ।
राज्यं विभज्य सर्वेषां स्वपुत्राणामदत्त च ॥ ५१ ॥
अपि प्रदत्तसर्वस्वो दातासौ राज्यमावयोः ।
अस्ति नास्तीति का चिन्ता कार्या सेवैव सेवकैः ॥ ५२ ॥
याचेथां भरतं स्वामी निर्ममो निष्परिग्रहः ।
किमद्य दद्यादिति तौ तेनोक्तावित्यवोचताम् ॥ ५३ ॥

---

(१) ख म च सत्त्ववान् ।

विश्वस्वामिनमाराध्यामुं कुर्वः स्वाम्यन्तरं नहि ।
कल्पपादपमासाद्य कः करीरं निषेवते ॥ ५४ ॥
आवां याचावहे नान्यं विहाय परमेश्वरम् ।
पयोमुचं विमुच्यान्यं याचते चातकोऽपि किम् ॥ ५५ ॥
स्वस्त्यस्तु भरतादिभ्यः किं तवास्मद्विचिन्तया ।
स्वामिनोऽस्माद्यद्भवति तद्भवत्वपरेण किम् ॥ ५६ ॥
तदुक्तिमुदितोऽवादीदथेदं पन्नगेश्वरः ।
पातालपतिरेषोऽस्मि स्वामिनोऽस्यैव किङ्करः ॥ ५७ ॥
सेव्यः स्वाम्ययमेवेति प्रतिज्ञा साधु साधु वः ।
स्वामिसेवाफलं विद्याधरैश्वर्यं ददामि तत् ॥ ५८ ॥
स्वामिसेवासमेवैतद्बुध्येथां हन्त नान्यथा ।
सम्बोध्येति ददौ विद्याः प्रज्ञप्तीप्रमुखास्तयोः ॥ ५९ ॥
ईयतुस्तदनुज्ञातौ पञ्चाशद्योजनीपृथुम् ।
तौ वैताढ्याद्रिमुत्सेधं पञ्चविंशतियोजनम् ॥ ६० ॥
दशयोजनविस्तारदक्षिणश्रेणिमध्यगाः ।
तत्र विद्याबलाच्चक्रे नमिः पञ्चाशतं पुरीः ॥ ६१ ॥
दशयोजनविस्तारोत्तरश्रेण्यां न्यवीविशत् ।
विद्याधरपतिः षष्टिं पुराणि विनमिः पुनः ॥ ६२ ॥
चक्राते चक्रवर्त्तित्वं [1]चिराद् विद्याधरेषु तौ ।
तादृशः स्वामिसेवायाः किं नाम स्याद्दुरासदम् ॥ ६३ ॥

---

(१) ख ग घ विरम् ।

वर्षं मौनी निराहारो विहरन् भगवानपि ।
पुरं गजपुरं नाम प्रययौ पारणेच्छया ॥ ६४ ॥
तदा च सोमयशसः श्रेयांसः स्वप्नमैक्षत ।
मेरुं श्यामं सुधाकुम्भैः क्षालयित्वोज्ज्वलं व्यधात् ॥ ६५ ॥
सुबुद्धिश्रेष्ठिनाप्यैक्षि गोसहस्रं रवेश्च्युतम् ।
श्रेयांसेनाहितं तत्र ततोऽसौ भासुरोऽभवत् ॥ ६६ ॥
अदर्शि सोमयशसा राज्ञैको बहुभिः परैः ।
वृतः समन्ताच्छ्रेयांससाहाय्याज्जयमीयिवान् ॥ ६७ ॥
त्रयस्ते सदसि स्वप्नानन्योऽन्यस्य न्यवीविदन् ।
ते निर्णयमजानन्तः स्वं स्वं स्थानं पुनर्ययुः ॥ ६८ ॥
प्रादुर्भावयितुमिव तदा तत्स्वप्ननिर्णयम् ।
श्रेयांसस्य ययौ वेश्म भिक्षार्थी भगवानपि ॥ ६९ ॥
भगवन्तं समायान्तं शशाङ्कमिव सागरः ।
आलोक्य श्रेयसां पात्रं श्रेयांसः शिश्रिये मुदम् ॥ ७० ॥
ऊहापोहं वितन्वानः श्रेयांसः स्वामिदर्शनात् ।
अवाप जातिस्मरणं पूर्वनष्टनिधानवत् ॥ ७१ ॥
चक्रभृद्वज्रनाभोऽसौ प्राग्भवेऽस्यास्मि सारथिः ।
अनुप्रव्रजितश्चामुं तदेत्यादि विवेद सः ॥ ७२ ॥
ततो विज्ञातनिर्दोषभिक्षादानविधिः सुधीः ।
स्वामिने प्रासुकायातेक्षुरसं मुदितो ददौ ॥ ७३ ॥
भूयानपि रसः पाणिपात्रे भगवतो ममौ ।
श्रेयांसस्य तु हृदये ममुर्नहि मुदस्तदा ॥ ७४ ॥

स्वामिनोऽनुसम्भिनोऽभ्यासीद् व्योम्नि लक्ष्मणिको रसः ।
भक्तौ स्वामिनोऽचिन्त्यप्रभावाः प्रभवः खलु ॥ ७५ ॥
ततो भगवता तेन रसेनाकारि पारणम् ।
सुरासुरनृणां नेत्रैः पुनस्तद्दर्शनामृतैः ॥ ७६ ॥
कुर्वद्भिर्दुन्दुभिध्वानं देवैर्दिवि घनैरिव ।
वृष्टयो रत्नपुष्पाणां चक्रिरे वारिवृष्टिवत् ॥ ७७ ॥
अथ तक्षशिलां स्वामी ययौ बाहुबलेः पुरीम् ।
बाह्योद्याने प्रपेदे च प्रतिमामेकरात्रिकीम् ॥ ७८ ॥
प्रभाते पावयिष्यामि स्वं लोकं स्वामिदर्शनात् ।
इतीच्छतो बाहुबलेः साभून्मासोपमा निशा ॥ ७९ ॥
स प्रातः प्रययौ यावत्तावत्स्वाम्यन्यतोऽगमत् ।
तथास्वामिकमुद्यानं व्योमेवाचन्द्रमैक्षत ॥ ८० ॥
मनोरथो विलीनो मे हृदि बीजमिवोषरे ।
हा धिक् प्रमद्वरोऽस्मीति वक्षात्मानं निनिन्द सः ॥ ८१ ॥
यत्रास्थातां प्रभोः पादौ रत्नैस्तत्राभिर्व्यधात् ।
धर्मचक्रं सहस्रारं सहस्रांशुमिवापरम् ॥ ८२ ॥
विविधाभिग्रहः स्वामी म्लेच्छदेशेष्वधर्मसु ।
विजहार यथार्येषु समभावा हि योगिनः ॥ ८३ ॥
तदा प्रभुत्वनार्याणामपि पापैककर्मणाम् ।
धर्मास्तिक्यधिया जज्ञे दृढानुष्ठानचेष्टितम् ॥ ८४ ॥
एवं विहरमाणस्तु सहस्रे शरदां गते ।
पुरं पुरिमतालाख्यमाजगाम जगद्गुरुः ॥ ८५ ॥

तत्पूर्वोत्तरदिग्भागे कानने शकटानने ।
वटस्याधोऽष्टमभक्तेनाख्यात्प्रतिमया प्रभुः ॥ ८६ ॥
आरूढः क्षपकश्रेणिमपूर्वकरणक्रमात् ।
शुक्लध्यानान्तरं शुक्लमध्यासीच्च जगत्पतिः ॥ ८७ ॥
ततश्च घातिकर्माणि व्यलीयन्त घना इव ।
स्वामिनः केवलज्ञानरविराविर्बभूव च ॥ ८८ ॥
विमानान्यतिसम्मर्दाद् घट्टयन्तः परस्परम् ।
एयुरिन्द्राश्चतुःषष्टिः समं देवगणैस्तदा ॥ ८९ ॥
त्रैलोक्यभर्तुः समवसरणस्थानभूतलम् ।
ममृजुर्वायुकुमाराः स्वयं मार्जितमानिनः ॥ ९० ॥
गन्धाम्बुवृष्टिभिर्मेघकुमाराः सिषिचुः क्षितिम् ।
सुगन्धिबाष्पैः सोत्सिक्तधूपार्घैर्वेष्यतः प्रभोः ॥ ९१ ॥
पुष्पोपहारमृतवो जानुदघ्नं व्यधुर्भुवि ।
अप्येषत्पूज्यसंसर्गः पूजायै खलु जायते ॥ ९२ ॥
स्निग्धधूमशिखास्तोमवासितव्योममण्डलाः ।
चक्रुर्धूपघटीस्तत्र तत्र वह्निकुमारकाः ॥ ९३ ॥
इन्द्रचापशतालीढमिव नानामणित्विषा ।
ततः समवसरणं चक्रे शक्रादिभिः सुरैः ॥ ९४ ॥
रजतस्वर्णमाणिक्यवप्रास्तत्र त्रयो बभुः ।
भुवनाधिपतिज्योतिर्वैमानिकसुरैः कृताः ॥ ९५ ॥
असौ स्वर्गमसौ मोक्षं गच्छत्यध्वेति देहिनाम् ।
शंसन्त्य इव वल्गन्त्यः पताकास्तेषु रेजिरे ॥ ९६ ॥

विद्याधर्यो रत्नमय्यो वप्रोपरि चकाशिरे ।
कृतप्रवेशनिष्कासा विमानाशङ्कया सुरैः ॥ ९७ ॥
माणिक्यकपिशीर्षाणि मुग्धामरवधूजनैः ।
आलोक्यन्त चिरं हर्षाद्रत्नताडङ्कशङ्कया ॥ ९८ ॥
प्रतिवप्रं च चत्वारि गोपुराणि बभासिरे ।
चतुर्विधस्य धर्मस्य क्रीडावातायना इव ॥ ९९ ॥
चक्रे समवसरणान्तरेऽशोकतरुः सुरैः ।
क्रोशत्रयोदयो रत्नत्रयोदयमिवोद्दिशन् ॥ २०० ॥
तस्याधःपूर्वदिग्भागे रत्नसिंहासनं सुराः ।
सपादपीठं विदधुः सारं स्वर्गश्रियामिव ॥ १ ॥
प्रविश्य पूर्वद्वारेण नत्वा तीर्थं तमश्छिदे ।
स्वामी सिंहासनं भेजे पूर्वाचलमिवार्यमा ॥ २ ॥
रत्नसिंहासनस्थानि दिक्ष्वन्यास्वपि तत्क्षणम् ।
भगवत्प्रतिबिम्बानि त्रीणि देवा विचक्रिरे ॥ ३ ॥
वराक्षीणतराकेन्दुमण्डलं परमेष्ठिनः ।
त्रैलोक्यस्वामिताचिह्नमिवच्छत्रत्रयं बभौ ॥ ४ ॥
भगवानेक एवायं स्वामीत्यूर्ध्वीकृतो भुजः ।
इन्द्रेण च प्रभोरग्रे रेजे रत्नमयो ध्वजः ॥ ५ ॥
चकाशे केवलज्ञानिचक्रवर्त्तित्वसूचकम् ।
अत्यद्भुतप्रभाचक्रं धर्मचक्रं प्रभोः पुरः ॥ ६ ॥
रेजतुर्जाह्नवीवीचिसोदरे चारुचामरे ।
हंसाविवानुधावन्तौ स्वामिनो मुखपङ्कजम् ॥ ७ ॥

आविर्बभूवानुवपुस्तदा भामण्डलं विभोः ।
खद्योतपोतवद्यस्य पुरो मार्त्तण्डमण्डलम् ॥ ८ ॥
प्रतिध्वानैस्ततोऽपि दिशो मुखरयन् भृशम् ।
अम्भोद इव गम्भीरो दिवि दध्वान दुन्दुभिः ॥ ९ ॥
अधोवृन्ताः सुमनसो विष्वग्ववृषिरे सुरैः ।
आत्मीभूते जने त्यक्तान्यस्त्राणीव मनोभुवा ॥ १० ॥
पञ्चत्रिंशदतिशयान्वितया भगवान् गिरा ।
त्रैलोक्यानुग्रहायाथ प्रारेभे धर्मदेशनाम् ॥ ११ ॥
भगवत्केवलज्ञानोत्सवं चारा अचीकथन् ।
भरतस्य तदा चक्ररत्नमप्युदपद्यत ॥ १२ ॥
उत्पन्नकेवलस्तात इतश्चक्रमितोऽभ्यगात् ।
आदौ करोमि कस्यार्चामिति दध्यौ क्षणं नृपः ॥ १३ ॥
क्व विश्वाभयदस्तातः क्व चक्रं प्राणिघातकम् ।
विमृश्येति स्वामिपूजाहेतोः स्वानादिदेश सः ॥ १४ ॥
सूनोः परोक्षशोकदुःखात्मूत्पन्नदृग्युजम् ।
मरुदेवामथोपेत्य नत्वा चासौ व्यजिज्ञपत् ॥ १५ ॥
आदिशः सर्व्वदापीदं यन्मे सूनुस्तपात्यये ।
पद्मखण्ड इव मृदुः सहते वारिविप्लवम् ॥ १६ ॥
हिमर्त्तौ हिमसम्पातपरिक्लेशवशां दशाम् ।
अरण्ये मालतीस्तम्ब इव याति निरन्तरम् ॥ १७ ॥
उष्णर्त्तावुष्णकिरणकिरणैरतिदारुणैः ।
क्लान्तायं चानुभवति स्वम्बेरम इवाधिकम् ॥ १८ ॥

तदेवं सर्व्वकालेषु वनवासी निराश्रयः ।
पृथग्जन इवैकाकी वत्सो मे दुःखभाजनम् ॥ १९ ॥
त्रैलोक्यस्वामिताभाजः स्वसूनोस्तस्य सम्पति ।
पश्य सम्पदमित्युक्त्वारोहयामास तां गजे ॥ २० ॥
सुवर्णवज्रमाणिक्यभूषणैस्तुरगैर्गजैः ।
पत्तिभिः स्यन्दनैर्मूर्त्तश्रीमयैः सोऽचलत्ततः ॥ २१ ॥
सैन्यैर्भूषणभाःपुञ्जकृतजङ्गमतोरणैः ।
गच्छन् दूरादपि नृपोऽपश्यद्रत्नध्वजं पुरः ॥ २२ ॥
मरुदेवामथावादीद्भरतः पुरतो मुदः ।
प्रभोः समवसरणं देवि देवैर्विनिर्मितम् ॥ २३ ॥
अयं जयजयारावतुमुलस्त्रिदिवौकसाम् ।
श्रूयते तातपादान्ते सेवोत्सवमुपेयुषाम् ॥ २४ ॥
मालवकैशिकीमुख्यग्रामरागपवित्रिता ।
कर्णामृतमियं वाणी स्वामिनो देशनाकृतिः ॥ २५ ॥
मयूरसारसक्रौञ्चहंसाद्यैः स्वरस्वराधिका ।
आकर्ण्यते दत्तकर्णैः स्वामिनो गीः सविस्मयम् ॥ २६ ॥
तातस्य तोयदस्येव घनगर्जितजादिह ।
श्रुते मनोबलाकेव बलवद्देवि धावति ॥ २७ ॥
त्रैलोक्यभर्त्तुर्गम्भीरां वाणीं संसारतारिणीम् ।
निर्वातदीपनिस्पन्दा मरुदेवा मुदाऽशृणोत् ॥ २८ ॥
शृण्वन्त्यास्तां गिरं देव्या मरुदेव्या व्यलोयत ।
आनन्दाश्रुपयःपूरैः पङ्कवत्पटलं दृशोः ॥ २९ ॥

साऽपश्यत्तीर्थकृल्लक्ष्मीं तस्याऽतिशयशालिनीम् ।
तस्यास्तद्दर्शनानन्दस्थैर्यात्तमं व्यशीर्यत ॥ १० ॥
भगवद्दर्शनानन्दयोगस्थैर्यमुपेयुषी ।
केवलज्ञानमज्ञानमाससाद तदैव सा ॥ ११ ॥
करिस्कन्धाधिरूढैव प्रागायुःकर्मसङ्क्षया ।
अन्तकृत्केवलित्वेन निर्वाणं मरुदेव्यगात् ॥ १२ ॥
एतस्यामवसर्पिण्यां सिद्धोऽसौ प्रथमस्ततः ।
क्षीराब्धौ तद्वपुः क्षिप्ता चक्रे मोक्षोत्सवः सुरैः ॥ १३ ॥
ततो विज्ञाततन्मोक्षो हर्षशुग्भ्यां समं नृपः ।
अभ्रच्छायार्कतापाभ्यां शरत्काल इवाश्रि ॥ १४ ॥
समुत्सृज्य राज्यचिह्नानि पदातिः सपरिच्छदः ।
ततः समवसरणं प्रविवेश विशाम्पतिः ॥ १५ ॥
चतुर्भिर्देवनिकायैः स्वामी परिवृतस्तदा ।
ददृशे भरतेशेन दृक्चकोरनिशाकरः ॥ १६ ॥
त्रिः प्रदक्षिणीकृत्य भगवन्तं प्रणम्य च ।
मूर्ध्नि बद्धाञ्जलिः स्तोतुमिति चक्री प्रचक्रमे ॥ १७ ॥
जयाखिलजगन्नाथ जय विश्वाभयप्रद ।
जय प्रथमतीर्थेश जय संसारतारक ॥ १८ ॥
अद्यावसर्पिणीलोकपद्माकरदिवाकर ।
त्वयि दृष्टे प्रभातं मे प्रणष्टतमसोऽभवत् ॥ १९ ॥
भव्यजीवमनोवारिनिर्मलीकारकर्मणि ।
वाणी जयति ते नाथ कतकक्षोदसोदरा ॥ ४० ॥

तेषां दूरे न लोकाग्रं कारुण्यक्षीरसागर ।
समारोहन्ति ये नाथ त्वच्छासनमहारथम् ॥ ४१ ॥
लोकाग्रतोऽपि संसारमधिकं देव मन्महे ।
निष्कारणजगद्बन्धुर्यत्र साक्षात्त्वमीक्ष्यसे ॥ ४२ ॥
त्वद्दर्शनमहानन्दस्यन्दनिष्यन्दलोचनैः ।
स्वामिन् मोक्षसुखास्वादः संसारेऽप्यनुभूयते ॥ ४३ ॥
रागद्वेषकषायाद्यैरुद्धं जगद्रातिभिः ।
इदमुद्वेष्यते नाथ त्वयैवाभयसत्रिणा ॥ ४४ ॥
स्वयं ज्ञापयसे तत्त्वं मार्गं दर्शयसि स्वयम् ।
स्वयं च त्रायसे विश्वं त्वत्तो नाथामि नाथ किम् ॥ ४५ ॥
इति स्तुत्वा जगन्नाथं महीनाथशिरोमणिः ।
देशनावाक्सुधां पूर्णं कर्णाञ्जलिपुटं पपौ ॥ ४६ ॥
तदा ऋषभसेनादीन् भगवान्वृषभध्वजः ।
दीक्षयामास चतुरशीतिं गणधरान् स्वयम् ॥ ४७ ॥
अदीक्षयत्ततो ब्राह्मीं भरतस्य च नन्दनान् ।
शतानि पञ्च नप्तृंश्च शतानि सप्त नाभिभूः ॥ ४८ ॥
साधवः पुण्डरीकाद्याः साध्व्यो ब्राह्मादयोऽभवन् ।
श्रेयांसाद्याः श्रावकाश्च श्राविकाः सुन्दरीमुखाः ॥ ४९ ॥
एवं चतुर्विधः सङ्घः स्थापितः स्वामिना तदा ।
ततःप्रभृति सङ्घस्य सर्वेषां व्यवस्थितिः ॥ ५० ॥
स्वाम्यथो भव्यबोधायान्यतोऽगात्सपरिच्छदः ।
तं नत्वा भरताधीशोऽप्ययोध्यां नगरीं ययौ ॥ ५१ ॥

तत्र नाभ्यङ्गभूवंशरत्नाकरनिशाकरः ।
यथाविधि जुगोपोर्व्वीं न्यायो विग्रहवानिव ॥ ५२ ॥
चतुःषष्टिः सहस्राणि बभूवुस्तस्य वल्लभाः ।
अनुचर्यः श्रियो यासां जज्ञिरे रूपसम्पदा ॥ ५३ ॥
तस्मिन्नर्द्धासनासीने वासवस्य दिवौकसः ।
द्वयोर्भेदमजानन्तः पेतुः प्रणतिसंशये ॥ ५४ ॥
प्रारब्धदिग्जयः पूर्वं पूर्वस्यां भानुमानिव ।
सोऽगाज्जितान्यतेजोभिस्तेजोभिर्द्योतयन् जगत् ॥ ५५ ॥
उत्क्षिप्तार्घमिवोद्वीचिहस्तविन्यस्तविद्रुमैः ।
गङ्गासम्भेदसुभगं स प्रापत् पूर्वसागरम् ॥ ५६ ॥
मागधतीर्थकुमारं देवं मनसिकृत्य च ।
प्रपेदेऽष्टमभक्तं सोऽर्थसिद्धेर्द्वारमादिमम् ॥ ५७ ॥
यादांसि त्रासयन्नाशु रथेनारुह्य रंहसा ।
जलधिं मन्दरेणेव जगाहे स महाभुजः ॥ ५८ ॥
रथनाभ्युदये तोये स्थित्वा द्वादशयोजनीम् ।
बाणं दूतमिव प्रैषीन्नामाङ्कं मागधाय सः ॥ ५९ ॥
अथ मागधतीर्थस्य पतिर्निपतिते शरे ।
चुकोप विकटाटोपभ्रुकुटीभङ्गभीषणम् ॥ ६० ॥
शरे मन्त्राक्षराणीव तस्य नामाक्षराण्यसौ ।
दृष्ट्वा नागकुमारोऽभूद्विनतास्तं शान्तमानसः ॥ ६१ ॥
प्रथमश्चक्रवर्त्येष उत्पन्न इति चिन्तयन् ।
उपतस्थे स भरतं विजयो मूर्त्तिमानिव ॥ ६२ ॥

शरचूडामणिरमिं निजं चूडामणिं फणी ।
चिराञ्चितं तेज इवोपानयत्सच्छरं च सः ॥ ६३ ॥
तवाहं पूर्वदिक्पालः किङ्करः करवाणि किम् ।
इति विज्ञपयन् राज्ञा सोऽनुजज्ञे महौजसा ॥ ६४ ॥
अथ स्तम्भमिवारोप्य तत्र तं मागधाधिपम् ।
पूर्वनीरनिधेस्तीरात्स देवो न्यवर्त्तत ॥ ६५ ॥
उर्व्वीमुर्व्वीं कुर्वाणश्चलयञ्चलानपि ।
चतुरङ्गबलेनाथ प्रपेदे दक्षिणोदधिम् ॥ ६६ ॥
एलालवङ्गलवलीककोलबहुले तटे ।
सैन्यान्यावासयामास सदोर्वीर्यपुरन्दरः ॥ ६७ ॥
तेजसा स दुरालोको द्वितीय इव भास्करः ।
महावाहं महावाहुरारुरोह महारथम् ॥ ६८ ॥
तरङ्गैरिव रङ्गद्भिस्ततस्तुङ्गैस्तुरङ्गमैः ।
रथनाभ्युदयं तोयं लङ्घते स महोदधिम् ॥ ६९ ॥
वरदामाभिमुखं च सज्जीकृतशरासनः ।
धनुर्वेदोङ्कारमिव ज्याभिर्घोषं ततान सः ॥ ७० ॥
सौवर्णकर्णताडङ्कपद्मनालतुलास्पृशम् ।
काञ्चनं सन्दधे बाणमाकर्णाकृष्टकार्मुके ॥ ७१ ॥
वरदामाख्यतीर्थेशमभि श्रीभरतस्ततः ।
मुमोच नमुचिद्वेषिधामा नामाङ्कितं शरम् ॥ ७२ ॥
वरदामपतिर्बाणं प्रेक्ष्य च प्रतिष्ठा च ।
भरतं प्रत्युपायञ्च उपायनमुपानयत् ॥ ७३ ॥

जवे च भरताधीशं धन्योऽस्मि यद्दिशागमः।
नाथेन भवता नाथ सनाथोऽहमतः परम् ॥ ७४ ॥
ततस्तमात्मसात्कृत्वा कृत्यविज्ञरतेश्वरः।
प्रति प्रतीचीमचलचलयन्नचलां बलैः ॥ ७५ ॥
अपरार्णवमासाद्य प्रभासाभिमुखं शरम्।
जाज्वल्यमानं भरतस्तडिद्दण्डमिवाक्षिपत् ॥ ७६ ॥
दण्डं प्रयच्छ कुर्वाज्ञां जिजीविषसि चेत्सुखम्।
इत्यक्षराणि तत्राणि प्रभासपतिरैक्षत ॥ ७७ ॥
प्राज्यानि प्रगुणीकृत्य प्राभृतान्यद्भुतानि सः।
चचाल शरमादाय प्रसादयितुमार्षभिम् ॥ ७८ ॥
हारानोहारहारिणानाजहारातिहारिणः।
चिरकालार्जितानात्मयशोराशीनिवाखिलान् ॥ ७९ ॥
येषामग्रे ह्युषत्कल्पो रमारमणकौस्तुभः।
तांस्तान्विश्राणयामास मणीश्वरशिरोमणीः ॥ ८० ॥
कटकानि कटीसूत्रं चूडामणिमुरोमणिम्।
निष्कादि चार्पयद्राज्ञे मूर्त्तं तेज इव स्वकम् ॥ ८१ ॥
इति प्रसादितस्तेनाच्छद्मना भक्तिसद्मना।
भरतोऽगात्सदीं सिन्धुमुत्तरद्वारदेहलीम् ॥ ८२ ॥
निकषा सिन्धुभवनं निदधे शिविरं नृपः।
सिन्धुदेवीं समुद्दिश्य विदधे चाष्टमं तपः ॥ ८३ ॥
सिन्धुरासनकम्पेन ज्ञात्वा चक्रिणमागतम्।
उपेत्योपायनैर्दिव्यैरानर्च पृथिवीपतिम् ॥ ८४ ॥

तामुरीकृतसेवां च विसृज्य कृतपारणः।
अष्टाह्निकोत्सवं तस्या विदधे [1]वसुधाधवः ॥ ८५ ॥
सोऽथ चक्रानुगो गच्छन् ककुभोत्तरपूर्वया।
भरतार्धद्वयाघाटं वैताढ्याद्रिमवाप च ॥ ८६ ॥
नितम्बे दक्षिणे तस्य विन्यस्तशिबिरस्ततः।
अधिवैताढ्यकुमारं नृपतिर्विदधेऽष्टमम् ॥ ८७ ॥
विज्ञायावधिना सोऽपि दिव्यैस्तैस्तैरुपायनैः।
उपतस्थे महीपालं सेवां च प्रत्यपद्यत ॥ ८८ ॥
तं विसृज्य नृपश्चक्रेऽष्टमभक्तान्तपारणम्।
अष्टाह्निकोत्सवं तस्य विदधे च यथाविधि ॥ ८९ ॥
गुहां तमिस्रामभितस्तमिस्रारिरिव त्विषा।
जगाम तददूरे च स्कन्धावारं न्यधान्नृपः ॥ ९० ॥
कृतमालामरं तत्र स उद्दिश्याष्टमं व्यधात्।
सोऽपि ज्ञात्वासनकम्पादागत्योपैत्य भूपतिम् ॥ ९१ ॥
विसृज्य तमपि क्ष्मापः कृत्वा चाष्टमपारणम्।
विदधेऽष्टाह्निकां तस्य महोत्सवपुरःसरम् ॥ ९२ ॥
सुषेणो भरतादेशात्सिन्धुमुत्तीर्य चर्मणा।
तरसा साधयामास दक्षिणं सिन्धुनिष्कुटम् ॥ ९३ ॥
करं ततस्तन्म्लेच्छानामादाय स्वेच्छयाथ सः।
उत्तीर्य चर्मणा सिन्धुमाययौ भरतेश्वरम् ॥ ९४ ॥

---

(१) क ख वसुधाधिपः।

वैताढ्ये तमिस्रां वज्रकपाटपिहितां गुहाम् ।
उद्घाटयितुमादिक्षत् [1]सुषेणचमूभाक्प्रभुः ॥ ९५ ॥
सुषेणोऽपि प्रभोराज्ञां शेषामिव मूर्ध्नि धारयन् ।
प्रदेशेऽगात्तमिस्राया गुहाया अदवीयसि ॥ ९६ ॥
तदधिष्ठातृदेवं च कृतमालमनुस्मरन् ।
तस्थौ पौषधशालायामष्टमेन विशुद्धधीः ॥ ९७ ॥
स्नात्वा चाष्टमभक्तान्ते बाह्याभ्यन्तरशौचभृत् ।
पर्यधाच्छुचिवस्त्राणि विविधाभरणानि च ॥ ९८ ॥
होमकुण्डोपमे धूपदहने ज्वलदग्निके ।
धूपमुष्टीः क्षिपन् स्वार्थसाधनीराहुतीरिव ॥ ९९ ॥
ततः स्थानादसौ तस्या गुहाया द्वारमभ्यगात् ।
कोशद्वारं तदायुक्त इवोद्घाटयितुं त्वरो ॥ २०० ॥
दृष्टमात्रं तत्कपाटयुगलं प्रणनाम च ।
नेतारमिव तदन्तःप्रवेशः स्यात्कुतोऽन्यथा ॥ १ ॥
गुहाद्वारे ततोऽष्टाष्टमङ्गलालेखपूर्वकम् ।
सोऽष्टाह्निकामहिमानं चक्रे समहिमोचितम् ॥ २ ॥
दण्डरत्नं वज्रसारं सर्वशत्रुविनाशनम् ।
अथ सेनापतिर्वज्रं वज्रपाणिरिवाददे ॥ ३ ॥
पदानि कतिचित्त्वोपसृत्य वक्र इव ग्रहः ।
दण्डरत्नेन झटिति कपाटौ बिरताडयत् ॥ ४ ॥

---

(१) स च ततस्तत्प्रभाक्प्रभुः ।

पश्चाविवाद्रेर्दण्डेन दण्डरत्नेन ताडितौ ।
तडत्तडिति कुर्वाणौ विश्लिष्टौ तौ बभूवतुः ॥ ५ ॥
तद्गुहाद्वारवलदः सविकाशमुखो द्रुतम् ।
सुषेणो भरतायेदं गत्वा नत्वा व्यजिज्ञपत् ॥ ६ ॥
प्रद्याभूत्त्वत्प्रभावेण गुहाद्वारमपार्गलम् ।
यतेर्निःश्रेयसद्वारं तपसेवातिभूयसा ॥ ७ ॥
मघवैरावणमिवाधिरूढो गन्धवारणम् ।
तत्कालं भरताधीशो गुहाद्वारमुपाययौ ॥ ८ ॥
अन्धकारापहाराय मणिरत्नं न्यधान्नृपः ।
दक्षिणे कुम्भिनः कुम्भे पूर्वाद्राविव भास्करम् ॥ ९ ॥
ततोऽनुगचमूचक्रचक्रमार्गानुगो गुहाम् ।
प्रविवेश विशामीशो मेघमध्यमिवार्यमा ॥ १० ॥
गोमूत्रिकाक्रमेणानुयोजनान्तं तमश्छिदे ।
पार्श्वयोः काकिणीरत्नेमालिखन्मण्डलानि सः ॥ ११ ॥
दीप्रैरेकोनपञ्चाशन्मण्डलैः काकिणीकृतैः ।
मार्त्तण्डमण्डलोद्योतैस्तद्वाभ्योऽवहन्मुखम् ॥ १२ ॥
भूपोऽथापश्यदुन्मग्ननिमग्ने निम्नगे ययोः ।
एकत्रोन्मज्जति ग्रावाऽन्यस्यां मज्जत्यलाब्वपि ॥ १३ ॥
अतिदुस्तरताभाजोरपि सारथिलीलया ।
तयोर्नद्योरनवद्यां पद्यां व्यधित वर्द्धकिः ॥ १४ ॥
पद्यया ते समुत्तीर्य तद्गुहाकुहरान्नृपः ।
निरगच्छन्महामेघमण्डलादिव भास्करः ॥ १५ ॥

भरतो भरतक्षेत्रोत्तरखण्डं प्रविष्टवान् ।
अयुध्यत ततो म्लेच्छैर्दानवैरिव वासवः ॥ १६ ॥
जिता राज्ञा ¹महेशेन म्लेच्छाः प्रतिजयेच्छवः ।
उपासाञ्चक्रिरे मेघमुखान् स्वकुलदेवताः ॥ १७ ॥
मुसलाकारधाराभिरारादासारदारुणम् ।
ते प्रावर्त्तन्त संवर्त्त इव विष्वक् प्रवर्षितुम् ॥ १८ ॥
चर्मरत्नमधस्तेने राज्ञा द्वादशयोजनीम् ।
तदूर्द्ध्वं छत्ररत्नं मध्ये च निदधे चमूः ॥ १९ ॥
मणिरत्नमुरुध्वान्तध्वंसाय वसुधाधिपः ।
पूर्वाचल इवादित्यं छत्रदण्डे न्ययोजयत् ॥ २० ॥
नरदण्ड इवाराजत्तद्रत्नद्वयसम्पुटम् ।
ततस्तदादिलोकेऽभूद्ब्रह्माण्डमिति कल्पना ॥ २१ ॥
पूर्वाह्ने वापितान् शालीनपराह्ने च पश्चिमान् ।
प्रत्यावासं गृहपतिर्भोजनार्थमपूरयत् ॥ २२ ॥
वर्षं वर्षं च निर्व्विस्रैरूचे मेघकुमारकैः ।
किराताश्चक्रवर्त्त्येष न साध्योऽस्मादृशामपि ॥ २३ ॥
अम्लेच्छास्तद्गिरा म्लेच्छाः शरणं भरतं ययुः ।
अग्निना किल दग्धानामग्निरेव महौषधम् ॥ २४ ॥
ततश्चाजय्यमजयत्सिन्धोरुत्तरनिष्कुटम् ।
स्वाम्यादेशेन सेनानीः संसारमिव योगवित् ॥ २५ ॥

---

(१) ख ग च महेच्छेन ।

कैश्चित्प्रयाणकैर्गच्छन् गजेन्द्र इव लीलया।
नितम्बं दक्षिणं क्षुद्रहिमाद्रेः प्राप भूपतिः॥ २६॥
उद्दिश्य क्षुद्रहिमवत्कुमारं तत्र चार्षभिः।
चक्रेऽष्टमं कार्यसिद्धेस्तपोमङ्गलमादिमम्॥ २७॥
गत्वाष्टमान्ते हिमवत्पर्वतं त्रिरताडयत्।
साटोपो रथशीर्षेण शीर्षण्यः पृथिवीभुजाम्॥ २८॥
भरतेशस्ततः क्षुद्रहिमवद्गिरिमूर्द्धनि।
द्वासप्ततिं योजनानि नामाङ्कं बाणमक्षिपत्॥ २९॥
बाणमालोक्य हिमवत्कुमारो ऽभ्येत्य सत्वरम्।
भरताज्ञां स्वशिरसा शिरस्त्राणमिवाग्रहीत्॥ ३०॥
गत्वा ऋषभकूटाद्रिमृषभस्वामिभूस्ततः।
जघान रथशीर्षेण त्रिर्दन्तेनेव दन्तिराट्॥ ३१॥
अवसर्पिण्यां तृतीयारप्रान्ते भरतोऽस्म्यहम्।
चक्रीति वर्णान् काकिण्या तत्पूर्वकटकेऽलिखत्॥ ३२॥
ततो व्यावृत्य सद्वृत्तः स्कन्धावारं निजं ययौ।
चकाराष्टमभक्तान्तपारणं च महीपतिः॥ ३३॥
ततश्च क्षुद्रहिमवत्कुमारस्य नरेश्वरः।
अष्टाह्निकोत्सवं चक्रेऽनुरूपं चक्रिसम्पदः॥ ३४॥
ततो निववृते चक्रवर्त्ती चक्रपथानुगः।
सिन्धुगङ्गान्तरं कुर्वन् सङ्कटं विपुलैर्बलैः॥ ३५॥

---

(१) क ख अभ्येत्य।

नितम्बमुत्तरमथ वैताढ्याद्रेरवाप सः ।
तत्र सत्पपरीवारं स्कन्धावारं न्यधत्त च ॥ ३६ ॥
ततो नमिविनम्याख्यौ विद्याधरपती प्रति ।
आदिदेश विशामीशो मार्गणं दण्डमार्गणम् ॥ ३७ ॥
वैताढ्यशृङ्गादुत्तीर्य कुपितौ दण्डयाचनात् ।
आजग्मतुर्युयुत्सू तौ विद्याधरबलावृतौ ॥ ३८ ॥
कुर्वन्मणिविमानैर्द्यां बहुसूर्यमयीमिव ।
प्रज्वलद्भिः प्रहरणैस्तडिन्मालामयीमिव ॥ ३९ ॥
उद्दामदुन्दुभिध्वानैर्मेघघोषमयीमिव ।
विद्याधरबलं व्योमन्यपश्यद्भरतस्ततः ॥ ४० ॥
दण्डार्थिन् दण्डमस्मत्तस्त्वं गृह्णासीति भाषिणौ ।
आह्वयामासतुस्तौ विद्याढ्यौ मेदिनीपतिम् ॥ ४१ ॥
अथ ताभ्यां ससैन्याभ्यां प्रत्येकं युगपच्च सः ।
युयुधे विविधैर्युद्धैर्युद्धाख्यौ यज्जयश्रियः ॥ ४२ ॥
युधा द्वादशवार्षिक्या विद्याधरपती जितौ ।
प्राञ्जली प्रणिपत्यैवं भरताधीशमूचतुः ॥ ४३ ॥
रवेरुपरि किं तेजो वायोरुपरि को जवो ।
मोक्षस्योपरि किं सौख्यं कश्च शूरस्तवोपरि ॥ ४४ ॥
ऋषभो भगवान् साक्षादद्य दृष्टस्त्वमार्षभे ।
अज्ञानाद्योधितोऽस्माभिः कुलस्वामिन् सहस्व तत् ॥ ४५
किरीट इव नो मूर्ध्नि मण्डनं तव शासनम् ।
कोशो वपुरपत्यानि सर्वमन्यच्च तावकम् ॥ ४६ ॥

भक्तिगर्भमिति प्रोच्य भरतेशाय दत्तवान् ।
विनमो विनमिर्नारीरत्नं रत्नोचयं नमिः ॥ ४७ ॥
ततो राज्ञा विसृष्टौ तौ राज्यान्यारोप्य सूनुषु ।
विरक्तावृषभेशांह्रिमूले जगृहतुर्व्रतम् ॥ ४८ ॥
ततोऽपि चलितश्चक्ररत्नस्य पृष्ठतः ।
गच्छन्नासादयामास राजा मन्दाकिनीतटम् ॥ ४९ ॥
उत्तरं निष्कुटं गाङ्गं सुषेणोऽप्यभिषेणयन् ।
तरसा साधयामास किमसाध्यं महात्मनाम् ॥ ५० ॥
राजाप्यष्टमभक्तेन गङ्गादेवीमसाधयत् ।
आनर्च भरतं सापि देवतार्हैरुपायनैः ॥ ५१ ॥
ततो गङ्गानदीकूले कमलामोदमालिनि ।
वासागार इवोवास वसुमत्येकवासवः ॥ ५२ ॥
भरतं रूपलावण्यकिङ्करीकृतमन्मथम् ।
मत्वावलोक्य गङ्गापि प्राप क्षोभमयीं दशाम् ॥ ५३ ॥
विराजमाना सर्वाङ्गं मुक्तामयविभूषणैः ।
वदनेन्दोरनुगतैस्तारैस्तारागणैरिव ॥ ५४ ॥
वस्त्राणि कदलीगर्भत्वग्गर्भाणि बिभ्रती ।
स्वप्रवाहपयांसीव तद्रूपपरिणामतः ॥ ५५ ॥
रोमाञ्चकञ्चुकोदञ्चत्कुचस्फुटितकञ्चुका ।
सव्यस्तरञ्जितापाङ्गा गङ्गा भरतमभ्यगात् ॥ ५६ ॥

(त्रिभिर्विशेषकम्)

प्रेमगद्गदवादिन्या गाढमभ्यर्थ्य पार्थिवः ।
रिरंसमानया निन्ये तया निजनिकेतनम् ॥ ५७ ॥
भुञ्जानो विविधान् भोगांस्तया सह महीपतिः ।
एकाहमिव वर्षाणां सहस्रं सोऽत्यवाहयत् ॥ ५८ ॥
गुहां खण्डप्रपाताख्यामखण्डितपराक्रमः ।
ततः स्थानान्नृपः प्राप करटीव वनाद्वनम् ॥ ५९ ॥
कृतमालकवत्तत्र नाट्यमालमसाधयत् ।
अष्टमेन नृपस्तद्वत्तस्य चाष्टाह्निकां व्यधात् ॥ ६० ॥
सुषेणोद्घाटितद्वारकपाटां तां गुहां नृपः ।
प्राविशद्दक्षिणं तस्या द्वारमुज्जघटे स्वयम् ॥ ६१ ॥
निर्ययौ तद्गुहामध्यात्केशरीव नरेश्वरः ।
स्कन्धावारं च निदधे गाङ्गे रोधसि पश्चिमे ॥ ६२ ॥
नवापि निधयो नागकुमाराधिष्ठितास्तदा ।
गङ्गाकूलमनुप्राप्तं राजानमुपतस्थिरे ॥ ६३ ॥
इत्यूचुस्ते वयं गङ्गामुखमागधवासिनः ।
आगतास्त्वां महाभाग भवद्भाग्यैर्वशीकृताः ॥ ६४ ॥
यथाकाममविश्रान्तमुपभुङ्क्ष्व प्रयच्छ च ।
अपि क्षीयेत पाथोऽब्धौ न तु क्षीयामहे वयम् ॥ ६५ ॥
सहस्रैर्नवभिर्यक्षैः किङ्करैरिव तावकैः ।
आपूर्यमाणाः सततं चक्राष्टकप्रतिष्ठिताः ॥ ६६ ॥
द्वादशयोजनायामा नवयोजनविस्तृताः ।
भूमध्ये सञ्चरिष्यामो देव त्वत्पारिपार्श्विकाः ॥६७॥ (युग्मम्)

सेनापतिः सुषेणोऽपि गङ्गादक्षिणनिष्कुटम् ।
महावनं महावायुरिवोन्मूल्य समाययौ ॥ ६८ ॥
समा सहस्रैः षष्ट्यैवं जित्वा षट्खण्डमेदिनीम् ।
चक्रमार्गानुगोऽयोध्यां जगाम जगतीपतिः ॥ ६९ ॥
ततो द्वादशभिर्वर्षैरागत्यागत्य पार्थिवैः ।
प्रचक्रे चक्रवर्तित्वाभिषेको भरतेशितुः ॥ ७० ॥
कुर्वता स्वकुटुम्बस्य सारां च ददृशे कृशाम् ।
सुन्दरीं चास्थिभूतां च चुकोप भरतेश्वरः ॥ ७१ ॥
ऊचे प्राहरिकान् किं रे मद्गेहे नास्ति भोजनम् ।
यदेवमीदृशी जाता अस्थिचर्ममयी कथम् ॥ ७२ ॥
स्वामिन् विजययात्राभूत्तव तावत्प्रभृत्यपि ।
आचामाम्लान्यविश्रान्तमकार्षीत्सुन्दरी यतः ॥ ७३ ॥
अत्रान्तरे च भगवान् विहृत्य वसुधातले ।
भगवान् समवासार्षीदष्टापदगिरौ ततः ॥ ७४ ॥
श्रुत्वा च भरताधीशः स्वामिवन्दनहेतवे ।
आगात्तद्देशनां श्रुत्वा व्रतं जग्राह सुन्दरी ॥ ७५ ॥
भ्रातॄननागतान् ज्ञात्वा तस्मिन्नपि महोत्सवे ।
तेषामेकैकशो दूतान् प्राहिणोद्भरतेश्वरः ॥ ७६ ॥
राज्यानि चेदमीहध्वे सेवध्वं भरतं ततः ।
दूतैरित्युदिताः सर्वेऽप्यालोच्यैवावदन्निदम् ॥ ७७ ॥
विभज्य राज्यं दत्तं नस्तातेन भरतस्य च ।
संसेव्यमानो भरतोऽधिकं किं नः करिष्यति ॥ ७८ ॥

समापतन्तं किं काले कालं प्रस्खलयिष्यति ।
किं जराराक्षसीं देहयाहिणीं नियहीष्यति ॥ ७९ ॥
बाधाविधायिनः किं वा व्याधिव्याधान् हनिष्यति ।
यथोत्तरं वर्धमानां तृष्णां वा दलयिष्यति ॥ ८० ॥
ईदृक्सेवाफलं दातुं न चेद्भरत ईश्वरः ।
मनुष्यभावे सामान्ये तर्हि कः केन सेव्यताम् ॥ ८१ ॥
प्राज्यराज्योऽप्यसन्तोषादस्मद्राज्यं जिघृक्षति ।
स्वाम्या चेत्तद्वयमपि तस्य तातस्य सूनवः ॥ ८२ ॥
अविज्ञपय्य तातं तु सोदर्येणाग्रजन्मना ।
दूत त्वत्स्वामिना योद्धुं न वयं प्रोत्सहामहे ॥ ८३ ॥
ते दूतानभिधायैवमृषभस्वामिनं ययुः ।
नत्वा भरतसन्दिष्टं [1]तच्च सर्व्वं व्यजिज्ञपन् ॥ ८४ ॥
अम्लानकेवलादर्शसंक्रान्ताशेषविष्टपः ।
कृपावान् भगवानादिनाथोऽपीत्यादिदेश तान् ॥ ८५ ॥
अनेकयोनिसम्पातानन्तबाधानिबन्धनम् ।
अभिमानफलैवेयं राज्यश्रीः सापि नश्वरी ॥ ८६ ॥
किञ्च या स्वःसुखैस्तृष्णा नात्रुट्यत्प्राग्भवेषु वः ।
साङ्गारकारकस्येव मर्त्यभोगैः कथं त्रुटेत् ॥ ८७ ॥
अङ्गारकारकः कश्चिदादाय पयसो दृतिम् ।
जगाम कर्तुमङ्गारानरण्ये तोयवारिणि ॥ ८८ ॥

---

(१) च तत्सकलं व्यजिज्ञपन् ।

सोऽङ्गारानलसन्तापान्मध्याह्नातपयोगितात् ।
उद्भूतया तृषाक्रान्तः सर्वं दृतिपयः पपौ ॥ ८९ ॥
तेनाप्यच्छिन्नतृष्णः सन् सुप्तः स्वप्ने गृहं गतः ।
आलूकलशनन्द्रानामुदकान्यभितोऽप्यपात् ॥ ९० ॥
तज्जलैरप्यशान्तायां तृष्णायामग्नितैलवत् ।
वापीकूपतडागानि पायंपायमशोषयत् ॥ ९१ ॥
तथैव दृषितोऽथापात्सरितः सरितांपतीन् ।
न तु तस्य तृषात्रुट्यन्नारकस्येव वेदना ॥ ९२ ॥
मरुकूपे ततो यातः कुशपूलं स रज्जुभिः ।
बद्ध्वा चिक्षेप पयसे किमार्त्तः कुरुते न हि ॥ ९३ ॥
दूराम्बुत्वेन कूपस्य मध्येऽपि गलिताम्बुकम् ।
निश्च्योत्य पूलं द्रमकः स्नेहप्रोतमिवापिबत् ॥ ९४ ॥
न छिन्ना यार्णवाद्यैस्तृट् छेद्या पूलाम्भसा न सा ।
तद्वद्वः स्वःसुखाच्छिन्ना छेद्या राज्यश्रिया किमु ॥ ९५ ॥
अमन्दानन्दनिःस्यन्दिनिर्वाणप्राप्तिकारणम् ।
वत्साः संयमराज्यं तद्युज्यते वो विवेकिनाम् ॥ ९६ ॥
तत्कालोत्पन्नवैराग्यवेगा भगवदन्तिके ।
तेऽष्टानवतिरप्याशु प्रव्रज्यां जगृहुस्ततः ॥ ९७ ॥
अहो धैर्यमहो सत्त्वमहो वैराग्यधीरिति ।
चिन्तयन्तस्तत्स्वरूपं दूता राज्ञे व्यजिज्ञपन् ॥ ९८ ॥
तत् श्रुत्वा भरतस्तेषां राज्यानि जगृहे स्वयम् ।
लाभाद्विवर्द्धितो लोभो राजधर्मो ह्यसौ सदा ॥ ९९ ॥

अथ विज्ञपयामास सेनानीर्भरतेश्वरम् ।
न चक्रं चक्रशालायां विशत्यद्यापि नः प्रभो ॥ ४०० ॥
स्वामिन् दिग्विजये कश्चिदाज्ञावाह्यो नृपः क्वचित् ।
विवर्त्तते ढोल इव वरङ्गे भ्रमति प्रभो ॥ १ ॥
चाः ज्ञातं भरतोऽवादील्लोकोत्तरपराक्रमः ।
भ्रातास्मन्मे महाबाहुरेको बाहुबलिर्बली ॥ २ ॥
एकतो गरुडश्चैकोऽन्यतोऽप्यहिकुलानि च ।
मृगारिरेको यत्कुर्य्यान्मृगकुलाः .... ॥ ३ ॥
एकतः संहताः सर्वे देवदानवमानवाः ।
तथान्यतो बाहुबलिः प्रतिमल्लो न विद्यते ॥ ४ ॥
एकतश्चक्रशालायां चक्रं न प्रविशत्यदः ।
नेच्छत्याज्ञामन्यतो बाहुः सङ्कटे पतितोऽस्म्यहम् ॥ ५ ॥
किंवा बाहुबलिः सोऽयमाज्ञां कस्यापि मन्यते ।
सहते नाम पर्य्याणं केसरी किं कदाचन ॥ ६ ॥
एवं विमृशतस्तस्य सेनानीर्जगदे स्फुटः ।
स्वामिंस्त्वद्बलस्याग्रे त्रैलोक्यं च तृणायते ॥ ७ ॥
वैमात्रेयं कनीयांसमथ बाहुबलिं प्रति ।
दूतं तक्षशिलापुर्य्यां प्रेषयामास पार्थिवः ॥ ८ ॥
शैलशृङ्गे सिंहमिवोत्तुङ्गसिंहासने स्थितम् ।
नत्वा बाहुबलिं दूतो युक्तियुतमवोचत ॥ ९ ॥
त्वमेकः श्लाघ्यसे यस्य ज्येष्ठो भ्राता जगज्जयी ।
षट्खण्डभरताधीशो लोकोत्तरपराक्रमः ॥ १० ॥

त्वद्भ्रातुश्चक्रवर्त्तित्वाभिषेके के महीभुजः।
अकृत्वोपायनकराः करदीभूय नाययुः॥ ११॥
सूर्योदय इवाम्भोजखण्डस्य भरतोदयः।
श्रिये तवैव किन्त्वस्याभिषेके न त्वमागमः॥ १२॥
ततः कुमार भवतो ऽसमागमनकारणम्।
ज्ञातुं राज्ञा नयज्ञेनाज्ञापितोऽहमिहागमम्॥ १३॥
नागा यथार्जवेनापि तत्र कोऽपि जनः पुनः।
तवाविनीततां ब्रूते यच्छिद्रान्वेषिणः खलाः॥ १४॥
पिशुनानां प्रवेशं तद्यत्नाद्रोपयितुं तव।
आगन्तुं युज्यते तत्र का त्रपा स्वाम्युपासने॥ १५॥
भ्रातेति यदि निर्भीको नागास्तदपि नोचितम्।
आज्ञासारा न सहन्ते ज्ञातेयेन महीभुजः॥ १६॥
अयस्कान्तैरिवायांसि देवदानवमानवाः।
कृष्टास्तेजोभिरधुना श्लोकं भरतमन्वगुः॥ १७॥
यमर्द्धासनदानेन वासवोऽपि सखीयति।
सेवामात्रेण तं हन्तानुकूलयसि किं नहि॥ १८॥
वीरमानितया यद्वा राजानमवमन्यसे।
त्वं हि तस्मिन् ससैन्योऽपि समुद्रे सक्तुमुष्टिवत्॥ १९॥
लक्षाश्चतुरशीतिस्तद्गजाः शक्रेभसन्निभाः।
सज्जाः केनाभिसर्प्यन्तः पर्व्वता इव जङ्गमाः॥ २०॥
तावतोऽश्वान् रथांश्चास्य विष्वक् प्लावयतो महीम्
कल्लोलानिव कल्पान्तोदधेः कः स्खलयिष्यति॥ २१॥

तस्य पञ्चवतिग्रामकोटिभर्त्तुः पदातयः ।
कोट्यः पञ्चवतिः सिंहा इव त्रासाय कस्य न ॥ २२ ॥
एकः सुषेणसेनानीर्दण्डपाणिः समापतन् ।
कृतान्त इव किं शक्यः सोढुं देवासुरैरपि ॥ २३ ॥
अमोघं बिभ्रतश्चक्रं चक्रिणो भरतस्य तु ।
सूर्यस्येव तमस्तोमः स्तोकिकैव त्रिलोक्यपि ॥ २४ ॥
तेजसा वयसा ज्येष्ठो नृपश्रेष्ठः स सर्वथा ।
राज्यजीवितकामेन सेव्यो बाहुबले त्वया ॥ २५ ॥
अथ बाहुबलिर्बाहुबलापास्तजगद्बलः ।
ऊचे भ्रूभङ्गभृद्दोरध्वानोऽर्णव इवापरः ॥ २६ ॥
युक्तं यदुक्तं भवता लोभनं क्षोभणं वचः ।
दूताः खलु यथावस्थस्वामिवाचिकवाचिनः ॥ २७ ॥
सुरासुरनरेन्द्रार्च्यो न तातोऽसमविक्रमः ।
श्लाघाहेतुर्मे भरतः कीर्त्तितो दूत नूतनः ॥ २८ ॥
करदीभूय भूपाला नागच्छन्तु कथं नु तम् ।
इष्यते नत्वसौ यस्य भ्राता बाहुबलिर्बली ॥ २९ ॥
आवयोर्ननु मार्त्तण्डपङ्करुट्खण्डयोरिव ।
किं न स्याद्व्यवहितयोरपि प्रीतिः परस्परम् ॥ ३० ॥
सदा मनसि तिष्ठामस्तस्य भ्रातुर्गुरोर्वयम् ।
गत्वा किमतिरिच्येत प्रीतिर्नैसर्गिकी हि नः ॥ ३१ ॥
आर्जवाद्वागताः सत्यं कौटिल्यं भरतेन किम् ।
विश्रम्भकारिणः सन्तो दूयन्ते किं खलोक्तिभिः ॥ ३२ ॥

एक एवावयोः स्वामी भगवानादितीर्थकृत् ।
तस्मिन्विजयिनि स्वामी कथङ्कारं ममापरः ॥ ३३ ॥
भ्राताऽस्वामीः स चाज्ञेश आज्ञापयतु यद्बलम् ।
ज्ञातिस्नेहेन किं वज्रं वज्रेण न विदार्यते ॥ ३४ ॥
सुरासुरनरोपास्त्या प्रीतोऽस्त्वेष भयास्य किम् ।
मार्ग एव क्षमः स्वस्थे रथः सज्जोऽपि भज्यते ॥ ३५ ॥
तातभक्तो महेन्द्रश्चेज्ज्येष्ठं तं तातनन्दनम् ।
आमयत्यासनस्यार्धे स किं तेनापि हृष्यति ॥ ३६ ॥
तेऽन्ये तस्मिन् समुद्रे ये ससैन्याः सक्तुमुष्टिवत् ।
तेजोभिर्दुःसहोऽहं तु शक्त स्यां वडवानलः ॥ ३७ ॥
पत्तयोऽश्वा रथा नागाः सेनानीर्भरतोऽपि च ।
मयि सर्वे प्रलीयन्तां तेजांसीवार्कतेजसि ॥ ३८ ॥
याहि दूत स एवैतु राज्यजीवितकाम्यया ।
तातदत्तांशतुष्टेन मयैवोपेक्षितास्य भूः ॥ ३९ ॥
दूतेनागत्य विज्ञप्ते यथार्थे तेन तत्क्षणम् ।
युयुत्सुर्बाहुबलिना भरतोऽथाभ्यषेणयत् ॥ ४० ॥
छादयन्मेदिनीं सैन्यैर्घनस्तुंग्यां घनैरिव ।
महाबाहुस्ततो बाहुबलिर्भरतमभ्यगात् ॥ ४१ ॥
उभयोरपि वाहिन्योर्महासुभटयादसोः ।
अन्योऽन्यास्फालितास्तोर्मिः सम्फेटोऽभूद्भयानकः ॥ ४२ ॥
तत्सैनिकानामन्योऽन्यं कुन्ताकुन्ति शराशरि ।
आमन्त्रितस्याद्यदेवः प्रावर्त्तत रणक्षणः ॥ ४३ ॥

पर्यस्याशेषसैन्यानि तूलानीव महाबलः ।
अभ्येत्य भरतं बाहुबलिरेवमवोचत ॥ ४४ ॥
हस्त्यश्वपत्तिघातेन किं मुधा पापदायिना ।
यद्यलं तत्त्वमेकाकी युद्धस्वैकाकिना मया ॥ ४५ ॥
एकाङ्गाजिं प्रतिज्ञाय द्वाभ्यामपि निवारिताः ।
सैनिका उभयेऽप्यस्थुः पश्यन्तः साक्षिणो यथा ॥ ४६ ॥
ततो दृग्युद्ध आरब्धे निर्निमेषविलोचनौ ।
देवैरपि नृदेवौ तौ देवाविति वितर्कितौ ॥ ४७ ॥
भरते निर्जिते तत्र [1]साक्षीभूतामरं तयोः ।
वाग्युद्धमभवत्पक्षप्रतिपक्षपरिग्रहात् ॥ ४८ ॥
तत्रापि हीनवादित्वं भरते समुपेयुषि ।
भूभुजौ भुजयुद्धेन युयुधाते महाभुजौ ॥ ४९ ॥
भरतो लम्बमानोऽथ बाहौ बाहुबलेः स्थिरे ।
शाखामृगो महाशाखिशाखायामिव रेजितः ॥ ५० ॥
भरतस्य महाबाहोरपि बाहुबलिर्बली ।
एकेन बाहुना बाहुं लतानालमनामयत् ॥ ५१ ॥
प्रारब्धे मुष्टियुद्धेऽथ पेतुर्भरतमुष्टयः ।
बाहुबली समुद्रोर्मिघाता इव तटाचले ॥ ५२ ॥
आहतो बाहुबलिना वज्रकल्पेन मुष्टिना ।
पपात भरतः पृथ्व्यां स्वसैन्याऽश्रुजलैः सह ॥ ५३ ॥

---

(१) ख ग घ सभ्यीभूतामरं तयोः ।

मूर्ध्न्यंसे भरतो बाहुबलिं दण्डेन दर्पतः।
ताडयामास दन्तीव तिर्यग्दन्तेन पर्वतम् ॥ ५४ ॥
दण्डेन बाहुबलिना निहतो भरतस्ततः।
भूम्यामाजानुमग्नोऽस्थाद्विखात इव कीलकः ॥ ५५ ॥
किमेष चक्रवर्त्तीति भरतः जातसंशयः।
यावत्संस्मृतवांश्चक्रं तावदागात्करेऽस्य तत् ॥ ५६ ॥
भूमेर्निःसृत्य कोपेन महता भरतेश्वरः।
चिक्षेप प्रज्वलच्चक्रं जातहाहारवं बलैः ॥ ५७ ॥
तच्चक्रं पार्श्वतो बाहुबलेर्भ्रान्त्वा न्यवर्त्तत।
दैवतानि हि शस्त्राणि स्वगोत्रे प्रभवन्ति न ॥ ५८ ॥
अचक्रं प्रेक्ष्य तद्बाहुबलिः कोपारुणेक्षणः।
सचक्रं चूर्णयाम्येनमिति मुष्टिमुदक्षिपत् ॥ ५९ ॥
असाविव कषायैर्धिगहं भ्रातृवधोद्यतः।
विजित्य करणग्रामं कषायानेव हन्मि ताम् ॥ ६० ॥
इति सञ्जातसंवेगस्तदा तेनैव मुष्टिना।
केशानुत्पाटयामास सामायिकमथाददे ॥ ६१ ॥
साधु साध्विति सानन्दं व्याहरन्तः सुरासुराः।
उपरिष्टाद्बाहुबलेः पुष्पवृष्टिं वितेनिरे ॥ ६२ ॥
गत्वा भगवतः पार्श्वे ज्ञानातिशयशालिनाम्।
कनीयसां सोदराणां विधास्ये वन्दनां कथम् ॥ ६३ ॥
उत्पन्नकेवलज्ञानस्तत्तां यास्यामि पर्षदम्।
इति तत्रैव मौनेन सोऽस्थात्प्रतिमया कृती ॥६४॥ (युग्मम्)

भरतस्तं तथादृष्ट्वा विचार्य स्वं कुकर्म च ।
बभूव न्यञ्चितग्रीवो विविक्षुरिव मेदिनीम् ॥ ६५ ॥
शान्तरसं मूर्तमिव भ्रातरं प्रणनाम च ।
नेत्रयोरश्रुभिः कोष्णैः कोपशेषमिवोत्सृजन् ॥ ६६ ॥
प्रणमन् भरतस्तस्याऽधिकोपास्तिविधित्सया ।
नखादर्शेषु संक्रान्त्या नानारूप इवाभवत् ॥ ६७ ॥
सुनन्दानन्दनमुनेर्गुणस्तवनपूर्विकाम् ।
स्वनिन्दामित्यथाकार्षीत्स्वापवादगदौषधीम् ॥ ६८ ॥
धन्यस्त्वं तत्यजे येन राज्यं मदनुकम्पया ।
पापोऽहं यदसन्तुष्टो दुर्मदस्त्वामुपाद्रवम् ॥ ६९ ॥
स्वशक्तिं ये न जानन्ति ये चान्यायं प्रकुर्वते ।
जीयन्ते ये च लोभेन तेषामस्मि धुरन्धरः ॥ ७० ॥
राज्यं भवतरोर्बीजं ये न जानन्ति तेऽधमाः ।
तेभ्योऽप्यहं विशिष्ये यत्तदमुञ्चन् विदन्नपि ॥ ७१ ॥
त्वमेव पुत्रस्तातस्य यस्तातपथमन्वगः ।
पुत्रोऽहमपि तस्य स्यां चेद्भवामि भवादृशः ॥ ७२ ॥
विषादपङ्कमुत्क्षाय पश्चात्तापजलैरिति ।
तत्पुत्रं सोमयशसं तद्राज्ये स न्यवीविशत् ॥ ७३ ॥
तदादिसोमवंशोऽभूच्छाखाशतसमाकुलः ।
नानापुरुषरत्नानामेकमुत्पत्तिकारणम् ॥ ७४ ॥
ततो बाहुबलिं नत्वा भरतः सपरिच्छदः ।
पुरीमयोध्यामगमत्स्वराज्यश्रीसहोदराम् ॥ ७५ ॥

दुस्तपं तप्यमानोऽथ तपो बाहुबलिर्मुनिः ।
वर्षमेकं व्यतीयाय सह प्राग्जन्मकर्मभिः ॥ ७६ ॥
ततश्चामूढलक्ष्येण स्वामिना नाभिसूनुना ।
ब्राह्मी च सुन्दरी चानुज्ञाते तत्पार्श्वमीयतुः ॥ ७७ ॥
ऊचतुश्च महासत्त्व समस्वर्णाश्मनस्तव ।
न युक्तं त्यक्तसङ्गस्य करिस्कन्धाधिरोहणम् ॥ ७८ ॥
एवम्भूतस्य ते हन्त कथं ज्ञानं प्ररोहति ।
अधःस्थितकरीषाग्नेः पादपस्येव पल्लवः ॥ ७९ ॥
आत्मनैव विचार्य त्वमुत्तितीर्षुर्भवोदधिम् ।
हस्तिनोऽस्मादवतर तरण्डादायसादिव ॥ ८० ॥
ततोऽसौ चिन्तयामास कुतस्त्यो हस्तिसङ्गमः ।
पादपारोहमारूढवत्नीव वपुषो मम ॥ ८१ ॥
त्यजेन्मुद्रां समुद्रोऽपि चलेयुरचला अपि ।
इमे तु भगवच्छिष्ये भाषेते न मृषा क्वचित् ॥ ८२ ॥
आः ज्ञातमथवाऽस्त्येष मान एव मतङ्गजः ।
स एव मे ज्ञानफलं बभञ्ज विनयद्रुमम् ॥ ८३ ॥
कथं कनीयसो भ्रातृन्वन्दे धिगिति चिन्तितम् ।
तपसा ज्यायसां तेषां मिथ्यादुष्कृतमस्तु मे ॥ ८४ ॥
सुरासुरनमस्यस्य गत्वा भगवतोऽन्तिके ।
वन्दे कनिष्ठानपि तांस्तच्छिष्यपरमाणुवत् ॥ ८५ ॥
अचलत्पादमुत्पाद्य यावत्तावदसौ मुनिः ।
अवाप केवलज्ञानं द्वारं निर्वाणवेश्मनः ॥ ८६ ॥

करामलकवद्विश्वं कलयन् केवलश्रिया ।
सर्वापि स्वामिनोऽध्यास्त सदः केवलभास्वताम् ॥ ८७ ॥
भरतोऽपि महारत्नैश्चतुर्दशभिराश्रितः ।
चतुःषष्टिसहस्रान्तःपुरो नवनिधीश्वरः ॥ ८८ ॥
धर्मार्थकामान् साम्राज्यसम्पद्वृक्षैः फलोपमान् ।
परस्पराविरोधेन यथाकालमसेवत ॥ ८९ ॥
अन्यदा विहरन् स्वामी जगामाष्टापदाचलम् ।
भरतोऽपि ययौ तत्र स्वामिपादान्विवन्दिषुः ॥ ९० ॥
सुरासुरार्च्यं समवसरणस्थं जगत्पतिम् ।
स त्रिः प्रदक्षिणीकृत्य नमस्कृत्येति तुष्टुवे ॥ ९१ ॥
विश्वासमिव मूर्त्तिस्थं सद्वृत्तमिव पिण्डितम् ।
प्रसादमिव निःशेषजगतामेकतः स्थितम् ॥ ९२ ॥
ज्ञानराशिमिवाध्यक्षं पुण्यस्येव समुच्चयम् ।
सर्वलोकस्य सर्वस्वमिवैकत्र समाहृतम् ॥ ९३ ॥
वपुःस्थं संयममिवोपकारमिव रूपिणम् ।
शीलमिव पादचारि क्षमामिव वपुष्मतीम् ॥ ९४ ॥
रहस्यमिव योगस्य विश्ववीर्यमिवैकगम् ।
सिद्ध्युपायमिवावन्ध्यं कौशल्यमिव केवलम् ॥ ९५ ॥
मैत्रीमिव मूर्त्तिमतीं मदेहां करुणामिव ।
मुदितामिव पिण्डस्थामुपेक्षामिव रूपिणीम् ॥ ९६ ॥
तपःप्रशमसज्ज्ञानयोगमेकमिवाहृतम् ।
साक्षाद्वैनयिकमिव सिद्धिं साधारणीमिव ॥ ९७ ॥

व्यापकं हृदयमिव सर्वासां श्रुतसम्पदाम् ।
नमःस्वस्तिस्वधास्वाहावषडर्थमिवापृथक् ॥ ९८ ॥
विशुद्धधर्म्मनिर्म्माणप्रकर्षमिव केवलम् ।
समस्ततपसां पिण्डीभूतं फलमिवाखिलम् ॥ ९९ ॥
परभागमिवाशेषगुणराशेरनश्वरम् ।
उपन्नमिव निर्विघ्नं श्रेयो निःश्रेयसश्रियः ॥ ५०० ॥
प्रभावस्यैकधामेव मोक्षस्य प्रतिमामिव ।
कुलवेश्मेव विद्यानां फलं सर्वाशिषामिव ॥ १ ॥
आर्यवर्यचरित्राणामात्मदर्शमिवामलम् ।
कूटस्थं प्रशममिव जगतो दत्तदर्शनम् ॥ २ ॥
दुःखशान्तेरिव द्वारं ब्रह्मचर्यमिवोज्ज्वलम् ।
पुण्यैरुपनतं जीवलोकस्यैवैकजीवितम् ॥ ३ ॥
मृत्युव्याघ्रमुखादेतदाक्रष्टुमखिलं जगत् ।
बाहुं प्रसारितमिव निर्वाणेन कृपालुना ॥ ४ ॥
ज्ञानमन्दरमन्थुब्धश्रेयाम्भोधेः समुत्थितम् ।
अपरं पीयूषमिव देहभाजाममृत्यवे ॥ ५ ॥
विश्वाभयप्रदानेन समाश्वासितविष्टपम् ।
शरणं त्वां प्रपन्नोऽस्मि प्रसीद परमेश्वर ॥ ६ ॥
तत्र च त्रिजगन्नाथमृषभस्वामिनं ततः ।
एकाग्रमनसोपास्ताचक्री चक्रधरश्चिरम् ॥ ७ ॥
अथाद्रौ तत्र साधूनां सहस्रैर्दशभिर्वृतः ।
दीक्षाकालाद्गते पूर्वलक्षे मोक्षं ययौ प्रभुः ॥ ८ ॥

तदा निर्वाणमहिमा [१]चक्रे शक्रादिभिः सुरैः ।
अस्तोकशोकः शक्रेण भरतेशोऽप्यबोध्यत ॥ ९ ॥
चक्र्यथ भरतो[२] रत्नमयमष्टापदोपरि ।
सिंहनिषद्याप्रासादमष्टापदमिवापरम् ॥ १० ॥
तत्र च स्वामिनो मानवर्णसंस्थानशोभितम् ।
रत्नोपलमयं बिम्बं स्थापयामास चक्रभृत् ॥ ११ ॥
स्वामिशिष्टत्रयोविंशभाविनीर्थकृतामपि ।
यथावन्मानसंस्थानवर्णैर्बिम्बान्यसूत्रयत् ॥ १२ ॥
भ्रातृणां नवनवतेरपि तत्र महात्मनाम् ।
रचयामास रत्नाश्मस्तूपाननुपमान्नृपः ॥ १३ ॥
पुनरेत्य निजां राजधानीं राजशिरोमणिः ।
यथावद्राज्यमशिषत्प्रजारक्षणदीक्षितः ॥ १४ ॥
स कर्मभिर्भोगफलैः प्रेर्यमाणो निरन्तरम् ।
बुभुजे विविधान्भोगान् साक्षादिव दिवस्पतिः ॥ १५ ॥
नेपथ्यकर्म्मनिर्म्मातुमपरेद्युरगादसौ ।
मध्ये शुद्धान्तनारीणां ताराणामिव चन्द्रमाः ॥ १६ ॥
तत्र सर्व्वाङ्गविन्यस्तरत्नाभरणबिम्बितैः ।
स्त्रीजनैर्युगपत्प्रेम्णा परिरब्ध इवाभवत् ॥ १७ ॥

---

(१) म च प्रमोदचक्रे सुरासुरैः ।

(२) ख च ततोऽसौ विदधे ।

पश्यन्नसौ स्वमादर्शेऽपश्यत्स्रस्ताङ्गुलीयकाम् ।
अङ्गुलिं गलितज्योत्स्नां दिवा शशिकलामिव ॥ १८ ॥
ततः प्रोज्झितनिर्वेदात्प्रत्यङ्गोज्झितभूषणम् ।
स्वमपश्यद्धतश्रीकं शीर्णपर्णमिव द्रुमम् ॥ १९ ॥
अचिन्तयच्च धिगहो वपुषो भूषणादिभिः ।
शोभाहार्यैव कुड्यस्य पुस्ताद्यैरिव कर्मभिः ॥ २० ॥
अन्तःक्लिन्नस्य विष्ठाद्यैर्मलैः स्रोतोभवैर्बहिः ।
चिन्त्यमानं किमप्यस्य शरीरस्य न शोभनम् ॥ २१ ॥
इदं शरीरं कर्पूरकस्तूरीप्रभृतीन्यपि ।
दूषयत्येव पाथोदपयांस्यूषरभूरिव ॥ २२ ॥
विरज्य विषयेभ्यो यैस्तेपे मोक्षफलं तपः ।
तैरेव फलमेतस्य जगृहे तत्त्ववेदिभिः ॥ २३ ॥
इति चिन्तयतस्तस्य शुक्लध्यानमुपेयुषः ।
उत्पेदे केवलज्ञानमहो योगस्य जृम्भितम् ॥ २४ ॥
रजोहरणमुख्यानि मुनिचिह्नानि तत्क्षणात् ।
विनीत उपनीयास्मै नमश्चक्रे दिवस्पतिः ॥ २५ ॥
तद्राज्येऽकृत तत्पुत्रमादित्ययशसं तदा ।
यदाद्यादित्यवंशोऽयमद्याप्यस्ति महीभुजाम् ॥५२६॥१०॥

स्यान्मतं युक्तं भरतस्य पूर्वजन्मार्जितयोगसमृद्धिवशक्षपित शुभकर्मणः कर्मलेशक्षपणाय योगप्रभाववर्णनम् । यस्तु जन्मान्तरेषु अलब्धरत्नत्रयोऽत एवाक्षपितकर्मा मानुषत्वमात्रमप्यप्राप्तवान् । स कथमनन्तकालपचितशुभाशुभकर्मनिर्मूलनमनुभवेत् ।

तथाह—

पूर्वमप्राप्तधर्मापि परमानन्दनन्दिता ।

योगप्रभावतः प्राप मरुदेवा परं पदम् ॥ ११ ॥

मरुदेवा हि स्वामिनी आ संसारं त्रसत्वमात्रमपि नानुभूतवती किं पुनर्मानुषत्वं तथापि योगबलसमृद्धेन शुक्लध्यानाग्निना चिरसञ्चितानि कर्मेन्धनानि भस्मसात्कृतवती ।

यदाह—

'जह एगा मरुदेवा अच्चंतं थावरा सिद्धा ।

मरुदेवाचरितं चोक्तप्रायम् ॥ ११ ॥

ननु जन्मान्तरेऽपि अकृतक्रूरकर्मणां मरुदेवादीनां योगबलेन युक्तः कर्मक्षयः ये त्वत्यन्तक्रूरकर्माणस्तेषु योगः कुण्ठतामप्यासादयेत् ।

इत्याह—

ब्रह्मस्त्रीभ्रूणगोघातपातकान्नरकातिथेः ।

दृढप्रहारिप्रभृतेर्योगो हस्तावलम्बनम् ॥ १२ ॥

ब्रह्मणो ब्राह्मणस्य स्त्रिया वनितायाः भ्रूणस्य गर्भस्य गर्भिण्याश्च गोर्धेनोस्तेषां घातः स एव पातकं तस्मात् । यद्यपि समदर्शिनां ब्राह्मणाब्राह्मणयोः स्त्रीपुरुषयोर्भ्रूणाभ्रूणयोर्गवागवोर्घाते अविशेषेण पापबन्धः ।

---

(१) यथा एका मरुदेवा अत्यन्तं स्थावरा सिद्धा ।

यदाह —

[1]सव्वो न हिंसियव्वो जह महिपालो तहा उदयपालो ।

न य अभयदाणवइणा जणोवमाणेण होयव्वं ॥ १ ॥

तथापि लोकप्रसिद्ध्यनुरोधेन ब्रह्मेत्याद्युक्तम्। ये हि लौकिकाः सर्वस्या हिंसायाः पापफलं न मन्यन्ते । तेऽपि ब्रह्मादिघातकस्य महापापीयस्तां मन्यन्त एवेति । नरकानितिदृढप्रहारिप्रभृतेर्योगो हस्तावलम्बनम् । तेनैव भवेन मोक्षगमनात् । प्रभृतिग्रहणादन्येऽपि पापकारिणो विदितजिनवचनास्तत एव प्राप्तयोगसम्पदो नरकप्राप्तियोग्यानि कर्माणि निर्मूल्य परमसम्पदमासादितवन्तो द्रष्टव्याः ।

यदाह—

[2]कूरावि सहावेणं विसयविसवसाणुगावि होऊणं ।

भावियजिणवयणमणा तेलुक्कसुहावहा होंति ॥ १ ॥ इति ।

तथाहि—

कस्मिंश्चिन्नगरे कश्चिदासीद्द्विजातिरुद्भटः ।

प्रजासु कर्त्तुमन्यायान् प्रावर्त्तत स पापधीः ॥ १ ॥

---

(१) सर्वो न हिंसितव्यो यथा महीपालस्तथा उदयपालः ।
न च अभयदानव्रतिना जनोपमानेन भवितव्यम् ॥ १ ॥

(२) क्रूरा अपि स्वभावेन विषयविषवशानुगा अपि भूत्वा ।
भावितजिनवचनमनसः त्रैलोक्यसुखावहा भवन्ति ॥ १ ॥

आरक्षपुरुषैरेष ततो निर्वासितः पुरात् ।
व्याधहस्तमिव श्वेनश्चौरपल्लीं जगाम च ॥ २ ॥
नृशंसचरितैस्तैस्तैरात्मनस्तुल्य इत्यसौ ।
चौरसेनाधिपतिना पुत्रत्वेनाभ्यमन्यत ॥ ३ ॥
चौरसेनापतौ तस्मिन्नवसानमुपेयुषि ।
तत्पुत्र इति तत्स्थाने स बभूव महाभुजः ॥ ४ ॥
निष्कृपं प्रहरत्येष सर्वेषां प्राणिनां यतः ।
ततो दृढप्रहारीति नाम्ना निजगदे जनैः ॥ ५ ॥
अन्येद्युर्विश्वकुट्टाकलुण्टाकभटपेटकैः ।
स कुशस्थलनामानं ग्रामं लुण्टयितुं ययौ ॥ ६ ॥
ब्राह्मणो देवशर्मेति तत्र दारिद्र्यविह्वलः ।
अवकेशीफलमिव क्षैरान्नं याचितोऽर्भकैः ॥ ७ ॥
पर्यट्य सकले ग्रामे क्वापि क्वापि स तन्दुलान् ।
क्वापि क्वापि पयोऽभ्यर्थ्य परमान्नमपीपचत् ॥ ८ ॥
नद्यां स्नातुं ययावेष यावत्तावत् तदोकसि ।
ते क्रूरतस्कराः पेतुर्दैवं दुर्बलघातकम् ॥ ९ ॥
तेषामेकतमो दस्युरपश्यत्तस्य पायसम् ।
क्षुधातुरः प्रेत इव तदादाय पलायितः ॥ १० ॥
आच्छिद्यमाने तस्मिंस्तु पायसे जीवितव्यवत् ।
क्रन्दन्ति डिम्भरूपाणि गत्वा पितरमूचिरे ॥ ११ ॥
व्याघ्रानन्नामाभ्राक्तं दस्युवृन्देन पायसम् ।
जक्षे प्रसारितदृष्यासमिलेनैव कज्जलम् ॥ १२ ॥

तदाकर्ण्य वचो विप्रः क्षिप्रं दीप्रः क्रुदग्निना ।
यमदूत इवादाय परिघं पर्य्यधावत ॥ १३ ॥
सरोषराक्षसावेशात्समुत्पादितदोर्बलः ।
हन्तुं प्रवहृते दस्यून् परिघेण पशूनिव ॥ १४ ॥
तेनावकरवत्तात्क्षिप्यमाणानवेक्ष्य तान् ।
विव्रस्यतस्तिरस्कुर्व्वन् दधावे तस्करेश्वरः ॥ १५ ॥
तस्यापि धावतो दैवाद्गतिविघ्नविधायिनी ।
निरोद्धुं दुर्गतिमिव मार्गे गौरन्तरेऽभवत् ॥ १६ ॥
करालकरवालैकप्रहारेण वराकिकाम् ।
जघान तृजघन्यस्तां चण्डाल इव निर्घृणः ॥ १७ ॥
तस्याभ्यापततो रोषाद्द्विजातेः स शिरो भुवि ।
पनसद्रोः फलमिवापातयन्खड्गयष्टिना ॥ १८ ॥
आः पाप निष्कृप क्षतं किमेतदिति वादिनी ।
बाला मासवती तं चाभ्यगात् द्विजकुटुम्बिनी ॥ १९ ॥
तस्या वृक इव च्छाग्या गुर्विण्याः सोऽतिदारुणः ।
कुष्माण्डदारमुदरं दारयित्वा द्विधाकरोत् ॥ २० ॥
ततो जरायुमध्यस्थं तस्या गर्भं द्विधाकृतम् ।
स स्फुरन्तं निरैक्षिष्ट लताया इव पल्लवम् ॥ २१ ॥
तथा सम्पश्यमानस्य तस्य विह्वलचेतसः ।
कृपागतकृपस्यापि जज्ञे वक्रमिवात्मनः ॥ २२ ॥
ततो हा तात तातेति हा मातर्मातरित्यपि ।
विलपन्तः समाजग्मुस्तत्कालं द्विजबालकाः ॥ २३ ॥

नग्नान् भुग्नानतिश्यामान् [1]श्यामानतिमलेन च ।
दृष्ट्वा दृढप्रहारी तान् सानुतापमचिन्तयत् ॥ २४ ॥

हहा हता निर्घृणेन दरिद्रौ दम्पती मया ।
अमी बाला हतास्तोयशोषे जीवन्ति किं झषाः ॥ २५ ॥

क्रूरेण कर्मणानेन नेष्यमाणस्य दुर्गतिम् ।
अघभीतस्य मे कः स्यादुपायः शरणं च कः ॥ २६ ॥

इति सञ्चिन्तयन्नेव वैराग्यावेगभागसौ ।
एनोगदागदङ्कारान्साधूनुद्यानगैक्षत ॥ २७ ॥

नत्वोवाचेत्यहं पापो भाष्यमाणोऽपि पाप्मने ।
पङ्किलः स्पृश्यमानोऽपि पङ्किलीकुरुते परम् ॥ २८ ॥

येषामेकतरमपि नरकायैव तान्यहम् ।
ब्रह्मस्त्रीभ्रूणगोघातपातकान्यकृपो व्यधात् ॥ २९ ॥

मामीदृशमपि त्रातुं साधवो यूयमर्हथ ।
मेघानां वर्षतां स्थानमस्थानं वा न किञ्चन ॥ ३० ॥

अथ ते साधवस्तस्मै यतिधर्ममुपादिशन् ।
सोऽथ छत्रमिवोष्णालुः पापभीरुस्तमाददे ॥ ३१ ॥

न भोक्ष्ये तत्र यत्राह्नि स्मरिष्याम्यस्य पाप्मनः ।
करिष्ये सर्वथा शान्तिं सोऽग्रहीदित्यभिग्रहौ ॥ ३२ ॥

पूर्वावस्कन्दिते तस्मिन्नेव ग्रामे कुशस्थले ।
कर्मक्षयं चिकीर्षुः स विजहार महामनाः ॥ ३३ ॥

---

(१) ख ङ क स्निग्धानतिमलेन च ।

स एवायं कृतच्छद्मा पापः पापीयसामपि ।
इत्युक्तःयेन लोकेन स महात्मा दिवानिशम् ॥ ३४ ॥
गोभ्रूणद्विजघात्येष इति लोकेन जल्पता ।
विशन् गृहेषु भिक्षार्थं क्षेव लोष्टैरकुत्स्यत ॥ ३५ ॥
स्मार्यमाणः स तत्पापं प्रतिवासरमप्यसौ ।
शान्तस्वान्तो न भुङ्क्ते स्म किंवा सत्त्वस्य दुष्करम् ॥ ३६ ॥
क्वचित्प्रातः क्वचिन्मध्यं दिने सायमपि क्वचित् ।
स्मार्यमाणः स तत्पापं कुत्राप्यह्नि न भुक्तवान् ॥ ३७ ॥
लोष्टुभिर्यष्टिभिः पांशुवृष्टिभिर्मुष्टिभिर्जनाः ।
यज्जघ्नुः सोऽधिसेहे तत्सम्यक् चैवमभावयत् ॥ ३८ ॥
आत्मन् यादृक्कृतं कर्म तादृशं फलमाप्नुहि ।
यादृगुप्यते बीजं फलं तादृगवाप्यते ॥ ३९ ॥
यदमी निरनुक्रोशमाक्रोशान्मयि तन्वते ।
अयत्नेनैव सिद्धा तन्ममेयं कर्मनिर्जरा ॥ ४० ॥
मय्याक्रोशाः प्रमोदाय यद्येषां मे तथैव हि ।
यत्प्रीत्या सहमानस्य कर्मक्षयविधायिनः ॥ ४१ ॥
यन्मां भर्त्सयतामेषां सुखमुत्पद्यतेऽद्य तत् ।
उत्पद्यतां भवे ह्यत्र दुर्लभः सुखसङ्गमः ॥ ४२ ॥
अमी मदीयं दुष्कर्मग्रन्थिं परुषभाषितैः ।
क्षारैरिव चिकित्सन्तो नितान्तं सुहृदो मम ॥ ४३ ॥
कुर्वन्तु ताडनं ह्यत्र मर्मते यदिदं किल ।
स्वर्णस्येवाग्निसन्तापो मलिनत्वमपोहति ॥ ४४ ॥

कर्षन् दुर्गतिशुमेमीं स्वं प्रक्षिपति तत्र यः ।
कथं कुप्याम्यहं तस्मै प्रहारानपि कुर्वते ॥ ४५ ॥
मत्पापानि व्यपोहन्ति निजपुण्यव्ययेन ये ।
कथङ्कारमिवैतेभ्यो ऽपरः परमबान्धवः ॥ ४६ ॥
वधबन्धादि हर्षाय यस्य संसारमोचनम् ।
तदेवानन्तसंसारहेतुरेषां दुनोति माम् ॥ ४७ ॥
केचित्परेषां तोषाय त्यजन्त्यर्थान्वपूंष्यपि ।
एषां प्रीतिदमाक्रोशहननादि कियन् मम ॥ ४८ ॥
तर्जितोऽहं हतो नाऽस्मि हतो वा नास्मि मारितः ।
मारितो वा न मे धर्मोऽपहृतो बान्धवैरिव ॥ ४९ ॥
आक्रोशवागधिक्षेपो बन्धनं हननं मृतिः ।
सह्यं श्रेयोऽर्थिना सर्वं श्रेयो हि बहुविघ्नकम् ॥ ५० ॥
एवं भावयता तेन गर्हता स्वं च दुष्कृतम् ।
निर्दग्धः सर्वतः कर्मराशिः कक्ष इवाग्निना ॥ ५१ ॥
अज्ञानं केवलज्ञानमथ लेभे [1]सुदुर्लभम् ।
अयोगिकेवलिगुणस्थानस्थो मोक्षमाप च ॥ ५२ ॥

योगप्रभावेन दृढप्रहारी
यद्येष मुक्ता नरकातिथित्वम् ।
पदं प्रपेदे परमं तथान्यो-
ऽप्यसंशयानः प्रयतेत योगे ॥ ५३ ॥ १२ ॥

---

(१) क ख ग दुर्लभम् ।

पुनरुदाहरणान्तरेण योगश्लाघामेव वर्द्धयति ।

तत्कालकृतदुष्कर्मकर्मठस्य दुरात्मनः ।
गोप्त्रे चिलातीपुत्रस्य योगाय स्पृहयेन्न कः ॥ १३ ॥

तत्कालं तत्क्षणं कृतं यद्दुष्कर्म स्त्रीवधलक्षणं तेन कर्मठः कर्मशूरस्तस्य दुरात्मन इति पापकरणकालापेक्षं चिलातीपुत्राभिधानस्य गोप्त्रे दुर्गतिनिपातरक्षकाय योगाय को न स्पृहयेत् सर्व एव स्पृहयेदित्यर्थः ।

तथाहि—

क्षितिप्रतिष्ठे नगरे यज्ञदेवोऽभवद्द्विजः ।
निनिन्द पण्डितम्मन्यः स सदा जिनशासनम् ॥ १ ॥
असहिष्णुश्च तां निन्दां जिगीषुः कोऽपि चेल्लकः ।
गुरुणा वार्यमाणोऽपि तं वादार्थमवीवदत् ॥ २ ॥
इदृशी च प्रतिज्ञाभूद्वादाधिष्ठितयोस्तयोः ।
येन यो जीयते तस्य शिष्यत्वं स करिष्यति ॥ ३ ॥
आनीतो निग्रहस्थानं बुद्धिकौशलशालिना ।
विवदन्वादिना तेन यज्ञदेवः पराजितः ॥ ४ ॥
चेल्लको जितकाशी तु यज्ञदेवद्विजन्मना ।
तदा पूर्वप्रतिज्ञातां परिव्रज्यामजिग्रहत् ॥ ५ ॥
ततः शासनदेव्यैवं यज्ञदेवो व्यबोध्यत ।
चारित्रं प्रतिपन्नोऽसि ज्ञानश्रद्धानवान्भव ॥ ६ ॥

व्रतं तत: प्रभृत्येष यथावत्पालयन्नपि ।
निनिन्द वस्त्राङ्गमलं प्राक्संस्कारो हि दुस्त्यज: ॥ ७ ॥
अशाम्यन् ज्ञातयोऽप्यस्य संसर्गेण महात्मन: ।
प्रावृषेण्याभ्रसम्पर्केणाहिमांशोरिवांशव: ॥ ८ ॥
अस्य पाणिगृहीती तु नितान्तमनुरागिणी ।
उज्झाञ्चकार नो रागं नीलीरक्तेव शाटिका ॥ ९ ॥
वश्यो मेऽस्त्विति सा तस्मै पारणे कार्म्मणं ददौ ।
सत्यं रक्ता विरक्ताश्च मारयन्त्येव योषित: ॥ १० ॥
क्षीयमाण: क्षणपक्षेणेव कार्म्मणकर्म्मणा ।
स मुनीन्दुर्ययौ स्वर्गं मण्डलं तरणेरिव ॥ ११ ॥
तस्यावमानात् सञ्जातनिर्वेदा सापि गेहिनी ।
प्रव्रज्याभवर्गाहीदेकं मानुष्यकतरो: फलम् ॥ १२ ॥
अनालोच्यैव सा पापं पतिव्यसनसम्भवम् ।
कालं कृत्वा दिवं प्राप दुष्प्रापं तपसा हि किम् ॥ १३ ॥
यज्ञदेवस्य जीवोऽथ च्युत्वा राजगृहे पुरे ।
धनसार्थपतेश्चेट्याश्चिलात्यास्तनयोऽभवत् ॥ १४ ॥
चिलात्या: पुत्र इत्येष चिलातीपुत्रसंज्ञया ।
आहूयते स्म लोकेन नाम नान्यत्प्रकल्पितम् ॥ १५ ॥
यज्ञदेवप्रियाजीवश्च्युत्वाऽनुसुतपञ्चकम् ।
भद्राया धनभार्याया: सुसुमेति सुताऽभवत् ॥ १६ ॥
धनो नियोजयामास चिलातीतनयं च तम् ।
सुसुमाया: स्वदुहितु: बालग्राहककर्म्मणि ॥ १७ ॥

लोकेष्वागांसि चक्रेऽसौ श्रेष्ठ्यभैषीच्च राजतः ।
स्वामी भृत्यापराधेन यतः स्याद्दण्डभाजनम् ॥ १८ ॥
मत्वेति तं धनश्रेष्ठी सदोपद्रवकारिणम् ।
गृहान्निर्वासयामास दासेरं दन्दशूकवत् ॥ १९ ॥
सोऽथ सिंहगुहां चौरपल्लीं वल्लीं महागसाम् ।
ययौ प्रियागाः प्रीतिर्हि तुल्यव्यसनशीलयोः ॥ २० ॥
स नृशंसो नृशंसेन दस्युवृन्देन सङ्गतः ।
वायुनेवाग्निरभवद्दारुणोऽप्यतिदारुणः ॥ २१ ॥
ततः सिंहगुहाधीशे चौरसेनापतौ मृते ।
चौरसेनापतिः सोऽभूत्तदर्थमिव निर्मितः ॥ २२ ॥
यौवनं सुसुमाप्याप्ता रूपादिगुणशालिनी ।
कलाकलापपूर्णाभूत् खेचरीव महीचरी ॥ २३ ॥
चैलातेयोऽन्यदोचे स्वानस्ति राजगृहे पुरे ।
श्रेष्ठी धनो ऽनन्तधनो दुहिता चास्य सुसुमा ॥ २४ ॥
तस्करास्तत्र गच्छामो धनं वः सुसुमा तु मे ।
इति व्यवस्थामास्थाय सोऽगाद्धनगृहं निशि ॥ २५ ॥
प्रयोज्य स्वापनीं विद्यां कीर्त्तयित्वा स्वमागतम् ।
स धनं ग्राहयामास सुसुमां स्वयमग्रहीत् ॥ २६ ॥
सुप्ताशेषपरीवारः सूनुभिः पञ्चभिः समम् ।
अपहृत्य धनस्तस्थौ नयो नयवतां ह्यसौ ॥ २७ ॥
जीवग्राहं गृहीत्वा च हृदयेन स सुसुमाम् ।
चैलातेयः पलायिष्ट सलोप्त्रैर्दस्युभिः सह ॥ २८ ॥

आहूयारक्षपुरुषान् धनश्रेष्ठीत्यभाषत ।
चौरापहृतवित्तं च प्रत्यानयत सुसुमाम् ॥ २९ ॥
ततो धनः सहारक्षैः पुत्रैश्चायुधपाणिभिः ।
पुरोगस्त्वमनःस्पर्द्धयेव त्वरितमन्वगात् ॥ ३० ॥
जलं स्थलं लता वृक्षानन्यदप्यखिलं पथि ।
पीतोन्मत्तो हैममिव सोऽपश्यत्सुसुमामयम् ॥ ३१ ॥
इतः पीतमितो भुक्तमितः स्थितमितो गतम् ।
एवं वदद्भिः पदिकैः स दस्यूत्रिकषा ययौ ॥ ३२ ॥
हत हतेति गृह्णीत गृह्णीतेति च भाषिणः ।
मलिम्लुचानामभिलन्नारक्षपुरुषास्ततः ॥ ३३ ॥
दिशो दिशि प्रणेशुस्ते वित्तं त्यक्त्वान्यतस्कराः ।
सुसुमां स तु नामुञ्चच्चौरो व्याघ्रो मृगीमिव ॥ ३४ ॥
आरक्षपुरुषास्ते तु तद्वित्तं प्राप्य पुष्कलम् ।
व्यावर्त्तन्त कृतार्थो हि सर्वः स्यादन्यथामतिः ॥ ३५ ॥
उद्वहन् सुसुमामंसे लतामिव मतङ्गजः ।
प्रविवेश महारण्यं चिलातीतनयस्ततः ॥ ३६ ॥
सूनुभिः पञ्चभिः पञ्चाननैरिव धनोऽन्वगात् ।
कष्टुं पुत्रीं मुखाद्द्ध्योराहोरिन्दुकलामिव ॥ ३७ ॥
धने सन्निधीभूते माभवत्वस्य सा मम ।
सुसुमेति धिया तस्याः शिरःकमलमच्छिनत् ॥ ३८ ॥

॥१॥ ख ग ब: ।

आकृष्टकरवालोऽसौ हस्तविन्यस्तमस्तकः ।
तदा यमपुरीद्वारक्षेत्रपाल इवाबभौ ॥ ३९ ॥

सुसुमायाः कबन्धस्याग्निके स्थित्वा रुदन् धनः ।
वारीव बाष्पपूरेण नयनाञ्जलिभिर्ददौ ॥ ४० ॥

तस्याः कबन्धमुत्सृज्य व्यावृत्तः ससुतो धनः ।
शल्यितः शोकशल्येन महाटव्यामथापतत् ॥ ४१ ॥

ललाटन्तपतपनतेजस्तापभयादिव ।
विष्वक् सङ्कुचितच्छायो मध्याह्नश्च ततोऽभवत् ॥ ४२ ॥

शोकश्रमक्षुधातृष्णामध्याह्नातपवह्निभिः ।
धनः सुताश्च पञ्चाग्निसाधका इव तेपिरे ॥ ४३ ॥

न जलं न फलं नान्यद्दृष्टप्राणितौषधम् ।
मृत्यवे प्रत्युतापश्यंस्ते [1]हिंस्रश्वापदान् पथि ॥ ४४ ॥

आत्मनस्तनयानां च तां पश्यन्विषमां दशाम् ।
धनश्रेष्ठी पथ्यतुच्छे गच्छन्नेवमचिन्तयत् ॥ ४५ ॥

मम सर्वस्वनाशोऽभूत्सूतौ प्राणप्रिया मृता ।
मृत्युकोटिं वयं प्राप्ता धिगहो दैवजृम्भितम् ॥ ४६ ॥

न यत्पुरुषकारेण साध्यं धीसम्पदा न च ।
तदेकं दैवमेवेह बलिभ्यो बलवत्तरम् ॥ ४७ ॥

प्रसाद्यते न दानेन विनयेन न गृह्यते ।
सेवया वश्यते नैव केयं दुःसाध्यता विधेः ॥ ४८ ॥

---

(१) ख ग हिंस्रश्वापदान्यपि ।

विबुधैर्बाध्यते नैव बलवद्भिर्न कृष्यते ।
न साध्यते तपस्विभिः प्रतिमल्लोऽस्तु को विधेः ॥ ४९ ॥

अहो दैवं मित्रमिव कदाचिदनुकम्पते ।
कदाचित्परिपन्थीव निःशङ्कं प्रणिहन्ति च ॥ ५० ॥

विधिः पितेव सर्वत्र कदाचित्परिरक्षति ।
कदाचित्पीडयत्येव दायाद इव [1]दुर्दमः ॥ ५१ ॥

विधिर्नयति मार्गेणामार्गस्थमपि कर्हिचित् ।
कदाचिन्मार्गगमपि विमार्गेण प्रवर्त्तयेत् ॥ ५२ ॥

आनयेदपि दूरस्थं करस्थमपि नाशयेत् ।
मायेन्द्रजालतुल्यस्य विचित्रा गतयो विधेः ॥ ५३ ॥

अनुकूले विधौ पुंसां विषमप्यमृतायते ।
विपरीते पुनस्तस्मिन्नमृतमेव विषायते ॥ ५४ ॥

स एवं चिन्तयन्नेव प्राप राजगृहं पुरम् ।
अशोकः सुसुमापुत्रा विदधे चौर्ध्वदेहिकम् ॥ ५५ ॥

वैराग्याद्व्रतमादाय श्रीवीरस्वामिनोऽन्तिके ।
दुस्तपं स तपस्तेपे पूर्णायुश्च दिवं ययौ ॥ ५६ ॥

चैलातेयोऽप्यनुरागात्सुसुमाया मुहुर्मुहुः ।
मुखं पश्यन्नविज्ञातश्रमो याम्यां दिशं ययौ ॥ ५७ ॥

सर्वसन्तापहरणं छायावृक्षमिवाध्वनि ।
साधुमेकं ददर्शासौ कायोत्सर्गजुषं पुरः ॥ ५८ ॥

---

(१) ख च दुर्मदः ।

स स्वेन कर्मणा तेन किञ्चिदुद्विग्नमानसः ।
तमुवाच समाख्याहि धर्मं संक्षेपतो मम ॥ ५८ ॥
अन्यथा कदलीलावं लविष्यामि शिरस्तव ।
अनेनैव कृपाणेन सुसुमाया इव क्षणात् ॥ ६० ॥
स ज्ञानान्मुनिरज्ञासीद्बोधिबीजमिहाहितम् ।
अवश्यं यास्यति स्फातिं पल्वले शालिबीजवत् ॥ ६१ ॥
कार्यः सम्यगुपशमो विवेकः संवरोऽपि च ।
इत्युक्त्वा चारणमुनिः स पक्षीव खमुद्ययौ ॥ ६२ ॥
पदानि मन्त्रवत्तानि परावर्त्तयतस्ततः ।
जज्ञे चिलातीपुत्रस्य तदर्थोल्लेख ईदृशः ॥ ६३ ॥
क्रोधादीनां कषायाणां कुर्यादुपशमं सुधीः ।
हहा तैरहमाक्रान्तस्यन्दनः पन्नगैरिव ॥ ६४ ॥
चिकित्साम्यद्य तदिमान्महारोगानिवात्मनः ।
क्षमामृदुत्वऋजुतासन्तोषपरमौषधैः ॥ ६५ ॥
धनधान्यहिरण्यादिसर्वस्वत्यागलक्षणम् ।
विवेकमेकं कुर्वीत बीजं ज्ञानमहातरोः ॥ ६६ ॥
तदिदं सुसुमाशीर्षं कृपाणं च करस्थितम् ।
सर्वस्वभूतं मुञ्चामि केतनं पापसम्पदः ॥ ६७ ॥
संवरश्चाक्षमनसां विषयेभ्यो निवर्त्तनम् ।
स मया प्रतिपन्नोऽद्य संयमश्रीशिरोमणिः ॥ ६८ ॥
पदार्थं भावयन्नेवं संवृतसकलेन्द्रियः ।
समाधिमधिगम्याभून्मनोमात्रैकचेतनः ॥ ६९ ॥

ततोऽस्य विस्रगन्धासृक्कटाकवचितं वपुः ।
कीटिकाभिः शतच्छिद्रं चक्रे दारु घुणैरिव ॥ ७० ॥
पिपीलिकोपसर्गेऽपि स स्तम्भ इव निश्चलः ।
सार्द्धाहोरात्रयुग्मेन जगाम त्रिदशालयम् ॥ ७१ ॥

यदाह —

[1]जो तिहिं पएहिं धम्मं समभिगओ संजमं समारूढो ।
उवसमविवेयसंवरचिलाइपुत्तं नमंसामि ॥ ७२ ॥
[2]अहिसरिया पाएहिं सोणियगंधेण जस्स कीडीओ ।
खायंति उत्तमंगं तं दुक्करकारयं वंदे ॥ ७३ ॥
[3]धीरो चिलाइपुत्तो मुयइंगलीयाहिं चालणिव्व कओ ।
जो तहवि खज्जमाणो पडिवन्नो उत्तमं अट्ठं ॥ ७४ ॥
[4]अड्ढाइज्जेहिं राइंदिएहिं पत्तं चिलाइपुत्तेण ।
देविंदामरभवणं अच्छरगणसंकुलं रम्मम् ॥ ७५ ॥

चरित्रैरापन्नः श्वपच इव धिक्कारपदवीम्
चिलातीपुत्रोऽसावधिनरकमासूत्रितगतिः ।

---

(१) यस्त्रिभिः पदैः धर्मं समभिगतः संयमं समारूढः ।
उपशमविवेकसंवरचिलातीपुत्रं नमस्यामि ॥
(२) अभिसृता पादैः शोणितगन्धेन यस्य कीटिकाः ।
खादन्ति उत्तमाङ्गं तं दुष्करकारकं वन्दे ॥
(३) धीरश्चिलातीपुत्रः पिपीलिकाभिश्चालनीव कृतः ।
यस्तथापि खाद्यमानः प्रतिपन्न उत्तममर्थम् ॥
(४) सार्द्धाभ्यामपि रात्रिदिनैः प्राप्तं चिलातीपुत्रेण ।
देवेन्द्रामरभवनं अप्सरोगणसङ्कुलं रम्यम् ॥

समालम्ब्यैवं यन्त्रिदिवसदनातिथ्यमगमत्
स एवायं योगः सकलसुखमूलं विजयते ॥ ७६ ॥ १३ ॥

पुनरेव योगमेव स्तौति—

तस्याजननिरेवास्तु नृपशोर्मोघजन्मनः ।
अविद्धकर्णो यो योग इत्यक्षरशलाकया ॥ १४ ॥

न जननमजननिः "नञोऽनिः शापे" ॥ ५ । ३ । १२७ ॥ इत्यनिः । अस्तु भूयात् । ना चासौ पशुश्च नृपशुस्तस्य नृपशोः । पशुप्राय-पुरुषस्य मोघजन्मन इति निष्फलजननस्य यः । किं योऽविद्धकर्णः कया अक्षरशलाकया । अक्षराण्येव शलाका कर्णवेधजननी अक्षरशलाका । केनोल्लिखित यान्यक्षराणि अतएव आह । योग इति योग इत्यक्षरलक्षणशलाकया योऽविद्धकर्णः लोहादिमय-शलाकाविद्धकर्णोऽपि । तस्य नृपशोर्वरमजननिर्युक्ता न पुन-र्विडम्बनाप्रायं जननमिति ॥ १४ ॥

पुनरपि पूर्वार्द्धेन योगं स्तुत्वा उत्तरार्द्धेन तत्स्वरूपमाह—

चतुर्वर्गेऽग्रणीर्मोक्षो योगस्तस्य च कारणम् ।
ज्ञानश्रद्धानचारित्ररूपं रत्नत्रयं च सः ॥ १५ ॥

चतुर्वर्गोऽर्थकामधर्ममोक्षलक्षणः तस्मिन्नग्रणीः प्रधानं मोक्षः । अर्थो हि अर्जनरक्षणनाशव्ययहेतुकदुःखानुषङ्गदूषितत्वान्न चतु-र्वर्गेऽग्रणीर्भवति । कामस्तु सुखानुषङ्गलेशाद्यद्यप्यर्थादुत्कृष्यते तथापि विरसावसानत्वात् दुर्गतिसाधनत्वाच्च नाग्रणीः । धर्मस्तु

ऐहिकामुष्मिकसुखसाधनत्वेन अर्थकामाभ्यां यद्यप्युत्कृष्यते तथापि कनकनिगडरूपपुण्यकर्मबन्धननिबन्धनत्वाद्भवभ्रमणहेतुरिति ना-ग्रणीः। मोक्षस्तु पुण्यपापक्षयलक्षणो न क्लेशबहुलो न वा विषसम्पृक्तान्नवदापातरमणीयः परिणामदुःखदायी नवा ऐहिका-मुष्मिकफलाशंसादोषदूषित इति भवति परमानन्दमयश्चतुर्वर्गे-ऽग्रणीः यः। तस्य च कारणं साधकतमं करणं योगः। तस्य किं रूपमित्याह। रत्नत्रयं मरकतादिव्यवच्छेदेनाह। ज्ञान-श्रद्धानचारित्ररूपमिति ॥ १५ ॥

रत्नत्रये प्रथमं ज्ञानस्वरूपमाह —

यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः ॥ १६ ॥

यथावस्थितानि नयप्रमाणप्रतिष्ठितस्वरूपाणि यानि तत्त्वानि जीवाजीवास्रवसंवरनिर्जराबन्धमोक्षलक्षणानि तेषां योऽवबोध-स्तत्सम्यग्ज्ञानं स चावबोधः क्षयोपशमविशेषात्कस्यचित्संक्षेपेण कर्मक्षयाच्च कस्यचिद्विस्तरेण।

तथाहि—

जीवाजीवावास्रवश्च संवरो निर्जरा तथा।
बन्धो मोक्षश्चेति सप्त तत्त्वान्याहुर्मनीषिणः ॥ १ ॥
तत्र जीवा द्विधा ज्ञेया मुक्तसंसारिभेदतः।
अनादिनिधनाः सर्वे ज्ञानदर्शनलक्षणाः ॥ २ ॥

मुक्ता एकस्वभावाः स्युर्जन्मादिक्लेशवर्जिताः ।
अनन्तदर्शनज्ञानवीर्यानन्दमयाश्च ते ॥ ३ ॥

संसारिणो द्विधा जीवाः स्थावरत्रसभेदतः ।
द्वितीयेऽपि द्विधा पर्याप्तापर्याप्तविशेषतः ॥ ४ ॥

पर्याप्तयस्तु षडिमाः पर्याप्तत्वनिबन्धनम् ।
आहारो वपुरक्षाणि प्राणा भाषा मनोऽपि च ॥ ५ ॥

स्युरेकाक्षविकलाक्षपञ्चाक्षाणां शरीरिणाम् ।
चतस्रः पञ्च षड्वापि पर्याप्तयो यथाक्रमम् ॥ ६ ॥

एकाक्षाः स्थावरा भूम्यप्तेजोवायुमहीरुहः ।
तेषां तु पूर्वे चत्वारः स्युः सूक्ष्मा बादरा अपि ॥ ७ ॥

प्रत्येकाः साधारणाश्च द्विप्रकारा महीरुहः ।
तत्र पूर्वे बादराः स्युरुत्तरे सूक्ष्मबादराः ॥ ८ ॥

त्रसा द्वित्रिचतुष्पञ्चेन्द्रियत्वेन चतुर्विधाः ।
तत्र पञ्चेन्द्रिया द्वेधा संज्ञिनोऽसंज्ञिनोऽपि च ॥ ९ ॥

शिक्षोपदेशालापान्ये जानते तेऽत्र संज्ञिनः ।
संप्रवृत्तमनःप्राणास्तेभ्योऽन्ये स्युरसंज्ञिनः ॥ १० ॥

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रमितीन्द्रियम् ।
तस्य स्पर्शो रसो गन्धो रूपं शब्दश्च गोचरः ॥ ११ ॥

द्वीन्द्रियाः कृमयः शङ्खा गण्डूपदजलौकसः ।
कपर्दाः शुक्तिकाद्याश्च विविधाकृतयो मताः ॥ १२ ॥

यूकामत्कुणमत्कोटलिक्षाद्यास्त्रीन्द्रिया मताः ।
पतङ्गमक्षिकाभृङ्गदंशाद्याश्चतुरिन्द्रियाः ॥ १३ ॥

तिर्यग्योनिभवाः शेषा जलस्थलखचारिणः ।
नारका [1]मानवा देवाः सर्वे पञ्चेन्द्रिया मताः ॥ १४ ॥

मनोभाषाकायबलत्रयमिन्द्रियपञ्चकम् ।
आयुरुच्छ्वासनिःश्वासमिति प्राणा दश स्मृताः ॥ १५ ॥

सर्वजीवेषु देहायुरुच्छ्वासा इन्द्रियाणि च ।
विकलासंज्ञिनां भाषा पूर्णानां संज्ञिनां मनः ॥ १६ ॥

उपपादभवा [2]देवा नारका गर्भजाः पुनः ।
जरायुपोताण्डभवाः शेषाः सम्मूर्च्छनोद्भवाः ॥ १७ ॥

सम्मूर्च्छिनो नारकाश्च जीवाः पापा नपुंसकाः ।
देवास्तु स्त्रीपुंवेदाः[3] स्युर्वेदत्रयजुषः परे ॥ १८ ॥

सर्वे जीवा व्यवहार्यव्यवहारितया द्विधा ।
सूक्ष्मनिगोदा एवान्त्या[4]स्तेभ्योऽन्ये व्यवहारिणः ॥ १९ ॥

सचित्तः संवृतः शीतस्तदन्यो मिश्रितोऽपि वा ।
त्रिभेदैरान्तरैर्भिन्नो नवधा योनिरङ्गिनाम् ॥ २० ॥

प्रत्येकं सप्तलक्षाणि पृथ्वीवार्यग्निवायुषु ।
प्रत्येकानन्तकायेषु क्रमाद्दश चतुर्दश ॥ २१ ॥

षट् पुनर्विकलाक्षेषु मनुष्येषु चतुर्दश ।
स्युश्चतस्रश्चतस्रश्च श्वभ्रतिर्यक्सुरेषु तु ॥ २२ ॥

---

(१) क ङ मनुजा' ।
(२) क ख ङ देवनारका' ।
(३) ख ग च देवाः स्त्रीपुंसवेदाः ।
(४) ख ग ङ तेऽन्येऽपि व्यवहारिणः ।

एवं लक्षाणि योनीनामशीतिश्चतुरुत्तरा ।
सर्वज्ञोपज्ञमुक्तानि सर्वेषामपि जन्मिनाम् ॥ २३ ॥
एकाक्षा बादराः सूक्ष्माः पञ्चाक्षाः संज्ञ्यसंज्ञिनः ।
स्युर्द्वित्रिचतुरक्षाश्च पर्याप्ता इतरेऽपि च ॥ २४ ॥
एतानि जीवस्थानानि जिनोक्तानि चतुर्दश ।
मार्गणा अपि तावन्त्यो ज्ञेयास्ता नामतो यथा ॥ २५ ॥
गतीन्द्रियवपुर्योगवेदज्ञानकुदादयः ।
संयमाहारदृग्लेश्याभव्यसम्यक्त्वसंज्ञिनः ॥ २६ ॥
मिथ्यादृष्टिः सास्वादनसम्यग्मिथ्यादृशावपि ।
अविरतसम्यग्दृष्टिर्विरताविरतोऽपि च ॥ २७ ॥
प्रमत्तश्चाप्रमत्तश्च निवृत्तिबादरस्ततः ।
अनिवृत्तिबादरश्चाथ सूक्ष्मसंपरायकः ॥ २८ ॥
ततः प्रशान्तमोहश्च क्षीणमोहश्च योगवान् ।
अयोगवानिति गुणस्थानानि स्युश्चतुर्दश ॥ २९ ॥
मिथ्यादृष्टिर्भवेन्मिथ्यादर्शनस्योदये सति ।
गुणस्थानत्वमेतस्य भद्रकत्वाद्यपेक्षया ॥ ३० ॥
मिथ्यात्वस्यानुदयेऽनन्तानुबन्ध्युदये सति ।
सास्वादनः सम्यग्दृष्टिः स्यादुत्कर्षात् षडावलीः ॥ ३१ ॥
सम्यक्त्वमिथ्यात्वयोगान्मुहूर्त्तं मिश्रदर्शनः ।
अविरतसम्यग्दृष्टिरप्रत्याख्यानकोदये ॥ ३२ ॥
विरताविरतस्तु स्यात्प्रत्याख्यानोदये सति ।
प्रमत्तसंयतः प्राप्तसंयमो यः प्रमाद्यति ॥ ३३ ॥

सोऽप्रमत्तसंयतो यः संयमी न प्रमाद्यति ।
उभावपि परावृत्त्या स्यातामान्तर्मुहूर्त्तिकौ ॥ ३४ ॥
कर्मणां स्थितिघातादीनपूर्वान् कुरुते यतः ।
तस्मादपूर्वकरणः क्षपकः शमकश्च सः ॥ ३५ ॥
यद्वादरकषायाणां प्रविष्टानामिमं मिथः ।
परिणामा निवर्त्तन्ते निवृत्तिबादरोऽपि तत् ॥ ३६ ॥
परिणामा निवर्त्तन्ते मिथो यत्र न यत्नतः ।
अनिवृत्तिबादरः स्यात्क्षपकः शमकश्च सः ॥ ३७ ॥
लोभाभिधः सम्पराय: सूक्ष्मः किट्टीकृतो यतः ।
स सूक्ष्मसम्परायः स्यात्क्षपकः शमकोऽपि च ॥ ३८ ॥
क्षयोपशान्तमोहः स्यान्मोहस्योपशमे सति ।
मोहस्य तु क्षये जाते क्षीणमोहं प्रचक्षते ॥ ३९ ॥
सयोगिकेवली घातिक्षयादुत्पन्नकेवलः ।
योगानां तु क्षये जाते स एवायोगिकेवली ॥ ४० ॥

॥ इति जीवतत्त्वम् ॥

अजीवाः स्युर्धर्माधर्मविहायःकालपुद्गलाः ।
जीवेन सह पञ्चापि द्रव्याण्येतं निवेदिताः ॥ ४१ ॥
तत्र कालं विना सर्वे प्रदेशप्रचयात्मकाः ।
विना जीवमचिद्रूपा अकर्त्तारश्च ते मताः ॥ ४२ ॥
कालं विनास्तिकायाः स्युरमूर्त्ताः पुद्गलं विना ।
उत्पादविगमध्रौव्यात्मानः सर्वेऽपि ते पुनः ॥ ४३ ॥

पुद्गलाः स्युः स्पर्शरसगन्धवर्णस्वरूपिणः।
तेऽणुस्कन्धतया द्वेधा तत्राऽबद्धाः किलाणवः॥ ४४॥
बद्धाः स्कन्धा गन्धशब्दसौक्ष्म्यस्थौल्याकृतिस्पृशः।
अन्धकारातपोद्योतभेदच्छायात्मका अपि॥ ४५॥
कर्मकायमनोभाषाचेष्टितोच्छ्वासदायिनः।
सुखदुःखजीवितव्यमृत्यूपग्रहकारिणः॥ ४६॥
प्रत्येकमेकद्रव्याणि धर्माधर्मौ नभोऽपि च।
अमूर्त्तानि निष्क्रियाणि स्थिराण्यपि च सर्व्वदा॥ ४७॥
एकजीवपरीमाणसंख्यातीतप्रदेशकौ।
लोकाकाशमभिव्याप्य धर्माधर्मौ व्यवस्थितौ॥ ४८॥
स्वयं गन्तुं प्रवृत्तेषु जीवाजीवेषु सर्वतः।
सहकारी भवेद्धर्मः पानीयमिव यादसाम्॥ ४९॥
जीवानां पुद्गलानां च प्रपन्नानां स्वयं स्थितिम्।
अधर्मः [1]सहकार्यंष यथा छायाऽध्वयायिनाम्॥ ५०॥
सर्वगं स्वप्रतिष्ठं स्यादाकाशमवकाशदम्।
लोकालोकौ स्थितं व्याप्य तदनन्तप्रदेशभाक्॥ ५१॥
लोकाकाशप्रदेशस्था भिन्नाः कालाणवस्तु ये।
भावानां परिवर्त्ताय मुख्यः कालः स उच्यते॥ ५२॥
ज्योतिःशास्त्रे यस्य मानमुच्यते समयादिकम्।
स व्यावहारिकः कालः कालवेदिभिरामतः॥ ५३॥

---

(१) क ग सहकार्येषु।

नवजीर्णादिरूपेण यदमी भुवनोदरे ।
पदार्थाः परिवर्त्तन्ते तत्कालस्यैव चेष्टितम् ॥ ५४ ॥
वर्त्तमाना अतीतत्वं भाविनो वर्त्तमानताम् ।
पदार्थाः प्रतिपद्यन्ते कालक्रीडाविडम्बिताः ॥ ५५ ॥

॥ इति अजीवतत्त्वम् ॥

मनोवचनकायानां यत्स्यात्कर्म्म स आश्रवः ।
शुभः शुभस्य हेतुः स्यादशुभस्त्वशुभस्य च ॥ ५६ ॥

॥ इति आश्रवः ॥

सर्वेषामास्रवाणां यो रोधहेतुः स संवरः ।
कर्म्मणां भवहेतूनां जरणादिह निर्जरा ॥ ५७ ॥

॥ इति संवरनिर्जरे ॥

वक्ष्यन्ते भावनास्वेवास्रवसंवरनिर्जराः ।
तत्रात विस्तरेणोक्ताः पुनरुक्तत्वभीरुभिः ॥ ५८ ॥
सकषायतया जीवः कर्म्मयोग्यांस्तु पुद्गलान् ।
यदादत्ते स बन्धः स्याज्जीवास्वातन्त्र्यकारणम् ॥ ५९ ॥
प्रकृतिस्थित्यनुभागप्रदेशा विधयोऽस्य तु ।
प्रकृतिस्तु स्वभावः स्यात् ज्ञानावृत्त्यादिरष्टधा ॥ ६० ॥
ज्ञानदृष्ट्यावृती वेद्यं मोहनीयायुषी अपि ।
नामगोत्रान्तरायाश्च मूलप्रकृतयो मताः ॥ ६१ ॥
निकर्षोत्कर्षतः कालनियमः कर्म्मणां स्थितिः ।
अनुभागो विपाकः स्यात्प्रदेशोंऽशप्रकल्पनम् ॥ ६२ ॥

मिथ्यादृष्टिरविरतिप्रमादौ च क्रुदादयः ।
योगेन सह पञ्चेते विज्ञेया बन्धहेतवः ॥ ६३ ॥

॥ इति बन्धतत्त्वम् ॥

अभावे बन्धहेतूनां घातिकर्मक्षयोद्भवे ।
केवले सति मोक्षः स्याच्छेषाणां कर्मणां क्षये ॥ ६४ ॥
सुरासुरनरेन्द्राणां यत्सुखं भुवनत्रये ।
स स्यादनन्तभागोऽपि न मोक्षसुखसम्पदः ॥ ६५ ॥
स्वस्वभावजमत्यक्षं यदस्मिन् शाश्वतं सुखम् ।
चतुर्वर्गाग्रणीत्वेन तेन मोक्षः प्रकीर्त्तितः ॥ ६६ ॥

॥ इति मोक्षतत्त्वम् ॥

मतिश्रुतावधिमनःपर्यायाः केवलं तथा ।
अमीभिः सान्वयैर्भेदैर्ज्ञानं पञ्चविधं मतम् ॥ ६७ ॥
अवग्रहादिभिर्भिन्नं बह्वाद्यैरितरैरपि ।
इन्द्रियानिन्द्रियभवं मतिज्ञानमुदीरितम् ॥ ६८ ॥
विस्तृतं बहुधा पूर्वैरङ्गोपाङ्गैः प्रकीर्णकैः ।
स्याच्छब्दलाञ्छितं ज्ञेयं श्रुतज्ञानमनेकधा ॥ ६९ ॥
देवनैरयिकाणां स्यादवधिर्भवसम्भवः ।
षड्विकल्पस्तु शेषाणां क्षयोपशमलक्षणः ॥ ७० ॥
ऋजुर्विपुल इत्येवं स्यान्मनःपर्ययो द्विधा ।
विशुद्ध्यप्रतिपाताभ्यां तद्विशेषोऽवगम्यताम् ॥ ७१ ॥

अशेषद्रव्यपर्यायविषयं विश्वलोचनम् ।
अनन्तमेकमत्यचं [1]केवलज्ञानमुच्यते ॥ ७२ ॥
एवं च पञ्चभिर्ज्ञानैर्ज्ञाततत्त्वसमुच्चयः ।
अपवर्गङ्कितो रत्नत्रयस्याद्याङ्गभाग्भवेत् ॥ ७३ ॥
भवविटपिसमूलोन्मूलने मत्तदन्ती
जडिमतिमिरनाशे पद्मिनीप्राणनाथः ।
नयनमपरमेतद्विश्वतत्त्वप्रकाशे ।
करणहरिणबन्धे वागुरा ज्ञानमेव ॥ ७४ ॥ १६ ॥

द्वितीयं रत्नमाह—

रुचिर्जिनोक्ततत्त्वेषु सम्यक्श्रद्धानमुच्यते ।
जायते तन्निसर्गेण गुरोरधिगमेन वा ॥ १७ ॥

जिनोक्तेषु तत्त्वेषु जीवादिषूक्तस्वरूपेषु या रुचिस्तत् श्रद्धानम्। नहि ज्ञानमित्येव रुचिं विना फलसिद्धिः । शाकावादिस्वरूपवेदिनाऽपि रुचिरहितेन न सौहित्यलक्षणं फलमवाप्यते। श्रुतज्ञानवतोऽप्यङ्गारमर्दकादेरभव्यस्य दूरभव्यस्य वा जिनोक्ततत्त्वेषु रुचिरहितस्य न विवक्षितं फलमुपश्रूयते। तस्य चोत्पादे द्वयी गतिः निसर्गोऽधिगमश्च। निसर्गः स्वभावो गुरूपदेशादिनिरपेक्षः सम्यक्श्रद्धानकारणम्।

---

(१) ख क केवलं ज्ञानम् ।

तथाहि—

अनाद्यनन्तसंसारावर्त्तवर्त्तिषु देहिषु ।
[1]ज्ञानदृग्व्याहृतिवेदनीयान्तरायकर्म्मणाम् ॥ १ ॥
सागरोपमकोटीनां कोव्यस्त्रिंशत्परा स्थितिः ।
विंशतिर्गोत्रनाम्नोश्च मोहनीयस्य सप्ततिः ॥ २ ॥
ततो गिरिसरिद्ग्रावघोलनान्यायतः स्वयम् ।
एकाब्धिकोटिकोव्यूना प्रत्येकं क्षीयते स्थितिः ॥ ३ ॥
शेषाब्धिकोटिकोव्यन्तःस्थितौ सकलजन्मिनः ।
यथाप्रवृत्तिकरणाद्ग्रन्थिदेशं समियृति ॥ ४ ॥
रागद्वेषपरीणामो दुर्भेदो ग्रन्थिरुच्यते ।
दुरुच्छेदो दृढतरः काष्ठादेरिव सर्वदा ॥ ५ ॥
ग्रन्थिदेशं तु संप्राप्ता रागादिप्रेरिताः पुनः ।
उत्कृष्टबन्धयोग्याः स्युश्चतुर्गतिजुषोऽपि ते ॥ ६ ॥
तेषां मध्ये तु ये भव्या भाविभद्राः शरीरिणः ।
आविष्कृत्य परं वीर्यमपूर्वकरणे कृते ॥ ७ ॥
अतिक्रामन्ति सहसा तं ग्रन्थिं दुरतिक्रमम् ।
अतिक्रान्तमहाध्वानो घट्टभूमिमिवाध्वगाः ॥ ८ ॥
अथानिवृत्तिकरणादन्तरकरणे कृते ।
मिथ्यात्वं विरलीकुर्युर्वेदनीयं यदग्रतः ॥ ९ ॥

---

(१) क ख ज्ञानदृग्व्याहृतिवेद्याभिधान्तरायकर्मणाम् ।

आन्तर्मुहूर्त्तिकं सम्यगदर्शनं प्राप्नुवन्ति यत् ।
निसर्गहेतुकमिदं सम्यकश्रद्धानमुच्यते ॥ १० ॥
गुरूपदेशमालम्ब्य सर्वेषामपि देहिनाम् ।
यत्तु सम्यक्श्रद्धानं तत्स्यादधिगमजं परम् ॥ ११ ॥
यमप्रशमजीवातुर्बीजं ज्ञानचारित्रयोः ।
हेतुस्तपःश्रुतादीनां सद्दर्शनमुदीरितम् ॥ १२ ॥
श्लाघ्यं हि चरणज्ञानवियुक्तमपि दर्शनम् ।
न पुनर्ज्ञानचारित्रे मिथ्यात्वविषदूषिते ॥ १३ ॥
ज्ञानचारित्रहीनोऽपि श्रूयते श्रेणिकः किल ।
सम्यग्दर्शनमाहात्म्यात्तीर्थकृत्वं प्रपत्स्यते ॥ १४ ॥
अधिगततत्त्वबोधाः प्राणिनो यत्प्रभावा-
दममसुखनिधानं मोक्षमासादयन्ति ।
भवजलनिधिपोतं दुःखकान्तारदावम् ।
श्रयत तदिह सम्यगदर्शनं रत्नमेकम् ॥ १५ ॥ १७ ॥

तृतीयं रत्नमाह—

सर्वसावद्ययोगानां त्यागश्चारित्रमिष्यते ।
कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा ॥ १८ ॥

सर्वे न तु कतिपये ये सावद्ययोगाः सपापव्यापारास्तेषां त्यागो ज्ञानश्रद्धानपूर्वकं परिहारः स सम्यक्चारित्रं ज्ञानदर्शनं विना कृतस्य चारित्रस्य सम्यक्चारित्रत्वानुपपत्तेः । सर्वग्रहणं देशचारित्रव्यवच्छेदार्थम् । इदं च चारित्रं मूलोत्तरगुणभेदेन

द्विविधं कीर्त्तितमित्यादिना मूलगुणरूपं चारित्रमाह । पञ्चधेति व्रतभेदेन न तु स्वरूपतः ॥ १८ ॥

मूलगुणानेव कीर्त्तयति—

अहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहाः ।
पञ्चभिः पञ्चभिर्युक्ता भावनाभिर्विमुक्तये ॥१९॥

अहिंसादयश्च पञ्चापि प्रत्येकं पञ्चविधभावनाभ्यर्हिताः सन्तः स्वकार्यजननं प्रति अप्रतिबद्धसामर्थ्या भवन्तीति पञ्चभिरित्याद्युक्तम् ॥ १९ ॥

प्रथमं मूलगुणमाह—

न यत्प्रमादयोगेन जीवितव्यपरोपणम् ।
त्रसानां स्थावराणां च तदहिंसाव्रतं मतम् ॥२०॥

प्रमादोऽज्ञानसंशयविपर्ययरागद्वेषस्मृतिभ्रंशयोगदुष्प्रणिधानधर्मानादरभेदादष्टविधः । तद्योगात्त्रसानां स्थावराणां च जीवानां प्राणव्यपरोपणं हिंसा । तन्निषेधादहिंसा प्रथमं व्रतम् ॥ २० ॥

द्वितीयमाह—

प्रियं पथ्यं वचस्तथ्यं सूनृतव्रतमुच्यते ।
तत्तथ्यमपि नो तथ्यमप्रियं चाहितं च यत् ॥२१॥

तथ्यं वचोऽमृषारूपमुच्यमानं सूनृतव्रतमुच्यते । किं विशिष्टं तथ्यं

प्रियं पथ्यं च तत्र प्रियं यत् श्रुतमात्रं प्रीणयति पथ्यं यदायती हितम्। ननु तथ्यमेवैकं विशेषणमस्तु सत्यव्रताधिकारात् प्रिय-पथ्ययोस्तु कोऽधिकारः। अत आह। तत्तथ्यमपीति व्यवहारापेक्षया तथ्यमपि यदप्रियं यथा चौरं प्रति चौरस्त्वं कुष्ठिनं प्रति कुष्ठी त्वमिति तदप्रियत्वान्न तथ्यम्। तथ्यमप्यहितं यथा। मृगयुभिः पृष्टस्यारण्ये मृगान् दृष्टवतो मया मृगा दृष्टा इति तज्जन्तु-घातहेतुत्वान्न तथ्यम् ॥ २१ ॥

तृतीयमाह—

अनादानमदत्तस्यास्तेयव्रतमुदीरितम्।
बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते ॥२२॥

वित्तस्वामिना अदत्तस्य वित्तस्य यदनादानं तदस्तेयव्रतम्। तच्च स्वामिजीवतीर्थंकरगुर्व्वदत्तभेदेन चतुर्विधम्। तत्र स्वाम्यदत्तं तृणोपलकाष्ठादिकं तत्स्वामिना यददत्तम्। जीवादत्तं यत्स्वामिनादत्तमपि जीवेनादत्तं यथा प्रव्रज्यापरिणामविकलो मातापितृभ्यां पुत्रादि गुरुभ्यो दीयते। तीर्थंकरादत्तं यत्तीर्थंकरैः प्रतिषिद्धमाधा-कर्मिकादि गृह्यते। गुर्व्वदत्तं नाम स्वामिना दत्तमाधाकर्म्मि-कादिदोषरहितं गुरूननुज्ञाप्य यद्गृह्यते। नन्वहिंसापरिकरत्वं सर्व्वव्रतानामदत्तादाने तु केव हिंसा येनाहिंसापरिकरत्वं स्यादित्युक्तं बाह्याः प्राणा इत्यादि। यदि स्तेयस्य प्राणहरणस्वरूप मृष्यते तदा तदस्त्येव ॥ २२ ॥

चतुर्थमाह—

दिव्यौदारिककामानां कृतानुमतिकारितैः।
मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम् ॥२३॥

दिवि भवा दिव्याः ते च वैक्रियशरीरसम्भवाः। औदारिकाश्च औदारिकतिर्यग्मनुष्यदेहप्रभवास्ते च ते काम्यन्त इति कामाश्च तेषां त्यागो ऽब्रह्मनिषेधात्मकं ब्रह्मचर्यव्रतम्। तच्चाष्टादशधा मनसा ऽब्रह्म न करोमि न कारयामि कुर्वन्तमपि परं नानुमन्ये। एवं च वचसा कायेन वेति दिव्ये ब्रह्मणि नवभेदाः। एवमौदारिके ऽपीत्यष्टादश।

यदाह—

दिव्यात्कामरतिसुखात् त्रिविधं त्रिविधेन विरतिरिति नवकम्।
औदारिकादपि तथा तद्ब्रह्माष्टादशविकल्पम् ॥ १ ॥ इति ॥

कृतानुमतिकारितैरिति मनोवाक्कायत इति च मध्ये कृतत्वात्पूर्वोत्तरेष्वपि महाव्रतेषु सम्बन्धनीयम् ॥ २३ ॥

पञ्चममाह—

सर्वभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः।
यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः ॥२४॥

सर्वभावेषु द्रव्यक्षेत्रकालभावरूपेषु यो मूर्च्छाया गार्द्ध्यस्य त्यागो नतु द्रव्यादित्यागमात्रं सोऽपरिग्रहव्रतम्। ननु परिग्रहत्यागोऽपरिग्रहव्रतं स्यात् किं मूर्छात्यागलक्षणेन तल्लक्षणेन मत आह। यदसत्स्वपीति।

यस्मादसत्स्वप्यविद्यमानेष्वपि द्रव्यक्षेत्रकालभावेषु मूर्च्छया चित्त-विप्लवः स्यात्। चित्तविप्लवः प्रशमसौख्यविपर्यासः। असत्यपि धने धनगर्द्धवतो राजगृहनगरद्रमकस्येव चित्तसंक्लेशो दुर्गतिपात-निबन्धनं भवति। सत्यपि वा द्रव्यक्षेत्रकालभावलक्षणे सामग्री-विशेषे तृष्णाकृष्णाहिनिरुपद्रवमनसां प्रशमसुखप्राप्त्या चित्त-विप्लवाभावः। अत एव धर्म्मोपकरणधारिणां यतीनां शरीरे उपकरणे च निर्ममत्वानामपरिग्रहत्वम्।

यदाह—

यद्वत्तुरगः सत्स्वप्याभरणभूषणेष्वनभिषक्तः।
तद्वदुपग्रहवानपि न सङ्गमुपयाति निर्ग्रन्थः॥ १॥

यथा च धर्म्मोपकरणवतामपि मूर्च्छारहितानां मुनीनां न परिग्रहग्रहिलत्वदोषस्तथा व्रतिनीनामपि गुरूपदिष्टधर्म्मोपकरण-धारिणीनां रत्नत्रयवतीनां तेन तासां धर्म्मोपकरणपरिग्रहमात्रेण मोक्षापवादः प्रलापमात्रम्॥ २४॥

पञ्चभिः पञ्चभिर्युक्ता भावनाभिर्विमुक्तये इत्युक्तं तत्रस्तौति—

भावनाभिर्भावितानि पञ्चभिः पञ्चभिः क्रमात्।
महाव्रतानि नो कस्य साधयन्त्यव्ययं पदम्॥ २५॥

भाव्यन्ते वास्यन्ते गुणविशेषमारोप्यन्ते महाव्रतानि याभिस्ता भावनाः॥ २५॥

अथ प्रथमव्रतस्य भावना आह —

मनोगुप्त्यैषणादानेर्याभिः समितिभिः सदा ।
दृष्टान्नपानग्रहणे नाहिंसां भावयेत् सुधीः ॥२६॥

मनोगुप्तिर्वक्ष्यमाणलक्षणा तयेत्येका भावना । एषणा विशुद्धपिण्ड ग्रहणलक्षणा तस्यां या समितिः । आदानग्रहणेन निक्षेप उपलक्ष्यते । तेन पीठादेर्ग्रहणे स्थापने च या समितिः । ईरणमीर्या गमनं तत्र या समितिः । आभिरेषणादानेर्यासमितिभिर्दृष्टयोरन्नपानयोर्ग्रहणेनोपलक्षणत्वात् तदभ्यासेनाहिंसां भावयेदिति सम्बन्धः । इह च गुप्तिसमितीनां महाव्रतभावनात्वेन गतार्थानामपि अथवा पञ्चसमितीत्यादिग्रन्थेन पुनरुक्तीकरणं गुप्तिसमितीनामुत्तरगुणत्वज्ञापनार्थम् ।

यदाह—

पिण्डस्स जा विसोही समिईओ भावणा तवो दुविहो ।
पडिमा अभिग्गहो चिय उत्तरगुणमोवियाणाहिं ॥ १ ॥

इह च मनोगुप्तेर्भावनात्वं हिंसायां मनोव्यापारस्य प्राधान्यात् । श्रूयते हि प्रसन्नचन्द्रराजर्षिर्मनोगुप्त्या अभाविताहिंसाव्रतो हिंसामकुर्वन्नपि सप्तमनरकपृथ्वीयोग्यं कर्म्म निर्ममे एषणादानेर्यासमितयस्तु अहिंसायां नितरामुपकारिण्य इति युक्तं भावनात्वम् । दृष्टान्नपानग्रहणं च संसक्तान्नपानपरिहारेणाहिंसाव्रतोपकारायेति पञ्चमी भावना ॥ २६ ॥

द्वितीयव्रतस्य भावना आह—

हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम् ।
आलोच्य भाषणेनापि भावयेत्सूनृतव्रतम् ॥२७॥

हसन् हि मिथ्या ब्रूयात् । लोभपरवशश्चार्थाकाङ्क्षया भयार्त्तः प्राणादिरक्षणेच्छया क्रुद्धः क्रोधतरलितमनस्कतया मिथ्या ब्रूयादिति । हास्यादिप्रत्याख्यानानि चतस्रो भावनाः । आलोच्य भाषणं सम्यग्ज्ञानपूर्व्वकं पर्य्यालोच्य मृषा माभूदिति मौनतिरस्कारद्वारेण भाषणं पञ्चमी भावना । मौनस्य च मृषावादहेतुत्वं प्रतीतमेव ।

यदाह—

रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतमिति ॥ २७ ॥

तृतीयव्रतस्य भावना आह ।

आलोच्यावग्रहयाच्ञाभीक्ष्णावग्रहयाचनम् ।
एतावन्मात्रमेवैतदित्यवग्रहधारणम् ॥ २८ ॥
समानधार्मिकेभ्यश्च तथावग्रहयाचनम् ।
अनुज्ञापितपानान्नाशनमस्तेयभावनाः ॥२९॥ (युग्मम्)

आलोच्य मनसा विचिन्त्यावग्रहं याचेत । देवेन्द्रराजगृहपतिशय्यातरसाधर्मिकभेदाद्धि पञ्चावग्रहाः । अत्र च पूर्वः पूर्वो बाध्य उत्तर उत्तरो बाधकः । तत्र देवेन्द्रावग्रहो यथा सौधर्म्माधिपतेर्दक्षिणलोकार्द्धं ईशानाधिपतेरुत्तरलोकार्द्धम् । राजा चक्रवर्त्ती

तस्यावग्रहो भारतादिवर्षम् । गृहपतिर्मण्डलाधिपतिस्तस्यावग्रह-स्तन्मण्डलादि । शय्यातरो वसतिस्वामी तदवग्रहो वसतिरेव । साधर्मिकाः साधवस्तेषामवग्रहः शय्यातरप्रदत्तं गृहादि । एता-नवग्रहान् ज्ञात्वा यथायथमवग्रहं याचेत । अस्वामियाचने हि परस्परविरोधेन अकाण्डधाटनादय ऐहिका दोषाः परलोके-ऽपि अदत्तपरिभोगजनितं पापकर्म्म । इति प्रथमा भावना । सकृद्दत्तेऽप्यवग्रहे स्वामिना अभीक्ष्णं भूयो भूयोऽवग्रहयाचनं कार्य्यं पूर्व्वलब्धेऽवग्रहे ग्लानाद्यवस्थामूत्रपुरीषोत्सर्गपात्रकरचरण-प्रक्षालनस्थानानि दातृचित्तपीडापरिहारार्थं याचनीयानि । इति द्वितीयभावना । एतावन्मात्रमेव एतावत्परिमाणमेवैतत् क्षेत्रादि ममोपयोगि नाधिकमिति अवग्रहस्य धारणं व्यवस्थापनम् । एवमवग्रहधारणे हि तदभ्यन्तरवर्त्तिनीमूर्द्ध्वस्थानादिक्रियामासे-वमानो न दातुरुपरोधकारी भवति । याञ्चाकाल एवावग्रहा-नवधारणे विपरिणतिरपि दातुश्चेतसि स्यादात्मनोऽपि चादत्तपरि-भोगजनितकर्म्मबन्धः स्यादिति तृतीयभावना । धर्मं चर-न्तीति धार्मिकाः समानास्तुल्याः प्रतिपन्नैकशासनाः साधवस्तेभ्यः पूर्वपरिगृहीतक्षेत्रेभ्योऽवग्रहो याच्यस्तदनुज्ञानाद्धि तत्रासितव्यं अन्यथा स्तेयं स्यादिति चतुर्थी भावना । अनुज्ञापितं अनुज्ञया स्वीकृते ये पानान्ने तयोरशनं सूत्रोक्तेन हि विधिना प्रासुकमेषणीयं कल्पनीयं च पानान्नं लब्धमानीयालोचनापूर्वं गुरवे निवेद्यानुज्ञातो गुरुणा मण्डल्यामेकको वा ऽश्नीयात् । उपलक्षणमेतत् यत्-किञ्चिदौघिकौपग्रहिकभेदमुपकरणं धर्मसाधनं तत्सर्वं गुरुणाऽनु-

स्नातं परिभोक्तव्यम्। एवं विदधानो नातिक्रामत्यस्तेयव्रतमिति पञ्चमी भावना।

चतुर्थव्रतभावना आह –

स्त्रीषण्ढपशुमद्वेश्मासनकुड्यान्तरोज्झनात्।
सरागस्त्रीकथात्यागात्प्राग्रतस्मृतिवर्जनात् ॥ ३० ॥
स्त्रीरम्याङ्गेक्षणस्वाङ्गसंस्कारपरिवर्जनात्।
प्रणीतात्यशनत्यागाद् ब्रह्मचर्यं तु भावयेत् ॥ ३१ ॥
(युग्मम्)

स्त्रियो देवमानुषभेदाद्विविधाः एताश्च सचित्ताः। अचित्तास्तु पुस्त-लेप्यचित्रकर्मादिनिर्मिताः। षण्ढास्तृतीयवेदोदयवर्त्तिनो महा-मोहकर्माणः स्त्रीपुंससेवनाभिरताः। पशवस्तिर्यग्योनिजाः। तत्र गोमहिषीवडवावालेयीश्रजाश्चविकादयः सम्भाव्यमानमैथुनाः। एभ्यः कृतद्वन्द्वेभ्यो मतुः स्त्रीषण्ढपशुमती च ते वेश्मासने च वेश्म वसतिः। आसनं संस्तारकादि। कुड्यान्तरं यत्रान्तरस्थोऽपि कुड्यादौ दम्पत्योर्मोहनादिशब्दः श्रूयते ब्रह्मचर्यभङ्गभयादेषामुज्झनं त्यागः। इति प्रथमा भावना। सरागस्य मोहोदयवतो या स्त्रीभिः कथा स्त्रीणां वा कथा सरागाश्च ताः स्त्रियश्च ताभिस्तासां वा कथा तस्यास्त्यागः। रागानुबन्धिनी हि देशजातिकुलनेपथ्यभाषागति-विभ्रमेङ्गितहास्यलीलाकटाक्षप्रणयकलहशृङ्गाररसानुविद्धा कथा

वात्येव चित्तोदधेरवश्यं विक्षोभमादधातीति द्वितीया भावना। प्राक् प्रव्रज्याब्रह्मचर्यात् पूर्वं गृहस्थावस्थायां यद्वृत्तं स्त्रीभिः सह निधुवनं तस्य स्मृतिस्तस्या वर्जनं प्राग्रतस्मरणेन्धनाद्धि कामाग्निः सन्धुक्ष्यते। इति तृतीया भावना। स्त्रीणामविवेकिजनापेक्षया यानि रम्याणि स्पृहणीयान्यङ्गानि मुखनयनस्तनजघनादीनि तेषामीक्षणमपूर्वविस्मयरसनिर्भरतया विस्फारिताक्षस्य विलोकनम्। ईक्षणमात्रं तु रागद्वेषरहितस्यादुष्टमेव।

यदाह—

> अशक्यं रूपमद्रष्टुं चक्षुर्गोचरमागतम्।
> रागद्वेषौ तु यौ तत्र तौ बुधः परिवर्जयेत् ॥१॥ इत्यादि ॥

तथा स्वस्यात्मनोऽङ्गं शरीरं तस्य संस्कारः स्नानविलेपनधूपननख-दन्तकेशसम्मार्जनादि स्त्रीरम्याङ्गेक्षणं च स्वाङ्गसंस्कारश्च तयोः परिवर्जनात्। स्त्रीरम्याङ्गेक्षणतरलितविलोचनो हि दीपशिखायां शलभ इव विनाशमुपयाति। अशुचिशरीरसंस्कारमूढो हि तत्तदुत्कलिकामयैर्विकल्पैर्वृथात्मानमायासयतीति चतुर्थी भावना। प्रणीतो वृष्यः स्निग्धमधुरादिरसः। अत्यशनमप्रणीतस्याऽपि रूक्षभैक्षस्याकण्ठमुदरपूरणं तयोस्त्यागो निरन्तरवृष्यमधुरस्निग्ध-रसप्रणीतो हि प्रधानधातुपरिपोषेण वेदोदयादब्रह्माऽपि सेवेत। अत्यशनस्य तु न केवलं ब्रह्मक्षतिकारित्वाद्वर्जनं शरीरपीडा-कारित्वादपि।

यदाह—

अड्ढमसणस्स सव्वं अणस्स कुज्जा [1]दगस्स दोभागे ।

वाउपवियारणट्ठा छब्भायं ऊणगं कुज्जा ॥ १ ॥

इति पञ्चमी भावना । एवं नवविधब्रह्मचर्यगुप्तिसंग्रहेण ब्रह्मचर्य-व्रतस्य पञ्च भावना: ॥ ३० ॥ ३१ ॥

पञ्चमव्रतस्य भावना आह—

स्पर्शे रसे च गन्धे च रूपे शब्दे च हारिणि ।
पञ्चस्वितीन्द्रियार्थेषु गाढं गार्द्ध्यस्य वर्ज्जनम् ॥३२॥
एतेष्वेवामनोज्ञेषु सर्व्वथा द्वेषवर्ज्जनम् ।
आकिञ्चन्यव्रतस्यैवं भावना: पञ्च कीर्त्तिता: ॥३३॥

(युग्मम्)

स्पर्शादिषु मनोहारिषु विषयेषु यद्गाढं गार्द्ध्यस्याभिष्वङ्गस्य वर्जनम् । स्पर्शादिष्वेवामनोज्ञेष्विन्द्रियप्रातिकूलेषु यो द्वेषोऽप्रीति-लक्षणस्तस्य वर्जनम् । गार्द्ध्यवान् हि मनोज्ञे विषयेऽभिष्वङ्गवानम-नोज्ञान्विषयान्विद्वेष्टि मध्यस्थस्य तु मूर्च्छारहितस्य न क्वचि-त्प्रीतिरप्रीतिर्वा रागानान्तरीयकतया च द्वेषस्योपादानम् । किञ्चन बाह्याभ्यन्तरपरिग्रहरूपं नास्यास्तीत्यकिञ्चनस्तद्भाव-आकिञ्चन्यमपरिग्रहता । आकिञ्चन्यं च तद्व्रतं च तस्यैता: पञ्च भावना: ॥ ३२ ॥ ३३ ॥

---

(१) क ग घ ङ च छ दगस्स ।

मूलगुणरूपचारित्रमभिधायोत्तरगुणरूपं तदाह—

अथवा पञ्चसमितिगुप्तित्रयपवित्रितम् ।
चरित्रं सम्यक्चारित्रमित्याहुर्मुनिपुङ्गवाः ॥ ३४ ॥

समितिरिति पञ्चानां चेष्टानां तान्त्रिकी संज्ञा । अथवा सं सम्यक् प्रशस्ता अर्हत्प्रवचनानुसारिणी इतिः चेष्टा समितिः पञ्चानां समितीनां समाहारः पञ्चसमिति । गुप्तिरात्मनः संरक्षणं मुमुक्षोर्योगनिग्रह इत्यर्थः । गुप्तीनां त्रयं गुप्तित्रयं पञ्चसमिति च गुप्तित्रयं च ताभ्यां च पवित्रितं यच्चरित्रं यतीनां चेष्टा सा सम्यक्चारित्रमुच्यते । सम्यक्प्रवृत्तिलक्षणा समितिः प्रवृत्तिनिवृत्तिलक्षणा गुप्ति रत्यनयोर्विशेषः ॥ ३४ ॥

अथ समितीर्गुप्तीश्च नामत आह—

ईर्याभाषेषणादाननिक्षेपोत्सर्गसंज्ञिकाः ।
पञ्चाहुः समितीस्तिस्रो गुप्तीस्त्रियोगनिग्रहात् ॥ ३५ ॥

ईर्यासमितिर्भाषासमितिरेषणासमितिरादाननिक्षेपसमितिरुत्सर्गसमितिरित्येताः पञ्चसमितीर्ब्रुवते तीर्थकराः । त्रिसंख्या योगास्त्रियोगा मनोवाक्कायव्यापारास्तेषां निग्रहो निरोधः । प्रवचनविधिना मार्गव्यवस्थापनमुन्मार्गनिवारणं च । निग्रहादिति हेतौ पञ्चमी तेन मनोगुप्तिर्वचनगुप्तिः कायगुप्तिरिति तिस्रो गुप्तीर्ब्रुवते ॥ ३५ ॥

ईर्यालक्षणमाह—

लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः ।
जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम् ॥ ३६ ॥

त्रसस्थावरजन्तुजाताभयदानदीक्षितस्य मुनेरावश्यके प्रयोजने गच्छतो जन्तुरक्षानिमित्तं स्वशरीररक्षानिमित्तं च पादाग्रादारभ्य युगमात्रक्षेत्रं यावत् निरीक्ष्य ईरणमीर्या गतिस्तस्यां समितिरीर्यासमितिः ।

यदाहुः—

'पुरओ जुगमायाए पेहमाणो महिं चरे ।
वज्जंतो बीयहरियाइं पाणे य दगमट्टियं ॥ १ ॥
²ओवायं विसमं खाणुं विज्जलं परिवज्जए ।
संकमेण न गच्छेज्जा विज्जमाणे परक्कमे ॥ २ ॥

गतिश्च मार्गे भवति तस्य विशेषणं लोकातिवाहिते लोकैरतिवाहिते अत्यन्तक्षुण्ण । चुम्बिते स्पृष्टे आदित्यकिरणैः प्रथमविशेषणेन परैर्विराधिते मार्गे गच्छतो यतः षड्जीवनिकायविराधना न भवति । उन्मार्गेण न गन्तव्यमिति चाह । तथाविधेऽपि मार्गे

(१) पुरतो युगमात्रया प्रेक्षमाणो महीं चरेत् ।
वर्जयन् बीजहरितानि प्राणान् च दकमृत्तिकाम् ॥
(२) अवपातं विषमं स्थाणुं विजलं परिवर्जयेत् ।
संक्रमेण न गच्छेत् विद्यमाने पराक्रमे ॥

रात्रौ गच्छतः सम्पातिमसत्त्वविराधना भवेदिति तत्परिहारार्थं द्वितीयविशेषणम् । एवंविधोपयोगवतश्च गच्छतो मुनेः कथंचित् प्राणिवधेऽपि प्राणिवधपापं न भवति ।

यदाह—

उच्चालियम्मि पाए इरियासमियस्स सङ्कमट्ठाए ।
वावज्जेज्ज कुलिङ्गी मरिज्ज तं जोगमासज्ज ॥ १ ॥
न य तस्स तन्निमित्तो बंधो सुहुमोवि देसिओ समए ।
अणवज्जो उपओगेण सव्वभावेण सो जम्हा ॥ २ ॥

तथा—

जियदु व मरदु व जीवो अजदाचारस्स निच्छओ हिंसा ।
पयदस्स णत्थि बंधो हिंसामित्तेण समिदस्स ॥ ३ ॥ ३६ ॥

भाषासमितिमाह—

अवद्यत्यागतः सर्वजनीनं मितभाषणम् ।
प्रिया वाचंयमानां सा भाषासमितिरुच्यते ॥३७॥

अवद्यानि भाषादोषा वाक्यशुद्ध्यध्ययनप्रतिपादिताः धूर्तकामुक क्रव्यादचौरचार्वाकादिभाषितानि च तेषां निरस्ततया त्यागस्ततः सर्वजनीनं सर्वजनेभ्यो हितं मितं स्वल्पमप्यतिबहुप्रयोजनसाधकं तच्च तद्भाषणं च ।

यदाह—

'महुरं निउणं थोवं कज्जावडियं अगव्वियमतुच्छं ।

पुव्विंमइसंकलियं भणंति जं धम्मसंजुत्तं ॥ १ ॥

एवंविधं यद्भाषणं सा भाषासमितिः । भाषायां सम्यगिति-र्भाषासमितिः । सा च प्रिया अभिमता वाचंयमानां मुनीनाम् ।

यदाहुः—

'जा य सच्चा न वत्तव्वा सच्चामोसा य जा मुसा ।

जा य बुद्धेहिं णाइन्ना ण तं भासेज्ज पन्नवं ॥ १ ॥ इति ॥३७॥

एषणासमितिमाह—

द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् ।

मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ॥ ३८ ॥

द्वाभ्यामधिका चत्वारिंशत् द्विचत्वारिंशद्भिक्षादोषाः उद्गमोत्पाद-नैषणालक्षणाः तत्रोद्गमदोषा गृहस्थप्रभवाः षोडश ।

यद्यथा—

'आहाकम्मुद्देसियपूइकम्मे अ मीसजाए य ।

ठवणा पाहुडियाए पाउयरकीयपामिच्चे ॥ १ ॥

(१) मधुरं निपुणं स्तोकं कार्यापतितमगर्वितमतुच्छम् ।

पूर्वमतिसङ्कलितं भणन्ति यद्धर्मसंयुक्तम् ॥

(२) या च सत्या न वक्तव्या सत्यामृषा च या मृषा ।

या च बुद्धैरनाचीर्णा न तां भाषेत प्रज्ञावान् ॥

(३) आधाकर्मौद्देशिकपूतिकर्म च मिश्रजातं च ।

स्थापना प्राभृतिका प्रादुष्कारक्रीतप्रामित्यम् ॥

'परियट्टिए अभिहडे उब्भिन्ने मालोहडे इय ।
अच्छिज्जे अणिसट्ठे अज्झोयरए य सोलसमे ॥ २ ॥

आधाय विकल्प्य यतिं मनसि कृत्वा सचित्तस्याचित्तीकरण-मचित्तस्य वा पाको निरुक्तादाधाकर्म ॥ १ ॥

उद्देशः साध्वर्थं सङ्कल्पः स प्रयोजनमस्य औद्देशिकं यत्पूर्वकृत-मोदनमोदकक्षोदादि तत्साधूद्देशेन दध्यादिना गुडपाकेन च संस्क्रियते भवति ॥ २ ॥

आधाकर्मिकावयवसम्मिश्रं शुद्धमपि यत्तत्पूतिकर्म शुचिद्रव्य-मिवाशुचिद्रव्यसम्मिश्रम् ॥ ३ ॥

यदात्मार्थं साध्वर्थं चादित एव मिश्रं पच्यते तन्मिश्रम् ॥ ४ ॥

साधुयाचितस्य क्षीरादेः पृथक्कृत्य स्वभाजने स्थापनं स्थापना ॥ ५ ॥

कालान्तरभाविनो विवाहादेरिदानीं सन्निहिताः साधवः सन्ति तेषामप्युपयोगे भवत्विति बुद्ध्या इदानीमेव करणं समय-परिभाषया प्राभृतिका सन्निकृष्टस्य विवाहादेः कालान्तरे साधु-समागमनं सञ्चिन्त्योत्कर्षणं वा ॥ ६ ॥

यदन्धकारव्यवस्थितस्य द्रव्यस्य वह्निप्रदीपमण्यादिना भित्त्य-पनयनेन वा बहिर्निष्कास्य द्रव्यधारणेन वा प्रकटकरणं तत्प्रादु-ष्करणम् ॥ ७ ॥

यत्साध्वर्थं मूल्येन क्रीयते तत्क्रीतम् ॥ ८ ॥

---

(१) परिवर्तितमभ्याहृतमुद्भिन्नं मालापहृतमिति ।
आच्छेद्यमनिसृष्टं अध्यवपूरकश्च षोडशः ॥

यत्साध्वर्थमन्नादि उच्छतकं गृहीत्वा दीयते तत्प्रामित्यकम् ॥९॥

स्वद्रव्यमर्पयित्वा परद्रव्यं तत्सदृशं गृहीत्वा यद्दीयते तत्परिवर्त्तितम् ॥ १० ॥

गृहग्रामादेः साध्वर्थं यदानीतं तदभ्याहृतम् ॥ ११ ॥

कुतुपादिस्थस्य घृतादेर्दानार्थं यन्मृत्तिकाद्यपनयनं तदुद्भिन्नम् ॥ १२ ॥

यदुपरिभूमिकातः शिक्यादेर्भूमिगृहाद्वा आकृष्य साधुभ्यो दानं तन्मालापहृतम् ॥ १३ ॥

यदाच्छिद्य परकीयं हठात् गृहीत्वा स्वामी प्रभुर्चौरो वा ददाति तदाच्छेद्यम् ॥ १४ ॥

यद्गोष्ठीभक्तादिसर्वैरदत्तमननुमतं वा एकः कश्चित्साधुभ्यो ददाति तदनिसृष्टम् ॥ १५ ॥

स्वार्थमधिश्रयणे सति साधुसमागमश्रवणात्तदर्थं पुनर्यो धान्यादिवापः सोऽध्यवपूरकः ॥ १६ ॥

उत्पादनादोषा अपि षोडश ते च साधुप्रभवाः ।

तद्यथा—

'धाई दूई निमित्ते आजीववणीवगे तिगिच्छा य ।
कोहे माणे माया लोभे अ हवन्ति दस एए ॥ १ ॥

(१) धात्री दूती निमित्तं आजीववनीपको चिकित्सा च ।
क्रोधो मानो माया लोभश्च भवन्ति दश एते ॥

[1]पुव्विंपच्छासंथवविज्जामन्ते य चुणजोए य।
उप्पायणाइ दोसा सोलसमे मूलकम्मे य ॥ २ ॥

बालस्य क्षीरमज्जनमण्डनक्रीडनाङ्कारोपणकर्मकारिण्यः पञ्च-धात्र्यः एतासां कर्म भिक्षार्थं कुर्वतो मुनेर्धात्रीपिण्डः ॥ १ ॥

मिथः सन्देशकथनं दूतीत्वं तत्कुर्वतो भिक्षार्थं दूती-पिण्डः ॥ २ ॥

अतीतानागतवर्त्तमानकालेषु लाभालाभादिकथनं निमित्तं तद्भिक्षार्थं कुर्वतो निमित्तपिण्डः ॥ ३ ॥

जातिकुलगणकर्मशिल्पादिप्रधानेभ्य आत्मनस्तत्तद्गुणत्वारोपणं भिक्षार्थमाजीवपिण्डः ॥ ४ ॥

श्रमणब्राह्मणकृपणातिथिश्वानादिभक्तानां पुरतः पिण्डार्थ-मात्मानं तत्तद्भक्तं दर्शयतो वनीपकपिण्डः ॥ ५ ॥

वमनविरेचनवस्तिकर्मादि कारयतो वैद्यभैषज्यादि सूचयतो वा पिण्डार्थं चिकित्सापिण्डः ॥ ६ ॥

विद्यातपःप्रभावख्यापनं राजपूजादिख्यापनं क्रोधफलदर्शनं वा भिक्षार्थं कुर्वतः क्रोधपिण्डः ॥ ७ ॥

लब्धिप्रशंसोत्तानस्य परेणोत्साहितस्यावमतस्य वा गृहस्था-भिमानमुत्पादयतो मानपिण्डः ॥ ८ ॥

नानावेषभाषापरिवर्त्तनं भिक्षार्थं कुर्वतो मायापिण्डः ॥ ९ ॥

---

(१) पूर्वपश्चात्संस्तवविद्यामन्त्रं च चूर्णयोगश्च।
उत्पादनाया दोषा षोडशो मूलकर्म च ॥

अतिलोभाद् भिक्षार्थं पर्यटतो लोभपिण्डः ॥ १० ॥

पूर्वसंस्तवं जननीजनकादिद्वारेण पश्चात्संस्तवं श्वश्रूश्वशुरादिद्वारेणात्मपरिचयाऽनुरूपं सम्बन्धं भिक्षार्थं घटयतः पूर्वपश्चात्संस्तवपिण्डः ॥ ११ ॥

विद्यां मन्त्रं चूर्णं योगं च भिक्षार्थं प्रयुञ्जानस्य चत्वारो विद्यादिपिण्डाः:—

मन्त्रजपहोमादिसाध्या स्त्रीदेवताधिष्ठाना वा विद्या ॥ १२ ॥

पाठमात्रप्रसिद्धः पुरुषाधिष्ठानो वा मन्त्रः ॥ १३ ॥

चूर्णानि नयनाञ्जनादीनि अन्तर्द्धानादिफलानि ॥ १४ ॥

पादप्रलेपादयः सौभाग्यदौर्भाग्यकरा योगाः ॥ १५ ॥

गर्भस्तम्भगर्भाधानप्रसवस्नपनकमूलरक्षाबन्धनादिभिक्षार्थं कुर्वतो मूलकर्मपिण्डः ॥ १६ ॥

गृहिसाधूभयप्रभवा एषणादोषा दश ।

तद्यथा—

[1]संकियमक्खियनिक्खित्तपिहियसाहरियदायगुम्मीसे ।
अपरिणयलित्तच्छड्डिय एसणदोसा दस हवन्ति ॥ १ ॥

आधाकर्मादिशङ्काकलुषितो यदन्नाद्यादत्ते तच्छङ्कितं यं च दोषं शङ्कते तमापद्यते ॥ १ ॥

(१) शङ्कितम्रक्षितनिक्षिप्तपिहितसंहृतदायकोन्मिश्रम् ।
अपरिणतलिप्तछर्दितं एषणादोषा दश भवन्ति ॥

पृथिव्युदकवनस्पतिभिः सचित्तैरचित्तैरपि मध्वादिभिर्गर्हितै-राश्लिष्टं यदन्नादि तन्म्रक्षितम् ॥ २ ॥

पृथिव्युदकतेजोवायुवनस्पतिषु त्रसेषु च यदन्नाद्यचित्तमपि स्थापितं तन्निक्षिप्तम् ॥ ३ ॥

सचित्तेन फलादिना स्थगितं पिहितम् ॥ ४ ॥

दानभाजनस्थमयोग्यं सचित्तेषु पृथिव्यादिषु निक्षिप्य तेन भाजनेन ददतः संहृतम् ॥ ५ ॥

बालवृद्धपण्डकवेपमानज्वरितान्धमत्तोन्मत्तच्छिन्नकरचरण-निगडितपादुकारूढकण्डकपेषकभर्जककर्त्तकलोठकवीङ्खकपिञ्ज-कदलकव्यालोडकभोजकषड्कायविराधका दातृत्वेन प्रतिषिद्धा या च स्त्री वेलामासवती गृहीतबाला बालवत्सा वा एभ्यो ऽन्नादि गृहीतुं साधोर्न कल्पते ॥ ६ ॥

देयद्रव्यं खण्डादि सचित्तेन धान्यकणादिना मिश्रं ददत उन्मिश्रम् ॥ ७ ॥

देयद्रव्यं मिश्रमचित्तत्वेनापरिणमनादपरिणतम ॥ ८ ॥

वसादिना संसृष्टेन हस्तेन पात्रेण वा ददतोऽन्नादि लिप्तम् ॥९॥

घृतादि च्छर्दयन् यद्ददाति तत् छर्दितं छर्यमाणे घृतादौ तत्रस्थस्यागन्तुकस्य वा सत्त्वस्य जन्तोर्मधुबिन्दूदाहरणेन विराधना-सम्भवात् ॥ १० ॥

तदेवमुद्गमोत्पादनैषणादोषाः संहृता द्विचत्वारिंशद्भवन्ति ते च भिक्षादोषास्तैरदूषितमन्नमशनखाद्यस्वाद्यभेदमुपलक्षणत्वात्पानं सौवीरादि तथा रजोहरणमुखवस्त्रचोलपट्टपात्रादिस्थविर-

कल्पिकयोग्यश्चतुर्दशविधो जिनकल्पिकयोग्यश्च द्वादशविध-
श्चौघिक उपधिः। आर्यिकायोग्यश्च पञ्चविंशतिविधः। औप-
ग्रहिकश्च शय्यापीठफलकचर्मदण्डादिकपलक्षणादेव परिगृह्यते।
नन्वौघिकरजोहरणाद्यन्तरेण औपग्रहिकपीठफलकाद्यन्तरेण च
वर्षासु हेमन्तग्रीष्मयोरपि जलकणिकाकुलायामनूपभूमौ
महाव्रतसंरक्षणं कर्तुं क्षमम्। एतद्दोषविशुद्धमन्नादि यन्मुनिना-
दत्ते सा एषणैषणा यथागममन्नादेरन्वेषणम्। अत्र "इषोऽनि-
च्छायाम्" ॥ ५। ३। ११२॥ इति स्त्रियामनस्तस्यां च समिति-
रेषणासमितिः। इयं गवेषणारूपा एषणाग्रासैषणाप्यनयोरुप-
लक्ष्यते तस्यां च पञ्च दोषाः।

तद्यथा--

संयोजना १ प्रमाणातिरिक्तता २ अङ्गारो ३ धूमः ४ कारणा-
भावश्च ५ तत्र रसलोभाद्द्रव्यस्य मण्डकादेर्द्रव्यान्तरेण खण्डघृतादिना
वसतेर्बहिरन्तर्वा योजनं संयोजना ॥१॥ धृतिबलसंयमयोगा यावता
न सीदन्ति तदाहारप्रमाणम्। अधिकाहारम् वमनाय मृत्यवे
व्याधये चेति तं परिहरेदिति प्रमाणातिरिक्ततादोषः ॥२॥ स्वादन्नं
तद्दातारं वा प्रशंसन् यद्भुङ्क्ते सरागाग्निना चरित्रेन्धनस्याङ्गारी-
करणादङ्गारो दोषः ॥३॥ निन्दन् पुनश्चारित्रेन्धनं दहन् धूम-
करणाद्धूमो दोषः ॥४॥ क्षुद्वेदनाया असहनं क्षामस्य च वैयावृत्त्या-
करणमीर्यासमितेरविशुद्धिः प्रक्षोत्प्रेक्षादेः संयमस्य चापालनं
क्षुधातुरस्य प्रबलाभ्युदयात्प्राणप्रहाणशङ्का [1]आर्त्तरौद्रपरिहारेण

(१) ख -द्यार्त्तरौद्रपरिहारेण।

धर्मध्यानस्थिरीकरणं चेति भोजनकारणानि तदभावे भुञ्जानस्य कारणाभावदोषः ॥ ५ ॥

यदाह—

उत्पादनोद्गमैषणाधूमाङ्गारप्रमाणकारणतः ।

संयोजनाच्च पिण्डं शोधयतामेषणासमितिः ॥१॥ इति ॥ ३८ ॥

आदाननिक्षेपसमितिमाह—

आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः ।

गृह्णीयान्निक्षिपेद्वा यत्साऽऽदानसमितिः स्मृता ॥ ३९ ॥

आसनं विष्टरः आदिशब्दाद्वस्त्रपात्रफलकदण्डादेः परिग्रहः । तान्यासनादीनि संवीक्ष्य चक्षुषा प्रतिलिख्य रजोहरणादिना यत्नत इत्युपयोगपूर्व्वकम् । अन्यथा सम्यक्प्रतिलेखना न स्यात् ।

यदाह—

[1]पडिलेहणं कुणंतो मिहो कहं कुणइ जणवयकहं वा ।

देइ व पच्चक्खाणं वाएइ सयं पडिच्छइ वा ॥ १ ॥

[2]पुढवीआउक्काएतेउवाऊवणस्सइतसाणं ।

पडिलेहणापमत्तो छण्हंपि विराहगो भणिओ ॥ २ ॥

---

(१) प्रतिलेखनां कुर्वन् मिथः कथां करोति जनपदकथां वा ।
ददाति वा प्रत्याख्यानं वाचयति स्वयं प्रतीच्छति वा ॥

(२) पृथिव्यप्कायतेजोवायुवनस्पतित्रसानाम् ।
प्रतिलेखनाप्रमत्तः षण्णामपि विराधको भणितः ॥

यद्गृह्णीयाद्‌दादद्वीत निक्षिपेत् स्थापयेत्सम्वीक्षितप्रतिलिखित-भूमौ। सा आदाननिक्षेपसमितिः। भीमो भीमसेन इति [1]न्यायाद्‌दादानसमितिः ॥ ३९ ॥

उत्सर्गसमितिमाह —

कफमूत्रमलप्रायं निर्जन्तुजगतीतले।
यत्नाद्यदुत्सृजेत्साधुः सोत्सर्गसमितिर्भवेत् ॥ ४० ॥

कफः श्लेष्मा मुखनासिकासञ्चारी मूत्रं प्रस्रवणं मलो विष्ठा प्राय-ग्रहणादन्यदपि परिष्ठापनायोग्यं वस्त्रपात्रभक्तपानादि गृह्यते। निर्जन्तुस्त्रसस्थावरजन्तुरहिता स्वयं च निर्जन्तुर्या जगती तस्या-स्तलं स्थण्डिलमित्यर्थः। तत्र यत्नादुपयोगपूर्वकं यदुत्सृजेत्साधुः सोत्सर्गसमितिः। अथ गुप्तीनामवसरः ॥ ४० ॥

तत्र मनोगुप्तिमाह -

विमुक्तकल्पनाजालं समत्वे सुप्रतिष्ठितम्।
आत्मारामं मनस्तज्ज्ञैर्मनोगुप्तिरुदाहृता ॥ ४१ ॥

इह मनोगुप्तिस्त्रिधा। आर्त्तरौद्रध्यानानुबन्धिकल्पनाजालवियोगः प्रथमा। शास्त्रानुसारिणी परलोकसाधिका धर्म्मध्यानानुबन्धिनी माध्यस्थ्यपरिणतिर्द्वितीया। कुशलाकुशलमनोवृत्तिनिरोधेन योग-निरोधावस्थाभाविन्यात्मारामता तृतीया। ता एतास्तिस्रोऽपि विशेषणत्रयेणाह। विमुक्तकल्पनाजालमिति समत्वे सुप्रतिष्ठित-मिति आत्मारामसिति च एवंविधं मनो मनोगुप्तिः ॥ ४१ ॥

(१) ख च न्यायाच्चादानसमितिः।

वाग्गुप्तिमाह—

संज्ञादिपरिहारेण यन्मौनस्यावलम्बनम् ।
वाग्वृत्तेः संवृत्तिर्वा या सा वाग्गुप्तिरिहोच्यते ॥४२॥

संज्ञा मुखनयनभ्रूविकाराङ्गुल्याच्छोटनादिका अर्थसूचिकाचेष्टाः आदिशब्दाल्लोष्टक्षेपोर्द्ध्वीभावकासितहुङ्कृतादीनि गृह्यन्ते। संज्ञादीनां यः परिहारस्तेन यन्मौनमभाषणं तस्यावलम्बनमभिग्रहः। संज्ञादिना हि प्रयोजनानि सूचयतो मौनं निष्फलमेवेत्येका वाग्गुप्तिः। वाचनप्रच्छनपृष्टव्याकरणादिषु लोकागमाविरोधेन मुखवस्त्रिकाच्छादितवक्त्रस्य भाषमाणस्यापि वाग्वृत्तेः संवृत्तिर्वा-ग्विनियन्त्रणं द्वितीया वाग्गुप्तिः। आभ्यां भेदाभ्यां वाग्गुप्तेः सर्वथा वाग्निरोधः सम्यग्भाषणं च स्वरूपं प्रतिपादितं भवति भाषा-समितौ तु सम्यग्वाक्प्रवृत्तिरेवेति वाग्गुप्तिभाषासमित्योर्भेदः।

यदाहुः—

समिओ नियमागुत्तो गुत्तो समियत्तणम्मि भयणिज्जो ।
कुसलवयमुईरंतो जं वइगुत्तोवि समिओवि ॥ १ ॥

अथ कायगुप्तिः सा च द्विधा चेष्टानिवृत्तिलक्षणा यथासूत्रं चेष्टा-नियमलक्षणा च ॥ ४२ ॥

तत्राद्यामाह--

उपसर्गप्रसङ्गेऽपि कायोत्सर्गजुषो मुनेः ।
स्थिरीभावः शरीरस्य कायगुप्तिर्निगद्यते ॥ ४३ ॥

उपसर्गा देवमानुषतिर्यक्कृता उपद्रवाः। उपलक्षणत्वात् क्षुत्पिपा-

सादय: परीषहा अपि गृह्यन्ते तेषां प्रसङ्ग: सन्निपात:। अपि शब्दात्तदभावेऽपि मुने: साधो: काय: शरीरं तस्योत्सर्गस्त्यागस्तत्र निरपेक्षतालक्षणस्तं जुषते तत्तस्य कायोत्सर्गजुषो य: स्थिरीभावो निश्चलता योगनिरोधं कुर्वत: सर्वथा शरीरचेष्टापरिहारो वा य: सा कायगुप्ति: ॥ ४३ ॥

द्वितीयामाह —

शयनासननिक्षेपादानचंक्रमणेषु य: ।
स्थानेषु चेष्टानियम: कायगुप्तिस्तु सापरा ॥४४॥

शयनमागमोक्तो निद्राकाल: स च रात्रावेव न दिवा। अन्यत्र ग्लानाध्वश्रान्तवृद्धादे:। तत्रापि प्रथमयामेऽतिक्रान्ते गुरूनापृच्छ्य प्रमाणयुक्तायां वसतौ संवीक्ष्य प्रमृज्य च भूमिं संहत्यास्तीर्य च संस्तरणपट्टकद्वयमूर्द्धमधश्च कायं सपादं मुखवस्त्रिकारजोहरणाभ्यां प्रमृज्यानुज्ञापितसंस्तारकावस्थान: पठितपञ्चनमस्कारसामायिक-सूत्र: कृतवामबाहूपधान आकुञ्चितजानुक: कुक्कुटीवद्वियति प्रसारितजङ्घो वा प्रमार्जितक्षोणीतलन्यस्तचरणो वा भूय: सङ्कोच-समये प्रमार्जितसंदंशक:। उद्वर्त्तनकाले च मुखवस्त्रिकाप्रमृष्ट-कायो नात्यन्ततीव्रनिद्र: शयीत। प्रमाणयुक्ता तु वसतिर्हस्तत्रय-प्रमिते भूप्रदेशे प्रत्येकं सभाजनानां साधूनां यत्रावस्थानं सकलाव-काशपूरणं च स्यात्। आसनमुपवेशनं तद्यत्र प्रदेशे चिकीर्षितं तं चक्षुषा निरीक्ष्य प्रमृज्य च रजोहरणेन बहिर्निषद्यामास्तीर्योप-विशेत् उपविष्टोऽप्याकुञ्चनप्रसारणादि तथैव कुर्वीत वर्षादिषु

च दृष्टीपीठादिषूपयैव समाचार्योपविशेत्। निक्षेपादाने च दण्डाद्युपकरणविषये ते अपि प्रत्यवेक्ष्य प्रमृज्य च विधेये चंक्रमणं गमनं तदप्यावश्यकप्रयोजनवतः साधोः पुरस्ताद्युगमात्र-प्रदेशसन्निवेशितदृष्टेरप्रमत्तस्य त्रसस्थावरभूतानि संरक्षतोऽत्वरया पदन्यासमाचरतः प्रशस्तं स्थानमूर्द्धस्थितिलक्षणमवष्टम्भादि च प्रत्यवेक्षितप्रमार्जितप्रदेशविषयम्। एतेषु चेष्टानियमः स्वच्छन्द-चेष्टापरिहारो यः सा अपरा द्वितीया कायगुप्तिरिति ॥ ४४ ॥

एतासामागमप्रसिद्धं मातृत्वमुपदर्शयति—

एताश्चारित्रगात्रस्य जननात्परिपालनात्।

संशोधनाच्च साधूनां मातरोऽष्टौ प्रकीर्त्तिताः ॥४५॥

एताः समितिगुप्तयः शास्त्रेऽष्टौ मातर इति प्रसिद्धाः। मातृत्वे हेतूनाह। साधूनां सम्बन्धि चारित्रमेव गात्रमङ्गं तस्य जननाद-भूतस्य प्रादुर्भावनात् जनितस्य च चारित्रगात्रस्य परिपालनात्सर्वो-पद्रवनिवारणेन पोषणेन च वृद्धिनयनात् चारित्रगात्रस्यैवातिचार-मलिनस्य सतः संशोधनान्निर्मलीकरणादिति ॥ ४५ ॥

चारित्रं व्याख्यायोपसंहरति—

सर्वात्मना यतीन्द्राणामेतच्चारित्रमीरितम्।

यतिधर्मानुरक्तानां देशतः स्यादगारिणाम् ॥४६ ॥

द्विधा चारित्रं सर्वदेशभेदात्। सर्वात्मना चारित्रं सर्वसावद्ययोग-विरतिलक्षणम्। यतीन्द्राणामनगारिश्रेष्ठानामेतन्मूलगुणोत्तरगुण-

स्वरूपमीरितम् । धातूनामनेकार्थत्वात्प्रतिपादितम् । देशचारित्रं तु केषामित्याह । अगारिणां गृहस्थानां देशत एकदेशविरति-लक्षणम् । किं विशिष्टानामगारिणां यतिधर्मानुरक्तानां यतिधर्मे सर्वविरतिचारित्ररूपे अनुरक्तानां संहननादिदोषादकुर्वतामपि प्रीतिमताम् ।

यदाह—

सर्वविरतिलालसः खलु देशविरतिपरिणामः यतिधर्मानु-रागरहितानां तु गृहस्थानां देशविरतिरपि न सम्यगिति देशतः स्यादगारिणामित्युक्तम् । तत्र यादृशो गृहस्थो धर्माधि कारी तादृशमुपदर्शयितुं तथाहीत्यनेन प्रस्तावनामाह ॥ ४६ ॥

तथाहीत्युपदर्शने निपातसमुदायः —

न्यायसम्पन्नविभवः शिष्टाचारप्रशंसकः ।
कुलशीलसमैः सार्धं कृतोद्वाहोऽन्यगोत्रजैः ॥ ४७ ॥
पापभीरुः प्रसिद्धं च देशाचारं समाचरन् ।
अवर्णवादी न क्वापि राजादिषु विशेषतः ॥ ४८ ॥
अनतिव्यक्तगुप्ते च स्थाने सुप्रातिवेश्मिके ।
अनेकनिर्गमद्वारविवर्जितनिकेतनः ॥ ४९ ॥
कृतसङ्गः सदाचारैर्मातापित्रोश्च पूजकः ।
त्यजन्नुपप्लुतं स्थानमप्रवृत्तश्च गर्हिते ॥ ५० ॥

व्ययमायोचितं कुर्वन् वेषं वित्तानुसारतः ।
अष्टभिर्धीगुणैर्युक्तः शृण्वानो धर्ममन्वहम् ॥ ५१ ॥
अजीर्णे भोजनत्यागी काले भोक्ता च सात्म्यतः ।
अन्योऽन्याप्रतिबन्धेन त्रिवर्गमपि साधयन् ॥ ५२ ॥
यथावदतिथौ साधौ दीने च प्रतिपत्तिकृत् ।
सदानभिनिविष्टश्च पक्षपाती गुणेषु च ॥ ५३ ॥
अदेशाकालयोश्चर्यां त्यजन् जानन् बलाबलम् ।
वृत्तस्थज्ञानवृद्धानां पूजकः पोष्यपोषकः ॥ ५४ ॥
दीर्घदर्शी विशेषज्ञः कृतज्ञो लोकवल्लभः ।
सलज्जः सदयः सौम्यः परोपकृतिकर्मठः ॥ ५५ ॥
अन्तरङ्गारिषड्वर्गपरिहारपरायणः ।
वशीकृतेन्द्रियग्रामो गृहिधर्माय कल्पते ॥ ५६ ॥

(दशभिः कुलकम्)

स्वामिद्रोहमित्रद्रोहविश्वसितवञ्चनचौर्यादिगर्ह्यार्थोपार्जनपरिहारेणार्थोपार्जनोपायभूतः स्वस्ववर्णानुरूपः सदाचारो न्यायस्तेन सम्पन्न उत्पन्नो विभवः सम्पद्यस्य स तथा । न्यायसम्पन्नो हि विभव इहलोकहिताय । अशङ्कनीयतया स्वशरीरेण तत्फलभोगान्मित्रस्वजनादौ संविभागकरणाच्च ।

यदाह—

सर्व्वत्र शुचयो धीराः स्वकर्म्मबलगर्विताः ।

कुकर्म्मनिहतात्मानः पापाः सर्वत्र शङ्किताः ॥ १ ॥

परलोकहिताय च सत्पात्रेषु विनियोगाद्दीनादौ कृपया वितरणाच्च । अन्यायोपात्तस्तु लोकद्वयेऽप्यहितायैव । इहलोके हि लोकविरुद्धकारिणो वधबन्धादयो दोषाः परलोके नरकादिगमनादयः । यद्यपि कस्यचित्पापानुबन्धिपुण्यकर्म्मवशादैहिक लौकिकी विपन्न दृश्यते तथाप्यायत्यामवश्यम्भाविन्येव ।

यदाह—

पापेनैवार्थरागान्धः फलमाप्नोति यत् क्वचित् ।

बडिशामिषवत्तत्तमविनाश्य न जीर्यति ॥ १ ॥

न्याय एव परमार्थतोऽर्थोपार्जनोपायोपनिषत् ।

यदाह—

निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः ।

शुभकर्म्माणमायान्ति विवशाः सर्वसम्पदः ॥ १ ॥

विभवश्च गार्हस्थ्ये प्रधानं कारणमित्यादौ न्यायसम्पन्नविभव इत्युक्तम् ॥ १ ॥

तथा शिष्टाचारप्रशंसकः शिष्यन्ते स्म शिष्टा वृत्तस्थज्ञानवृद्धसेवोपलब्धविशुद्धशिक्षाः पुरुषविशेषास्तेषामाचारश्चरितम् ।

यथा—

लोकापवादभीरुत्वं दीनाभ्युद्धरणादरः ।

कृतज्ञता सुदाक्षिण्यं सदाचारः प्रकीर्त्तितः ॥ १ ॥ इत्यादि ।

तस्य प्रशंसकः ।

यथा—

विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यस्तनुधनः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ १ ॥ २ ॥

तथा कुलं पितृपितामहादिपूर्वपुरुषवंशः शीलं मद्यमांसनिशाभोजनादिपरिहाररूपः समाचारस्ताभ्यां समास्तुल्याः समकुलशीला इत्यर्थः । गोत्रं नाम तथाविधैकपुरुषप्रभवो वंशस्तत्र जाता गोत्रजाः तेभ्यो ऽन्येऽन्यगोत्रजास्तैः सार्द्धं कृतोद्वाहो विहितविवाहः । अग्निदेवादिसाक्षिकं पाणिग्रहणं विवाहः । स च लोकेऽष्टविधः । तत्रालङ्कृत्य कन्यादानं ब्राह्मो विवाहः १ विभवविनियोगेन कन्यादानं प्राजापत्यः २ गोमिथुनदानपूर्वकमार्षः ३ यत्र यज्ञार्थमृत्विजः कन्याप्रदानमेव दक्षिणा स दैवः ४ एते धर्म्या विवाहाश्चत्वारः । मातुः पितुर्बन्धूनां चाप्रामाण्यात्परस्परानुरागेण मिथः समवायाद्गान्धर्वः ५ पणबन्धेन कन्याप्रदानमासुरः ६ प्रसह्यकन्याग्रहणाद्राक्षसः ७ सुप्तप्रमत्तकन्याग्रहणात्पैशाचः ८ । एते चत्वारोऽप्यधर्म्याः । यदि वधूवरयोः परस्परं रुचिरस्ति तदा अधर्म्या अपि धर्म्याः । शुद्धकलत्रलाभफलो विवाहः । अशुद्धभार्यादियोगेन नरक एव । तत्फलं वधूरक्षणमाचरतः सुजातसुतसन्ततिरनुपहता चित्तनिर्वृत्तिर्गृहकृत्यसुविहितत्वमाभिजात्याचारविशुद्धत्वं देवातिथिबान्धवसत्कारानवद्यत्वं

चेति। वधूरक्षणोपायास्त्विति। गृहकर्मविनियोगः १ परिमितोऽर्थ-संयोगो २ ऽस्वातन्त्र्यम् ३ सदा च मातृतुल्यस्त्रीलोकावरोधन-४ मिति ॥ ३ ॥

पापानि दृष्टादृष्टापायकारणानि कर्माणि तेभ्यो भीरुः। तत्र दृष्टापायकारणानि चौर्यपारदारिकत्वद्यूतरमणादीनि इह-लोकेऽपि सकललोकप्रसिद्धविडम्बनास्थानानि। अदृष्टापायकार णानि मद्यमांससेवनादीनि शास्त्रनिरूपितनरकादियातना-फलानि ॥ ४ ॥

प्रसिद्धः तथाविधापरशिष्टसम्मततया दूरं रूढिमागतः। देशाचारो भोजनाच्छादनादिविचित्रक्रियात्मकः सकलमण्डल-व्यवहारस्तं सम्यगाचरन् तदाचारातिलङ्घने हि तद्देशवासिजन-तया विरोधसम्भावनादकल्याणलाभः स्यात् ॥ ५ ॥

अवर्णोऽश्लाघा तं वदतीत्येवंशीलोऽवर्णवादी न क्वापि। जघन्योत्तममध्यमभेदेषु जन्तुषु परावर्णवादो हि बहुदोषः।
यदाह —

परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म।
नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम् ॥ १ ॥

तदेवं सकलजनगोचरोऽप्यवर्णवादो न श्रेयान्। किं पुना-राजामात्यपुरोहितादिषु बहुजनमान्येषु। राजाद्यवर्णवादाद्धि [1]वित्तप्राणनाशनादिरपि दोषः स्यात् ॥ ६ ॥

---

(१) क ग ङ वित्तप्राणनाशादिरपि।

तथा अनेकं बहु यन्निर्गमद्वारं उपलक्षणत्वात्तदेव च प्रवेशद्वारं तेन विवर्जितं निकेतनं यस्य स तथा। बहुषु हि निर्गमप्रवेशद्वारे-ष्वनुपलक्ष्यमाणनिर्गमप्रवेशानां दुष्टलोकानामापाते स्त्रीद्रविणादि-विप्लवः स्यात्। अत्र चानेकद्वारतायाः प्रतिषेधेन विधिराक्षिप्यते। ततः प्रतिनियतद्वारसुरक्षितगृहो गृहस्थः स्यादिति लभ्यते। तथा-विधमपि निकेतनं स्थान एव निवेशयितुं युक्तं नास्थाने। स्थानं तु शल्यादिदोषरहितं बहुलदूर्वाप्रवालकुशस्तम्बप्रशस्तवर्णगन्धमृत्ति-कासुस्वादुजलोद्गमनिधानादिमच्च। स्थानगुणदोषपरिज्ञानं च शकुनस्वप्नोपश्रुतिप्रभृतिनिमित्तादिबलेन। स्थानमेव विशिनष्टि। अतिव्यक्तमतिप्रकटमतिगुप्तमतिप्रच्छन्नं तन्निषेधादनतिव्यक्तगुप्तम्। तत्र अतिव्यक्ते ह्यसन्निहितगृहान्तरतया परिपार्श्वतो निरावरण-तया चौरादयोऽभिभवेयुः। अतिगुप्ते च सर्वतो गृहान्तरैर्निरुद्ध-त्वान्न स्वशोभां लभते। प्रदीपनकाद्युपद्रवेषु च दुःखनिर्गमप्रवेशं गृहं भवति। पुनः कथंभूते स्थाने सुप्रातिवेश्मिके शोभनाः शीलादिसम्पन्नाः प्रातिवेश्मिका यत्र। कुशीलप्रातिवेश्मिकत्वे हि तदालापश्रवणतच्चेष्टादर्शनादिवशात् स्वतः सगुणस्यापि गुणहानिः स्यात्। दुष्प्रातिवेश्मिकास्त्वेते शास्त्रप्रतिषिद्धाः—

खरियातिरिक्खजोणीतालायरसमणमाहणसुसाणा।

वग्गुरिअवाहगुम्मियहरिएसपुलिंदमच्छंधा॥ १ ॥ ७ ॥

तथा कृतः सङ्गो येन स कृतसङ्गः सन् शोभन आचार इह-परलोकहिता प्रवृत्तिर्येषां ते सदाचारास्तैर्न तु कितवधूर्तविट-भट्टभण्डनटादिभिस्तत्सङ्गे हि सदपि शीलं विलीयेत।

यदाह—

यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि ।
अथासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ १ ॥
सङ्गः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते ।
स सद्भिः सह कर्त्तव्यः सन्तः सङ्गस्य भेषजम् ॥ २ ॥

॥ इति च ॥ ८ ॥

तथा माता जननी पिता जनकस्तयोः पूजकस्त्रिसन्ध्यं प्रणामकरणेन परलोकहितानुष्ठाननियोजनेन सकलव्यापारेषु तदाज्ञया प्रवृत्त्या वर्णगन्धादिप्रधानस्य पुष्पफलादिवस्तुन उपढौकनेन तद्भोगे भोगेन चान्नादीनामन्यत्र तदनुचितादिति माता च पिता च मातापितरौ "आद्वन्द्वे" ॥ ३ । २ । ३८ ॥ इत्यात्वं मातुश्चाभ्यर्हितत्वात्पूर्वनिपातः ।

यन्मनुः—

उपाध्याया दशाचार्य आचार्याणां शतं पिता ।
सहस्रं तु पितुर्माता गौरवेणातिरिच्यते ॥ १ ॥ ८ ॥

तथा त्यजन् परिहरन् उपप्लुतं स्वचक्रपरचक्रविरोधाद्दुर्भिक्षमारीतिजनविरोधादेश्चास्वस्थीभूतं यत् स्थानं ग्रामनगरादि । अत्यज्यमाने हि तस्मिन् धर्मार्थकामानां पूर्वार्जितानां विनाशेन नवानां चानुपार्जनेनोभयलोकभ्रंश एव स्यात् ॥ १० ॥

तथा गर्हितं देशजातिकुलापेक्षया निन्दितं कर्म तत्राप्रवृत्तः ।

देशगर्हितं यथा—

सौवीरेषु कृषिकर्म । लाटेषु मद्यसन्धानम् ।

आत्मापेक्षया यथा—

ब्राह्मणस्य सुरापानं तिललवणादिविक्रयश्च ।

कुलापेक्षया यथा—

चौलुक्यानां मद्यपानम् । गर्हितकर्मकारिणो हि शेषमपि धर्म्यं कर्मोपहासाय भवति ॥ ११ ॥

तथा व्ययो भर्त्तव्यभरणस्वभोगदेवतातिथिपूजनादिप्रयोजने द्रव्यविनियोगः । आयः कृषिपाशुपाल्यवाणिज्यसेवादिजनितो द्रव्यलाभः तस्योचितमनुरूपं व्ययं कुर्वन् ।

यदाह—

'लाभोचियदाणे लाभोचियभोगे लाभोचियनिहिकरे सिया ।

आयोचितश्च व्ययश्चतुर्भागादितया केश्चिदुच्यते ।

यदाह—

पादमायान्निधिं कुर्यात्पादं वित्ताय खट्टयेत् ।

धर्मोपभोगयोः पादं पादं भर्त्तव्यपोषणे ॥ १ ॥

केचित्त्वाहुः—

आयादर्द्धं नियुञ्जीत धर्मे समधिकं ततः ।

शेषेण शेषं कुर्वीत यत्नतस्तुच्छमैहिकम् ॥ १ ॥

आयानुचितो हि व्ययो रोगमिव शरीरं कृशीकृत्य विभवसारमखिलव्यवहारासमर्थं पुरुषं कुर्वीत ।

---

(१) लाभोचितदानं लाभोचितभोगो लाभोचितनिधिकरः स्यात् ।

उक्तञ्च

आयव्ययमनालोच्य यस्तु वैश्रवणायते ।

अचिरेणैव कालेन सोऽत्र वै श्रमणायते ॥ १ ॥ १२ ॥

तथा वेषो वस्त्रालङ्करणादिभोगः । वित्तं विभव उपलक्षणा-द्वयोऽवस्थादेशकालजात्यादिग्रहः । तदनुसारेण तदानुरूप्येण कुर्वन्निति सम्बध्यते । विभवाद्यननुसारेण वेषं कुर्वतो जनोप-हसनीयतातुच्छत्वान्यायसम्भावनादयो दोषाः । अथवा व्यय-मायोचितं कुर्वन्नेव वेषं वित्तानुसारेण कुर्व्वन्नेवेत्यपरोऽर्थः । यो हि सत्यप्याये कार्पण्याद् व्ययं न करोति सत्यपि वित्ते कुचेलत्वादिधर्मा भवति । स लोकगर्हितो धर्म्मेऽप्यनधिका-रीति ॥ १३ ॥

तथा अष्टभिर्धीगुणैर्युक्तः धियो बुद्धेर्गुणाः शुश्रूषादयः । ते त्वमी—

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।

ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥ १ ॥

तत्र शुश्रूषा श्रोतुमिच्छा । श्रवणमाकर्णनम् । ग्रहणं शास्त्रार्थो-पादानम् । धारणमविस्मरणम् । ऊहो विज्ञातमर्थमवलम्ब्यान्येषु तथाविधेषु व्याप्त्या वितर्कणम् । अपोह उक्तियुक्तिभ्यां विरुद्धादर्थात् हिंसादिकात् प्रत्यपायसम्भावनया व्यावर्त्तनम् । अथवा ऊहः सामान्यज्ञानमपोहो विशेषज्ञानम् । अर्थविज्ञानमूहापोहयोगा-न्मोहसन्देहविपर्यासव्युदासेन ज्ञानम् । तत्त्वज्ञानमूहापोहविज्ञान-विशुद्धमिदमित्थमेवेति निश्चयः । शुश्रूषादिभिर्हि उपाहितप्रज्ञा-

प्रकर्षः पुमान्न कदाचिदकल्याणमाप्नोति । एते च बुद्धिगुणा यथासम्भवं द्रष्टव्याः ॥ १४ ॥

तथा शृण्वानस्तच्छीलेन धर्ममभ्युदयनिःश्रेयसहेतुं शृण्वन् अन्वहं प्रतिदिनं धर्मश्रवणपरो हि [1]मनःखेदापनोदादिक-माप्नोति ।

यदाह—

क्लान्तमपोज्झति खेदं तप्तं निर्वाति बुध्यते मूढम् ।
स्थिरतामेति व्याकुलमुपयुक्तसुभाषितं चेतः ॥ १ ॥

प्रत्यहं धर्मश्रवणं चोत्तरोत्तरगुणप्रतिपत्तिसाधनत्वात्प्रधान-मिति श्रवणमात्राद्बुद्धिगुणादस्य भेदः ॥ १५ ॥

तथा अजीर्णे अजरणे पूर्वभोजनस्य अथवा अजीर्णे परिपाक-मनागते पूर्वभोजने नवं भोजनं त्यजतीत्येवंशीलः । अजीर्ण-भोजने हि सर्वरोगमूलस्याजीर्णस्य वृद्धिरेव कृता भवति ।

यदाह—

अजीर्णप्रभवा रोगा इति ।

अजीर्णं च लिङ्गतो ज्ञातव्यम् ।

यदाह—

मलवातयोर्विगन्धो विड्भेदो गात्रगौरवमरुच्यम् ।
अविशुद्धश्चोद्गारः षडजीर्णव्यक्तलिङ्गानि ॥ १ ॥ १६ ॥

तथा काले बुभुक्षासमये भोक्ता अबाध्युपजीवकः । भोक्तेति

---

(1) ग छ मनःखेदापनोदनादिकं करोति ।

साधो सन् तेन लौल्यपरिहारेण यथाग्निबलं मितं भुञ्जीत। अतिरिक्तभोजनं हि वमनविरेचनमरणादिना न साधु भवति यो हि मितं भुङ्क्ते स बहु भुङ्क्ते। असुधितेन ह्यमृतमपि भुक्तं भवति विषम्। तथा क्षुत्कालातिक्रमादन्नद्वेषो देहसादश्च भवति। विध्यातेऽग्नौ किं नामेन्धनं कुर्यादिति।

पानाहारादयो यस्याविरुद्धाः प्रकृतेरपि।
सुखित्वायावकल्पन्ते तत्सात्म्यमिति गीयते॥ १॥

एवं लक्षणात्सात्म्यात् आजन्म सात्म्येन भुक्तं विषमपि पथ्यं भवति। परमसात्म्यमपि पथ्यं सेवेत न पुनः सात्म्यप्राप्तमप्यपथ्यम्। सर्वं बलवतः पथ्यमिति मत्वा न कालकूटं खादेत्। सुशिक्षितोऽपि विषतन्त्रज्ञो म्रियत एव कदाचिद्विषात्॥ १७॥

तथा त्रिवर्गो धर्मार्थकामास्तत्र यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। यतः सर्वप्रयोजनसिद्धिः सोऽर्थः। यत आभिमानिकरसानुविद्धा सर्वेन्द्रियप्रीतिः स कामः। ततोऽन्योऽन्यस्य परस्परं योऽप्रतिबन्धोऽनुपघातस्तेन त्रिवर्गमपि नत्वेकैकं साधयेत्।

यदाह—

यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति॥ १॥

तत्र धर्मार्थयोरुपघातेन तादात्विकविषयसुखलुब्धो वनगज इव को नाम न भवत्यास्पदमापदाम्। न च तस्य धनं धर्मः शरीरं वा यस्य कामेऽत्यन्तासक्तिः। धर्मकामातिक्रमाद्धनमुपार्जितं परेऽनुभवन्ति स्वयं तु परं पापस्य भाजनं सिंह इव

सिन्धुरवधात्। अर्थकामातिक्रमेण च धर्मसेवा यतीनामेव धर्मो न गृहस्थानाम्। न च धर्मबाधयाऽर्थकामौ सेवेत। बीजभोजिनः कुटुम्बिन इव नास्त्यधार्मिकस्यायत्यां किमपि कल्याणम्। स खलु सुखी योऽमुत्र सुखाविरोधेन इहलोकसुखमनुभवति। एवमर्थबाधया धर्मकामौ सेवमानस्य ऋणाधिकत्वम्। कामबाधया धर्मार्थौ सेवमानस्य गार्हस्थ्याभावः स्यात्।

एवं च तादात्विकमूलहरकदर्येषु धर्मार्थकामानामन्योऽन्यबाधा सुलभैव।

तथाहि—

यः किमप्यसञ्चिन्त्योत्पन्नमर्थमपव्येति स तादात्विकः। यः पितृपैतामहमर्थमन्यायेन भक्षयति स मूलहरः। यो भृत्यात्मपीडाभ्यामर्थं सञ्चिनोति न तु क्वचिदपि व्ययते स कदर्यः। तत्र तादात्विकमूलहरयोरर्थभ्रंशेन धर्मकामयोर्विनाशान्नास्ति कल्याणं कदर्यस्य त्वऽर्थसंग्रहो राजदायादतस्कराणां निधिर्न तु धर्मकामयोर्हेतुरिति। अनेन च त्रिवर्गबाधा गृहस्थस्य कर्तुमनुचितेति प्रतिपादितम्। यदा तु दैववशाद्बाधा सम्भवति। तदोत्तरोत्तरबाधायां पूर्वस्य पूर्वस्य बाधा रक्षणीया।

तथाहि—

कामबाधायां धर्मार्थयोर्बाधा रक्षणीया तयोः सतोः कामस्य सुकरोत्पादकत्वात्। कामार्थयोस्तु बाधायां धर्मो रक्षणीयः धर्ममूलत्वादर्थकामयोः।

उक्तञ्च

धर्मश्चेन्नावसीदेत कपालेनापि जीवतः ।

आढ्योऽस्मीत्यवगन्तव्यं धर्मवित्ता हि साधवः ॥ १ ॥ १८ ॥

तथा न विद्यते सततप्रवृत्तातिविशदैकाकारानुष्ठानतया तिथ्यादि-दिनविभागो यस्य सोऽतिथिः ।

यथोक्तम्—

तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना ।

अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥ १ ॥

साधुः शिष्टाचाररतः सकललोकाऽवगीतः । दीनो दीङ् क्षय इति वचनात् क्षीणसकलधर्मार्थकामाराधनशक्तिः तेषु प्रति-पत्तिश्च प्रतिपत्तिरुपचारोऽन्नपानादिरूपः । कथं यथावत् औचित्यानतिक्रमेण ।

यदाह—

औचित्यमेकमेकत्र गुणानां कोटिरेकतः ।

विषायते गुणग्राम औचित्यपरिवर्जितः ॥ १ ॥ १९ ॥

तथा अनभिनिविष्टोऽभिनिवेशरहितः । अभिनिवेशश्च नीति-पथमनागतस्यापि पराभिभवपरिणामेन कार्यस्यारम्भः । स च नीचानां भवति ।

यदाह—

दर्पः श्रमयति नीचान्निष्फलनयविगुणदुष्करारम्भैः ।

स्रोतोविलोमतरणव्यसनिभिरायास्यते मत्स्यैः ॥ १ ॥

अनभिनिविष्टत्वं च कादाचित्कं शाठ्याशौचानामपि सम्भव-त्यत आह । सदेति ॥ २० ॥

तथा गुणेषु सौजन्यौदार्यदाक्षिण्यस्थैर्यप्रियपूर्वप्रथमाभिभाष-णादिषु स्वपरयोरुपकारकारणेष्वात्मधर्मेषु पक्षपाती । पक्षपातस्तु बहुमानतत्प्रशंसासाहाय्यकरणादिना अनुकूला प्रवृत्तिः । गुणपक्ष-पातिनो हि जीवा अवन्ध्यपुण्यबीजनिषेकेणेहामुत्र च गुणग्राम-सम्पदमारोहन्ति ॥ २१ ॥

तथा प्रतिषिद्धो देशोऽदेशः प्रतिषिद्धः कालोऽकालः तयोर-देशाकालयोश्चर्यां चरणं तां त्यजन् परिहरन् अदेशकालचारी हि चौरादिभ्योऽवश्यमुपद्रवमाप्नोति ॥ २२ ॥

तथा जानन् विदन् बलं शक्तिं स्वस्य परस्य वा द्रव्यक्षेत्रकाल-भावकृतं सामर्थ्यम् । अबलमपि तथैव बलाबलपरिज्ञाने हि सर्वः सफल आरम्भः अन्यथा तु विपर्ययः ।

यदाह —

स्थाने शमवतां शक्त्या व्यायामे वृद्धिरङ्गिनाम् ।

अयथाबलमारम्भो निदानं क्षयसम्पदः ॥ १ ॥ इति ॥ २३ ॥

तथा वृत्तमनाचारपरिहारः सम्यगाचारपरिपालनं च । तत्र तिष्ठन्तीति वृत्तस्थाः । ज्ञानं हेयोपादेयवस्तुविनिश्चयस्तेन वृद्धा महान्तः । वृत्तस्थाश्च ते ज्ञानवृद्धाश्च तेषां पूजकः । पूजा च सेवा-ञ्जल्यासनाभ्युत्थानादिलक्षणा । वृत्तस्थज्ञानवन्तो हि पूज्यमाना नियमात्कल्पतरव इव सदुपदेशादिफलैः फलन्ति ॥ २४ ॥

तथा पोष्या अवश्यभर्त्तव्या मातृपितृगृहिण्यपत्यादयस्तान् योगक्षेमकरणेन पोषयतीति पोषकः ॥ २५ ॥

तथा दीर्घकालभाविनोऽदीर्घमर्थमनर्थं च पश्यति पर्यालोचयतीत्येवंशीलो दीर्घदर्शी ॥ २६ ॥

तथा वस्त्ववस्तुनोः कृत्याकृत्ययोः स्वपरयोर्विशेषमन्तरं जानाति निश्चिनोतीति विशेषज्ञः । अविशेषज्ञो हि पुरुषः पशोर्नातिरिच्यते । अथवा विशेषमात्मन एव गुणदोषाधिरोहलक्षणं जानातीति विशेषज्ञः ।

यदाह—

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।

किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥ १ ॥ २७ ॥

तथा कृतं परोपकृतं जानाति न निह्नुते कृतज्ञः एवं हि तस्य कुशललाभो यदुपकारकारिणो बहु मन्यते कृतघ्नस्य तु निष्कृतिरेव नास्ति ।

यदाह—

कृतघ्ने नास्ति निष्कृतिरिति ॥ २८ ॥

तथा लोकानां विशिष्टजनानां विनयादिगुणैर्वल्लभः प्रियः । को हि गुणवतः प्रति प्रीतो न भवति । यस्तु न लोकवल्लभः स न केवलमात्मानं स्वस्य धर्मानुष्ठानमपि परैर्दूषयन् परेषां बोधिलाभभ्रंशहेतुर्भवति ॥ २९ ॥

तथा लज्जा वैयात्याभावः सह लज्जया सलज्जः । लज्जावान् हि प्राणप्रहाणेऽपि न प्रतिज्ञातमपजहाति ।

यदाह—

लज्जां गुणौघजननीं जननीमिवार्या-
मत्यन्तशुद्धहृदयामनुवर्त्तमानाः।
तेजस्विनः सुखमसूनपि सन्त्यजन्ति
सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम्॥ १॥ ३०॥

तथा सह दयया दुःखितजन्तुदुःखत्राणाभिलाषेण वर्त्तत इति सदयः। धर्मस्य दया मूलमिति ह्यामनन्ति। तदवश्यं दयां कुर्वीत।

यदाह—

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतानां दयां कुर्वीत मानव॥ १॥ ३१॥

तथा सौम्योऽक्रूराकारः क्रूरो हि लोकस्योद्वेगकारणम्॥३२॥

तथा परोपकृतौ परोपकारे कर्मठः कर्मशूरः कर्माणि घटते "तत्र घटते कर्मणष्ठः" ॥ ७। १। १३७॥ इति ठः परोपकारपरो हि पुमान् सर्वस्य नेत्रामृताञ्जनम्॥ ३३॥

तथा अन्तरङ्गश्चासावरिषड्वर्गश्चान्तरङ्गारिषड्वर्गस्तस्य परिहारोऽनासेवनं तत्र परायणस्तत्परः। तत्रायुक्तितः प्रयुक्ताः कामक्रोधलोभमानमदहर्षाः शिष्टगृहस्थानामन्तरङ्गोऽरिषड्वर्गः। तत्र परपरिगृहीतास्वनूढासु वा स्त्रीषु दुरभिसन्धिः कामः। परस्यात्मनो वा अपायमविचार्य कोपकरणं क्रोधः। दानार्हेषु स्वधनाप्रदानं निष्कारणं परधनग्रहणं च लोभः। दुरभिनिवेशारोहो युक्तोक्ता-

ग्रहणं वा मानः। कुलबलैश्वर्यरूपविद्यादिभिरहङ्कारकरणं पर-प्रधर्षनिबन्धनं वा मदः। निर्निमित्तं परदुःखोत्पादनेन स्वस्य द्यूतपापर्द्धाद्यनर्थसंश्रयेण वा मनःप्रमोदो हर्षः। एतेषां च परिहार्यत्वमपायहेतुत्वात्।

यदाह—

दाण्डक्यो नाम भोजः कामाद्ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश करालश्च वैदेहः १ क्रोधाज्जनमेजयो ब्राह्मणेषु विक्रान्तस्तालजङ्घश्च भृगुषु २ लोभादैलश्चातुर्वर्ण्यमभ्याहारयमाणः सौवीरश्चाजबिन्दुः ३ मानाद्रावणः परदारानप्रयच्छन् दुर्योधनो राज्याद्भ्रंशं च ४ मदाद्दम्भोद्भवो भूतावमानी हैहयश्चार्जुनः ५ हर्षाद्वातापिरगस्त्यमभ्यासादयन् वृष्णिसङ्घश्च द्वैपायन ६ मिति॥ ३४॥

तथा वशीकृतः स्वच्छन्दतां त्याजित इन्द्रियग्रामो हृषीक-समूहो येन स तथा। अत्यन्तासक्तिपरिहारेण स्पर्शनादीन्द्रिय-विकारनिरोधकः। इन्द्रियजयो हि पुरुषाणां परमसम्पदे भवति।

यदाह—

आपदां कथितः पन्था इन्द्रियाणामसंयमः।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम्॥ १॥
इन्द्रियाण्येव तत्सर्वं यत् स्वर्गनरकावुभौ।
निगृहीतविसृष्टानि स्वर्गाय नरकाय च॥ २॥

सर्वथेन्द्रियनिरोधस्तु यतीनामेव धर्म्मः इह तु श्रावकधर्मोचित-गृहस्थस्वरूपमेवाधिकृतमित्येवमुक्तम् ॥ ३५ ॥

एवंविधगुणसमग्रो मनुष्यो गृहिधर्म्माय कल्पते अधिकृतो भवतीति ॥ ५६ ॥

इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्यश्रीहेमचन्द्र-विरचितेऽध्यात्मोपनिषन्नाम्नि सञ्जातपट्टबन्धे श्रीयोगशास्त्रे स्वोपज्ञं प्रथमप्रकाशविवरणम् ।

अर्हम्

द्वितीयः प्रकाशः ।

गृहिधर्माय कल्पत इत्युक्तं गृहिधर्मश्च श्रावकधर्मः स च
सम्यक्त्वमूलानि द्वादशव्रतानि तान्येवाह—

सम्यक्त्वमूलानि पञ्चाणुव्रतानि गुणास्त्रयः ।
शिक्षापदानि चत्वारि व्रतानि गृहमेधिनाम् ॥१॥

सम्यक्त्वं मूलं कारणं येषां तानि सम्यक्त्वमूलानि । अणूनि महा-
व्रतापेक्षया लघूनि व्रतानि अहिंसादीनि पञ्च एतानि मूलगुणाः ।
गुणास्त्रय उत्तरगुणरूपाः ते च गुणव्रतानि दिग्व्रतादीनि त्रीणि ।
शिक्षणं शिक्षा अभ्यासः शिक्षायै पदानि स्थानानि चत्वारि
सामायिकादीनि प्रतिदिवसाभ्यसनीयानि तत एव गुणव्रतेभ्यो
भेदः । गुणव्रतानि हि प्रायो यावज्जीविकानि । एवं द्वादशव्रतानि
गृहमेधिनां श्रावकाणाम् ॥ १ ॥

सम्यक्त्वमूलानीत्युक्तं तत्र सम्यक्त्वं विभजति—

या देवे देवताबुद्धिर्गुरौ च गुरुतामतिः ।
धर्मे च धर्मधीः शुद्धा सम्यक्त्वमिदमुच्यते ॥ २ ॥

या देवे गुरौ धर्मे च वक्ष्यमाणलक्षणे देवत्वगुरुत्वधर्मत्वबुद्धिरयमेव
देवो गुरुर्धर्म इति निश्चयपूर्वा रुचिः श्रद्धानमिति यावत् शुद्धा
अज्ञानसंशयविपर्यासनिराकरणेन निर्मला सा सम्यक्त्वम् । यद्यपि

रुचिर्जिनोक्ततत्त्वेष्विति यतिश्रावकाणां साधारणं सम्यक्त्वलक्षण-मुक्तम्। तथापि गृहस्थानां देवगुरुधर्मेषु पूज्यत्वोपास्यत्वानुष्ठेयत्व-लक्षणोपयोगवशाद् देवगुरुधर्मतत्त्वप्रतिपत्तिलक्षणं सम्यक्त्वं पुन-रभिहितम्। ननु तत्त्वार्थरुचिलक्षणे सम्यक्त्वे देवगुरुधर्माणां क्व तत्त्वेऽन्तर्भावः। उच्यते देवा गुरवश्च जीवतत्त्वे धर्मः शुभास्रवे संवरे चान्तर्भवति। सम्यक्त्वं च त्रिधा औपशमिकं क्षायोपशमिकं क्षायिकं च। तत्रोपशमो भस्मच्छन्नाग्निवत् मिथ्यात्वमोहनीयस्यानन्तानु-बन्धिनां च क्रोधमानमायालोभानामनुदयावस्था। उपशमः प्रयोजनं प्रवर्त्तकमस्य औपशमिकं तच्चानादिमिथ्यादृष्टेः करणत्रय पूर्वकमान्तर्मौहूर्त्तिकं चतुर्गतिगतस्यापि जन्तोर्भवतीत्युक्तप्रायम्। यद्वा उपशमश्रेण्यारूढस्य भवति।

यदाह—

[1]उवसामगसेढिगयस्स होइ उवसामियं तु सम्मत्तं
जो वा अकयतिपुंजो अ खवियमिच्छो लहइ सम्मं ॥ १ ॥

क्षयो मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च उदितानां देशतो निर्मूलनाशः अनुदितानां चोपशमः। क्षयेण युक्त उपशमः क्षयोपशमः स प्रयोजनमस्य क्षायोपशमिकं तच्च सत्कर्मवेदनाद्वे-दकमप्युच्यते। औपशमिकं तु सत्कर्मवेदनारहितमित्यौपशमिक-क्षायोपशमिकयोर्भेदः।

---

(१) उपशमकश्रेणिगतस्य भवति औपशमिकं तु सम्यक्त्वम्।
यो वाऽकृतत्रिपुञ्जश्च क्षपितमिथ्यो लभते सम्यक्॥

यदाह—

[1]वेएइ संतकम्मं खओवसमिएसु नाणुभावं सो

उवसंतकसाओ उण वेएइ न संतकम्मं वि।

एतस्य च स्थितिः षट्षष्टिः सागरोपमाणि साधिकानि।

यदाह—

[2]दो वारे विजयाइसु गयस्स तिच्चुए अहव ताइं।

अइरेगं नरभवियं नाणाजीवाण सव्वद्धं ॥ १ ॥

क्षयो मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च निर्मूलनाशः। क्षयः प्रयोजनमस्य क्षायिकं तच्च साद्यनन्तम्।

अत्र चान्तरश्लोकाः—

मूलं बोधिद्रुमस्यैतत् द्वारं पुण्यपुरस्य च।

पीठं निर्वाणहर्म्यस्य निधानं सर्वसम्पदाम् ॥ १ ॥

गुणानामेक आधारो रत्नानामिव सागरः।

पात्रं चारित्रवित्तस्य सम्यक्त्वं श्लाघ्यते न कैः ॥ २ ॥

अवतिष्ठेत नाज्ञानं जन्तौ सम्यक्त्ववासिते।

प्रचारस्तमसः कीदृक् भुवने भानुभासिते ॥ ३ ॥

तिर्यङ्नरकयोर्द्वारे दृढा सम्यक्त्वमर्गला।

देवमानवनिर्वाणसुखद्वारैककुञ्चिका ॥ ४ ॥

---

(१) वेदयति सत्कर्म क्षायोपशमिकेषु नानुभावं सः।
उपशान्तकषायः पुनर्वेदयति न सत्कर्मापि ॥

(२) द्वौ वारान् विजयादिषु गतस्य त्रीणि अच्युतेऽथवा तानि।
अतिरेकं नरभविकं नानाजीवानां सर्वाद्धम् ॥

भवेद्वैमानिकोऽवश्यं जन्तुः सम्यक्त्ववासितः ।
यदि नोद्वान्तसम्यक्त्वो बद्धायुर्वापि नो पुरा ॥ ५ ॥

अन्तर्मुहूर्त्तमपि यः समुपास्य जन्तुः
सम्यक्त्वरत्नममलं विजहाति सद्यः ।
बम्भ्रम्यते भवपथे सुचिरं न सोऽपि
तद्बिभ्रतश्चिरतरं किमुदीरयामः ॥ ६ ॥ इति ।

विपक्षज्ञाने सति विवक्षितं सुज्ञानं भवतीति सम्यक्त्वविपक्षं मिथ्यात्वमाह—

अदेवे देवबुद्धिर्या गुरुधीरगुरौ च या ।
अधर्मे धर्मबुद्धिश्च मिथ्यात्वं तद्विपर्ययात् ॥ ३ ॥

अदेवोऽगुरुरधर्मश्च वक्ष्यमाणलक्षणस्तत्र देवत्वगुरुत्वधर्मत्वप्रतिपत्तिलक्षणं मिथ्यात्वं तस्य लक्षणं तद्विपर्ययादिति तस्य सम्यक्त्वस्य विपर्ययः तस्माद्धेतोः सम्यक्त्वविपर्ययरूपत्वादित्यर्थः तथा च इदमपि संगृहीतं देवे अदेवत्वस्य गुरावगुरुत्वस्य धर्मे अधर्मत्वस्य प्रतिपत्तिरिति ।

मिथ्यात्वं च पञ्चधा आभिग्रहिकमनाभिग्रहिकमाभिनिवेशिकं सांशयिकमनाभोगिकं च ।

तत्राभिग्रहिकं पाखण्डिनां स्वस्वशास्त्रनियन्त्रितविवेकालोकानां परपक्षप्रतिक्षेपदक्षाणां भवति ॥ १ ॥

अनाभिग्रहिकं तु प्राकृतलोकानां सर्वे देवा वन्दनीया न निन्दनीया एवं सर्वे गुरवः सर्वे धर्मा इति ॥ २ ॥

आभिनिवेशिकं जानतोऽपि यथास्थितं वस्तु दुरभिनिवेश-लेशविप्लावितधियो जमालेरिव भवति ॥ ३ ॥

सांशयिकं देवगुरुधर्मेष्वयमयं वेति संशयानस्य भवति ॥ ४ ॥

अनाभोगिकं विचारशून्यस्यैकेन्द्रियादेर्वा विशेषविज्ञान-विकलस्य भवति ॥ ५ ॥

यदाह--

[1]आभिग्गहियं [2]अणभिग्गहं च तह अभिणिवेसियं चेव ।
संसइयमणाभोगं मिच्छत्तं पंचहा होइ ॥ १ ॥

अत्रान्तरश्लोकाः—

मिथ्यात्वं परमो रोगो मिथ्यात्वं परमं तमः ।
मिथ्यात्वं परमः शत्रुर्मिथ्यात्वं परमं विषम् ॥ १ ॥
जन्मन्येकत्र दुःखाय रोगो ध्वान्तं रिपुर्विषम् ।
अपि जन्मसहस्रेषु मिथ्यात्वमचिकित्सितम् ॥ २ ॥

मिथ्यात्वेनालीढचित्ता नितान्तं
तत्त्वातत्त्वं जानते नैव जीवाः ।
किं जात्यन्धाः कुत्रचिद्वस्तुजाते
रम्यारम्यव्यक्तिमासादयेयुः ॥ ३ ॥

---

(१) आभिग्रहिकमनभिग्रहं च तथा आभिनिवेशिकं चैव ।
सांशयिकमनाभोगं मिथ्यात्वं पञ्चधा भवति ॥

(२) क अणभिग्गहियं ।

देवादेवगुर्वगुरुधर्माधर्मेषु लक्षयितव्येषु देवलक्षणमाह—

सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः ।
यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ॥ ४ ॥

देवस्य देवत्वे चतुरोऽतिशयानाचक्षते विचक्षणाः ।

तद्यथा—

ज्ञानातिशयः१ अपायापगमातिशयः २ पूजातिशयः ३ वागतिशयश्च४ तत्र सर्वज्ञ इत्यनेन सकलजीवाजीवादितत्त्वज्ञतया ज्ञानातिशयमाह । नतु यथाहुर्विशृङ्खलवादिनः परं ।

सर्वं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।
कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ॥ १ ॥
दूरं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।
प्रमाणं दूरदर्शी चेदेतान् गृद्ध्रानुपास्महे ॥ २ ॥ इति ॥

नहि विवक्षितस्यैकस्यापीष्टस्यार्थस्य ज्ञानमशेषार्थज्ञानमन्तरेण भवति । सर्वे हि भावा भावान्तरैः साधारणासाधारणरूपा [1]इत्यशेषज्ञानमन्तरेण सा लक्षण्यवैलक्षण्याभ्यां नैकोऽपि ज्ञातो भवति ।

यदाहुः—

एको भावः सर्वथा येन दृष्टः
सर्वे भावास्तत्त्वतस्तेन दृष्टाः ।

---

(१) क ख इत्यशेषपदार्थज्ञानमन्तरेण ।

सर्वे भावाः सर्वथा येन दृष्टाः

एको भावस्तत्त्वतस्तेन दृष्टः ॥ १ ॥

जितरागादिदोष इत्यनेनापायापगमातिशयमाह तत्रेदं सर्व-जनप्रतीतम् । यथा सन्ति रागद्वेषादयः । ते च दोषास्तैरात्मनो दूषणात् । ते च जिताः प्रतिपक्षसेवनादिभिर्भगवतेति जितरागादि-दोष इत्युक्तम् । सदा रागादिरहित एव कश्चित्पुरुषविशेषोऽस्तीति तु वार्त्तामात्रम् । अजितरागादेरस्मदादिवन्न देवत्वमिति । त्रैलोक्यपूजित इत्यनेन पूजातिशयमाह । कतिपयप्रतारितमुग्ध-बुद्धिपूजायां हि न देवत्वं स्यात् । यदा तु चलितासनैः सुरासुरै-र्नानादेशभाषाव्यवहारविसंस्थुलैर्मनुष्यैः परस्परनिरुद्धवैरैः सख्य-मुपागतैस्तिर्यग्भिश्च समवसरणभूमिमभिपतद्भिरहमहमिकया सेवाञ्जलिपूजागुणस्तोत्रधर्मदेशनामृतरसास्वादादिभिः पूज्यते भगवान् तदा देवत्वमिति । यथास्थितार्थवादीत्यनेन वागतिशयः यथास्थितं सद्भूतमर्थं वदतीत्येवंशीलो यथास्थितार्थवादी ।

यदाचक्ष्महि स्तुतौ—

अपक्षपातेन परीक्षमाणा द्वयं द्वयस्याप्रतिमं प्रतीमः ।

यथास्थितार्थप्रथनं तवैतदस्थाननिर्बन्धरसं परेषाम् ॥ १ ॥

यथा वा

क्षिप्येत वाऽन्यैः सदृशीक्रियेत वा तवाङ्घ्रिपीठे लुठनं सुरेशितुः ।

इदं यथावस्थितवस्तुदेशनं परैः कथङ्कारमपाकरिष्यते ॥ २ ॥

देव इति लक्ष्यपदं दीव्यते स्तूयते इति देवः स च सामर्थ्या-दर्हन् परमेश्वरो नान्यः ॥ ४ ॥

चतुरतिशयवतो देवस्य ध्यानोपासनशरणगमनशासनप्रतिपत्तीः साधिक्षेपमुपदिशति—

ध्यातव्योऽयमुपास्योऽयमयं शरणमिष्यताम् ।
अस्यैव प्रतिपत्तव्यं शासनं चेतनास्ति चेत् ॥ ५ ॥

अयं देवो ध्यातव्यः पिण्डस्थपदस्थरूपस्थरूपातीतरूपतया श्रेणिकेनेव । श्रेणिको हि वर्णप्रमाणसंस्थानसंहननचतुस्त्रिंशदतिशयादियोगिनं भगवन्तं श्रीमहावीरमनुध्यानवान् । तदनुभावाच्च तद्वर्णप्रमाणसंस्थानसंहननातिशययुक्तः पद्मनाभस्तीर्थंकरो भविष्यति ।

यदाचख्महि—

[1]तह तम्मएण मणसा वीरजिणो झाइयो तए पुव्विं ।
जह तारिसो चिय तुमं अर्हसि हो जोगमाहप्पं ॥ १ ॥

आगमश्च—

[2]जस्सीलसमायारो अरिहा तित्थंकरो महावीरो ।
तस्सीलसमायारो होहि हु अरिहा महापउमो ॥ २ ॥

उपास्यः सेवाञ्जलिसंबन्धादिना अयमेव देवः दुष्कृतगर्हासुकृतानुमोदनापूर्वकमयमेव देवो भवभयार्त्तिभेदी शरणमिष्यताम् । अस्यैवोक्तलक्षणस्य देवस्य शासनमाज्ञा प्रतिपत्तव्यं स्वीकरणीयम् ।

---

(१) तथा तन्मयेन मनसा वीरजिनो ध्यातस्त्वया पूर्वम् ।
यथा तादृश एव त्वमासीः ह्री योगमाहात्म्यम् ॥

(२) यच्छीलसमाचारो अर्हन् तीर्थंकरो महावीरः ।
तच्छीलसमाचारो भविष्यति खलु अर्हन् महापद्मः ॥

शासनान्तराणि हि निरतिशयपुरुषप्रणीतकाणि न प्रतिपत्ति-योग्यानि । चेतनास्ति चेदित्यधिक्षेपः चेतनावत एव प्रत्युपदेशस्य सफलत्वात् । अचेतनं तु प्रति विफल उपदेशप्रयासः ।

यदाह —

अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं
श्वपुच्छमवनामितं बधिरकर्णजापः कृतः ।
स्थले कमलरोपणं सुचिरमूषरे वर्षणं
तदन्धमुखमण्डनं यदबुधे जने भाषितम् ॥ १ ॥ ५ ॥

अदेवलक्षणमाह —

ये स्त्रीशस्त्राक्षसूत्रादिरागाद्यङ्ककलङ्किताः ।
निग्रहानुग्रहपरास्ते देवाः स्युर्न मुक्तये ॥ ६ ॥

स्त्री कामिनी शस्त्रं शूलादि अक्षसूत्रं जपमाला तान्यादौ येषां नाट्याट्टहासादीनां ते स्त्रीशस्त्राक्षसूत्रादयः राग आदिर्येषां ते रागादयः आदिशब्दाद् द्वेषमोहपरिग्रहः रागादीनामङ्काश्चिह्नानि स्त्रीशस्त्राक्षसूत्रादयश्च ते रागाद्यङ्काश्च तैः कलङ्किता दूषितास्तत्र स्त्री रागचिह्नं शस्त्रं द्वेषचिह्नं अक्षसूत्रं मोहचिह्नम् । वीतरागो हि नाङ्गनासङ्गभाग्भवति । वीतद्वेषो वा कथं शस्त्रं बिभृयात् । गतमोहो वा कथं विस्मृतिचिह्नं जपमालां परिगृह्णीयात् । रागद्वेषमोहैः सर्वदोषाः सङ्गृहीतास्तन्मूलत्वात्सर्वदोषाणाम् । निग्रहो वधबन्धादिः अनुग्रहो वरप्रदानादिः तौ परौ प्रकृष्टौ येषां ते तथा । निग्रहानु-ग्रहावपि रागद्वेषयोश्चिह्नं । य एवंविधास्ते देवा न भवन्ति मुक्तये

इति मुक्तिनिमित्तम्। देवत्वमात्रं तु क्रीडनादिकारिणां प्रेत-पिशाचादीनामिव न वार्यते ॥ ६ ॥

मुक्तिनिमित्तत्वाभावमेव व्यनक्ति—

नाट्याट्टहाससङ्गीताद्युपप्लवविसंस्थुलाः।
लम्भयेयुः पदं शान्तं प्रपन्नान् प्राणिनः कथम् ॥७॥

इहसकलसांसारिकोपप्लववर्जितं शान्तं पदं मुक्तिकैवल्यादि-शब्दाभिधेयमस्तीत्यत्र नास्ति विप्रतिपत्तिः। तत्तादृशं शान्तं पदं नाट्याट्टहाससङ्गीतादिविसंस्थुलाः स्वयमुपहतवृत्तयः कथमाश्रित-जनान् प्रापयेयुः। नह्येरण्डतरुः कल्पतरुलीलामुद्वहति। ततश्च रागद्वेषमोहदोषविवर्जितो जिन एको देवो मुक्तये नेतरे दोष-दूषिताः।

अत्रान्तरश्लोकाः—

न सर्वज्ञा न वीतरागाः शङ्करब्रह्मविष्णवः।
प्राकृतेभ्यो मनुष्येभ्यो ऽप्यमसञ्जसवृत्तितः ॥ १ ॥
सोमङ्कः काममाचष्टे द्वेषं चायुधसंग्रहः।
व्यामोहं चाक्षसूत्रादिरशौचं च कमण्डलुः ॥ २ ॥
गौरी रुद्रस्य सावित्री ब्रह्मणः श्रीर्मुरद्विषः।
शचीन्द्रस्य रवे रत्नादेवी दक्षात्मजा विधोः ॥ ३ ॥
तारा बृहस्पतेः स्वाहा वह्नेश्चेतोभुवो रतिः।
धूमोर्णा श्राद्धदेवस्य दारा एवं दिवौकसाम् ॥ ४ ॥

सर्वेषां शस्त्रसम्बन्धः सर्वेषां मोहजृम्भितम् ।
तदेवं देवसन्दोहो न देवपदवीं स्पृशेत् ॥ ५ ॥

बुद्धस्यापि न देवत्वं मोहाच्छून्याभिधायिनः ।
प्रमाणसिद्धे शून्यत्वे शून्यवादकथा वृथा ॥ ६ ॥

प्रमाणस्यैव सत्त्वेन न प्रमाणविवर्जिता ।
शून्यसिद्धिः परस्यापि न स्वपक्षस्थितिः कथम् ॥ ७ ॥

सर्वथा सर्वभावेषु क्षणिकत्वे प्रतिश्रुते ।
फलेन सह सम्बन्धः साधकस्य कथं भवेत् ॥ ८ ॥

वधस्य वधको हेतुः कथं क्षणिकवादिनः ।
स्मृतिश्च [1]प्रत्यभिज्ञा च व्यवहारकरी कथम् ॥ ९ ॥

निपत्य ददतो व्याघ्र्याः स्वकायं कृमिसङ्कुलम् ।
देयादेयविमूढस्य दया बुद्धस्य कीदृशी ॥ १० ॥

स्वजन्मकाल एवात्मजनन्युदरदारिणः ।
मांसोपदेशदातुश्च कथं शौद्धोदनेर्दया ॥ ११ ॥

यो ज्ञानं प्रकृतेर्धर्मं भाषते स निरर्थकम् ।
निर्गुणो निष्क्रियो मूढः स देवः कपिलः कथम् ॥ १२ ॥

आर्याविनायकस्कन्दसमीरणपुरस्सराः ।
निगद्यन्ते कथं देवाः सर्वदोषनिकेतनम् ॥ १३ ॥

या पशुर्गूथमश्नाति स्वपुत्रं च हृषस्यति ।
शृङ्गादिभिर्हन्तो जन्तून् सा वन्द्यास्तु कथं नु गौः ॥ १४ ॥

---

(1) क प्रत्यभिज्ञातव्यवहारकरी कथम् ।

पय:प्रदानसामर्थ्याद्धन्या चेन्महिषी न किम् ।
विशेषो दृश्यते नास्यां महिषीतो मनागपि ॥ १५ ॥
स्थानं तीर्थविदेवानां सर्वेषामपि गौर्यदि ।
विक्रीयते दुह्यते च हन्यते च कथं तत: ॥ १६ ॥
मुसलोदूखले चुल्ली देहली पिप्पली जलम् ।
निम्बोऽर्कश्चापि यै: प्रोक्ता देवास्तै: कोऽत्र वर्जिता: ॥१७॥

वीतरागस्तोत्रेऽप्युक्तमस्माभि: ।

कृतार्था जठरोपस्थदु:स्थितैरपि दैवतै. ।
भवादृशान्निह्नुवते हहा देवास्तिका: परं ॥ १८ ॥ ७ ॥

गुरुलक्षणमाह —

महाव्रतधरा धीरा भैक्षमात्रोपजीविन: ।
सामायिकस्था धर्मोपदेशका गुरवो मता: ॥ ८ ॥

महाव्रतानि अहिंसादीनि तानि धरन्तीति महाव्रतधरा: । महाव्रतधारित्व एवायं हेतु: धीरा इति धैर्यं ह्यापत्स्वप्यवैक्लव्यं तद्योगाद्धि अखण्डितमहाव्रतधरा भवन्ति । मूलगुणधारित्वमुक्त्वा उत्तरगुणधारित्वमाह । भैक्षमात्रोपजीविन इति भिक्षाणां समूहो भैक्षं अन्नपानधर्मोपकरणरूपं तन्मात्रमेवोपजीवन्ति नीकाम पुनर्द्धन धान्यहिरण्यग्रामनगरादि । मूलगुणोत्तरगुणधारणकारणभूतगुणवत्त्वमाह । सामायिकस्था इति समो रागद्वेषविकल आत्मा समस्य आयो विशिष्टज्ञानादिगुणलाभ: । समाय: स एव सामायिकं

विनयादित्वादिकण् तत्र तिष्ठन्तीति सामायिकस्थाः । सामायिकस्थो हि मूलगुणोत्तरगुणभेदभिन्नं चारित्रं पालयितुं क्षमः । एतद्यतिमात्र-साधारणलक्षणम् । गुरोस्तु असाधारणलक्षणं धर्मोपदेशका इति धर्मं संवरनिर्जरारूपं यतिश्रावकसम्बन्धिभेदभिन्नं वा उपदिशन्तीति धर्मोपदेशकाः ।

यदुक्तमस्माभिरभिधानचिन्तामणौ—

गुरुर्धर्मोपदेशक इति गृणन्ति सद्भूतं शास्त्रार्थमिति गुरवः ॥ ८ ॥

अगुरुलक्षणमाह—

सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः ।
अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥ ९ ॥

सर्वमुपदेश्यसम्बन्धिस्त्रीधनधान्यहिरण्यक्षेत्रवास्तुचतुष्पदाद्यभिलष-णशीलाः सर्वाभिलाषिणः । तथा सर्वं मद्यमधुमांसानन्त-कायादि भुञ्जत इत्येवंशीलाः सर्वभोजिनः । सह परिग्रहेण पुत्रकलत्रादिना वर्त्तन्ते सपरिग्रहाः । अत एवाब्रह्मचारिणः अब्रह्मणो महादोषतां कथयितुमब्रह्मचारिण इति पृथगुपन्यासः । अगुरुत्वे असाधारणं कारणमाह । मिथ्योपदेशा इति । मिथ्या वितथ आप्तोपज्ञोपदेशरहितत्वादुपदेशो धर्मदेशनं येषां ते तथा । न तु नैव एवंविधा गुरव इति । ननु धर्मोपदेशदायित्वं चेदस्ति तदास्तु गुरुत्वं किं निष्परिग्रहित्वादिगुणगवेषणेन ॥ ९ ॥

इत्याह—

परिग्रहारम्भमग्नास्तारयेयुः कथं परान् ।
स्वयं दरिद्रो न परमीश्वरीकर्त्तुमीश्वरः ॥ १० ॥

परिग्रहस्त्यादिरारम्भो जन्तुहिंसानिबन्धनं सर्वाभिलाषित्वसर्वभोजित्वादिः । ताभ्यां मग्ना भवाब्धौ ब्रुडिताः कथं परानुपदेश्यान् भवाम्भोधेस्तारयेयुस्तारणसमर्थाः स्युः । साधकं दृष्टान्तमाह स्वयमित्यादि स्पष्टम् ॥ १० ॥

धर्म्मलक्षणमाह—

दुर्गतिप्रपतत्प्राणिधारणाद्धर्म उच्यते ।
संयमादिर्दशविधः सर्व्वज्ञोक्तो विमुक्तये ॥ ११ ॥

दुर्गतौ नरकतिर्यग्लक्षणायां प्रपतन्तो ये प्राणिनस्तेषां धारणाहेतोर्धर्म उच्यते । धर्मशब्दार्थोऽयं इदमेव च लक्षणं धर्म्मस्य । धत्ते वा नरसुरमोक्षस्थानेषु जन्तूनिति निरुक्ताद्धर्म्मः ।

यदाह—

दुर्गतिप्रसृतान् जन्तून् यस्माद्धारयते ततः ।
धत्ते चैतान् शुभे स्थाने तस्माद्धर्म्म इति स्मृतः ॥ १ ॥

स तु वक्ष्यमाणैः संयमादिभिर्भेदैर्दशधा । सर्वज्ञोक्तत्वाद्विमुक्तये भवति । देवतान्तरप्रणीतस्यासर्वज्ञवक्तृकत्वान्न प्रमाणम् । ननु सर्वज्ञोक्तत्वाभावेऽप्यपौरुषेयवचनोपज्ञस्य धर्मस्य प्रामाणिकत्वमस्तु ।

यदाह—

चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं स्थूलं व्यवहितं विप्रकृष्टमेवं जातीयकमर्थमवगमयितुं शक्नोति नान्यत्किञ्चनेन्द्रिय-मिति। चोदना च अपौरुषेयत्वेन पुरुषगतानां दोषाणामप्रवेशात् प्रमाणमेव।

यदाह—

शब्दे दोषोद्भवस्तावद्वक्त्रधीन इति स्थितम्।
तदभावः क्वचित्तावद्गुणवद्वक्तृकत्वतः॥ १॥
तद्गुणैरपकृष्टानां शब्दे संक्रान्त्यसम्भवात्।
यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः॥ २॥

किञ्च—

दोषाः सन्ति न सन्तीति पौरुषेयेषु युज्यते।
वेदे कर्त्तुरभावाच्च दोषाशङ्कैव नास्ति नः॥ ३॥ ११॥

इत्याह—

अपौरुषेयं वचनमसम्भवि भवेद्यदि।
न प्रमाणं भवेद्वाचां ह्याप्ताधीना प्रमाणता॥ १२॥

पुरुषेण कृतं पौरुषेयं तत्प्रतिषेधादपौरुषेयम्। उच्यते स्थान-करणाभिघातपूर्वकं पुरुषेण प्रतिपाद्यत इति वचनम्। तदिदं परस्परविरुद्धम्। अपौरुषेयं वचनं चेति। तदेवाह। असम्भवि न ह्यस्ति सम्भवो वचनस्य त्रसरेणोरिवाकाशे। न चामूर्त्तस्य

सतोऽप्यदर्शनमिति वक्तुं युक्तं प्रमाणाभावात्। अभिव्यञ्जकवशाच्छब्दश्रवणमेव प्रमाणमिति चेत् न। तस्य जन्यत्वेऽप्युपपत्तेः। अभिव्यङ्ग्यत्वे प्रत्युत दोषसम्भवः। एकशब्दाभिव्यक्त्यर्थं स्थानकरणाभिघाते शब्दान्तराणामपि तद्देशानामभिव्यक्तिप्रसङ्गः। न च प्रतिनियतव्यञ्जकव्यङ्ग्यता शब्दानां भवति व्यङ्ग्यान्तरेषु तददर्शनात्।

तथाच—

गृहे दधिघटीं द्रष्टुमाहितो गृहमेधिना।

अपूपानपि तद्देशान् प्रकाशयति दीपकः॥ १॥

तदेवं वचनस्यापौरुषेयता न सम्भवति। अथाप्यप्रामाणिककर्तृवाकबलादाकाशादिवच्छब्दस्यापौरुषेयता यदि भवेत् तथापि प्रामाण्यं न सम्भवति। हि यस्मादाप्तवक्तृकत्वेन वाचां प्रामाण्यं नान्यथा।

यतः—

शब्दे गुणोद्भवस्तावद्वक्त्रधीन इति स्थितम्।

तदभावः क्वचित्तावद्दोषवद्वक्तृकत्वतः॥ १॥

तद्दोषैरपकृष्टानां शब्दे संक्रान्त्यसम्भवात्।

यद्वा वक्तुरभावेन गुणा न स्युर्निराश्रयाः॥ २॥

किञ्च—

गुणाः सन्ति न सन्तीति पौरुषेयेषु युज्यते।

वेदे कर्तुरभावात्तु गुणाशङ्केव नास्ति नः॥ ३॥ १२॥

एवं तावदपौरुषेयवचनाभिहितस्यासम्भवादिना
अभावमभिधायासर्वज्ञपुरुषवक्तृकस्य
धर्मस्याप्रामाणिकत्वमाह—

मिथ्यादृष्टिभिराम्नातो हिंसाद्यैः कलुषीकृतः ।
स धर्म्म इति वित्तोऽपि भवभ्रमणकारणम् ॥१३॥

मिथ्यादृष्टिभिर्हरिहरहिरण्यगर्भकपिलबुद्धादिभिराम्नात आम्नो-पज्ञतया प्रतिपादितः । यत्तदोर्नित्याभिसम्बन्धाद्यो मिथ्यादृष्टि-भिराम्नातः स धर्मत्वेन मुग्धबुद्धीनां प्रसिद्धोऽपि भवभ्रमण-कारणमधर्म एवेत्यर्थः । कुत इत्याह । हिंसाद्यैः कलुषीकृत इति । मिथ्यादृष्टिप्रणीता ह्यागमा हिंसादिदोषदूषिताः ॥ १३ ॥

इदानीमदेवागुर्व्वधर्म्माणां साक्षेपं प्रतिक्षेपमाह—

सरागोऽपि हि देवश्चेद् गुरुरब्रह्मचार्य्यपि ।
कृपाहीनोऽपि धर्म्मः स्यात्कष्टं नष्टं हहा जगत् ॥१४॥

रागग्रहणमुपलक्षणं द्वेषमोहयोः । अब्रह्मचारित्वमुपलक्षणं प्राणा-तिपातादीनाम् । कृपाहीनत्वमुपलक्षणं मूलोत्तरगुणहीनत्वस्य । चेच्छब्दः प्रत्येकमभिसम्बध्यते । आक्षेपं प्रकटयति । कष्टमिति खेदे नष्टं जगत् देवगुरुधर्मशून्यत्वेन विनष्टं दुर्गतिगमनात् । हहा निपातः खेदातिशयसूचकः ।

यदाह—

'रागी देवो दोसी देवो मामि सुन्नंपि देवो
मज्जे धम्मो मंसे धम्मो जीवहिंसाइ धम्मो।
रत्ता मत्ता कन्तासत्ता जे गुरु तेवि पुज्जा
हाहा कट्ठं नट्ठो लोओ अट्टमट्टं कुणंतो॥ १॥

तदेवमदेवागुर्वधर्मपरिहारेण देवगुरुधर्मप्रतिपत्तिलक्षणं सम्यक्त्वं सुव्यवस्थितम्। तच्च शुभात्मपरिणामरूपमस्मदादीनामप्रत्यक्षं केवलं लिङ्गैर्लक्ष्यते॥ १४॥

तान्येवाह—

शमसंवेगनिर्वेदानुकम्पास्तिक्यलक्षणैः।
लक्षणैः पञ्चभिः सम्यक् सम्यक्त्वमुपलक्ष्यते॥१५॥

पञ्चभिर्लक्षणैर्लिङ्गैः परस्थं परोक्षमपि सम्यक्त्वं सम्यगुपलक्ष्यते। लिङ्गानि तु शमसंवेगनिर्वेदानुकम्पास्तिक्यस्वरूपाणि। शमः प्रशमः क्रूराणामनन्तानुबन्धिनां कषायाणामनुदयः। स च प्रकृत्या वा कषायपरिणतेः कटुफलावलोकनाद्वा भवति।

(१) रागी देवो दोषी देवो शून्योऽपि देवः
मद्ये धर्मो मांसे धर्मः जीवहिंसायां धर्मः।
रक्ता मत्ताः कान्तासक्ता ये गुरवः तेऽपि पूज्याः
हाहा कष्टं नष्टो लोको अट्टमट्टं कुर्वन्॥

यदाह—

[1]पइईए कम्माणं नाऊणं वा विवागमसुहंति ।

अवरद्धेवि न कुप्पइ उवसमओ सव्वकालंपि ॥ १ ॥

अन्ये तु क्रोधकण्डूविषयतृष्णोपशमः शम इत्याहुः अधिगत सम्यग्दर्शनो हि साधूपासनावान् कथं क्रोधकण्ड्वा विषयतृष्णाया च तरलीक्रियेत । ननु क्रोधकण्डूविषयतृष्णोपशमश्चेच्छमस्तर्हि कृष्णश्रेणिकादीनां सापराधे निरपराधेऽपि च परे क्रोधवतां विषयतृष्णातरलितमनसां च कथं [2]शमः । तदभावे च सम्यक्त्वं न गम्येत । नैवम् । लिङ्गिनि सम्यक्त्वे सति लिङ्गैरवश्यभाव्यमिति नायं नियमः । दृश्यते हि धूमरहितोऽप्ययस्कारगृहेषु वह्निः भस्मच्छन्नस्य वा वह्नेर्न धूमलेशोऽपीति अयं तु नियमः सुपरीक्षिते लिङ्गे सति लिङ्गी भवत्येव ।

यदाह—

लिङ्गे लिङ्गी भवत्येव लिङ्गिन्येवेतरत्पुनः ।

नियमस्य विपर्यासे सम्बन्धो लिङ्गलिङ्गिनोः ॥ १ ॥

सञ्ज्वलनकषायोदयाद्वा कृष्णादीनां क्रोधकण्डूविषयतृष्णे सञ्ज्वलना अपि केचन कषायास्तीव्रतया अनन्तानुबन्धिसदृश-विपाकवन्त इति सर्वमवदातम् । संवेगो मोक्षाभिलाषः । सम्यग्-

---

(१) प्रकृत्याः कर्मणां ज्ञात्वा वा विपाकमशुभमिति ।

अपराधेऽपि न कुप्यति उपशमतः सर्वकालमपि ॥

(२) क ख प्रशमः ।

दृष्टिर्हि नरेन्द्रसुरेन्द्राणां विषयसुखानि दुःखानुषङ्गाद्दुःखतया मन्यमानो मोक्षसुखमेव सुखत्वेन मन्यते अभिलषति च।

यदाह—

'नरविबुहेसरसोक्खं[2] दुक्खं चिय भावओ अ मन्नंतो।
संवेगओ न मोक्खं मोत्तूणं किंचि पत्थेइ ॥ १ ॥

निर्वेदो भववैराग्यम्। सम्यग्दर्शनी हि दुःखदौर्गत्यगहने भवकारागारे कर्मदण्डपाशिकैस्तथातथाकदर्थ्यमानः प्रतिकर्त्तुमक्षमो ममत्वरहितश्च दुःखेन निर्विण्णो भवति।

यदाह—

[3]'नारयतिरियनरामरभवेसु निव्वेयओ वसइ दुक्खं।
अकयपरलोयमग्गो ममत्तविसवे[4]गरहिओ य ॥ १ ॥

अन्ये तु संवेगनिर्वेदयोरर्थविपर्ययमाहुः संवेगो भवविरागः निर्वेदो मोक्षाभिलाष इति। अनुकम्पा दुःखितेषु अपक्षपातेन दुःखप्रहाणेच्छा। पक्षपातेन तु करुणा स्वपुत्रादौ व्याघ्रादीनामप्यस्त्येव। सा चानुकम्पा द्रव्यतो भावतश्च भवति। द्रव्यतः सत्यां शक्तौ दुःखप्रतीकारेण। भावत आर्द्रहृदयत्वेन।

(१) नरविबुधेश्वरसौख्यं दुःखमेव भावतश्च मन्यमानः।
संवेगतो न मोक्षं मुक्त्वा किञ्चित् प्रेप्सते ॥

(२) च ठ -दुक्खं।

(३) नारकतिर्यङ्नरामरभवेषु निर्वेदतः वसति दुःखम्।
अकृतपरलोकमार्गो ममत्वविषवेगरहितश्च ॥

(४) ख ग घ ङ -अर-।

यदाह—

[1]दट्ठूण पाणिनिवहं भीमे भवसायरम्मि दुक्खत्तं ।

अविसेसओणुकंपं [2]दुविहावि मामच्छओ कुणइ ॥ १ ॥

अस्तीति मतिरस्यत्यास्तिकस्तस्य भावः कर्म वा आस्तिक्यम् । तत्त्वान्तरश्रवणेऽपि जिनोक्ततत्त्वविषये निराकाङ्क्षा प्रतिपत्तिः । आस्तिक्येन हि जीवधर्मतया अप्रत्यक्षं सम्यक्त्वं लक्ष्यते । तद्वान् हि आस्तिक इत्युच्यते ।

यदाह—

[3]मन्नइ तमेव सच्चं नीसंकं जं जिणेहिं पन्नत्तं ।

सुहपरिणामो सम्मं कंखाइविसुत्तिआरहिओ ॥ १ ॥

अन्ये तु शमादीनि लिङ्गान्यन्यथा व्याचक्षते सुपरीक्षित-प्रवक्तृप्रवाच्यप्रवचनतत्त्वाभिनिवेशान्मिथ्याभिनिवेशोपशमः शमः । स सम्यग्दर्शनस्य लक्षणम् । यो ह्यतत्त्वं विहायात्मना तत्त्वं प्रतिपन्नः स लक्ष्यते सम्यग्दर्शनवानिति । संवेगो भयं जिनप्रवचनानुसारिणो हि नरकेषु शरीरं मानसं च शीतोष्णादिजनितं च संक्लिष्टासुरो-दीरितं च परस्परोदीरितं च तिर्यक्षु भारारोपणाद्यनेकविधं मनुजेषु दारिद्र्यदौर्भाग्यादि च दुःखमवलोकयतस्तद्भीततया तत्प्रशमोपाय-भूतं धर्ममनुतिष्ठतो लक्ष्यते विद्यतेऽस्य सम्यग्दर्शनमिति । निर्वेदो

---

(१) दृष्ट्वा प्राणिनिवहं भीमे भवसागरे दुःखार्त्तम् ।
अविशेषतोऽनुकम्पां द्विविधामपि सामर्थ्यतः करोति ॥

(२) ख ग घ ठ दुहावि ।

(३) मन्यते तदेव सत्यं निःशङ्कं यज्जिनैः प्रज्ञापितम् ।
शुभपरिणामः सम्यक् काङ्क्षादिविस्रोतसिकारहितः ॥

विषयेष्वनभिष्वङ्ग: यथा इहलोक एव प्राणिनां दुरन्तकाम-भोगाभिष्वङ्गोऽनेकोपद्रवफल: परलोकेऽप्यतिकटुकनरकतिर्यग्-मनुष्यजन्मफलप्रद:। अतो न किञ्चिदनेन। उज्झितव्य एवाय-मिति। एवंविधनिर्वेदेनापि लक्ष्यतेऽस्यास्य सम्यग्दर्शनमिति। अनु-कम्पा कृपा यथा सर्व्वे एव सत्त्वा: सुखार्थिनो दु:खप्रहाणार्थिनश्च। ततो नैषामल्पापि पीडा मया कार्येत्यनयापि लक्ष्यतेऽस्यास्य सम्यक्त्वमिति। सन्ति खलु जिनेन्द्रप्रवचनोपदिष्टा अतीन्द्रिया जीवपरलोकादयो भावा इति परिणाम आस्तिक्यम्। अनेनापि लक्ष्यते सम्यग्दर्शनयुक्तोऽयमिति ॥ १५ ॥

सम्यक्त्वलिङ्गान्युक्त्वा भूषणान्याह—

स्थैर्यं प्रभावना भक्ति: कौशलं जिनशासने।
तीर्थसेवा च पञ्चास्य भूषणानि प्रचक्षते ॥ १६ ॥

अस्य सम्यक्त्वस्य पञ्च भूषणानि भूष्यते अलङ्क्रियते यैस्तानि भूषणानि जिनशासने जिनशासनविषये। एतच्च सर्वत्र सम्बध्यते। स्थैर्य्यं जिनधर्मं प्रति चलितचित्तस्य परस्य स्थिरत्वापादनं स्वयं वा परतीर्थिकर्द्धि-दर्शनेऽपि जिनशासनं प्रति निष्प्रकम्पता। प्रभवति जैनेन्द्रशासनं तस्य प्रभवत: प्रयोजकत्वं प्रभावना। सा चाष्टधा प्रभावकभेदेन।

यदाह—

'पावयणी धम्मकही वाई नेमित्तिओ तवस्सी य।
विज्जा सिद्धो अ कई य अट्ठेव पभावगा भणिया ॥ १ ॥

(१) प्रवचनी धर्मकथी वादी नैमित्तिक: तपस्वी च।
विद्यावान् सिद्धश्च कविश्च अष्टैव प्रभावका भणिता: ॥

तत्र प्रवचनं द्वादशाङ्गं गणिपिटकं तदस्यास्त्यतिशयवदिति प्रवचनी युगप्रधानागमः। धर्मकथा प्रशस्यास्यास्तीति धर्मकथी शिष्यादिलब्धादिन्। वादिप्रतिवादिसभ्यसभापतिलक्षणायां चतुरङ्गायां सभायां प्रतिपक्षनिरासपूर्वकं स्वपक्षस्थापनार्थमवश्यं वदतीति वादी। निमित्तं त्रैकालिकं लाभालाभादिप्रतिपादकं शास्त्रं तद्वेत्त्यधीते वा नैमित्तिकः। तपो विकृष्टमष्टमाद्यस्यास्तीति तपस्वी। विद्याः प्रज्ञप्त्यादयः शासनदेवतास्ताः साहायके यस्य स विद्यावान्। अञ्जनपादलेपतिलकगुटिकासकलभूताकर्षणनिष्कर्षणवैक्रियत्वप्रभृतयः सिद्धयस्ताभिः सिद्ध्यति स्म सिद्धः। कवते गद्यपद्यादिभिः प्रबन्धवर्णनां करोतीति कविः। एते प्रवचन्यादयोऽष्टौ प्रभवन्तो भगवच्छासनस्य यथायथं देशकालाद्यौचित्येन साहायककरणात्प्रभावकास्तेषां कर्म प्रभावना द्वितीयं भूषणम्। भक्तिः प्रवचने विनयवैयावृत्त्यरूपा प्रतिपत्तिः सम्यग्दर्शनज्ञानचारित्रादिगुणाधिकेष्वभ्युत्थानमभियानं शिरस्यञ्जलिकरणं स्वयमासनढौकनमासनाभिग्रहो वन्दना पर्युपासना अनुगमनं चेत्यष्टविधकर्मविनयनादष्टविध उपचारविनयः। व्यावृत्तस्य भावः कर्म वा वैयावृत्त्यम्। तच्चाचार्योपाध्यायतपस्विशिक्षकग्लानकुलगणसङ्घसाधुसमनोज्ञेषु दशस्वन्नपानवस्त्रपात्रप्रतिश्रयपीठकफलकसंस्तारादिभिर्धर्मसाधनैरुपग्रहः शुश्रूषाभैषजक्रियाकान्तारविषमदुर्गोपसर्गेष्वभ्युपपत्तिश्च। जिनशासनविषये च कौशलं नैपुण्यम्। ततो हि व्यवहितादिरप्यर्थो विषयीक्रियते। यथानार्यदेशवर्त्ती आर्द्रककुमारः श्रेणिकपुत्रेणाभयकुमारेण कौशलात्प्रतिबोधित इति। तीर्थं नद्यादे-

रिव संसारस्य तरणे सुखावतारो मार्गः। तच्च [1]द्विधा द्रव्यतीर्थं भावतीर्थं च। द्रव्यतीर्थं तीर्थकृतां जन्मदीक्षाज्ञाननिर्व्वाणस्थानम्।

यदाह—

[2]जम्मं दिक्खा नाणं तित्थयराणं महाणुभावाणं।

जत्थ य किर निव्वाणं आगाढं दंसणं होइ ॥ १ ॥

भावतीर्थं तु [3]चतुर्विधः श्रमणसङ्घः प्रथमगणधरो वा।

यदाह—

[4]तित्थं भन्ते तित्थं तित्थयरे तित्थं गोयमा अरिहा ताव नियमा तित्थंकरे तित्थं पुणचाउव्वणो समणसंघे पढमगणहरे वा।

तीर्थस्य सेवा तीर्थसेवा ॥ १६ ॥

अस्य सम्यक्त्वस्य भूषणान्युक्त्वा दूषणान्याह—

शङ्काकाङ्क्षाविचिकित्सामिथ्यादृष्टिप्रशंसनम्।

तत्संस्तवश्च पञ्चापि सम्यक्त्वं दूषयन्त्यलम् ॥ १७ ॥

पञ्चापि शङ्कादयो निर्दोषमपि सम्यक्त्वं दूषयन्ति अत्यमतिशयेन। शङ्का सन्देहः सा च सर्वविषया देशविषया च। सर्वविषया अस्ति वा नास्ति वा धर्म्म इत्यादि। देशशङ्का एकैकवस्तुधर्म्मगोचरा।

(१) ख क द्वेधा।

(२) जन्म दीक्षा ज्ञानं तीर्थकराणां महानुभावानाम्।
यत्र च किल निर्वाणं आगाढं दर्शनं भवति ॥

(३) ग क चतुर्वर्णः।

(४) तीर्थं भगवन् तीर्थं तीर्थंकर तीर्थं गौतमा अर्हन् तावन्नियमेन तीर्थंकरस्तीर्थं पुनश्चातुर्वर्ण्ये श्रमणसङ्घे प्रथमगणधरे वा।

यथा अस्ति जीवः केवलं सर्वगतोऽसर्वगतो वा सप्रदेशोऽप्रदेशो वेति । इयं च द्विधाऽपि भगवदर्हत्प्रणीत[1]प्रवचनेषु अप्रत्ययरूपा सम्यक्त्वं दूषयति । केवलागमगम्या अपि हि पदार्था अस्मदादिप्रमाणपरीक्षानिरपेक्षा आप्तप्रणीतत्वान्न सन्देग्धुं योग्याः । यत्रापि मोहवशात् क्वचन संशयो भवति तत्राप्यप्रतिहतेयमर्मता ।

यथा—

[2]कत्थ य मइदुव्वलेण तव्विहायरियविरहओ वावि ।
नेयगहणत्तणेण य नाणावरणोदएणं च ॥ १ ॥
[3]हेउदाहरणासंभवे अ सइ सुट्ठु जं न बुज्झेज्जा ।
सव्वन्नुमयमवितहं तहावि तं चिंतए मइमं ॥ २ ॥
[4]अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा ।
जियरागदोसमोहा य नन्नहा वाइणो तेणं ॥ ३ ॥

यथा वा सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः मिथ्यादृष्टिः । सूत्रं हि नः प्रमाणं जिनाभिहितम् । काङ्क्षा अन्यान्यदर्शनग्रहः । सापि सर्वविषया देशविषया च । सर्वविषया सर्वपाखण्डिधर्माकाङ्क्षारूपा । देशकाङ्क्षा त्वेकादिदर्शनविषया यथा सुगतेन

---

(१) ख ग क -प्रवचने ।

(२) क्व च मतिदुर्बलेन तद्विधाचार्यविरहतो वापि ।
ज्ञेयगहनत्वेन च ज्ञानावरणोदयेन च ॥

(३) हेतूदाहरणासंभवे च सति सुष्ठु यन्न बुध्येत ।
सर्वज्ञमतमवितथं तथापि तच्चिन्तयति मतिमान् ॥

(४) अनुपकृतपरानुग्रहपरायणा यज्जिना जगत्प्रवराः ।
जितरागद्वेषमोहाश्च नान्यथा वादिनस्तेन ॥

भिक्षूणामक्लेशको धर्म उपदिष्टः स्नानान्नपानाच्छादनशयनीयादिषु सुखानुभवद्वारेण।

यदाह –

मृद्वी शय्या प्रातरुत्थाय पेया
मध्ये भक्तं पानकं चापराह्णे
द्राक्षाखण्डं शर्करा चार्धरात्रे
मोक्षश्चान्ते शाक्यसिंहेन दृष्टः ॥ १ ॥ इति

एतदपि घटमानकमेव न दूरापेतम्। तथा परिव्राड्भौत-ब्राह्मणादयो विषयानुपभुञ्जाना एव परलोकेऽपि सुखेन युज्यन्त इति। साधीयानेषोऽपि धर्म इति। एवं च काङ्क्षापि परमार्थतो भगवदर्हत्प्रणीतागमानाश्वासरूपा सम्यक्त्वं दूषयति। विचिकित्सा चित्तविप्लवः। सा च सत्यपि युक्त्यागमोपपन्ने जिनधर्मेऽस्य महतस्तपःक्लेशस्य सिकताकणकवलवन्निस्वादस्यायत्यां फलसम्प-द्भविता। अथ क्लेशमात्रमेवेदं निर्जराफलविकलमिति। उभयथा हि क्रिया दृश्यन्ते सफला अफलाश्च कृषीवलादीनामिव इयमपि तथा सम्भाव्यते।

यदाह –

[1]पुव्वपुरिसा जहोइअमग्गचरा घडइ तेसि फलजोगो
अम्हेसु य धीसंघयणविरहओ न तह तेसि फलं ॥ १ ॥ इति ॥

---

(१) पूर्वपुरुषा यथोचितमार्गचरा घटते तेषां फलयोगः।
अस्मासु च धीसंघयणविरहतः न तथा तेषां फलम् ॥

विचिकित्सापि भगवद्वचनानाश्वासरूपत्वात्सम्यक्त्वस्य दोषः। न च शङ्कातो नेयं भिद्यते। शङ्का हि सकलासकलपदार्थभाक्त्वेन द्रव्यगुणविषया इयं तु क्रियाविषयैव। यद्वा विचिकित्सा निन्दा सा च सदाचारमुनिविषया यथा अस्नानेन प्रस्वेदजलक्लिन्नमलत्वा दुर्गन्धिवपुष एत इति। को दोषः स्याद्यदि प्रासुकवारिणा अङ्ग-क्षालनं कुर्वीरन्निति। इयमपि तत्त्वतो भगवद्धर्मानाश्वासरूपत्वात् सम्यक्त्वदोषः। मिथ्या जिनागमविपरीता दृष्टिर्दर्शनं येषां ते मिथ्या-दृष्टयस्तेषां प्रशंसनं प्रशंसा तच्च सर्वविषयं देशविषयं च। सर्वविषयं सर्वाण्यपि कपिलादिदर्शनानि युक्तियुक्तानीति माध्यस्थ्यसारा स्तुतिः सम्यक्त्वस्य दूषणम्।

यदाचक्ष्महि स्तुतौ—

सुनिश्चितं मत्सरिणो जनस्य
न नाथ मुद्रामतिशेरते ते।
माध्यस्थ्यमास्थाय परीक्षका ये
मणौ च काचे च समानुबन्धाः॥ १॥

देशविषयं तु इदमेव बुद्धवचनं साङ्ख्यकणादादिवचनं वा तत्त्वमिति। इदं तु व्यक्तमेव सम्यक्त्वदूषणम्। तैर्मिथ्यादृष्टिभिरेकत्र संवासात्पर-स्परालापादिजनितः परिचयः संस्तवः। एकत्रवासे हि तत्प्रक्रिया-श्रवणात्तत्क्रियादर्शनाच्च दृढसम्यक्त्ववतोऽपि दृष्टिभेदः सम्भाव्यते। किमुत मन्दबुद्धेर्नवधर्मस्य इति संस्तवोऽपि सम्यक्त्वदूषणम्। एवंविधं च सम्यक्त्वं विशिष्टद्रव्यक्षेत्रकालभावसामग्र्यां सत्यां गुरोः समीपे विधिना प्रतिपद्य श्रावको यथावत्पालयति।

यदाह—

[1]समणोवासओ तत्थ मिच्छत्ताओ पडिक्कमे।
दव्वओ भावओ पुव्विंसम्मत्तं पडिवज्जए॥ १॥

[2]न कप्पए से परतित्थियाणं तहेव तेसिं चिय देवयाणं
परिग्गहे ताण य चेइयाणं पहावणावंदणपूयणाइं॥ २॥

[3]लोयाण तित्थेसु सिणाणदाणं पिंडप्पयाणं हुणणं तवं च
संकंतिसोमग्गहणाइएसुं पभूयलोयाण पवाहकिच्चं॥ ३॥

एवं तावत्सागरोपमकोटीकोट्यां शेषायां किञ्चिदूनायां मिथ्यात्वमोहनीयस्थितौ जन्तुः सम्यक्त्वं प्रतिपद्यते। सागरोपमकोटीकोट्यामप्यवशिष्टायां पल्योपमपृथक्त्वं यदा व्यतीतं भवति तदा देशविरतिं प्रतिपद्यते।

यदाह—

[4]सम्मत्तम्मि उ लद्धे पलियपुहुत्तेण सावओ होज्जत्ति॥ १७॥

---

(१) श्रमणोपासकस्तत्र मिथ्यात्वात्प्रतिक्रामेत्।
द्रव्यतो भावतः पूर्वं सम्यक्त्वं प्रतिपद्यते॥

(२) न कल्पते तस्य परतीर्थिकानां तथैव तेषामेव देवतानाम्।
परिग्रहे तेषां च चैत्यानां प्रभावनावन्दनपूजनादि॥

(३) लोकानां तीर्थेषु स्नानदानं पिण्डप्रदानं हवनं तपश्च।
संक्रान्तिसोमग्रहणादिकेषु प्रभूतलोकानां प्रवाहकृत्यम्॥

(४) सम्यक्त्वे तु लब्धे पल्योपमपृथक्त्वेन श्रावको भवेदिति।

सम्यक्त्वमूलानि पञ्चाणुव्रतानीत्युक्तं तत्र सम्यक्त्व-
मभिहितमिदानीमणुव्रतान्याह—

विरतिं स्थूलहिंसादेर्द्विविधत्रिविधादिना।
अहिंसादीनि पञ्चाणुव्रतानि जगदुर्जिनाः॥१८॥

स्थूला मिथ्यादृष्टीनामपि हिंसात्वेन प्रसिद्धा या हिंसा सा स्थूल-
हिंसा स्थूलानां वा त्रसानां जीवानां हिंसा स्थूलहिंसा।
स्थूलग्रहणमुपलक्षणम्। तेन निरपराधसङ्कल्पपूर्वकहिंसानामपि
ग्रहणं आदिग्रहणात् स्थूलानृतस्तेयाब्रह्मचर्यापरिग्रहाणां संग्रहः।
एभ्यः स्थूलहिंसादिभ्यो या विरतिर्निवृत्तिस्तामहिंसादीनि
अहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहान् पञ्चाणुव्रतानीति जिना-
स्तीर्थंकरा जगदुः प्रतिपादितवन्तः। किमविशेषेण विरति-
नेत्याह। द्विविधत्रिविधादिना भङ्गजालेन द्विविधः कृत-
कारितरूपस्त्रिविधो मनोवाक्कायभेदेन यत्र स द्विविधत्रिविध
एको भङ्गः। इह यो हिंसादिभ्यो विरतिं प्रतिपद्यते। स द्विविधां
कृतकारितभेदां त्रिविधेन मनसा वचसा कायेन चेति। एवं
च भावना स्थूलहिंसां न करोत्यात्मना न कारयत्यन्येन मनसा
वचसा कायेन चेति। अस्य चानुमतिरप्रतिषिद्धा अपत्यादि-
परिग्रहसद्भावात् तैर्हिंसादिकरणे च तस्यानुमतिप्राप्तेः। अन्यथा
परिग्रहापरिग्रहयोरविशेषेण प्रव्रजिताप्रव्रजितयोरभेदापत्तेः।
ननु भगवत्यादावागमे त्रिविधं त्रिविधेनेत्यपि प्रत्याख्यानमुक्त-

मगारिणः। तच्च श्रुतोक्तत्वादनवद्यमेव तत्कस्मान्नोच्यते। उच्यते। तस्य विशेषविषयत्वात्। तथाहि यः किल प्रविव्रजिषुरेव प्रतिमाः प्रतिपद्यते। पुत्रादिसन्ततिपालनाय यो वा विशेषं स्वयंभूरमणादिगतं मत्स्यादिमांसं स्थूलहिंसादिकं वा कचिद-वस्थाविशेषे प्रत्याख्याति स एव त्रिविधं त्रिविधेनेति करोति। इत्यल्पविषयत्वान्नोच्यते। बाहुल्येन तु द्विविधं त्रिविधेनेति। द्विविधत्रिविध आदिर्यस्य द्विविधत्रिविधादेर्भङ्गजालस्य तेन॥

द्विविधं द्विविधेनेति द्वितीयो भङ्गः द्विविधमिति स्थूलहिंसां न करोति न कारयति द्विविधेनेति मनसा वचसा यद्वा मनसा कायेन यद्वा वाचा कायेनेति। तत्र यदा मनसा वाचा न करोति न कारयति। तदा मनसा अभिसन्धिरहित एव वाचापि हिंसकमब्रुवन्नेव कायेनैव दुश्चेष्टितादिना असंज्ञिवत्करोति। यदा तु मनसा कायेन न करोति न कारयति तदा मनसाभि-सन्धिरहित एव कायेन दुश्चेष्टितादि परिहरन्नेवानाभोगाद्वाचैव हन्मि घातयामि वेति ब्रूते। यदा तु वाचा कायेन न करोति न कारयति। तदा मनसैवाभिसन्धिमधिकृत्य करोति कारयति च। अनुमतिस्तु त्रिभिरपि सर्वत्रैवास्ति। एवं शेषविकल्पा अपि भावनीयाः।

द्विविधमेकविधेनेति तृतीयः द्विविधं करणं कारणं च एकविधेन मनसा यद्वा वचसा यद्वा कायेन।

एकविधं त्रिविधेनेति चतुर्थः एकविधं करणं यद्वा कारणं मनसा वाचा कायेन च।

एकविधं द्विविधेनेति पञ्चमः एकविधं करणं यद्वा कारणं द्विविधेन मनसा वाचा यद्वा मनसा कायेन यद्वा वाचा कायेन ।

एकविधमेकविधेनेति षष्ठः एकविधं करणं यद्वा कारणं एकविधेन मनसा यद्वा वाचा यद्वा कायेन ।

यदाह—

'दुविहतिविहेण पढमो दुविहं दुविहेण बीयओ होइ दुविहं एगविहेणं एगविहं चेव तिविहेण एगविहं दुविहेणं एगेगविहेण छट्ठओ होइत्ति ।

एते च भङ्गाः करणत्रिकेण योगत्रिकेण च विशिष्यमाणा एकोनपञ्चाशद्भवन्ति ।

तथाहि—

हिंसां न करोति मनसा १ वाचा २ कायेन ३ मनसा वाचा ४ मनसा कायेन ५ वाचा कायेन वा ६ मनसा वाचा कायेन च ७ इति करणेन सप्त भङ्गाः ।

एवं कारणेन सप्त । अनुमत्या सप्त । तथा हिंसां न करोति न कारयति च मनसा १ वाचा २ कायेन ३ मनसा वाचा ४ मनसा कायेन ५ वाचा कायेन वा ६ मनसा वाचा कायेन च ७ । इति करणकारणाभ्यां सप्त भङ्गाः ।

---

(१) द्विविधत्रिविधेन प्रथमो द्विविधं द्विविधेन द्वितीयो भवति द्विविधं एक-विधेन एकविधं चैव त्रिविधेन एकविधं द्विविधेन एकैकविधेन षष्ठो भवतीति ।

एवं करणानुमतिभ्यां सप्त। कारणानुमतिभ्यामपि सप्त। करणकारणानुमतिभिरपि सप्त। एवं सर्वे मीलिता एकोनपञ्चाशद्भवन्ति। एते च त्रिकालविषयत्वात् प्रत्याख्यानस्य कालत्रयेण गुणिताः सप्तचत्वारिंशदधिकं शतं भवन्ति।

यदाह—

[1]सीयालं भंगसयं पच्चक्खाणम्मि जस्स उवलद्धं।

सो खलु पच्चक्खाणे कुसलो सेसा अकुसलाओ ॥ १ ॥

त्रिकालविषयता चातीतस्य निन्दया साम्प्रतिकस्य संवरणेन अनागतस्य प्रत्याख्यानेनेति।

यदाह—

[2]अइयं निंदामि पडुप्पन्नं संवरेमि अणागयं पच्चक्खामित्ति। एते च भङ्गा अहिंसाव्रतमाश्रित्योपदर्शिताः व्रतान्तरेष्वपि द्रष्टव्याः ॥ १८ ॥

एवं सामान्येन हिंसादिगोचरां विरतिमुपदर्श्य प्रत्येकं हिंसादिषु तामुपदिदर्शयिषुर्हिंसायां तावदाह—

पङ्गुकुष्ठिकुणित्वादि दृष्ट्वा हिंसाफलं सुधीः।

निरागस्त्रसजन्तूनां हिंसां सङ्कल्पतस्त्यजेत् ॥१९॥

इह नादृष्टपापफलाः पापान्निवर्त्तन्त इति पापफलमुपदर्शयन्

(१) सप्तचत्वारिंशत्भङ्गशतं प्रत्याख्याने यस्य उपलब्धम्।

स खलु प्रत्याख्याने कुशलः शेषा अकुशलाः ॥

(२) अतीतं निन्दामि प्रत्युत्पन्नं संवृणोमि अनागतं प्रत्याख्यामीति।

हिंसाविरतिव्रतमुपदिशति । पङ्गुः सत्यपि पादे पादविहरणाक्षमः कुष्ठी त्वग्दोषी कुणिर्विकलपाणिः तेषां भावः पङ्गुकुष्ठीकुणित्वम् । आदिग्रहणात्पङ्गुत्वोपलक्षितमधःकायवैगुण्यम् । कुष्ठित्वोपलक्षितं सकलरोगजातम् । कुणित्वोपलक्षितमुपरिकायवैगुण्यं संगृह्यते । एतद्धिंसाफलं दृष्ट्वा सुधीरिति बुद्धिमान् स हि शास्त्रबलेन हिंसायाः फलमेतदिति निश्चित्य हिंसां त्यजेत् । अत्र विधौ सप्तमी । केषां निरागस्त्रसजन्तूनां निरागसो निरपराधास्त्रसा द्वीन्द्रियादयस्तेषां सङ्कल्पेन सङ्कल्पतः आद्यादित्वात्तृतीयान्तात्तसुः । निरागस इति निरपराधजन्तुविषयां हिंसां प्रत्याचष्टे सापराधस्य तु न नियमः । त्रसग्रहणेनैकेन्द्रियविषयां हिंसां नियमयितुं न क्षम इत्याचष्टे सङ्कल्पत इति अमुं जन्तुं मांसाद्यर्थित्वेन हन्मीति सङ्कल्पपूर्वकं हिंसां वर्जयेत् । आरम्भजा तु हिंसा अशक्यप्रत्याख्यानेति तत्र यतनामेव कुर्यादिति ।

अत्रान्तरश्लोकाः—

येषामैकान्तिको भेदः सम्मतो देहदेहिनोः ।
तेषां देहविनाशेऽपि न हिंसा देहिनो भवेत् ॥ १ ॥
अभेदैकान्तवादेऽपि स्वीकृते देहदेहिनोः ।
देहनाशे देहिनाशात्परलोको ऽस्तु कस्य वै ॥ २ ॥
भिन्नाभिन्नतया तस्माज्जीवे देहात्प्रतिश्रुते ।
देहनाशे भवेत्पीडा या तां हिंसां प्रचक्षते ॥ ३ ॥
दुःखोत्पत्तिर्मनःक्लेशस्तत्पर्यायस्य च क्षयः ।
यस्यां स्यात्सा प्रयत्नेन हिंसा हेया विपश्चिता ॥ ४ ॥

प्राणी प्रमादतः कुर्याद्यत्प्राणव्यपरोपणम् ।
सा हिंसा जगदे प्राज्ञैर्बीजं संसारभूरुहः ॥ ५ ॥
शरीरी म्रियतां मा वा ध्रुवं हिंसा प्रमादिनः ।
सा प्राणव्यपरोपेऽपि प्रमादरहितस्य न ॥ ६ ॥
जीवस्य हिंसा न भवेन्नित्यस्यापरिणामिनः ।
क्षणिकस्य स्वयं नाशात्कथं हिंसोपपद्यताम् ॥ ७ ॥
नित्यानित्ये ततो जीवे परिणामिनि युज्यते ।
हिंसा कायवियोगेन पीडातः पापकारणम् ॥ ८ ॥
केचिद्वदन्ति हन्तव्याः प्राणिनः प्राणिघातिनः ।
हिंस्रस्यैकस्य घाते स्याद्रक्षणं भूयसां किल ॥ ९ ॥
तदयुक्तमशेषाणां हिंस्रत्वात्प्राणिनामिह ।
हन्तव्यता स्यात्तल्लाभमिच्छोर्मूलक्षतिः [1]स्फुटा ॥ १० ॥
अहिंसासम्भवो धर्म्मः स हिंसातः कथं भवेत् ।
न तोयजानि पद्मानि जायन्ते जातवेदसः ॥ ११ ॥
पापहेतुर्वधः पापं कथं छेत्तुमलं भवेत् ।
मृत्युहेतुः कालकूटं जीविताय न जायते ॥ १२ ॥
संसारमोचकास्त्वाहुर्दुःखिनां वध इष्यताम् ।
विनाशे दुःखिनां दुःखविनाशो जायते किल ॥ १३ ॥
तदप्यसाम्प्रतं ते हि हता नरकगामिनः ।
अनन्तेषु नियोज्यन्ते दुःखेषु स्वल्पदुःखकाः ॥ १४ ॥

(१) घ ङ क स्फुटम् ।

किं च सौख्यवतां घाते धर्म्मः स्यात्पापवारणात् ।
इत्थं विचार्य हेयानि वचनानि कुतीर्थिनाम् ॥ १५ ॥
चार्वाकाः प्राहुरात्मैव तावन्नास्ति कथञ्चन ।
तं विना कस्य सा हिंसा कस्य हिंसाफलं भवेत् ॥ १६ ॥
भूतेभ्य एव चैतन्यं पिष्टादिभ्यो यथा मदः ।
भूतसंहतिनाशे च पञ्चत्वमिति कथ्यते ॥ १७ ॥
आत्माभावे च तन्मूलः परलोको न युज्यते ।
अभावे परलोकस्य पुण्यापुण्यकथा वृथा ॥ १८ ॥
तपांसि यातनाश्चित्राः संयमो भोगवञ्चना ।
इति विप्रतिपत्तिभ्यः परेभ्यः परिभाष्यते ॥ १९ ॥
स्वसंवेदनतः सिद्धः स्वदेहे जीव इष्यताम् ।
अहं दुःखी सुखी वाऽहमिति प्रत्यययोगतः ॥ २० ॥
घटं वेद्म्यहमित्यत्र त्रितयं प्रतिभासते ।
कर्म्म क्रिया च कर्त्ता च तत्कर्त्ता किं निषिध्यते ॥ २१ ॥
शरीरमेव चेत्कर्त्तृ न कर्त्तृ तदचेतनम् ।
भूतचैतन्ययोगाच्चेच्चेतनं तदसङ्गतम् ॥ २२ ॥
मया दृष्टं श्रुतं स्पृष्टं घ्रातमास्वादितं स्मृतम् ।
इत्येककर्त्तृकाभावात् भूतचिद्वादिनः कथम् ॥ २३ ॥
स्वसंवेदनतः सिद्धे स्वदेहे चेतनात्मनि ।
परदेहेऽपि तत्सिद्धिरनुमानेन साध्यते ॥ २४ ॥
बुद्धिपूर्वां क्रियां दृष्ट्वा स्वदेहेऽन्यत्र तद्गतिः ।
प्रमाणबलतः सिद्धा केन नाम निवार्यते ॥ २५ ॥

तत्परलोकिनः सिद्धौ परलोको न दुर्घटः ।
तथा च पुण्यपापादि [1]सर्वमेवोपपद्यते ॥ २६ ॥
तपांसि यातनाश्चित्रा इत्याद्युन्मत्तभाषितम् ।
सचेतनस्य तत्कस्य नोपहासाय जायते ॥ २७ ॥
निर्बाधोऽस्ति ततो जीवः स्थित्युत्पादव्ययात्मकः ।
ज्ञाता द्रष्टा गुणी भोक्ता कर्त्ता कायप्रमाणकः ॥ २८ ॥
तदेवमात्मनः सिद्धौ हिंसा किं नोपपद्यते ।
तदस्याः परिहारेणाहिंसाव्रतमुदीरितम् ॥ २९ ॥ १९ ॥

हिंसानियमे स्पष्टं दृष्टान्तमाह —

आत्मवत्सर्वभूतेषु सुखदुःखे प्रियाप्रिये ।
चिन्तयन्नात्मनोऽनिष्टां हिंसामन्यस्य नाचरेत् ॥२०॥

सुखशब्देन सुखसाधनमन्नपानस्रक्चन्दनादि गृह्यते । दुःखशब्देन दुःखसाधनं वधबन्धमारणादि । ततो यथात्मनि दुःखसाधनमप्रियं तथा सर्वभूतेष्वपि । एवं चिन्तयन् दुःखसाधनत्वादप्रियां परस्य हिंसां न कुर्वीत । सुखग्रहणं दृष्टान्तार्थम् । यथा सुखसाधनं प्रियमेवं दुःखसाधनमप्रियम् । तथा सर्वभूतेष्वपि दुःखसाधनमप्रियमित्यर्थः ।

यदाहुर्लौकिका अपि—

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥१॥ इति ॥२०॥

---

(1) क च स्वयमे ।

ननु प्रतिषिद्धाचरणे दोषः प्रतिषिद्धा च त्रसजीवविषया हिंसा स्थावरेषु त्वप्रतिषिद्धहिंसेषु यथेष्टं चेष्टन्तां गृहस्था इत्याह—

निरर्थिकां न कुर्वीत जीवेषु स्थावरेष्वपि ।
हिंसामहिंसाधर्मज्ञः काङ्क्षन्मोक्षमुपासकः ॥ २१ ॥

स्थावराः [1]पृथिव्यम्बुतेजोवायुवनस्पतयस्तेष्वपि जीवेषु हिंसां न कुर्वीत । किं विशिष्टां निरर्थिकां प्रयोजनरहितां शरीरकुटुम्ब-निर्वाहनिमित्तं हि स्थावरेषु हिंसा न प्रतिषिद्धा या त्वनर्थिका शरीरकुटुम्बादिप्रयोजनरहिता तादृशीं हिंसां न कुर्वीत । उपासकः श्रावकः किं विशिष्टः अहिंसाधर्मज्ञः अहिंसालक्षणं धर्मं जानातीति अहिंसाधर्मज्ञः । न हि प्रतिषिद्धवस्तुविषयैवाहिंसा-धर्मः । किन्त्वप्रतिषिद्धेष्वपि सा यतनारूपा । ततश्च तथाविधं धर्मं जानन् स्थावरेष्वपि निरर्थिकां हिंसां न विदधीत । ननु प्रतिषिद्धविषयैवाहिंसास्तु किमनया सूक्ष्मेक्षिकया इत्याह । काङ्क्षन्मोक्षं स हि मोक्षाकाङ्क्षी यतिवत् कथं निरर्थिकां हिंसामाचरेत् ॥ २१ ॥

ननु निरन्तरहिंसापरोऽपि सर्वस्वं दक्षिणां दत्त्वा पापविशुद्धिं विदध्यात् किमनेन हिंसापरिहारक्लेशेन इत्याह—

प्राणी प्राणितलोभेन यो राज्यमपि मुञ्चति ।
तद्वधोत्थमघं सर्वोर्वीदानेऽपि न शाम्यति ॥ २२ ॥

(१) ग घ ज पृथिव्यप्तेजो- ।

प्राणी जन्तुः प्राणितं जीवितव्यं तस्य लोभेन राज्यमपि तत्कालोप-
स्थितं परिहरति ।

यदाह—

मार्यमाणस्य हेमाद्रिं राज्यं वाथ प्रयच्छतु ।
तदनिष्टं परित्यज्य जीवो जीवितुमिच्छति ॥ १ ॥

तत्तथाविधप्राणितप्रियप्राणिवधसम्भवं पापं सकलपृथ्वीदाने-
नापि न शाम्यति । भूदानं हि सकलदानेभ्योऽभ्यधिकमिति
श्रुतिः ॥ २२ ॥

अथ श्लोकचतुष्टयेन हिंसाकर्त्तुर्निन्दामाह—

वने निरपराधानां वायुतोयतृणाशिनाम् ।
निघ्नन् मृगाणां मांसार्थी विशिष्येत कथं शुनः ॥२३॥

मृगाणामिति "निप्रेभ्यो घ्नः" ॥ २ । २ । १५ ॥ इति कर्मत्वप्रति-
षेधाच्छेषे षष्ठी । वने वनवासिनां नतु परस्वीकृतभूमिवासिनां
तथाविधा अपि सापराधाः स्युरित्याह । निरपराधानां परधनहर-
णपरस्त्रीभङ्गपरमारणाद्यपराधरहितानां निरपराधत्वे हेतुमाह ।
वायुतोयतृणाशिनाम् । न हि वायुतोयतृणानि परधनानि येन
तद्भक्षणात्सापराधत्वं स्यात् । मांसार्थीति अत्रापि मृगाणामिति
सम्बध्यते । मृगाणां यन्मांसं तदर्थयते मृगयुर्व्याधःआटविकाः प्राणिनो
दृश्यन्ते । एवंविधमृगमांसार्थी मृगवधपरायणो निरपराधमानुष-
पिचण्डिका मांसलुब्धाच्छुनः कथं विशिष्येत श्रेष्ठोऽयं ॥ २३ ॥

दीर्यमाणः कुशेनापि यः स्वाङ्गे हन्त दूयते ।
निर्मन्तून् स कथं जन्तूनन्तयेन्निशितायुधैः ॥ २४ ॥

दीर्यमाणो विदार्यमाणः कुशेन दर्भेण अपि शब्दादास्तां शस्त्रेण यः स्वाङ्गे शरीरे हन्तेति प्रतिबोध्यामन्त्रणे दूयते उपतप्यते । निर्मन्तून्निरपराधान् जन्तून् स कथं अन्तयेदन्तं प्रापयेत् । निशितायुधैः कुन्तादिभिः आत्मानुसारेणापि परपीडामजानन्नेवं निष्प्रते ।

तथाच मृगया व्यापृतान् क्षत्रियान् प्रति केनचिदुक्तम्—

रसातलं यातु यदत्र पौरुषं
[1]क्व नीतिरेषाऽशरणो ह्यदोषवान् ।
निहन्यते [2]यद्बलिनातिदुर्बलो
हहा महाकष्टमराजकं जगत् ॥ १ ॥ २४ ॥

निर्मातुं क्रूरकर्माणः क्षणिकामात्मनो धृतिम् ।
समापयन्ति सकलं जन्मान्यस्य शरीरिणः ॥ २५ ॥

क्रूरं रौद्रं कर्म हिंसादि येषां ते क्रूरकर्माणो लुब्धकादयः । आत्मनः स्वस्य धृतिं स्वास्थ्यलक्षणं निर्मातुमिति सम्बन्धः । धृतेर्विशेषणं क्षणिकामिति आत्मशाश्वतिकधृतिनिमित्तं कदाचित्किञ्चि-

---

(१) च कुनीति-। (२) न च बलिनापि दुर्बलो ।

च्छिन्नमपि क्रियेत। क्षणिकतृप्तिनिर्माणार्थं तु समापयन्ति समाप्तिं नयन्ति जन्म अन्यस्य वध्यस्य शरीरिणः। अयमर्थः परप्राणिमांस-भक्षणक्षणिकतृप्तिहेतोराकालिकं परस्यायुः समाप्यत इति महदिदं वैशसम्।

यदाह—

> योऽश्नाति यस्य तन्मांसमुभयोः पश्यतान्तरम्।
> एकस्य क्षणिका तृप्तिः प्राणैरन्यो वियुज्यते ॥ १ ॥ २५ ॥

> म्रियस्वेत्युच्यमानोऽपि देही भवति दुःखितः।
> मार्यमाणः प्रहरणैर्दारुणैः स कथं भवेत् ॥ २६ ॥

म्रियस्व त्वमित्युच्यमानोऽपि न तु मार्यमाणो देही जन्तुर्जाय-मानमृत्युरिव दुःखितो भवतीति सर्वप्राणिप्रतीतम्। प्रहरणैः कुन्ततोमरादिभिर्मार्यमाणो विनाश्यमानः स वराको देही कथं भवेत्। परमदुःखित एव भवेदित्यर्थः। मरणवचनेनाऽपि दूयमानस्य निश्चितेः शस्त्रैर्मारणमिति मृतमारणं तत्कथं सकर्णः कुर्यादिति निन्दा ॥ २६ ॥

हिंसाफलं दृष्टान्तद्वारेणाह—

> श्रूयते प्राणिघातेन रौद्रध्यानपरायणौ।
> सुभूमो ब्रह्मदत्तश्च सप्तमं नरकं गतौ ॥ २७ ॥

श्रूयते आकर्ण्यते एतदागमे। यदुत प्राणिघातेन हेतुना सुभूम-

ब्रह्मदत्तौ चक्रवर्त्तिनौ सप्तमं नरकं गतौ । हिंसाया नरकगमन-हेतुत्वं न रौद्रध्यानमन्तरेण भवति । अन्यथा सिंहवधकृतपक्षिणो-ऽपि नरकः स्यादित्युक्तं रौद्रध्यानपरायणौ हिंसानुबन्धिध्यानयुक्ता-वित्यर्थः । यथा तौ नरकं गतौ तथा कथानकद्वारेण दर्श्यते ।

तथाहि—

वसन्तपुरनामायां पुर्यामुच्छन्नवंशकः ।
आसीच्चुत इवाकाशादग्निको नाम दारकः ॥ १ ॥
सोऽन्यदा चलितस्तस्मात् स्थानाद्देशान्तरं प्रति ।
सार्थाद्धीनः परिभ्राम्यन्नगमत्तापसाश्रमम् ॥ २ ॥
तमग्निं तनयत्वेनाग्रहीत्कुलपतिर्यमः ।
जमदग्निरिति ख्यातिं स लोकेषु ततोऽगमत् ॥ ३ ॥
तप्यमानस्तपस्तीव्रं प्रत्यक्ष इव पावकः ।
तेजसा दुःसहेनासौ पप्रथे पृथिवीतले ॥ ४ ॥
अत्रान्तरे महाश्राद्धो नाम्ना वैश्वानरः सुरः ।
धन्वन्तरिश्च तापसभक्तो व्यवदतामिति ॥ ५ ॥
एक आहार्हतां धर्मः प्रमाणमितरः पुनः ।
तापसानां विवादेऽस्मिन् व्यधातामिति निर्णयम् ॥ ६ ॥
आर्हतेषु अधन्यो यः प्रकृष्टस्तापसेषु यः ।
परीक्षणीयावावाभ्यां को गुणैरतिरिच्यते ॥ ७ ॥
तदानीं मिथिलापुर्यां नवधर्मपरिष्कृतः ।
श्रीमान् पद्मरथो नाम प्रथितः पृथिवीपतिः ॥ ८ ॥

दीक्षां श्रीवासुपूज्यान्ते ग्रहीतुं भावतो यतिः ।
गच्छंश्चम्पापुरीं ताभ्यां देवाभ्यां ददृशे पथि ॥ ९ ॥
परीक्षाकाङ्क्षया ताभ्यां पानान्ने ढौकिते नृपः ।
तृषितः क्षुधितोऽप्यैच्छद्धीराः सत्त्वाच्चलन्ति न ॥ १० ॥
क्रकचैरिव चक्राते क्रूरैः कर्करकण्टकैः ।
पीडां देवौ नृदेवस्य मृदुनोः पादपद्मयोः ॥ ११ ॥
पादाभ्यां प्रसरद्रक्तधाराभ्यां तादृशेऽध्वनि ।
तूलिकातल्पसञ्चारं संचेरे च तथापि सः ॥ १२ ॥
निर्ममे गीतनृत्यादि ताभ्यां क्षोभाय भूपतेः ।
तन्मोघमभवत्तत्र दिव्यास्त्रमिव गोत्रजे ॥ १३ ॥
तौ सिद्धपुत्ररूपेण पुरोभूयेदमूचतुः ।
तवाद्यापि महाभाग महदायुर्युवासि च ॥ १४ ॥
स्वच्छन्दं भुंक्ष्व तद्भोगान् का धीर्यौवने तपः ।
निशीथकृत्यं कः प्रातः कुर्यादुद्योगवानपि ॥ १५ ॥
यौवने तदतिक्रान्ते देहदौर्बल्यकारणम् ।
गृह्णीयास्त्वं तपस्तात द्वितीयमिव वार्धकम् ॥ १६ ॥
राजोचे यदि बह्वायुर्बहुपुण्यं भविष्यति ।
जलमानेन नलिनीनालं हि परिवर्धते ॥ १७ ॥
लोलेन्द्रिये यौवने हि यत्तपस्तत्तपो ननु ।
दारुणाले रणे यो हि शूरः शूरः स उच्यते ॥ १८ ॥
तस्मिन्नचलिते सत्त्वात्साधु साध्विति वादिनौ ।
तौ गतौ तापसोत्कृष्टं जमदग्निं परीक्षितुम् ॥ १९ ॥

न्यग्रोधमिव विस्तारिजटासंस्पृष्टभूतलम् ।
वल्मीकाकीर्णपादान्तं दान्तं तौ तमपश्यताम् ॥ २० ॥
तस्य श्मश्रुलताजाले नीडं निर्माय मायया ।
तदैव देवौ चटकमिथुनीभूय तस्थतुः ॥ २१ ॥
चटकश्चटकामूचे यास्यामि हिमवद्गिरौ ।
अन्यासक्तो नैष्यसि त्वमिति तं नान्वमंस्त सा ॥ २२ ॥
गोघातपातकेनाहं स्पृश्ये नायामि चेत्प्रिये ।
इत्युक्तशपथं भूयश्चटकं चटकाऽब्रवीत् ॥ २३ ॥
ऋषेरस्यैनसा स्पृश्यो शपेथा इति चेत्प्रिय ।
विसृजामि तदैव त्वां पन्थानः सन्तु ते शिवाः ॥ २४ ॥
इत्याकर्ण्य वचः क्रुद्धो जमदग्निमुनिस्ततः ।
उभाभ्यामपि हस्ताभ्यामुभौ जग्राह पक्षिणौ ॥ २५ ॥
आचचक्षे ततो हन्त कुर्वाणे दुष्करं तपः ।
उच्चारक्षाविव ध्वान्तमाः पापं मयि कीदृशम् ॥ २६ ॥
अथर्षिं चटकोवाच मा कुपस्त्वं मुधा तपः ।
अपुत्रस्य गतिर्नास्तीत्यश्रौषीस्त्वं न किं श्रुतिम् ॥ २७ ॥
तत्तथा मन्यमानोऽयं मुनिरेवमचिन्तयत् ।
ममाकलत्रपुत्रस्य प्रवाहे स्रावितं तपः ॥ २८ ॥
क्षुभितं तं परिज्ञाय धिग् भ्रान्तस्तापसेरिति ।
अर्हो धन्वन्तरिः श्राद्धः प्रत्येति प्रत्ययाच्च वः ॥ २९ ॥
बभूवतुरदृश्यौ च तावपि त्रिदशौ तदा ।
जमदग्निश्च सम्प्राप पुरं नैमिककोष्टकम् ॥ ३० ॥

जितशत्रुमहीपालं तत्र भूयिष्ठकन्यकम् ।
स प्रेप्सुः कन्यकामेकां दर्श इव स्वागमत् ॥ ३१ ॥
कृत्वाभ्युत्थानमुर्वीशः प्राञ्जलिस्तमभाषत ।
किमर्थमागता यूयं ब्रूत किं करवाण्यहम् ॥ ३२ ॥
कन्यार्थमागतोऽस्मीति मुनिनोक्ते नृपोऽब्रवीत् ।
मध्ये शतस्य कन्यानां त्वां येच्छति गृहाण ताम् ॥ ३३ ॥
स कन्यान्तःपुरं गत्वा जगाद नृपकन्यकाः ।
धर्मपत्नी मम काचिद्भवतीभ्यो भवत्विति ॥ ३४ ॥
जटिलः पलितः क्षामो भिक्षाजीवी वदन्निदम् ।
न लज्जसे त्वमिति ताः कृतथूत्काम्मूचिरे ॥ ३५ ॥
समीरण इव क्रुद्धो जमदग्निमुनिस्ततः ।
अधिज्येष्वामयष्ट्याभाः कन्याः कुब्जीचकार ताः ॥ ३६ ॥
अथाङ्गणे रेणुपुञ्जे रममाणां नृपात्मजाम् ।
एकामालोकयामास रेणुकेत्यब्रवीच्च ताम् ॥ ३७ ॥
स तस्या इच्छसीत्युक्त्वा मातुलिङ्गमदर्शयत् ।
तया प्रसारितः पाणिः पाणिग्रहणसूचकः ॥ ३८ ॥
तां मुनिः परिजग्राह गेहे धनमिवोरसा ।
सार्द्धं गवादिभिस्तस्मै ददौ च विधिवन्नृपः ॥ ३९ ॥
स श्यालीस्नेहसम्बन्धादेकोनं कन्यकाशतम् ।
सज्जीचक्रे तपःशक्त्या धिग्मूढानां तपोव्ययः ॥ ४० ॥
नीत्वाश्रमपदं तां च स मुग्धमधुराकृतिम् ।
हरिणीमिव लोलाक्षीं प्रेम्णा मुनिरवर्द्धयत् ॥ ४१ ॥

अङ्गुलीभिर्गणयतो दिनान्यस्य तपस्विनः ।
यौवनं चारुकन्दर्पलीलावनमवाप सा ॥ ४२ ॥
साक्षीकृतज्वलदग्निर्जमदग्निमुनिस्ततः ।
यथावदुपयेमे तां भूतेश इव पार्वतीम् ॥ ४३ ॥
ऋतुकाले स जगे तां चरुं ते साधयाम्यहम् ।
यथा ब्राह्मणमूर्धन्यो धन्य उत्पद्यते सुतः ॥ ४४ ॥
सोवाच हस्तिनपुरेऽनन्तवीर्यस्य भूपतेः ।
पत्न्यस्ति मत्स्वसा तस्यै चरुः क्षात्रोऽपि साध्यताम् ॥ ४५ ॥
ब्राह्मं सधर्मचारिण्यै क्षात्रं तज्जामयेऽपरम् ।
स चरुं साधयामास पुत्रीयमुपजीवितुम् ॥ ४६ ॥
साचिन्तयदहं तावदभूवमटवीमृगी ।
माभून्मादृक् सुतोऽपीति क्षात्रं चरुमभक्षयत् ॥ ४७ ॥
मादाद्ब्राह्मं चरुं स्वस्रे जातौ च तनयौ तयोः ।
तत्र रामो रेणुकायाः कृतवीर्यश्च तत्स्वसुः ॥ ४८ ॥
क्रमेण ववृधे राम ऋषित्वे पैतृकेऽपि सः ।
क्षात्रं प्रदर्शयंस्तेजो हुताशनमिवाश्मसि ॥ ४९ ॥
विद्याधरोऽन्यदा तत्र कोऽप्यागादतिसारकी ।
विद्या तस्यातिसारार्त्ता विस्मृताकाशगामिनी ॥ ५० ॥
रामेण प्रतिचरितो भेषजाद्यैः स बन्धुवत् ।
रामाय सेवमानाय विद्यां पारशवीं ददौ ॥ ५१ ॥
मध्येशरवणं गत्वा तां च विद्यामसाधयत् ।
रामः परशुरामोऽभूत्ततः प्रभृति विश्रुतः ॥ ५२ ॥

अन्येद्युः पतिमापृच्छ्य रेणुकोत्कण्ठिता स्वसुः ।
जगाम हस्तिनपुरे प्रेम्णो दूरे न किञ्चन ॥ ५३ ॥
श्यालीति लालयन् लोललोचनां तत्र रेणुकाम् ।
अनन्तवीर्योऽरमयत्कामः कामं निरङ्कुशः ॥ ५४ ॥
ऋषिपत्न्या तया राजा शच्येव पुरन्दरः ।
अन्वभूच्च यथाकामं सम्भोगसुखसम्पदम् ॥ ५५ ॥
अनन्तवीर्यात्तनयो रेणुकायामजायत ।
ममतायामिवोतथ्यः सधर्मिण्यां बृहस्पतेः ॥ ५६ ॥
तेनापि सह पुत्रेण रेणुकामानयन्मुनिः ।
स्त्रीणां लुब्धो जनः प्रायो दोषं न खलु वीक्षते ॥ ५७ ॥
तां पुत्रसहितां वल्लीमकालफलितामिव ।
सञ्जातकोपः परशुरामः परशुनाऽच्छिनत् ॥ ५८ ॥
तद्भगिन्या स वृत्तान्तोऽनन्तवीर्यस्य शंसितः ।
कोपमुद्दीपयामास कृशानुमिव मारुतः ॥ ५९ ॥
ततश्चावार्यदोर्वीर्योऽनन्तवीर्यो महीपतिः ।
जमदग्न्याश्रमं गत्वाभाङ्क्षीन्मत्त इव द्विपः ॥ ६० ॥
तापसानां कृतत्रासः समादाय गवादि सः ।
मन्दं मन्दं परिक्रामन् केसरीव न्यवर्तत ॥ ६१ ॥
तत्तपस्वितुमुलं श्रुत्वा ज्ञात्वा च तां कथाम् ।
क्रुद्धः परशुरामोऽथाधावत्साक्षादिवान्तकः ॥ ६२ ॥
सुभटग्रामसंग्रामकौतुकी जमदग्निजः ।
परशुना खण्डशश्चक्रे दारुवद्दारुणेन तम् ॥ ६३ ॥

राज्ये निवेशयाञ्चक्रे तस्य प्रकृतिपूरुषैः ।
कृतवीर्यो महावीर्यः स एव तु वयोलघुः ॥ ६४ ॥
स तु मातृमुखाच्छ्रुत्वा मृत्युव्यतिकरं पितुः ।
आदिष्टाद्विरिवागत्य जमदग्निममारयत् ॥ ६५ ॥
रामः पितृवधक्रुद्धो द्रागत्वा हस्तिनापुरे ।
अमारयत्कृतवीर्यं किं यमस्य दवीयसि ॥ ६६ ॥
जामदग्न्यस्ततस्तस्य राज्ये न्यविशत स्वयम् ।
राज्यं हि विक्रमाधीनं न प्रमाणं क्रमाक्रमौ ॥ ६७ ॥
रामाक्रान्तपुराद्राज्ञी कृतवीर्यस्य गुर्विणी ।
व्याघ्राघ्रातवनादेणीवागमत्तापसाश्रमम् ॥ ६८ ॥
कृपाधनैर्भूगृहान्तः सा निधाय निधानवत् ।
तपस्विभिर्गोप्यत स्म क्रूरात्परशुरामतः ॥ ६९ ॥
चतुर्दशमहास्वप्नसूचितोऽस्याः सुतोऽजनि ।
गृह्णन् भूमिं सुखेनाभूत्सुभूमो नामतस्ततः ॥ ७० ॥
क्षत्रियो यत्र यत्रासीत्तत्र तत्राप्यदीप्यत ।
परशुः परशुरामस्य कोपाग्निरिव मूर्त्तिमान् ॥ ७१ ॥
रामोऽगादन्यदा तत्राश्रमे परशुश्च सोऽज्वलत् ।
क्षत्रं चासूचयद्धूम इव धूमध्वजं तदा ॥ ७२ ॥
किमत्र क्षत्रियोऽस्तीति पृष्टास्तेन तपस्विनः ।
इत्यूचुस्तापसीभूताः क्षत्रिया वयमास्महे ॥ ७३ ॥
रामोऽप्यमर्षाग्निःक्षत्रां सप्तकृत्वो वसुन्धराम् ।
निर्ममे निस्तृणां शैलतटीमिव दवानलः ॥ ७४ ॥

सुक्षत्रियदंष्ट्राभी रामः स्थालमपूरयत् ।
यमस्य पूर्णकामस्य पूर्णपात्रश्रियं दधत् ॥ ७५ ॥
रामः पप्रच्छ [1]नैमित्तानन्येद्युर्मे कुतो वधः ।
[2]सदा वैरायमाणा हि शङ्कन्ते परतो मृतिम् ॥ ७६ ॥
यो दंष्ट्राः पायसीभूताः सिंहासन इह स्थितः ।
भोक्ष्यतेऽमूस्ततस्त्वस्ते वधो भावीति तेऽब्रुवन् ॥ ७७ ॥
रामोऽथ कारयामास सत्रागारमवारितम् ।
धुरि सिंहासनं तत्रास्थापयत्स्थालमग्रतः ॥ ७८ ॥
अथाश्रमे प्रतिदिनं लाल्यमानस्तपस्विभिः ।
निर्व्यङ्गकल्पद्रुम इव सुभूमो वृद्धिमद्भुताम् ॥ ७९ ॥
विद्याधरो मेघनादोऽन्येद्युर्नैमित्तिकानिति ।
परिपप्रच्छ पद्मश्रीः कन्या मे कस्य दीयताम् ॥ ८० ॥
तस्या वरं वरीयांसं सुभूमं तेऽप्युपादिशन् ।
दत्वा कन्यां ततस्तस्मै तस्यैवाभूत्स सेवकः ॥ ८१ ॥
कूपभेक इवानन्यगोऽथ पप्रच्छ मातरम् ।
सुभूमः किमियानेव लोकोऽयमधिकोऽपि किम् ॥ ८२ ॥
माताप्यचीकथदथो लोकोऽनन्तो हि वत्सक ।
मक्षिकापदमात्रं हि लोकमध्येऽयमाश्रमः ॥ ८३ ॥
अस्मिन् लोकेऽस्ति विख्यातं नगरं हस्तिनापुरम् ।
पिता ते कृतवीर्योऽभूत्तत्र राजा महाभुजः ॥ ८४ ॥

---

(१) ख ङ नैमित्तानथान्येद्युः कुतो मम । (२) ख ङ वधो ।

हत्वा ते पितरं रामो राज्यं स्वयमशिश्रियत् ।
क्षितिं निःक्षत्रियां चक्रे तिष्ठामस्तद्भयादिह ॥ ८५ ॥
तत्कालं हास्तिनपुरे सुभूमो भौमवज्ज्वलन् ।
जगाम वैरिणे क्रुद्धः क्षात्रं तेजो हि दुर्द्धरम् ॥ ८६ ॥
तत्र सत्रे ययौ सिंह इव सिंहासनेऽविशत् ।
दंष्ट्रास्ताः पायसीभूताः सुभुजो बुभुजे च सः ॥ ८७ ॥
उत्तिष्ठमाना युद्धाय ब्राह्मणास्तत्र रक्षकाः ।
जघ्निरे मेघनादेन व्याघ्रेण हरिणा इव ॥ ८८ ॥
प्रस्फुरद्दंष्ट्रिकाकेशो दशनैरधरं दशन् ।
ततो रामः क्रुधा कालपाशाकृष्ट इवाययौ ॥ ८९ ॥
रामेण मुमुचे रोषात्सुभूमाय परश्वधः ।
विध्यातस्तत्क्षणं तस्मिन् स्फुलिङ्ग इव वारिणि ॥ ९० ॥
अस्त्राभावात्सुभूमोऽपि दंष्ट्रास्थालमुदक्षिपत् ।
चक्रीबभूव तत्सद्यः किं न स्यात्पुण्यसम्पदा ॥ ९१ ॥
चक्रवर्त्त्यष्टमः सोऽथ तेन चक्रेण भास्वता ।
शिरः परशुरामस्य पङ्कजच्छेदमच्छिदत् ॥ ९२ ॥
क्ष्मां निःक्षत्रियां रामः सप्तकृत्वो यथा व्यधात् ।
एकविंशतिकृत्वस्तां तथा निर्ब्राह्मणामसौ ॥ ९३ ॥
सुक्षितिपहस्त्यश्वपदातिव्यूहलांछितैः ।
वाहयन् वाहिनीर्नव्याः स प्राक् प्राचीमसाधयत् ॥ ९४ ॥
स च्छिन्नानेकसुभटमुण्डमण्डितभूतलः ।
दक्षिणाशां दक्षिणाशापतिरन्य इवाजयत् ॥ ९५ ॥

भटास्थिभिर्दन्तुरयन् शुक्तिशङ्खैरिवाभितः ।
रोधो नीरनिधेः सोऽथ प्रतीचीमजयद्दिशम् ॥ ९६ ॥
ईलोद्घाटितवैताढ्यकन्दरः स्थाममन्दरः ।
म्लेच्छाभ्विर्जितं भरतोत्तरखण्डं विवेश सः ॥ ९७ ॥
उच्छलच्छोणितरसच्छटाच्छुरितभूतलः ।
म्लेच्छांस्तत्राथ सोऽभाङ्क्षीद्दिग्नूनिव महाकरी ॥ ९८ ॥
एवं चतुर्दिशं भ्राम्यन् घरट्टघणकानिव ।
दलयन् सुभटानुर्वी स षट्खण्डामसाधयत् ॥ ९९ ॥

उल्लासयन्नसुमतामिति नित्यरौद्र-
ध्यानानलेन सततं ज्वलदन्तरात्मा ।
आसाद्य कालपरिणामवशेन मृत्युं
तां सप्तमीं नरकभूमिमगात्सुभूमः ॥ १०० ॥

इति सुभूमचक्रवर्तिकथानकम् ॥

अथ ब्रह्मदत्तकथा —

साकेतनगरे चन्द्रावतंसस्य सुतः पुरा ।
नामतो मुनिचन्द्रोऽभूच्चन्द्रवन्मधुराकृतिः ॥ १ ॥
निर्विण्णः कामभोगेभ्यो भारेभ्य इव भारिकः ।
मुनेः सागरचन्द्रस्य पार्श्वे जग्राह स व्रतम् ॥ २ ॥
प्रव्रज्यां जगतः पूज्यां पालयन्नयमन्यदा ।
देशान्तरे विहाराय चचाल गुरुणा सह ॥ ३ ॥
स तु भिक्षानिमित्तेन पथि ग्रामं प्रविष्टवान् ।
सार्थाद्भ्रष्टोऽटवीमाट यथच्युत इवैणकः ॥ ४ ॥

स तत्र क्षुत्पिपासाभ्यामाक्रान्तो ग्लानिमागतः ।
चतुर्भिः प्रतिचरितो वत्सैर्बान्धवैरिव ॥ ५ ॥
स तेषामुपकाराय निर्ममे धर्मदेशनाम् ।
अपकारिष्वपि कृपा सतां किं नोपकारिषु ॥ ६ ॥
प्रवव्रजुस्ते तत्पार्श्वे चत्वारः शमशालिनः ।
चतुर्विधस्य धर्मस्य चतस्र इव मूर्त्तयः ॥ ७ ॥
व्रतं तेऽपालयन् सम्यक् किन्तु द्वौ तत्र चक्रतुः ।
धर्मे जुगुप्सां चित्रा हि चित्तवृत्तिः शरीरिणाम् ॥ ८ ॥
जग्मतुस्तपसा तौ द्यां जुगुप्साकारिणावपि ।
स्वर्गाय जायतेऽवश्यमप्येकाहःकृतं तपः ॥ ९ ॥
च्युत्वा ततो दशपुरे शाण्डिल्यब्राह्मणादुभौ ।
युग्मरूपौ सुतौ दास्यां जयवत्यां बभूवतुः ॥ १० ॥
तौ क्रमाद्यौवनं प्राप्तौ पित्रादिष्टौ च जग्मतुः ।
रक्षितुं क्षेत्रमीदृग् हि दासेराणां नियोजनम् ॥ ११ ॥
तयोः शयितयोर्नक्तं निःसृत्य वटकोटरात् ।
एकः कृष्णाहिना दष्टः कृतान्तस्येव बन्धुना ॥ १२ ॥
ततः सर्पोपलम्भाय द्वितीयोऽपि परिभ्रमन् ।
वैरादिवाशु तेनैव दष्टो दुष्टेन भोगिना ॥ १३ ॥
तावनासप्रतीकारौ वराकौ मृत्युमापतुः ।
यथाऽऽयातौ तथा यातौ निष्फलं जन्म धिक्तयोः ॥ १४ ॥
कालिञ्जरगिरिप्रस्थे मृग्या यमलरूपिणौ ।
मृगावजनिषातां तौ वृद्धिमाप्तौ सहैव च ॥ १५ ॥

प्रीत्या सह चरन्तौ तौ मृगौ मृगयुणा हतौ ।
ग्राभिनैकेनैककालं कालधर्ममुपेयतुः ॥ १६ ॥
ततोऽपि मृतगङ्गायां राजहंस्या उभावपि ।
अजायेतां सुतौ युग्मरूपिणौ पूर्वजन्मवत् ॥ १७ ॥
क्रीडन्तावेकदेशस्थौ धृत्वा जालेन जालिकः ।
ग्रीवां भंक्त्वा ऽवधीत्कर्महीनानां कीदृशी गतिः ॥ १८ ॥
वाराणस्यां ततोऽभूतां भूतदत्ताभिधस्य तौ ।
महाधनसमृद्धस्य मातङ्गाधिपतेः सुतौ ॥ १९ ॥
चित्रसम्भूतनामानौ तौ मिथः स्नेहशालिनौ ।
न कदापि व्ययुज्येतां सम्बद्धौ नखमांसवत् ॥ २० ॥
वाराणस्यां तदा चाभूच्छङ्खः शत्रुवनापतिः ।
आसीच्च सचिवस्तस्य नमुचिर्नाम विश्रुतः ॥ २१ ॥
अपराद्धः सोऽपराधे महीयसि महीभुजा ।
अर्पितो भूतदत्तस्य प्रच्छन्नवधहेतवे ॥ २२ ॥
तेनोचे नमुचिश्छन्नं त्वां रक्षामि निजात्मवत् ।
पाठयस्यात्मजौ मे त्वं यदि भूमिगृहस्थितः ॥ २३ ॥
प्रतिपन्नं नमुचिना तन्मातङ्गपतेर्वचः ।
जनो हि जीवितव्यार्थी तन्नास्ति न करोति यत् ॥ २४ ॥
विचित्राश्चित्रसम्भूतौ स तयाऽध्यापयत् कलाः ।
रेमेऽनुरक्तया सार्धं मातङ्गपतिभार्यया ॥ २५ ॥
ज्ञात्वा तद्भूतदत्तेनारेभे मारयितुं स तु ।
सहते कः स्वदारेषु पारदारिकविप्लवम् ॥ २६ ॥

ज्ञात्वा मातङ्गपुत्राभ्यां स दूरेणापसारितः ।
सैवास्मै दक्षिणा दत्ता प्राणरक्षणलक्षणा ॥ २७ ॥
ततो निःसृत्य नमुचिर्गतवान् हस्तिनापुरे ।
चक्रे सनत्कुमारेण सचिवश्चक्रिणा निजः ॥ २८ ॥
इतश्च चित्रसम्भूतौ बभतुर्नवयौवनौ ।
कुतोऽपि हेतोरायातौ पृथिव्यामाश्विनाविव ॥ २९ ॥
तौ स्वादु जगतुर्गीतं हाहाहूहूपराभिनौ ।
वादयामासतुर्वीणामतितुम्बुरुनारदौ ॥ ३० ॥
गीतप्रबन्धानुगतैः सुव्यक्तैः सप्तभिः स्वरैः ।
तयोर्वादयतोर्वेणुं किं कारन्ति स्म किन्नराः ॥ ३१ ॥
मुरजं धीरघोषं तौ वादयन्तौ च चक्रतुः ।
गृहीतमुरजं कालातोद्यकर्णाविडम्बनाम् ॥ ३२ ॥
शिवः शिवोर्वशीरम्भासुन्दर्यंशोतिलोत्तमाः ।
यथाग्रं न विदाञ्चक्रुस्तौ तदप्यभिनिन्यतुः ॥ ३३ ॥
सर्वगान्धर्वसर्वस्वमपूर्वं विश्वकार्म्मणम् ।
प्रकाशयद्भ्यामेताभ्यां न जह्रे कस्य मानसम् ॥ ३४ ॥
तस्यां पुरि प्रवहृत्ते कदाचिन्मदनोत्सवः ।
निरीयुः पौरचर्चर्यस्तत्र संगीतपेशलाः ॥ ३५ ॥
चर्चरी निर्ययौ तत्र चित्रसम्भूतयोरपि ।
अन्वगुस्तत्रैव तद्गीताकृष्टाः पौरा मृगा इव ॥ ३६ ॥
राज्ञो व्यज्ञपि केनापि मातङ्गाभ्यां पुरीजनः ।
गीतेनाकृष्य सर्वोऽयमात्मवच्चान्त्यजः कृतः ॥ ३७ ॥

ख्यापिनापि पुराध्यक्षः साक्षेपमिदमाशपि ।
न प्रवेशः प्रदातव्यो नगर्यामनयोः क्वचित् ॥ ३८ ॥
ततःप्रभृति तौ वाराणस्या दूरेण तस्थतुः ।
प्रवृत्तश्चैकदा तत्र कौमुदीपरमोत्सवः ॥ ३९ ॥
राजशासनमुल्लङ्घ्य लोलेन्द्रियतया च तौ ।
प्रविष्टौ नगरीं भृङ्गौ गजगण्डतटीमिव ॥ ४० ॥
उत्सवं प्रेक्षमाणौ तौ सर्वाङ्गीणावगुण्ठनौ ।
दस्युवन्नगरीमध्ये क्रमं क्रमं विचेरतुः ॥ ४१ ॥
क्रोष्टुवत्क्रोष्टुशब्देन पौरगीतेन तौ ततः ।
अगायतां तारतारमलक्ष्या भवितव्यता ॥ ४२ ॥
आकर्ण्य कर्णमधुरं तद्गीतं युवनागरैः ।
मधुवन्मक्षिकाभिस्तौ मातङ्गौ परिवारितौ ॥ ४३ ॥
कावेतावित्ति विज्ञातुं लोकैः कृष्टावगुण्ठनौ ।
अरे तावेव मातङ्गावित्याक्षेपेण भाषितौ ॥ ४४ ॥
नागरैः कुट्यमानौ तौ यष्टिभिर्लोष्टुभिस्ततः ।
श्वानाविव रटत्पुर्यां नतग्रीवौ निरीयतुः ॥ ४५ ॥
तौ सैन्यशशवल्लोकैर्हन्यमानौ पदे पदे ।
स्खलत्पादौ कथमपि गम्भीरोद्यानमीयतुः ॥ ४६ ॥
तावचिन्तयतामेवं धिग् नौ [1]दुर्ज्ञातिदूषितम् ।
कलाकौशलरूपादि पयोघ्रातमिवाश्विना ॥ ४७ ॥

(१) ख ग घ ङ दुर्जाति- ।

उपकारो गुणैरासामपकारोऽयमावयोः ।
तदिदं क्रियमाणायाः शान्तेर्वैताल उत्थितः ॥ ४८ ॥
कलालावण्यरूपाणि स्यूतानि वपुषा सह ।
तदेवानर्थसदनं त्यक्तव्यन्यतां क्षणात् ॥ ४९ ॥
इति निश्चित्य तौ प्राणपरिहारपरायणौ ।
सत्त्वं साक्षादिव द्रष्टुं चेलतुर्दक्षिणामभि ॥ ५० ॥
ततो दूरं प्रयातौ तौ गिरिमेकमपश्यताम् ।
यत्रारूढैर्भृगौ भ्रश्यन्ते करिणः किरिपोतवत् ॥ ५१ ॥
भृगुपातेच्छया ताभ्यामारोहद्भ्यां महामुनिः ।
ददृशे पर्वते तस्मिन् जङ्गमो गुणपर्वतः ॥ ५२ ॥
प्रावृषेण्यामिवाम्भोदं मुनिं गिरिशिरःस्थितम् ।
दृष्ट्वा प्रनष्टसन्तापप्रसरौ तौ बभूवतुः ॥ ५३ ॥
तौ प्रारदुःखमिवांऽभस्तावानन्दाम्बुजलच्छलात् ।
तत्पादपद्मयोर्भृङ्गाविव सद्यो निपेततुः ॥ ५४ ॥
समाप्य मुनिना ध्यानं कौ युवां किमिहागतौ ।
इति पृष्टौ स्ववृत्तान्तं तावशेषमशंसताम् ॥ ५५ ॥
स ऊचे भृगुपातेन वपुरेव हि शीर्यते ।
शीर्यते नाशुभं कर्म जन्मान्तरशतार्जितम् ॥ ५६ ॥
त्याज्यं वपुरिदं वाञ्छेद् गृह्णीतं वपुषः फलम् ।
तच्चापवर्गस्वर्गादिकारणं परमं तपः ॥ ५७ ॥
इत्यादि देशनावाक्यसुधानिर्धौतमानसौ ।
तस्य पार्श्वे जगृहतुर्यतिधर्मसुभावपि ॥ ५८ ॥

अधीयानौ क्रमेणाथ तौ गीतार्थौ बभूवतुः ।
आदरेण गृहीतं हि किंवा न स्यान्मनस्विनाम् ॥ ५९ ॥
षष्ठाष्टमप्रभृतिभिस्तौ तपोभिः सुदुस्तपैः ।
क्षपयामासतुर्दीर्घं प्राक्तनैः कर्मभिः सह ॥ ६० ॥
ततो विहरमाणौ तौ ग्रामाद्ग्रामं पुरात्पुरम् ।
कदाचित्प्रतिपेदाते नगरं हस्तिनापुरम् ॥ ६१ ॥
तौ तत्र रुचिरोद्याने चेरतुर्दुश्चरं तपः ।
सम्भोगभूमयोऽपि स्युस्तपसे शान्तचेतसाम् ॥ ६२ ॥
सम्भूतमुनिरन्येद्युर्मासक्षपणपारणे ।
पुरे प्रविष्टो भिक्षार्थं यतिधर्मोऽङ्गवानिव ॥ ६३ ॥
गेहाद्गेहं परिभ्राम्यन्नीर्यासमितिपूर्वकम् ।
स राजमार्गपतितो दृष्टो नमुचिमन्त्रिणा ॥ ६४ ॥
मातङ्गदारकः सोऽयं मद्वृत्तं ख्यापयिष्यति ।
मन्त्रीति चिन्तयामास पापाः सर्वत्र शङ्किताः ॥ ६५ ॥
यावन्मर्म कस्यापि प्रकाशयति न ह्यसौ ।
तावन्निर्वासयाम्येनमिति पत्तीन्नयुङ्क्त सः ॥ ६६ ॥
स ताडयितुमारेभे तैन पूर्वोपकार्यपि ।
क्षीरपानमिवाहीनामुपकारोऽसतां यतः ॥ ६७ ॥
लकुटैः कुट्यमानोऽसौ सस्यबीजमिवोत्कटैः ।
स्थानात्ततोऽपचक्राम त्वरितं त्वरितं मुनिः ॥ ६८ ॥
अमुच्यमानः कुट्टाकैर्वियन्नपि मुनिस्तदा ।
शान्तोऽप्यकुप्यदापोऽपि तप्यन्ते वह्नितापतः ॥ ६९ ॥

निर्जगाम मुखात्तस्य बाष्पो नीलः समन्ततः ।
घनालीपल्लिताम्भोदविभ्रमं बिभ्रदम्बरे ॥ ७० ॥
तेजोलेश्योल्ललासाथ ज्वालापटलमालिनी ।
तडिद्वलयसङ्कीर्णामिव द्यामभितन्वती ॥ ७१ ॥
यतिविष्णुकुमारं तं तेजोलेश्याधरं ततः ।
प्रसादयितुमाजग्मुः पौराः सभयकौतुकाः ॥ ७२ ॥
राजा सनत्कुमारोऽपि ज्ञात्वा तत्र समाययौ ।
उत्तिष्ठति यतो वह्निस्तद्धि विध्यापयेत्सुधीः ॥ ७३ ॥
तत्रोचे तं नृपः किं वा युज्यते भगवन्निदम् ।
चन्द्राश्मार्कांशुतप्तोऽपि नार्चिर्मुञ्चति जातुचित् ॥ ७४ ॥
एभिरत्यपराद्धं यत्कोपोऽयं भवतामतः ।
क्षीराब्धिर्मथ्यमानस्य कालकूटमभून्न किम् ॥ ७५ ॥
न स्यात्स्याच्चेच्चिरं न स्याच्चिरं चेत्तत्फलेऽन्यथा ।
खलस्नेह इव क्रोधः सतां तद्भूमकेऽत्र किम् ॥ ७६ ॥
तथापि नाथ नाथामि कोपं मुञ्चेतरोचितम् ।
भवादृशाः समदृशो ह्यपकार्य्युपकारिषु ॥ ७७ ॥
चित्रोऽप्यत्रान्तरे ज्ञात्वा सम्भूतमुनिमभ्यगात् ।
सान्त्वयितुं भद्रमिव द्विपं मधुरभाषितैः ॥ ७८ ॥
तस्य कोप उपाशाम्यच्चित्रवाक्यैः श्रुतानुगैः ।
पयोवाहपयःपूरैर्गिरेरिव दवानलः ॥ ७९ ॥
[1]महाकोपतमोमुक्तः शशाङ्क इव पार्वणः ।

---

(१) ज च छ तीव्रकोप- ।

क्षणादामादयामास प्रसादं स महामुनिः ॥ ८० ॥
वन्दित्वा क्षमयित्वा च लोकस्तस्मान्न्यवर्त्तत ।
सम्भूतचित्रमुनिना तदुद्यानमनीयत ॥ ८१ ॥
पश्चात्तापं चक्रतुस्तौ पर्यटद्भिर्गृहे गृहे ।
आहारमात्रकक्षते प्राप्यते व्यसनं महत् ॥ ८२ ॥
शरीरं गत्वरमिदं ह्याहारेणापि पोषितम् ।
किमनेन शरीरेण किंवाहारेण योगिनाम् ॥ ८३ ॥
चेतसीति विनिश्चित्य कृतसंलेखनौ पुरा ।
उभौ चतुर्विधाहारप्रत्याख्यानं प्रचक्रतुः ॥ ८४ ॥
कः पराभूतवान्साधुं वसुधाम्याति मय्यपि ।
इति जिज्ञासतो राज्ञो मन्त्री व्यज्ञपि केनचित् ॥ ८५ ॥
अर्थाज्ञार्षति यः सोऽपि पापः किमुत हन्ति यः ।
इत्यानाययदुर्वीशो दस्युवत्संयमय्य तम् ॥ ८६ ॥
अन्योऽपि साधुविध्वंसं माविधादिति शुद्धधीः ।
तं बद्धं पुरमध्येन सोऽनैषीत्साधुसन्निधौ ॥ ८७ ॥
नमन्नृपशिरोरत्नभाभिरभ्रोमयीमिव ।
कुर्व्वन्नुर्वीं स उर्व्वीशपुङ्गवस्ताववन्दत ॥ ८८ ॥
सव्यपाणिगृहीतास्यवस्त्रिकापिहिताननौ ।
उद्दक्षिणकरौ तौ तमाशशंसतुराशिषा ॥ ८९ ॥
यो वोपराधवान् सोऽस्तु [1]स्वकर्मफलभाजनम् ।
राज्ञा सनत्कुमारेणेत्युदग्रे नमुचिस्तयोः ॥ ९० ॥

(१) क ख स्वकर्मफलभागसौ ।

अमोचि नमुचिः प्राप्तः पञ्चत्वोचितभूमिकाम् ।
सनत्कुमारतस्ताभ्यामुरगो गरुडादिव ॥ ८१ ॥

निर्वास्य कर्मचण्डालश्चण्डाल इव पत्तनात् ।
वध्योऽप्यमोच्यसौ राज्ञा मान्यं हि गुरुशासनम् ॥ ८२ ॥

सपत्नीभिश्चतुःषष्टिसहस्रैः परिवारिता ।
वन्दितुं तौ सुनन्दागात् स्त्रीरत्नमथ चक्रिणः ॥ ८३ ॥

सा सम्भूतमुनेः पादपद्मयोर्लुलितालका ।
पपाताश्येन कुर्वाणा भुवमिन्दुमतीमिव ॥ ८४ ॥

तस्यास्तालकसंस्पर्शं सम्भूतमुनिरन्वभूत् ।
रोमाञ्चितश्च सद्योऽभूच्छन्नान्वेषी हि मन्मथः ॥ ८५ ॥

अथ सान्तःपुरे राज्ञि तावनुज्ञाप्य जग्मुषि ।
रागाभिभूतः सम्भूतो निदानमिति निर्ममे ॥ ८६ ॥

दुष्करस्य मदीयस्य यद्यस्ति तपसःफलम् ।
तत्स्त्रीरत्नपतिरहं भूयासं भाविजन्मनि ॥ ८७ ॥

चित्रोऽप्यूचे काङ्क्षसीदं मोक्षदात्तपसः फलम् ।
मौलियोग्येन रत्नेन पादपीठं करोषि किम् ॥ ८८ ॥

मोहात्कृतं तन्निदानमिदानीमपि मुच्यताम् ।
मिथ्यादुष्कृतमस्यास्तु मुह्यन्ति न भवादृशाः ॥ ८९ ॥

एवं निवार्यमाणोऽपि सम्भूतश्चित्रसाधुना ।
निदानं नामुचद्धा विषयेच्छा बलीयसी ॥ १०० ॥

निर्व्यूढानशनौ तौ तु प्राप्तायुःकर्मसंक्षयौ ।
सौधर्मे समजायेतां विमाने सुन्दरे सुरौ ॥ १ ॥

च्युत्वा जीवोऽथ चित्रस्य प्रथमस्वर्गलोकतः ।
पुरे पुरिमतालाख्ये महेभ्यतनयोऽभवत् ॥ २ ॥
च्युत्वा सम्भूतजीवोऽपि काम्पिल्ये ब्रह्मभूपतेः ।
भार्यायाश्चुलनीदेव्याः कुक्षौ समवतीर्णवान् ॥ ३ ॥
चतुर्दशमहास्वप्नसूचितागामिवैभवः ।
अथ जज्ञे सुतस्तस्याः प्राच्या इव दिवाकरः ॥ ४ ॥
ब्रह्ममग्न इवानन्दाद् ब्रह्मभूपतिरस्य च ।
ब्रह्माण्डविश्रुतां ब्रह्मदत्त इत्यभिधां व्यधात् ॥ ५ ॥
ववृधे स जगन्नेत्रकुमुदानां मुदं दिशन् ।
पुष्यन् कलाकलापेन कलानिधिरिवामलः ॥ ६ ॥
वक्त्राणि ब्रह्मण इव चत्वारि ब्रह्मणोऽभवन् ।
प्रियमित्राणि तत्रैकः कटकः काशिभूपतिः ॥ ७ ॥
कणेरदत्तसंज्ञोऽन्यो हस्तिनापुरनायकः ।
दीर्घश्च कोशलाधीशश्चम्पेशः पुष्पचूलकः ॥ ८ ॥
ते स्नेहाद्वर्षमेकैकमेकैकस्य पुरं सुताः ।
पश्चाप्यधिवसन्ति स्म स्वर्द्रुमा इव नन्दनम् ॥ ९ ॥
ब्रह्मणो नगरेऽन्येद्युस्ते यथायोगमाययुः ।
तत्र च क्रीडतां तेषां ययौ कालः कियानपि ॥ १० ॥
ब्रह्मदत्तस्य पूर्णेषु वर्षेषु द्वादशेष्वथ ।
परलोकगतिं भेजे ब्रह्मराजः शिरोरुजा ॥ ११ ॥
कृत्वौर्ध्वदेहिकं ब्रह्मभूपतेः कटकादयः ।
उपाया इव मूर्त्तास्ते चत्वारोऽमन्त्रयन्निति ॥ १२ ॥

अशस्तः शिशुर्यावदेकैकस्तावदेष नः।
तस्य प्राहरिका एव वर्षे वर्षेऽस्तु रक्षकः॥ १३॥
दीर्घस्तातं सुहृद्राज्यं तैः संयुज्य व्ययुज्यत।
ततः स्थानास्थयास्थानमथ जग्मुस्त्रयोऽपि ते॥ १४॥
अदीर्घबुद्धिदीर्घोऽपि ब्रह्मणो राज्यसम्पदम्।
उत्तेवारक्षकं क्षेत्रं स्वच्छन्दं बुभुजे ततः॥ १५॥
निरङ्कुशतया कोशं चिरगूढं स मूढधीः।
सर्वमन्वेषयामास परमर्मेव दुर्जनः॥ १६॥
स प्राक् परिचयादन्तरन्तःपुरमनर्गलः।
सञ्चाराधिपत्यं हि प्रायोऽनर्थं कारणं नृणाम्॥ १७॥
एकान्ते चुलनीदेव्या सोऽतिमात्रममन्त्रयत्।
वचोभिर्नर्मनिपुणैर्नुदन् स्मरशरैरिव॥ १८॥
आचारं ब्रह्मसुहृतं लोकं चावगणय्य सः।
संप्रसक्तश्चुलन्याभूद्दुर्वाराणीन्द्रियाणि हि॥ १९॥
ब्रह्मराजे पतिप्रेमसित्रस्नेहं च तावुभौ।
अहतुश्चुलनीदीर्घावग्नो सर्वङ्कषः स्मरः॥ २०॥
सुखं विलसतोरेवं यथाकाममनयोस्तयोः।
बहवो व्यतियान्ति स्म मुहूर्त्तमिव वासराः॥ २१॥
ब्रह्मराजस्य हृदयं द्वैतीयकमिव स्थितम्।
मन्त्रयामासोऽनुविदं स्पष्टं दुश्चेष्टितं तयोः॥ २२॥
मतिमोऽचिन्तयच्चेदं चुलनी स्त्रीस्वभावतः।
अकार्यमाचरत्येषा सत्यो हि विरलाः स्त्रियः॥ २३॥

सकोशान्तःपुरं राज्यं न्यासे विश्वासतोऽर्पितम् ।
यद्विद्रवति दीर्घस्तदकार्यं नास्य किञ्चन ॥ २४ ॥

तदसावाचरेत्किञ्चित्कुमारस्यापि विप्रियम् ।
पोषकस्यापि नात्मीयो मार्जार इव दुर्जनः ॥ २५ ॥

विमृश्येति वरधनुसंज्ञं स्वसुतमादिशत् ।
तत्तत् ज्ञापयितुं नित्यं ब्रह्मदत्तं च सेवितुम् ॥ २६ ॥

विश्रम्भे मन्त्रिपुत्रेण वृत्तान्ते ब्रह्मनन्दनः ।
शनैः प्राकाशयत्कोपं नवोद्भिन्न इव द्विपः ॥ २७ ॥

ब्रह्मदत्तोऽसहिष्णुस्तन्मातुर्दुश्चरितं ततः ।
मध्ये शुद्धान्तमगमद्गृहीत्वा काककोकिलौ ॥ २८ ॥

वर्णसङ्करतो वध्यावेतावन्यमपीदृशम् ।
निश्चितं निग्रहीष्यामि तत्रेत्युच्चैरुवाच सः ॥ २९ ॥

काकोऽहं त्वं पिकीत्यावां निजिघांसत्यसाविति ।
दीर्घेणोक्ताऽवदद्देवी माभैषीर्बालभाषितात् ॥ ३० ॥

एकदा भद्रवशया सह नीत्वा मृगद्विपम् ।
साक्षेपं तद्देव्योचे कुमारो मारसूचकम् ॥ ३१ ॥

इति श्रुत्वाऽवदद्दीर्घः साकूतं बालभाषितम् ।
ततश्चुलन्युवाचेति यद्यस्त्येवं ततोऽपि किम् ॥ ३२ ॥

हंस्याऽन्येद्युर्बकं बद्धाभ्यधत्त ब्रह्मसूरिति ।
अनया रमते ह्येष सहे कस्यापि नेदृशम् ॥ ३३ ॥

दीर्घोऽवादीदिदं देवी स्वपुत्रस्य शिशोः शृणु ।
अन्तर्ज्वलद्रोषाग्निधूमोद्गारोपमा गिरः ॥ ३४ ॥

वर्द्धमानः कुमारोऽयं तदवश्यं भविष्यति ।
भावयोरतिविघ्नाय करेण्वोरिव केसरी ॥ ३५ ॥

न यावत्कवचहरः कुमारो हन्त जायते ।
तावद्विषद्रुम इव बालोऽप्युन्मूल्यतामसौ ॥ ३६ ॥

चूलन्यूचे कथं राज्यधरः पुत्रो विहन्यते ।
तिरश्चोऽपि हि रक्षन्ति पुत्रान् प्राणानिवात्मनः ॥ ३७ ॥

दीर्घोऽब्रवीत्पुत्रमूर्त्या तव कालोऽयमागतः ।
मा मुहस्त्वं मयि सति सुतास्तव न दुर्लभाः ॥ ३८ ॥

विमुच्यापत्यवात्सल्यं शाकिनीव चुलन्यथ ।
रतस्नेहपरवशा प्रतिशुश्राव तत्तथा ॥ ३९ ॥

सामन्तयद्विनाशोऽयं रक्ष्या च वचनीयता ।
यद्वदाश्रवणं सेव्य कार्यं च पितृतर्पणम् ॥ ४० ॥

क उपायोऽथवास्त्वेष विवाह्यो ब्रह्मसूरसौ ।
वासागारमिषादस्य कार्यं जतुगृहं ततः ॥ ४१ ॥

गूढप्रवेशनिःसारं तत्रोद्वाहादनन्तरम् ।
सुषुप्ते सस्नुषेऽप्यस्मिन् ज्वाल्यो निशि हुताशनः ॥ ४२ ॥

उभाभ्यां मन्त्रयित्वैवं पुष्पचूलस्य कन्यका ।
वृता वैवाहिकीसर्वसामग्री चोपचक्रमे ॥ ४३ ॥

तयोश्च क्रूरमाकूतं विज्ञाय सचिवो धनुः ।
इति विज्ञपयामास दीर्घराजं कृताञ्जलिः ॥ ४४ ॥

कलाविद्योतिकुशलः सूनुर्वरधनुर्मम ।
वर्त्तिष्यते युवैवास्तु त्वदाज्ञाधरधूर्वहः ॥ ४५ ॥

अरण्य इवाहं तु यातायातेषु निःसङ्गः ।
गत्वा क्वचिदनुष्ठानं करोमि त्वदनुज्ञया ॥ ४६ ॥
कमप्यनर्थं कुर्वीत मायाव्येष गतोऽन्यतः ।
ध्यायन्निति तं दीर्घो धीमद्भिः को न शङ्क्यते ॥ ४७ ॥
मायाकृतावहित्थोऽथ दीर्घः सचिवमूचिवान् ।
राज्येन त्वां विना नः किं यामिन्येव विना विधुम् ॥ ४८ ॥
धर्मं सत्रादिनाऽत्रैव कुरु मागास्त्वमन्यतः ।
राज्यं भवादृशैर्भाति मद्भृतैरिव काननम् ॥ ४९ ॥
ततो भार्गोवर्धीतीरे महद्भिर्विदर्भ धनुः ।
धर्मस्येव महाच्छत्रं पवित्रं सत्रमण्डपम् ॥ ५० ॥
सत्रं च पान्थसार्थानामन्नपानादिना ततः ।
प्रवाहमिव गाङ्गं सोऽनवच्छिन्नमवाहयत् ॥ ५१ ॥
दानमानोपकारास्तः स प्रत्ययितपूरुषैः ।
चक्रे सुरङ्गां हिरण्याश्यां ततो जतुगृहावधि ॥ ५२ ॥
इतः प्रच्छन्नलेखेन सौहार्दद्रुमवारिणा ।
¹इमं व्यतिकरं पुष्पचूलमज्ञापयन्मनः ॥ ५३ ॥
ज्ञात्वा तत्पुष्पचूलोऽपि सुधीः स्वदुहितुः पदे ।
प्रेषयामास दासेरीं हंसीस्थाने बकामिव ॥ ५४ ॥
पित्तले च स्वर्णमिति पौष्पचूलीति सा जनैः ।
लक्षिता भूषणमणिद्योतिताशाविशत्पुरीम् ॥ ५५ ॥

---

(१) च छ इति ।

मूर्च्छद्गीतिध्वनितूर्यैः पूर्यमाणे नभस्तले।
मुदा तां चुलनी ब्रह्मसूनुना पर्यणाययत् ॥ ५६ ॥
चुलन्यप्यखिलं लोकं विसृज्य रजनीमुखे।
कुमारं सस्नुषं प्रैषीज्जातुषे वासवेश्मनि ॥ ५७ ॥
सवधूकः कुमारोऽपि विसृष्टान्यपरिच्छदः।
तत्रागाद्वरधनुना छाययेव स्वया सह ॥ ५८ ॥
वार्त्ताभिर्मन्त्रिपुत्रेण ब्रह्मदत्तस्य जाग्रतः।
निशार्धं व्यतिचक्राम क्रुतो निद्रा महात्मनाम् ॥ ५९ ॥
चुलन्यादिष्टपुरुषैः फूत्कर्तुं नमितानमैः।
ज्वलेति प्रेरित इव वासगेहेऽज्वलच्छिखी ॥ ६० ॥
धूमस्तोमस्ततो विष्वक् पूरयामास रोदसीम्।
चुलनीदोषदुष्कृत्यदुष्कीर्तिप्रसरोपमः ॥ ६१ ॥
सप्तजिह्वोऽप्यभूत्कोटिजिह्वो ज्वालाकदम्बकैः।
तत्सर्वं कवलीकर्तुं बुभुक्षित इवानलः ॥ ६२ ॥
किमेतदिति संपृष्टो ब्रह्मदत्तेन मन्त्रिसूः।
संक्षेपादाचचक्षेऽदश्चुलनीदुष्टचेष्टितम् ॥ ६३ ॥
आकृष्टुं त्वामितः स्थानाद्रूपं करिकरादिव।
अस्ति तातेन दत्तेह सुरङ्गा सत्रगामिनी ॥ ६४ ॥
अत्र पार्ष्णिप्रहारेण प्रकाशीकृत्य तत्क्षणात्।
योगीव विवरद्वारं तद्वारं प्रविशाधुना ॥ ६५ ॥
आतोद्यपुटवत्सोऽथ पार्ष्णिनाऽऽस्फोट्य भूपटम्।
सुरङ्गया सभिक्षोऽगाद्गन्तरन्त्रेण सूत्रवत् ॥ ६६ ॥

सुरङ्गान्ते धनुर्धृतौ तुरङ्गावध्यरोहताम् ।
राजमन्त्रिकुमारौ तौ रेवन्तश्रीविडम्बकौ ॥ ६७ ॥

पञ्चाशद्योजनीं क्रोशमिव पञ्चमधारया ।
अश्वौ जग्मतुरश्वासौ ततः पञ्चत्वमापतुः ॥ ६८ ॥

ततस्तौ पादचारेण प्राणत्राणपरायणौ ।
अग्मतुर्निकषा ग्रामं कच्छात्कोष्टकनामकम् ॥ ६९ ॥

प्रोवाच ब्रह्मदत्तोऽथ सखे वरधनोऽधुना ।
स्पर्धमाने इवान्योऽन्यं बाधेते क्षुत्तृषा च माम् ॥ ७० ॥

क्षणमत्र प्रतीक्षस्वेत्युक्त्वा तं मन्त्रिनन्दनः ।
ग्रामादाकारयामास नापितं वपनेच्छया ॥ ७१ ॥

मन्त्रिपुत्रस्य मन्त्रेण तत्रत ब्रह्मनन्दनः ।
वपनं कारयामास चूलामात्रमधारयत् ॥ ७२ ॥

तथा कषायवस्त्राणि पवित्राणि स धारयन् ।
सन्ध्याभ्रच्छन्नबालांशुमालिलीलामधारयत् ॥ ७३ ॥

कण्ठे वरधनुस्तस्य ब्रह्मसूत्रमधत्त च ।
ब्रह्मपुत्रो ब्रह्मपुत्रमाहात्म्यमुदुवाह च ॥ ७४ ॥

मन्त्रिसूर्ब्रह्मदत्तस्य वक्षःश्रीवत्सलाञ्छितम् ।
पट्टेन पिदधे प्रावृट् पयोदेनेव भास्करम् ॥ ७५ ॥

एवं वेषपरावर्तं ब्रह्मसूः स्वत्रधारवत् ।
पारिपार्श्विकवन्मन्त्रिपुत्रोऽपि विदधे तथा ॥ ७६ ॥

ततः प्रविष्टौ ग्रामे तौ पार्वणाविन्दुभास्करौ ।
केनापि द्विजवर्येण भोजनाय निमन्त्रितौ ॥ ७७ ॥

सोऽथ तौ भोजयामास भक्त्या राजानुरूपया ।
प्रायस्तेजोऽनुमानेन जायन्ते प्रतिपत्तयः ॥ ७८ ॥
कुमारस्याक्षतान्मूर्ध्नि क्षिपन्ती विप्रगेहिनी ।
श्वेतवस्त्रयुगं कन्यां चोपनिन्येऽप्सरःसमाम् ॥ ७९ ॥
ऊचे ततो वरधनुर्बटोरस्याकलापटोः ।
कण्ठे बध्नासि किमिमां मूढे मण्डस्य गामिव ॥ ८० ॥
ततो द्विजवरेणोचे ममेयं गुणबन्धुरा ।
कन्या बन्धुमती नास्या विनामुमपरो वरः ॥ ८१ ॥
षट्खण्डपृथिवीपाता पतिरस्या भविष्यति ।
इत्याख्यायि निमित्तज्ञैर्निश्चितं चायमेव सः ॥ ८२ ॥
तैरेवाख्यायि मे पट्टच्छन्नश्रीवत्सलाञ्छनः ।
भोक्ष्यते यस्तवगृहे तस्मै देया स्वकन्यका ॥ ८३ ॥
जज्ञे च ब्रह्मदत्तस्योद्वाहः सह तया तदा ।
भोगिनामुपतिष्ठन्ते भोगाः काममचिन्तिताः ॥ ८४ ॥
तामुषित्वा निशां बन्धुमतीमाश्वास्य चान्यतः ।
ययौ कुमार एकत्रावस्थानं महिषां कुतः ॥ ८५ ॥
प्रातर्ग्रामं प्रापतुस्तौ तत्र चाश्रृणुतामिदम् ।
पन्थानोऽधिब्रह्मदत्तं सर्वे दीर्घेण रोधिताः ॥ ८६ ॥
प्रस्थितावुत्पथेनाथ पेततुस्तौ महाटवीम् ।
निरुद्धां श्वापदैर्दीर्घपुरुषैरिव दारुणैः ॥ ८७ ॥
ततः कुमारं तृषितं मुक्त्वा वटतरोरधः ।
वारिणेऽगाद्वरधनुर्मनस्त्विन रंहसा ॥ ८८ ॥

ततो वरधनुः सोऽयमुपलक्ष्य न्यरुध्यत ।
कवचितैर्दीर्घपुरुषैः पोत्रिपोत इव श्वभिः ॥ ८९ ॥
गृह्यतां गृह्यतामेष वध्यतां वध्यतामिति ।
भीषणं भाषमाणैस्तैर्जगृहे ववधे च सः ॥ ९० ॥
सञ्ज्ञामधिब्रह्मदत्तं पलायस्वेति सोऽकृत ।
पलायिष्ट कुमारोऽपि समये खलु पौरुषम् ॥ ९१ ॥
ततस्तस्या महाटव्या महाटव्यन्तरं जवात् ।
ब्रह्मसूराश्रमीवागादाश्रमादाश्रमान्तरम् ॥ ९२ ॥
स तु तत्र कृताहारो विरसैररसैः फलैः
तृतीये दिवसेऽपश्यदेकं तापसमग्रतः ॥ ९३ ॥
कुत्राश्रमो वो भगवन्निति पृष्टस्तपस्विना ।
स स्वाश्रमपदं निन्ये तापसा ह्यतिथिप्रियाः ॥ ९४ ॥
सोऽथापश्यत्कुलपतिं ववन्दे पितृवन् मुदा ।
प्रमाणमन्तःकरणमविज्ञातेऽपि वस्तुनि ॥ ९५ ॥
ऊचे कुलपतिर्वत्स तवातिमधुराकृतेः ।
को हेतुरत्रागमने मरौ सुरतरोरिव ॥ ९६ ॥
ततो महात्मनस्तस्य विश्वस्तो ब्रह्मसूर्निजम् ।
वृत्तान्तमाख्यत्प्रायेण गोप्यं न खलु तादृशम् ॥ ९७ ॥
हृष्टस्ततः कुलपतिर्व्याहरद्ब्रह्मदात्तरम् ।
द्विधास्थित इवात्मैको भ्राताहं त्वत्पितुर्लघुः ॥ ९८ ॥
ततो निजगृहं प्राप्तस्तिष्ठ वत्स यथासुखम् ।
अस्मत्तपोभिर्वर्द्धस्व सहैवास्मन्मनोरथैः ॥ ९९ ॥

कुर्वन् जनदृगानन्दममन्दं विश्ववल्लभः।
असौ तत्राश्रमे तस्थौ प्रावृट्कालोऽप्युपस्थितः॥ २०० ॥
तथाऽसौ निवसंस्तेन बलेनेव जनार्दनः।
शास्त्राणि शस्त्रशास्त्राणि सर्वाण्यध्याप्यत स्म च ॥ १ ॥
वर्षात्यये समायाते सारसालापबन्धुरे।
बन्धाविव फलाद्यर्थं प्रचेलुस्तापसा वनम् ॥ २ ॥
सादरं कुलपतिना वार्यमाणोऽप्यगाद्वनम्।
तैः सह ब्रह्मदत्तोऽपि कलभः कलभैरिव ॥ ३ ॥
भ्रमन्नितस्ततोऽपश्यद्दिशमूलं तत्र दन्तिनः।
प्रत्ययमिति सोऽमंस्त हस्ती कोऽप्यस्ति दूरतः॥ ४ ॥
तापसैर्वार्यमाणोऽपि ततः सोऽनुपदं व्रजन्।
योजनपञ्चकस्यान्ते नागं नगमिवैक्षत ॥ ५ ॥
निःशङ्कं वक्षपर्यङ्कः कुर्वन् गर्जितमूर्जितम्।
मल्लो मल्ल इवाह्वास्त नृहस्ती मत्तहस्तिनम् ॥ ६ ॥
क्रुद्धोदुञ्चितसर्वाङ्गो व्याकुञ्चितकरः करी।
निष्कम्पकर्णस्तब्धास्यः कुमारं प्रत्यधावत ॥ ७ ॥
इभोऽभ्यर्णेऽभ्यगाद्यावत् कुमारस्तावदन्तरे।
उत्तरीयं प्रचिक्षेप तं वञ्चयितुमर्भवत् ॥ ८ ॥
अभ्रखण्डमिव भ्रश्यदन्तरिक्षात्तदंशुकम्।
दशनाभ्यां प्रतीयेष क्षणादेषोऽत्यमर्षणः॥ ९ ॥
एवंविधाभिश्चेष्टाभिः कुमारस्तं मतङ्गजम्।
लीलया खेलयामासाहितुण्डिक इवोरगम् ॥ १० ॥

सद्येव ब्रह्मदत्तस्यावाम्बरे कृतडम्बरः ।
धाराधरोऽम्बुधाराभिरुपदुद्राव तं गजम् ॥ ११ ॥
ततो रसित्वा विरसं मृगनाशं ननाश सः ।
कुमारोऽपि भ्रमन्नद्रिदिङ्मूढः प्राप निम्नगाम् ॥ १२ ॥
उत्ततार कुमारस्तां नदीं मूर्त्तामिवापदम् ।
ददर्श च तटे तस्याः पुराणं पुरमुद्वसम् ॥ १३ ॥
कुमारः प्रविशंस्तस्मिन्नपश्यद्वंशजालिकाम् ।
तत्रासिवसुनन्दौ चात्यानर्कतुदिषु इव ॥ १४ ॥
तौ ग्रहीत्वा कृपाणेन कुमारः शस्त्रकौतुकी ।
चिच्छेद कदलीच्छेदं तां महावंशजालिकाम् ॥ १५ ॥
वंशजालान्तरे चासौ स्फुरदोष्ठदलं शिरः ।
ददर्श पतितं पृथ्व्यां स्थलपद्ममिवायतः ॥ १६ ॥
सम्यक् पश्यन्नपश्यच्च ब्रह्मसूत्रस्त्र कस्यचित् ।
वल्गुलीकरणस्यस्य कबन्धं धूमपायिनः ॥ १७ ॥
हा विद्यासाधनधनो निधनं प्रापितो मया ।
कोऽप्येषोऽनपराधो धिग् मामिति स्व निनिन्द सः ॥१८॥
अग्रतः स ययौ यावत्तावदुद्यानमैक्षत ।
सुरलोकादवतीर्णमवन्यामिव नन्दनम ॥ १९ ॥
स तत्र प्रविशन्नग्रे प्रासादं सप्तभूमिकम् ।
अदर्शन्मत्र्यलोकश्रीरहस्यमिव मूर्च्छितम् ॥ २० ॥
आरूढोऽभ्रंलिहं तस्मिन्निषण्णां खेचरीमिव ।
हस्तविन्यस्तवदना नारीमेकां स ऐक्षत ॥ २१ ॥

उपसृत्य कुमारस्तां पप्रच्छ स्वच्छया गिरा ।
का त्वमेकाकिनी किंवा किं वा शोकस्य कारणम् ॥ २२ ॥
अथ सा साध्वसाक्रान्ता जगादेति सगद्गदम् ।
महान् व्यतिकरो मेऽस्ति ब्रूहि कस्त्वं किमागतः ॥ २३ ॥
ब्रह्मदत्तोऽस्मि पञ्चालभूपतेर्ब्रह्मणः सुतः ।
इति सोऽचीकथद्यावन्मुदा सा तावदुत्थिता ॥ २४ ॥
आनन्दबाष्पसलिलैर्लोचनाञ्जलिनिश्च्युतैः ।
सा कुर्वती पाद्यमिव पपातामुष्य पादयोः ॥ २५ ॥
कुमाराशरणाया मे शरणं त्वमुपागतः ।
मज्जतो नीरिराशौधी वदन्तीति रुरोद सा ॥ २६ ॥
तेन पृष्टा च साप्यूचे त्वन्मातृभ्रातुरस्मारहम् ।
नाम्ना पुष्पवती पुष्पचूलस्याङ्गपतेः सुता ॥ २७ ॥
कन्यास्मि भवते दत्ता विवाहदिवसोन्मुखी ।
इर्माय रम्युमुद्याने दीर्घिकापुलिनेऽगमम् ॥ २८ ॥
दुष्टविद्याधरेणाहं नाथोन्मत्ताभिधेन नु ।
भवापहृत्यानीतास्मि रावणेनेव जानकी ॥ २९ ॥
दृष्टिं सोऽसहमाना मे विद्यासाधनहेतवे ।
सूर्पणखासूनुरिव प्राविशद्वंशजालिकाम् ॥ ३० ॥
धूमपस्योर्द्ध्वपादस्य तस्य विद्याद्य सेत्स्यति ।
शक्तिमान् सिद्धविद्यः स किल मां परिणेष्यति ॥ ३१ ॥
ततस्तद्वधवृत्तान्तं कुमारोऽस्यै न्यवेदयत् ।
हर्षस्योपरि हर्षोऽभूत्प्रियायास्तद्विप्रियच्छिदा ॥ ३२ ॥

तयोरथ विवाहोऽभूद्गान्धर्वोऽन्योऽन्यरक्तयोः ।
श्रेष्ठो हि क्षत्रियेष्वेव निर्मन्त्रोऽपि सकामयोः ॥ ३३ ॥
रममाणस्तया सार्द्धं विचित्रालापपेशलम् ।
स एकयाममिव तां त्रियामामत्यवाहयत् ॥ ३४ ॥
ततः प्रभातसमये ब्रह्मदत्तेन शुश्रुवे ।
आकाशे खेचरस्त्रीणां कुररीणामिव ध्वनिः ॥ ३५ ॥
अकस्माज्जायते कोऽयं खे शब्दो नष्टवृष्टिवत् ।
तेनेति पृष्टा संभ्रान्ता पुष्पवत्येवमब्रवीत् ॥ ३६ ॥
भगिन्यौ त्वद्द्विषो नाट्योन्मत्तस्यैते समागते ।
नाम्ना खण्डा विशाखा च विद्याधरकुमारिके ॥ ३७ ॥
तन्निमित्तं विवाहोपस्करपाणी इमे मुधा ।
अन्यथा चिन्तितं कार्यं दैवं घटयतेऽन्यथा ॥ ३८ ॥
अपसर्प क्षणं तावद्यावत्त्वद्गुणकीर्त्तनैः ।
लभेऽहमनयोर्भावं त्वयि रागविरागयोः ॥ ३९ ॥
रागे रक्तां प्रेरयिष्ये पताकां तत्क्षमापतेः ।
विरागे चलयिष्यामि श्वेतां गच्छेस्तदाऽन्यतः ॥ ४० ॥
ब्रह्मदत्तस्ततोऽवादीन्नाभैषीर्भीरु न त्वहम् ।
ब्रह्मसूनुः किमेते मे तुष्टे रुष्टे करिष्यतः ॥ ४१ ॥
उवाच पुष्पवत्येवं नैताभ्यां वच्मि ते भयम् ।
एतत्सम्बन्धिनः किन्तु मा विरौत्सुर्नभश्चराः ॥ ४२ ॥
तस्याश्चित्तानुवृत्त्या तु तत्रैवास्थात् स एकतः ।
अथ पुष्पवती श्वेतां पताकां पर्यचीचलत् ॥ ४३ ॥

ततः कुमारस्तां दृष्ट्वा तत्प्रदेशाच्छनैः शनैः।
प्रियानुरोधादगमबहि भौत्साहृयां दृणाम्॥ ४४॥
आकाशमिव दुर्वाहमरण्यमवगाह्य सः।
दिनान्तेऽर्क इवाम्भोधिं प्रापदेकं महासरः॥ ४५॥
ततः प्रविश्य तत्रासौ सुरेभ इव मानसे।
स्नात्वा स्वच्छन्दमत्यच्छाः सुधा इव पपावपः॥ ४६॥
निःसृत्य ब्रह्मसूनीरात्तीरमुत्तरपश्चिमम्।
लताकुञ्जदलिध्वानैः सौधातिकमिवाभ्यगात्॥ ४७॥
तत्र तेन द्रुमलताकुञ्जे पुष्पाणि चिन्वती।
वनाधिदेवता साक्षादिव काप्यैक्षि सुन्दरी॥ ४८॥
दध्याविति कुमारोऽपि जन्मप्रभृतिवेधसः।
रूपाण्यभ्यस्यतोऽमुष्यां सञ्जातं रूपकौशलम्॥ ४९॥
सा दास्या सह जल्पन्ती कटाक्षैः कुन्दसोदरैः।
कण्ठे मालामिवास्यन्ती तं पश्यन्त्यन्यतो ययौ॥ ५०॥
पश्यन् कुमारस्तामेव प्रस्थितो यावदन्यतः।
वस्त्रभूषणताम्बूलधृद्दासी तावदाययौ॥ ५१॥
सा वस्त्राद्यर्पयित्वोचे या त्वया ददृशेऽत्र सा।
सत्यङ्कारमिव स्वार्थसिद्धेः प्रैषीदिदं त्वयि॥ ५२॥
आदिष्टा चास्मि यदमुं मन्दिरे तातमन्त्रिणः।
नयातिथ्याय तथ्याय स हि वेत्ति यथोचितम्॥ ५३॥
सोऽगात् सह तया वेश्म नागदेवस्य मन्त्रिणः।
अमात्योऽप्यभ्युदस्थात्तमाकृष्ट इव तद्गुणैः॥ ५४॥

श्रीकान्तया राजपुत्र्या वासाय नव वेश्मनि ।
प्रेषितोऽसौ महाभागः मन्त्रिश्रेति जगाम सा ॥ ५५ ॥
उपास्यमानः स्वामीव विविधं तेन मन्त्रिणा ।
क्षणदां क्षपयामास क्षणमेकमिवैष ताम् ॥ ५६ ॥
मन्त्री राजकुलेऽनैषीत्कुमारं क्षणदात्यये ।
अर्घादिनोपतस्थेऽमुं बालार्कमिव भूपतिः ॥ ५७ ॥
वंशाद्यपृष्ट्वापि नृपः कुमाराय सुतां ददौ ।
आकृत्यैव हि तत्सर्वं विदन्ति ननु तद्विदः ॥ ५८ ॥
उपायंस्त कुमारस्तां हस्तं हस्तेन पीडयन् ।
अन्योऽन्यं संक्रमयितुमनुरागमिवाभितः ॥ ५९ ॥
ब्रह्मदत्तोऽन्यदा क्रीडन् रहः पप्रच्छ तामिति ।
एकस्माज्ज्ञातवंशाद्रेः पित्रा दत्तासि मे कथम ॥ ६० ॥
श्रीकान्ता कान्तदन्तांशुधौताधरदलाऽब्रवीत् ।
राजा शबरसेनोऽभूदमत्यपरपत्तनः ॥ ६१ ॥
तत्सूनुमं पिता राज्ये निरस्तः क्रूरगोत्रिभिः ।
पर्यस्तोऽश्रिश्रियदिमां पल्लीं सबलवाहनः ॥ ६२ ॥
भिल्लानुपनमय्यात्र वारणा इव वर्तमान् ।
ग्रामघातादिना तातः पुष्णाति स्वं परिग्रहम् ॥ ६३ ॥
जातास्मि चाहं तनया तातस्यात्यन्तवल्लभा ।
[1]स्वामिन् सम्पदिवोपायांश्चतुरस्तनयाननु ॥ ६४ ॥

(१) क ग घ उपायानां भोरितानु चतुर्णां तनुजन्मनाम् ।
च ड आवत्यशादुपायानां चतुर्णां तनुजन्मनाम ।

स मामुद्यौवनामूचे सर्वे मे द्विषिणो नृपाः ।
त्वयैव स्थितया वीक्ष्य शंस्यो यस्ते मतो वरः ॥ ६५ ॥
तस्थुषी चक्रवाकीव सरस्तीरे निरन्तरम् ।
ततःप्रभृति पश्यामि सर्वानेकैकशोऽध्वगान् ॥ ६६ ॥
मनोरथानामगतिः स्वप्नेऽप्यत्यन्तदुर्लभः ।
आर्यपुत्रागतोऽसि त्वं मद्भाग्योपचयादिह ॥ ६७ ॥
स पल्लीपतिरन्यद्युर्ग्रामघातकृते ययौ ।
कुमारोऽपि समं तेन क्षत्रियाणां क्रमो ह्यसौ ॥ ६८ ॥
लुण्ठ्यमाने ततो ग्रामे कुमारस्य सरस्तटे ।
पादाग्रयोर्वरधनुरेत्य हस इवापतत् ॥ ६९ ॥
कुमारकण्ठमालम्ब्य मुक्तकण्ठं रुरोद च¹ ।
नवीभवन्ति दुःखानि सञ्जाते ह्रीष्टदर्शने ॥ ७० ॥
ततः पौरुषगण्डपरिवालापैः सुपेशलैः ।
आश्वास्य पृष्टस्तेनोचे स्ववृत्तमिति मन्त्रिसूः ॥ ७१ ॥
वटेऽधस्त्वां तदा मुक्त्वा गतोऽहं नाथ पाथसे ।
सुधाकुण्डमिवापश्यं किञ्चिदग्रे महासरः ॥ ७२ ॥
तुभ्यमम्भोजिनीपत्रपुटेनादाय वार्यहम् ।
यमदूतैरिवागच्छन् रुद्धः संवर्मितैर्भटैः ॥ ७३ ॥
अरे वरधनो ब्रूहि ब्रह्मदत्तः क्व विद्यते ।
इति तैः पृच्छ्यमानः सखेदोऽत्यहमब्रुवम् ॥ ७४ ॥

---

(१) ग घ ड वः ।

तस्करैरिव निःशङ्कं ताड्यमानोऽथ तैरहम् ।
इत्यवोचं यथा ब्रह्मदत्तो व्याघ्रेण भक्षितः ॥ ७५ ॥
तं देशं दर्शयेत्युक्तो माययेतस्ततो भ्रमन् ।
त्वद्दर्शनपथेऽभ्येत्याकार्षं संज्ञां पलायने ॥ ७६ ॥
परिव्राड्दत्तगुटिकां मुखेऽहं क्षिप्तवांस्ततः ।
तत्प्रभावेन निःसंज्ञो मृत इत्युज्झितोऽस्मि तैः ॥ ७७ ॥
चिरं गतेषु तेष्वास्यादाकृष्य गुटिकामहम् ।
त्वां नष्टार्थमिवान्वेष्टुं भ्रमन् ग्रामं कमप्यगाम् ॥ ७८ ॥
तत्रैककोऽपि ददृशे परिव्राजकपुङ्गवः ।
साक्षादिव तपोराशिर्नमश्चक्रे मया ततः ॥ ७९ ॥
सोऽवदन् मां वरधनो मित्रमस्मि धनोरहम् ।
वसुभागो महाभागो ब्रह्मदत्तः क्व वर्त्तते ॥ ८० ॥
आचचक्षे मयाप्यस्य विश्वं विश्वस्य सूनृतम् ।
स च मे दुष्कथाधूमैर्म्लानास्यः पुनरभ्यधात् ॥ ८१ ॥
तदा जतुगृहे दग्धे दीर्घः प्रातरदैक्षत ।
करङ्कमेकं निर्दग्धं करङ्कत्रितयं न हि ॥ ८२ ॥
सुरङ्गां तत्र चापश्यत्तदन्तेऽश्वपदानि च ।
धनोर्बुद्ध्या प्रनष्टौ मां ज्ञात्वा तस्मै चुकोप सः ॥ ८३ ॥
बद्धा युवां समानेतुं प्रत्याशं साधनानि सः ।
अस्खलद्गमनान्यश्वमश्वांसीवादिदेश च ॥ ८४ ॥
पलायितो धनुर्मन्त्री जननी तु सा तव ।
दीर्घेण नरक इव क्षिप्ता मातङ्गपाटके ॥ ८५ ॥

गण्डोपरिष्टात्पिटकैमेवार्त्तो वार्त्तया तया ।
दुःखोपर्य्युपरिदुःखः काश्मीरं गतवानहम् ॥ ८६ ॥
छद्मकापालिकीभूय तत्र मातङ्गपाटके ।
वेश्म वेश्मानुप्रवेशमस्थां श्वश इवानिशम् ॥ ८७ ॥
पृच्छ्यमानश्च लोकेन तत्र भ्रमणकारणम् ।
अवोचमिति मातङ्ग्या विद्यायाः कल्प एष मे ॥ ८८ ॥
तत्रैवं भ्राम्यता मैत्री मया विश्वासभाजनम् ।
अजायतारक्षकस्य मायया किं न साध्यते ॥ ८९ ॥
अन्येद्युस्तन्मुखेनाश्वामवोचं यत्करोत्यसौ ।
त्वत्पुत्रमित्रकौण्डिन्यो महाव्रत्यभिवादनम् ॥ ९० ॥
द्वितीयेऽह्नि स्वयं गत्वा जनन्या बीजपूरकम् ।
अदां सगुटिकं जग्धेनासंज्ञा तेन साऽभवत् ॥ ९१ ॥
मृतेति तां पुराध्यक्षो गत्वा राज्ञे व्यजिज्ञपत् ।
राज्ञादिष्टाः स्वपुरुषास्तस्याः संस्कारहेतवे ॥ ९२ ॥
तत्रायाता मयोक्तास्ते संस्कारोऽस्याः क्षणोऽस्ति चेत् ।
महानर्थो वो राजेति जग्मुः स्वधाम ते ॥ ९३ ॥
आरक्षं चावदं त्वं चेत् सहायः साधयाम्यहम् ।
सर्वलक्षणभाजोऽस्या मन्त्रमेकं शवेन तत् ॥ ९४ ॥
आरक्षः प्रतिपेदे तत्तेनैव सहितस्ततः ।
सायमादाय जननीं श्मशानेऽगां दवीयसि ॥ ९५ ॥
स्थण्डिले मण्डलादीनि मया निर्माय मायया ।
पूर्वदेवीनां बलिं दातुमारक्षः प्रेषितस्ततः ॥ ९६ ॥

गर्त तस्मिन्नहं मातुरपरां गुटिकामदाम् ।
निद्राच्छेद इवोज्जृम्भा मोटस्याज्जातचेतना ॥ ९७ ॥
स्वं ज्ञापयित्वा रुदतीं निवार्यं स्म नयामि ताम् ।
कच्छग्रामे गृहे तातसुहृदो देवशर्मणः ॥ ९८ ॥
इतस्ततो भ्रमंस्त्वोऽन्वेषयंस्त्वामिहागमम् ।
दिष्ट्या दृष्टोऽधुना साक्षात्पुण्यराशिरिवासि मे ॥ ९९ ॥
ततः परं कथं नाथ प्रस्थितोऽसि स्थितोऽसि च ।
तेनेति पृष्टः स्वं वृत्तं कुमारोऽपि न्यवेदयत् ॥ ३०० ॥
अथ कोऽप्येत्य तावूचे ग्रामे दीर्घभटाः पटम् ।
युष्मत्तुल्यद्विरूपाङ्कं दर्शयन्तो वदन्त्यदः ॥ १ ॥
ईदृक्नरौ किमायातावित्याकर्ण्य गां मया ।
दृष्टाविह युवां यद्वा 'कचित कुरु तं हि तत् ॥ २ ॥
ततस्तस्मिन् गतेऽरण्यमध्येन कलभाविव ।
पलायमानौ कौशाम्बीं प्रापतुस्तौ पुरीं क्रमात् ॥ ३ ॥
तत्र सागरदत्तस्य श्रेष्ठिनो बुद्धिलस्य च ।
उद्यानेऽपश्यतां लक्षपणं तौ कुक्कुटाहवम् ॥ ४ ॥
उत्पत्यात्पत्य नखरैः प्राणाकर्षाङ्कुटैरिव ।
युयुधाते ताम्रचूडौ चञ्चाचञ्चविवोद्धकैः ॥ ५ ॥
तत्र सागरदत्तस्य जात्यं शक्तं च कुक्कुटम् ।
भद्रभमिव मिश्रभोऽभाङ्क्षीद्बुद्धिलकुक्कुटः ॥ ६ ॥

---

(१) कक्ष दर्शितं ।

ततो वरधनुः प्राह कथं जात्योऽपि कुक्कुटः ।
भग्नस्ते सागरानेन पश्याम्येनं यदीच्छसि ॥ ७ ॥
सागराऽनुज्ञया सोऽप्यपश्यत् बुद्धिलकुक्कुटम् ।
तत्पादयोरयःसूचीर्यमदूतीरिवैचत ॥ ८ ॥
लक्षयन् बुद्धिलोऽप्यस्य लक्षार्धं कबमिष्टवान् ।
सोऽप्याख्यत्तं व्यतिकरं कुमारस्य जनान्तिके ॥ ९ ॥
अग्रहसोऽप्ययःसूचीः कृष्ट्वा बुद्धिलकुक्कुटम् ।
भूयोऽपि सागरश्रेष्ठिकुक्कुटेनाभ्ययोजयत् ॥ १० ॥
असूचिकः कुक्कुटेन तेन बुद्धिलकुक्कुटः ।
चणादभञ्जि निःसूचानां कस्य वाऽस्तु कुतो जयः ॥ ११ ॥
हृष्टः सागरदत्तस्तावारोप्य स्यन्दनं स्वकम् ।
जयदानैकसुहृदौ निनाय निलये निजे ॥ १२ ॥
स्वधामनीव तत्रास्ति तयोर्विवसतोरथ ।
किमप्याख्यद्वरधनोरेत्य बुद्धिलकिङ्करः ॥ १३ ॥
तस्मिन् गते वरधनुः कुमारमिदमभ्यधात् ।
यद्बुद्धिलेन लक्षार्धं दित्सितं मेऽद्य पश्य तत् ॥ १४ ॥
सोऽदर्शयत्ततो हारं निर्मलस्थूलवर्तुलैः ।
कुर्वाणं मौक्तिकैः शुक्रमण्डलस्य विडम्बनाम् ॥ १५ ॥
हारे बद्धं स्वनामाङ्कं ब्रह्मसूलेखमैक्षत ।
चागाश्च वाचिकमिव मूर्त्तं वत्साख्यतापसी ॥ १६ ॥
अक्षतानि तयोर्मूर्ध्नि चिक्षेपाशीर्वादपूर्वकम् ।
नीत्वान्यतो वरधनुं किञ्चिदाख्याय सा ययौ ॥ १७ ॥

तच्चाख्यातुं समारेभे मन्त्रिसूर्ब्रह्मसूनवे ।
प्रतिलेखं हारवन्नलेखस्येयमयाचत ॥ १८ ॥
श्रीब्रह्मदत्तनामाङ्को लेखोऽयं प्रथयस्व तत् ।
को ब्रह्मदत्त इति सा मया पृष्टेदमब्रवीत् ॥ १९ ॥
अस्ति श्रेष्ठिसुता रत्नवती नामेह पत्तने ।
रूपान्तरेण कन्यात्वं प्रपन्नेव रतिर्भुवि ॥ २० ॥
भ्रातुः सागरदत्तस्य बुद्धिलस्य च तद्दिने ।
कुक्कुटायोधनेऽपश्यद्ब्रह्मदत्तमिमं हि सा ॥ २१ ॥
ततःप्रभृति ताम्यन्ती कामार्त्ता सा न शाम्यति ।
शरणं ब्रह्मदत्तो मे स एवेत्याह चानिशम ॥ २२ ॥
स्वयं लिखित्वा चान्येद्युर्लेखं हारेण संयुतम् ।
अर्प्यतां ब्रह्मदत्तस्येत्युदित्वा सा ममार्पयत् ॥ २३ ॥
दासहस्ते मया लेखः प्रैषीत्युक्ता स्थिता सती ।
मयापि प्रतिलेखं तेऽर्पयित्वा सा व्यसृज्यत ॥ २४ ॥
दुर्वारमारसन्तापः कुमारोऽपि ततो दिनात् ।
[1]मध्याह्नार्ककरोत्तप्तः करीव न सुखं स्थितः ॥ २५ ॥
कौशाम्बीस्वामिनोऽन्येद्युर्दीर्घेण प्रहिता नराः ।
नष्टमश्वकवद्ब्रह्म तौ तत्रान्वेष्टुं समाययुः ॥ २६ ॥

---

(१) क मध्याह्नार्ककरैस्तप्त ।

राजादेशेनकौशाम्ब्यां प्रवृत्तेऽन्वेषणे तयोः ।
सागरो भूगृहे क्षिप्त्वा तौ जुगोप निधानवत् ॥ २७ ॥

निशि तौ निर्यियासन्तौ रथमारोप्य सागरः ।
कियन्तमपि पन्थानं निनाय चचले ततः ॥ २८ ॥

तौ गच्छन्तौ पुरो नारीमुद्याने समपश्यताम् ।
अस्त्रपूर्णरथारूढाममरीमिव नन्दने ॥ २९ ॥

लग्ना किमियती वेला युवयोरिति सादरम् ।
तयोक्तौ तौ बभाषाते कावावां वेत्सि वा कथम् ॥ ३० ॥

अथाभाषत सा पुर्य्यामस्यां श्रेष्ठी महाधनः ।
धनप्रवर इत्यासीद्धनदस्येव सोदरः ॥ ३१ ॥

श्रेष्ठिश्रेष्ठस्य तस्याहमष्टानां तनुजन्मनाम् ।
उपरिष्टाद्विवेकश्रीधर्मगुणानामिवाभवम् ॥ ३२ ॥

उद्यौवनाक्षिमुद्याने यक्षमाराधयं बहु ।
अत्युत्तमवरप्राप्तौ स्त्रीणां नाऽन्यो मनोरथः ॥ ३३ ॥

तुष्टो भक्त्येव मे यक्षः वरो वरमिदं ददौ ।
ब्रह्मदत्तश्चक्रवर्त्ती तव भर्त्ता भविष्यति ॥ ३४ ॥

सागरबुद्धिलश्रेष्ठिकुक्कुटाजौ य एष्यति ।
श्रीवत्सो ससखा तुल्यरूपो ज्ञेयः स तु त्वया ॥ ३५ ॥

मदायतनवर्त्तिन्याः प्रथमस्ते भविष्यति ।
मेलको ब्रह्मदत्तेन तज्जाने सोऽसि सुन्दर ॥ ३६ ॥

एह्येहि तस्मां विरहदहनार्तां चिरादिह ।
विध्यापय पयःपूरेणेव सङ्गेन सम्प्रति ॥ ३७ ॥

तथेति प्रतिपद्यास्या अनुरागमिवालघुम् ।
सोऽधितष्ठौ रथं तां च गन्तव्यं क्वेति पृष्टवान् ॥ ३८ ॥
सेत्यूचे मगधपुरे मत्पितृव्यो धनावहः ।
अस्ति श्रेष्ठ्यावयोर्वार्त्तां प्रतिपत्तिं स दास्यति ॥ ३९ ॥
तदितस्तत्र गन्तव्यमिति रत्नवतीगिरा ।
ब्रह्मसूर्मन्त्रिपुत्रेण सूतेनाश्वाननोदयत् ॥ ४० ॥
कौशाम्बीदेशमुल्लङ्घ्य क्षणेन ब्रह्मनन्दनः ।
क्रीडास्थानं यमस्येव प्राप भीमां महाटवीम् ॥ ४१ ॥
सुकण्टकः कण्टकश्च तत्र चौरचमूपती ।
ब्रह्मदत्तं रुरुधतुः स्थानाविव महाकिरिम् ॥ ४२ ॥
ससैन्यौ युगपत् कालरात्रिपुत्राविवोत्कटौ ।
शरैर्नभो मण्डपवच्छादयामासतुश्च तौ ॥ ४३ ॥
आत्तधन्वा कुमारोऽपि गर्जंश्चौरवरूथिनीम् ।
निषिषेधेषुभिर्धारासारैर्दवमिवाम्बुदः ॥ ४४ ॥
कुमारे वर्षति शरान् ससैन्यौ तौ प्रणेशतुः ।
हन्त प्रहारिणि हरौ करिणानां कुतः स्थितिः ॥ ४५ ॥
कुमारं मन्त्रिसूरेवमूचे श्रान्तोऽसि सङ्गरात् ।
मुहूर्त्तं स्वपिहि स्वामिंस्तदिहैव रथे स्थितः ॥ ४६ ॥
स्यन्दने ब्रह्मदत्तोऽपि रत्नवत्या समन्वितः ।
सुष्वाप गिरिनितम्बे करिण्येव करी युवा ॥ ४७ ॥
विभातायां विभावर्यां प्राप्यैकामथ निम्नगाम् ।
तस्थुः श्रान्तास्तुरङ्गाश्च कुमारश्च व्यबुध्यत ॥ ४८ ॥

विदुरस्तु स नापश्यद्यस्यन्द्रने मन्त्रिनन्दनम् ।
पप्रच्छे किं गतः स्वादित्यसकृद्व्याजहार तम् ॥ ४८ ॥

सोऽलब्धप्रतिवाग् दृष्ट्वा रथाग्रं रक्तपङ्किलम् ।
विलपन् हा हतोऽस्मीति मूर्च्छितो न्यपतद्रथे ॥ ५० ॥

उत्थितो लब्धसंज्ञः सन् क्वाद्य वरधनो सखे ।
क्वासीति लोकवत् क्रन्दन् रक्षवत्येत्यबोधि सः ॥ ५१ ॥

विपन्नो ज्ञायते नैव स तावद्भवतः सखा ।
तस्य वार्ताप्यमाङ्गल्यं नाथ कर्त्तुं न युज्यते ॥ ५२ ॥

त्वत्कार्याय गतः क्वापि स भविष्यत्यसंशयम् ।
यान्ति नाद्यमपृष्ट्वापि नाथकार्याय मन्त्रिणः ॥ ५३ ॥

स तवोपरि भक्त्यैव रक्षितो नूनमेष्यति ।
स्वामिभक्तिप्रभावो हि भृत्यानां कवचायते ॥ ५४ ॥

स्थाने प्राप्ताः करिष्यामो नरैस्तस्य गवेषणम् ।
युज्यते नेह तु स्थातुमन्तकोपवने वने ॥ ५५ ॥

तद्वाचा सोऽनुदद्रथ्यान् प्रपेदे मगधक्षितेः ।
सीमग्रामं दविष्ठं हि वाजिनां मरुतां च किम् ॥ ५६ ॥

ग्रामेशेन सदःस्थेन दृष्ट्वा निन्ये स्ववेश्म सः ।
अज्ञाता अपि पूज्यन्ते महान्तो मूर्त्तिदर्शनात् ॥ ५७ ॥

शोकाक्रान्त इवासीति पृष्टो ग्रामाधिपेन सः ।
इत्यूचे मत्सखा चौरैर्युध्यमानो गतः क्वचित् ॥ ५८ ॥

तस्य प्रवृत्तिमानेष्ये सीताया इव मारुतिः ।
इत्युक्त्वा ग्रामणीः सर्वां तां जगाहे महाटवीम् ॥ ५९ ॥

अथैत्य ग्रामणीरूचे दृष्टः कोऽपि वने नहि ।
प्रहारपतितः किन्तु ग्राम 'एष गतो मया ॥ ६० ॥
हतो वरधनुर्नूनमिति चिन्तयतस्ततः ।
ब्रह्मसूनोः शोक इव तमोभूरभवन्निशि ॥ ६१ ॥
यामे तुरीये यामिन्यास्तत्र चौराः समापतन् ।
ते तु भग्नाः कुमारेण मारेणेव प्रवासिनः ॥ ६२ ॥
ततोऽनुयातो ग्रामण्या ययौ राजगृहं क्रमात् ।
स वासुचन्द्रावर्ती तद्बहिस्तापसाश्रमे ॥ ६३ ॥
विशन् पुरं स ऐक्षिष्ट हर्म्यवातायनस्थिते ।
साक्षादिव रतिप्रीती कामिन्यौ नवयौवने ॥ ६४ ॥
ताभ्यां सोऽभिदधे प्रेमभाजं त्यक्त्वा जनं ननु ।
यत्तदा गतवान् युक्तं तत् किं तं प्रत्यभाषत ॥ ६५ ॥
व्याजहार कुमारोऽपि प्रेमभाग् बत को जनः ।
स कदा च मया त्यक्तः कोऽहं के वा युवामिति ॥ ६६ ॥
प्रसीदागच्छ विश्राम्य नाथेत्यालापनिष्ठयोः ।
प्राविशद्ब्रह्मदत्तोऽपि मनसीव तयोर्गृहे ॥ ६७ ॥
तिष्ठमाने कृतस्नानाशनाय ब्रह्मसूनवे ।
कथयामासतुस्ते स्वां कथामवितथामिति ॥ ६८ ॥
अस्ति विद्याधरावासः कलधौतशिलामयः ।
मेदिन्यास्तिलक इव वैताढ्यो नाम पर्वतः ॥ ६९ ॥

---

(१) क एकः ।

अमुष्य दक्षिणश्रेण्यां नगरे शिवमन्दिरे ।
राजाऽस्ति ज्वलनशिखोऽलकायामिव गुह्यकः ॥ ७० ॥
विद्याधरपतेस्तस्य द्युतिद्योतितदिङ्मुखा ।
प्रिया विद्युच्छिखेत्यस्ति विद्युदम्भोमुचो यथा ॥ ७१ ॥
तयोः प्राणप्रिये नाम्नोर्मत्ताभिधसुतानुजे ।
नाम्ना खण्डा विशाखा च पुत्र्यावावां बभूविव ॥ ७२ ॥
तातः सौधेऽन्यदा सख्याग्निशिखेन सहालपन् ।
गच्छतोऽष्टापदगिरिं गीर्वाणान् खे निरैक्षत ॥ ७३ ॥
ततः स तीर्थयात्रार्थं चलितोऽचालयच्च नौ ।
सुहृदं चाग्निशिखं तं धर्मेऽपीष्टं हि योजयेत् ॥ ७४ ॥
प्राप्ता अष्टापदं तत्रापश्याम मणिनिर्मिताः ।
प्रतिमास्तीर्थनाथानां मानवर्णसमन्विताः ॥ ७५ ॥
स्नानं विलेपनं पूजां विरचय्य यथाविधि ।
ताश्चिः प्रदक्षिणीकृत्यावन्दामहि समाहिताः ॥ ७६ ॥
प्रासादान्निःसृतैर्दृष्टौ रक्ताशोकतरोरधः ।
चारणश्रमणौ मूर्त्तिमन्ताविव तपःशमौ ॥ ७७ ॥
तौ प्रणम्योपविश्याग्रे शुश्रुम श्रद्धया वयम् ।
अज्ञानतिमिरच्छेदकौमुदीं धर्मदेशनाम् ॥ ७८ ॥
पप्रच्छाग्निशिखः कः स्यात्कन्ययोरनयोः पतिः ।
तावूचतुर्योऽनयोर्भ्रातरं मारयिष्यति ॥ ७९ ॥
हिमेनेव शशी म्लानो जातस्तातस्तया गिरा ।
आवामपीत्यवोचाव वाचा वैराग्यगर्भया ॥ ८० ॥

संसारासारतासारा देशनाश्चैव शुश्रुवे ।
तद्विषादनिषादेन किं तात परिभूयसे ॥ ८१ ॥
अलमस्माकमप्येवं विधैर्विषयजैः सुखैः ।
प्रव्रजेते तत्प्रभृत्यावां त्रातुं निजसहोदरम् ॥ ८२ ॥
भ्रान्त्यन्यपक्षस्ते भ्राताऽन्यदा पुष्पवतीमसौ ।
मातुलस्य त्वदीयस्य पुष्पचूलस्य कन्यकाम् ॥ ८३ ॥
रूपेणाद्भुतलावण्यपुण्येन हृतमानसः ।
तां जहार स दुर्बुद्धिः बुद्धिः कर्मानुसारिणी ॥ ८४ ॥
सोऽसहिष्णुर्दृशं तस्या विद्यां साधयितुं ययौ ।
स्वयं संविद्रुते सम्यग् भवन्तस्तु ततः परम् ॥ ८५ ॥
तदा च पुष्पवत्यास्यदावयोर्भ्रातृसङ्क्षयम् ।
शोकं धर्माक्षरैः शोकापनोद इव चानुदत् ॥ ८६ ॥
अन्यच्च पुष्पवत्यूचेऽभ्यगम्योऽयमिहागतः ।
ब्रह्मदत्तोऽस्तु वां भर्त्ता नान्यथा हि मुनेर्गिरः ॥ ८७ ॥
स्वीकृतं च यदावाभ्यां तया च रभसावशात् ।
पताकाचालि धवला त्वक्त्वावां त्वं गतस्ततः ॥ ८८ ॥
यदाप्यस्माभ्यनेगुण्यादागतोऽसि न चेक्षितः ।
भ्रान्त्वा सर्वत्र निर्विण्णे आवामिह तदागते ॥ ८९ ॥
पुण्यैरसि समायातः पुरा पुष्पवतीगिरा ।
वृतोऽसि वरयावां तद्भतिरेकस्त्वमावयोः ॥ ९० ॥
गान्धर्वेण विवाहेन स उपायंस्त ते अपि ।
भोगी हि भाजनं स्त्रीणां सरितामिव सागरः ॥ ९१ ॥

रममाणः समं ताभ्यां मङ्गीमाभ्यामिवेश्वरः ।
तत्रातिवाहयामास तां निशां ब्रह्मनन्दनः ॥ ९२ ॥
यावन्मे राज्यलाभः स्यात्पुष्पवत्याः समीपतः ।
तावद्युवाभ्यां स्थातव्यमित्युक्त्वा व्यसृजच्च ते ॥ ९३ ॥
नथैत्याहृतवत्यौ ते सलोकास्तच्च मन्दिरम् ।
गन्धर्वनगरमिव ततः सर्वं तिरोदधे ॥ ९४ ॥
अथाश्रमे रत्नवतीमन्वेष्टुं ब्रह्मसूरगात् ।
अपश्यंस्तत्र पप्रच्छ नरमेकं शुभाकृतिम् ॥ ९५ ॥
दिव्याम्बरधरा नारी रत्नाभरणभूषिता ।
कापि दृष्टा महाभाग त्वयातीतदिनेऽद्य वा ॥ ९६ ॥
स ऊचे नाथ नाथेति रुदती क्षौमयेक्षिता ।
प्रत्यभिज्ञाय मत्पत्नीति तत्पितृव्याय चार्पिता ॥ ९७ ॥
तद्वरोऽसीति तेनोक्तस्तथेति ब्रह्मसूर्वदन् ।
निन्ये तेन प्रहृष्टेन तत्पितृव्यनिकेतनम् ॥ ९८ ॥
रत्नवत्या पितृव्योऽपि ब्रह्मदत्तं व्यवाहयत् ।
ख्यातो महत्या धनिनां सर्वमोषत्करं यतः ॥ ९९ ॥
तया विषयसौख्यानि समं सोऽनुभवंस्तथा ।
कृतकार्थं वरधनोरपरेद्युः प्रचक्रमे ॥ ४०० ॥
साक्षादिव परे तेषु भुञ्जानेषु द्विजन्मसु ।
विप्रवेषो वरधनुस्तत्रागत्याब्रवीदिति ॥ १ ॥
मम चेद्भोजनं दत्थ साक्षाद्वरधमोर्हि तत् ।
इति श्रुतिसुधेवास्य श्रुता वाग् ब्रह्मसूनुना ॥ २ ॥

स तं दृष्ट्वा परिष्वङ्गादेकीकुर्वन्निवात्मना ।
स्नपयन्निव हर्षास्रैर्निनायान्तर्गृहं ततः ॥ ३ ॥

जवे पृष्टः कुमारेण स्ववृत्तं सोऽकथयत्तदा ।
सुप्ते त्वयि निबद्धोऽहं चौरैः दोर्विभटैर्यथा ॥ ४ ॥

वृक्षान्तरस्थितेनैकदस्युनैकेन पत्रिणा ।
हतोऽहं पतितः पृथ्व्यां तिरोऽधां च लतान्तरे ॥ ५ ॥

गतेषु तेषु चौरेषु मध्येवृक्षं तिरोभवन् ।
आतिरस्तजलमिव क्रमेण ग्राममाप्नुवम् ॥ ६ ॥

भवत्प्रवृत्तिं ग्रामेणाभिज्ञायाहमिहागमम् ।
दिष्ट्याऽपश्यं भवन्तं च कलापीव पयोमुचम् ॥ ७ ॥

अथोचे ब्रह्मदत्तमस्माभिः स्थास्यते ननु ।
विना पुरुषकारेण क्लीबैरिव कियच्चिरम् ॥ ८ ॥

अत्रान्तरे च सम्प्राप्तसाम्राज्यमकरध्वजः ।
मधुवन्मदको यूनां प्रादुरासीन्मधूत्सवः ॥ ९ ॥

तदा च राज्ञो मत्तेभः स्तम्भं भङ्क्त्वाऽपशृङ्खलः ।
निर्ययौ त्रासिताशेषमर्त्यो मृत्योरिवानुजः ॥ १० ॥

ततो नितम्बभारार्त्तां काञ्चित् कन्यां स्खलद्गतिम् ।
करी करेण जग्राहाकृष्य पुष्करिणीमिव ॥ ११ ॥

तस्यां च शरणार्थिन्यां क्रन्दन्त्यां दीनचक्षुषि ।
जज्ञे हाहारवो विश्वदुःखबीजाङ्कुरोपमः ॥ १२ ॥

रे मातङ्गासि मातङ्गः स्त्रियं गृह्णन्न लज्जसे ।
इत्युक्तः स कुमारेण तां विमुच्य तमभ्यगात् ॥ १३ ॥

उत्प्लुत्य दन्तसोपाने पादं विन्यस्य हेलया ।
आरुरोह कुमारस्तमधिश्रयदथासनम् ॥ १४ ॥

वाक्पाटाङ्कुशयोगेन स्वं योगीव योगवित् ।
वशीचकार तं नागं कुमारस्तरसा ततः ॥ १५ ॥

साधुसाध्वित्युच्यमानो जनैर्जयजयेति च ।
कुमारः करिणं स्तम्भे नीत्वाबध्नाद्दशामिव ॥ १६ ॥

ततो नरेन्द्रस्तत्रागात्तं च दृष्ट्वा विसिस्मिये ।
आकृतिर्विक्रमश्चास्य कस्य चित्तीयते नवा ॥ १७ ॥

कोऽयं कुतो वा चक्रात्मा किं सूर्यो वासवोऽथवा ।
राज्ञेत्युक्ते रत्नवत्याः पितृव्यस्तमचीकथत् ॥ १८ ॥

ततो विशाम्पतिः कन्याः पुष्पमानोन्नतोत्सवः ।
दश स्वपाकरायेव ब्रह्मदत्ताय दत्तवान् ॥ १९ ॥

परिणीय स तास्तत्र सुखं तिष्ठन्नथाऽन्यदा ।
जरत्यैत्यैकयेत्यूचे भ्रमयित्वांशुकाञ्चलम् ॥ २० ॥

इह वैश्रवणोऽस्त्याढ्यः श्रिया वैश्रवणोऽपरः ।
तस्य च श्रीमतिर्नाम सुता श्रीरिव वारिधेः ॥ २१ ॥

साचिता भवता व्यालाद्राहोरिन्दुकलेव या ।
सा [1]त्वामेव पतीयन्ती ततःप्रभृति ताम्यति ॥ २२ ॥

यथा गजात्त्वया त्राता तथा त्रायस्व तां स्मरात् ।
गृहाण पाणिं त्वं तस्या यथा हृदयमग्रहीः ॥ २३ ॥

---

(१) च छ त्वामेवाभिवाञ्छन्ती ।

उपयेमे कुमारस्तां विविधोद्वाहमङ्गलैः ।
सुबुद्धिमन्त्रिणः कन्यां नन्दां वरधनुः पुनः ॥ २४ ॥

पश्चात्तौ पृथिव्यां तौ तिष्ठन्तौ तत्र शक्तितः ।
साभियोगौ प्रतस्थाते तती वाराणसीं प्रति ॥ २५ ॥

श्रुत्वायान्तं ब्रह्मदत्तं ब्रह्माणमिव गौरवात् ।
अभ्येत्य संमुखं वाराणसीशः स्वगृहेऽनयत् ॥ २६ ॥

कटकः कटकवतीं नाम पुत्रीं निजां ददौ ।
चतुरङ्गचमूं चास्मै मूर्त्तामिव जयश्रियम् ॥ २७ ॥

कणेरुदत्तश्चम्पेशो धनुर्मन्त्री तथाऽपरे ।
भगदत्तादयोऽप्येयुर्नृपाः श्रुत्वा तदागमम् ॥ २८ ॥

कृत्वा वरधनुं सेनान्यं सुषेणमिवार्षभिः ।
दीर्घं दीर्घपथे नेतुं प्रतस्थे ब्रह्मनन्दनः ॥ २९ ॥

दीर्घस्य दूतः कटकराजमेत्यैवमूचिवान् ।
दीर्घेण सममाबाल्यमैत्री त्यक्तुं न युज्यते ॥ ३० ॥

ततः कटक इत्यूचे ब्रह्मणा सहिताः पुरा ।
सोदर्या इव 'पञ्चाप्यभवाम सुहृदो वयम् ॥ ३१ ॥

स्वर्जुगोब्रह्मणः पुत्रं राज्यं च त्रातुमर्पितं ।
दीर्घेण धिक्कृतं नाऽस्ति याकिञ्चपि समर्पितम् ॥ ३२ ॥

ब्रह्मणः पुत्रभाण्ड यद्दीर्घोऽदीर्घमचिन्तयत् ।
चाण्डालोऽतिपापं तच्छ्वपचोऽपि किमाचरेत् ॥ ३३ ॥

---

(१) ख ग घ पञ्चापि सञ्जाताः ।

तदच्छ शंस दीर्घाय ब्रह्मदत्तोऽभ्युपैत्यसौ ।
युद्धाय यदि वा गच्छेत्युक्त्वा दूतं व्यसर्जयत् ॥ ३४ ॥
ततः प्रयाणैरच्छिन्नैः काम्पील्यं ब्रह्मसूर्ययौ ।
सदीर्घमप्यदीर्घौजस्तमभः सार्कमिवाम्बुदः ॥ ३५ ॥
दीर्घः सर्वाभिसारेण रणसारेण पत्तनात् ।
दण्डाक्रान्तो निरसरद्विलादिव महोरगः ॥ ३६ ॥
चुलन्यपि तदात्यन्तवैराग्यादाददे व्रतम् ।
पार्श्वे पूर्णाप्रवर्तिन्याः क्रमान्निर्वृतिमाप च ॥ ३७ ॥
पुरोगा दीर्घराजस्य पुरोगैर्ब्रह्मजन्मनः ।
नदीयादांस्यकूपारयादोभिरिव जघ्निरे ॥ ३८ ॥
दीर्घोऽप्यमर्षादुन्मिदंष्ट्रिकाविकटाननः ।
वराह इव धावित्वा हन्तुं प्रववृते परान् ॥ ३९ ॥
ब्रह्मदत्तस्य पादातरथसाधादिकं बलम् ।
पर्यास्थत नदीपूरेणेव दीर्घेण वेगिना ॥ ४० ॥
ब्रह्मदत्तस्ततः क्रोधारुणाक्षो युयुधे स्वयम् ।
गर्जता दीर्घराजेन गर्जन् दन्तीव दन्तिना ॥ ४१ ॥
उभावपि बलिष्ठौ तावस्त्राण्यस्त्रैर्निरासतुः ।
कल्लोलैरिव कल्लोलान् युगान्तोद्भ्रान्तवारिधी ॥ ४२ ॥
ज्ञात्वाऽथ सेवक इवावसरं प्रसरद्द्युति ।
ढुढौके ब्रह्मदत्तस्य चक्रं दिक्चक्रजित्वरम् ॥ ४३ ॥
ततो जहार दीर्घस्य तेनाशु ब्रह्मसूः शिरः ।
विमर्दो विद्युतः को वा गोधाभिधनसाधने ॥ ४४ ॥

जयतादेष चक्रीति भाषिणो मागधा इव ।
ब्रह्मदत्तोपरि सुराः पुष्पवृष्टिं वितेनिरे ॥ ४५ ॥
पौरैः पितेव मातेव दैवतेव स वीक्षितः ।
पुरं विवेश काम्पील्यं सुधामेवामरावतीम् ॥ ४६ ॥
विभिन्नस्वामिनोद्भूतसीमनिर्मूलनादसौ ।
षट्खण्डां साधयित्वोर्वीमेकखण्डां विनिर्ममे ॥ ४७ ॥
संवत्सरैर्द्वादशभिरुपेत्योपेत्य सर्वतः ।
तस्याभिषेको विदधे भरतस्येव राजभिः ॥ ४८ ॥
चतुःषष्टिसहस्रान्तःपुरस्त्रीपरिवारितः ।
स राज्यसौख्यं बुभुजे प्राक्तपोभूरुहः फलम् ॥ ४९ ॥
अन्येद्युर्नाट्यसङ्गीते तस्य दास्या समर्पितः ।
स्ववधूगुम्फितइव विचित्रः पुष्पगन्दुकः ॥ ५० ॥
ब्रह्मदत्तस्तु तं दृष्ट्वा दृष्टपूर्वो मयेदृशः ।
क्वापीति व्यधादन्तरूहापोहं मुहुर्मुहुः ॥ ५१ ॥
प्राक्पञ्चजन्मस्मरणोत्पत्तेस्तत्कालमेव च ।
[1]सौधर्मे दृष्टवानेतदित्यज्ञासीन्महीपतिः ॥ ५२ ॥
स मित्रचन्दनाम्भोभिः स्वस्थीभूयेत्यचिन्तयत् ।
कथं मेलिष्यति स मे पूर्वजन्मसहोदरः ॥ ५३ ॥
तं ज्ञातुकामः श्लोकार्द्धसमस्यामिवमार्पयत् ।
आस्व दासौ मृगौ हंसौ मातङ्गावमरौ तथा ॥ ५४ ॥

---

(१) क ख ग ङ मूर्च्छितो ज्ञातवानेतं सौधर्मे दृष्टवानिति ।

धर्द्धश्लोकसमस्यां मे य इमां पूरयिष्यति ।
राज्यार्द्धं तस्य दास्यामीत्यसावघोषयत्पुरे ॥ ५५ ॥
श्लोकार्द्धं तत्तु सर्वोऽपि कण्ठस्थं निजनामवत् ।
पठन्नकार्षीत्पश्चार्द्धं न चापूरिष्ट कश्चन ॥ ५६ ॥
तदा च पुरिमतालाश्चित्रजीवो महेभ्यभूः ।
जातिस्मृतः प्रव्रजितो विहरन्नेकदा ययौ ॥ ५७ ॥
[२]तत्र कस्मिंश्चिदुद्याने प्रासुकस्थण्डिलस्थितः ।
श्लोकार्द्धं तत्तु पठतः सोऽश्रौषीदारघट्टिकात् ॥ ५८ ॥
एषा नौ षष्टिका जातिरन्योऽन्याभ्यां वियुक्तयोः ।
श्लोकापरार्द्धमेवं स सम्पूर्य्य तमपाठयत् ॥ ५९ ॥
श्लोकापरार्द्धं तद्राज्ञः पुरस्तादारघट्टिकः ।
पपाठ कः कविरिति तत्पृष्टस्तं मुनिं जगौ ॥ ६० ॥
स पारितोषिकं तस्मै वितीर्य्योत्कण्ठया ययौ ।
तत्रोद्याने मुनिं द्रष्टुं धर्मद्रुममिवोद्गतम् ॥ ६१ ॥
वन्दित्वा तं मुनिं तत्र बाष्पपूर्णविलोचनः ।
निषसादान्तिके राजा सस्नेहः पूर्वजन्मवत् ॥ ६२ ॥
आशीर्वादं मुनिर्दत्त्वा कृपारसमहोदधिः ।
अनुग्रहार्थं भूपस्य प्रारेभे धर्मदेशनाम् ॥ ६३ ॥
राजन्नसारे संसारे सारमन्यन्न किञ्चन ।
सारोऽस्ति धर्म एवैकः सरोजमिव कर्दमे ॥ ६४ ॥

---

(२) च ड तस्मिन् ।

शरीरं यौवनं लक्ष्मीः स्वाम्यं मित्राणि बान्धवः ।
सर्वमप्यनिलोद्धूतपताकाञ्चलचञ्चलम् ॥ ६५ ॥
बहिरङ्गान् द्विषोऽजैषीर्यथा साधयितुं महीम् ।
अन्तरङ्गान् जय तथा मोक्षसाधनहेतवे ॥ ६६ ॥
गृहाण यतिधर्मं तत्पृथक्कृत्य त्यजापरम् ।
राजहंसो हि गृह्णाति विभज्य क्षीरमम्भसः ॥ ६७ ॥
ब्रह्मदत्तस्ततोऽवादीद् दिष्ट्या दृष्टोऽसि बान्धव ।
इयं तवैव राज्यश्रीर्भुङ्क्ष्व भोगान् यथारुचि ॥ ६८ ॥
तपसो हि फलं भोगाः सन्ति ते किं तपस्यसि ।
उपक्रमेत को नाम स्वतः सिद्धे प्रयोजने ॥ ६९ ॥
मुनिरूचे ममाप्यासन् धनदस्येव सम्पदः ।
मया तास्तृणवत्त्यक्ता भवभ्रमणभीरुणा ॥ ७० ॥
सौधर्मात्क्षीणपुण्योऽस्मिन्नागतोऽसि महीतले ।
इतोऽपि क्षीणपुण्यः सन् राजन्मा गा अधोगतिम् ॥ ७१ ॥
आर्ये देशे कुले श्रेष्ठे मानुष्यं प्राप्य मोक्षदम् ।
साधयस्यमुना भोगान् सुधया पायुशौचवत् ॥ ७२ ॥
स्वर्गाच्च्युत्वा क्षीणपुण्यौ भ्रान्तावावां कुयोनिषु ।
यथा तथा स्मरन् राजन् किं बाल इव मुह्यसि ॥ ७३ ॥
तेनैवं बोध्यमानोऽपि नाबुद्ध वसुधाधवः ।
कुतः कृतनिदानानां बोधिबीजसमागमः ॥ ७४ ॥
तमबोध्यतमं बुद्ध्वा जगाम मुनिरन्यतः ।
कालादिष्टाहिना दष्टे कियत्तिष्ठन्ति मान्त्रिकाः ॥ ७५ ॥

घातिकर्मक्षयात्प्राप्य केवलज्ञानमुत्तमम् ।
भवोपग्राहिकर्माणि हत्वा प्राप परं पदम् ॥ ७६ ॥
ब्रह्मदत्तोऽपि संसारसुखानुभवलालसः ।
समातिवाहयामास शतानि शरदां क्रमात् ॥ ७७ ॥
कदाचित्प्राक्परिचितो द्विजः कश्चिज्जगाद तम् ।
चक्रवर्त्तिन् स्वयं भुङ्क्ते यत्तन्मे देहि भोजनम् ॥ ७८ ॥
ब्रह्मदत्तोऽप्यवोचत्तं मदन्नं द्विज दुर्जरम ।
चिरेण जीर्य्यमाणं तु महोन्मादाय जायते ॥ ७९ ॥
कदर्य्योऽस्यन्नदानेऽपि धिक्त्वामिति वदन् द्विजः ।
अभोजि सकुटुम्बोऽपि भूभुजा भोजनं निजम् ॥ ८० ॥
निशायामथ विप्रस्य बीजादिव तदोदनात् ।
शतशाखः स्मरोन्मादतरुः प्रादुरभूद्भृशम् ॥ ८१ ॥
अगणितजननीजामिस्नुषाव्यतिकरं मिथः ।
पशुवत्सहपुत्रोऽपि विप्रः प्रववृते रते ॥ ८२ ॥
ततो विरामे यामिन्या द्विजो गृहजनश्च सः ।
ह्रिया दर्शयितुं स्वास्यमन्योऽन्यमपि नाशकत् ॥ ८३ ॥
कुर्व्वाणेनेन राज्ञाऽस्मि सकुटुम्बो विडम्बितः ।
चिन्तयन्नित्यमर्षेण नगरान्निरगाद्द्विजः ॥ ८४ ॥
दूरादश्वत्थपत्राणि काणयन् शर्कराकणैः ।
तेन कश्चिदजापालो ददृशे भ्रमता बहिः ॥ ८५ ॥
मद्वैरसाधनायालमसाविति विमृश्य सः ।
तं मूल्येनेव सत्कारेणादायैवमवोचत ॥ ८६ ॥

राजमार्गे गजारूढो यः श्वेतच्छत्रचामरः ।
याति कथं दृशौ तस्य त्वया प्रक्षिप्य गोलिके ॥ ८७ ॥
विप्रवाचमजापालः प्रतिपेदे तथैव ताम् ।
पशुवत्पशुपाला हि न विमृश्य विधायिनः ॥ ८८ ॥
सोऽथ कुड्यान्तरे स्थित्वा समं प्रक्षिप्य गोलिके ।
[1]आस्फोटयद् दृशौ राज्ञो नाम्ना लक्ष्या विधेः खलु ॥ ८९ ॥
सोऽश्रुश्चैरजापालः प्राप[2]श्यैनैरिव द्विकः ।
हन्यमानस्तमेवाख्यद्विप्रं विप्रियकारकम् ॥ ९० ॥
तच्छ्रुत्वा पार्थिवोऽवोचद्धिग् धिग् जातिर्द्विजन्मनाम् ।
यत्रैते भुञ्जते पापास्तत्र भञ्जन्ति भाजनम् ॥ ९१ ॥
यः स्वामीयति दातारं दत्ते तस्मै वरं शुने ।
न जातु दातुमुचितं कृतघ्नानां द्विजन्मनाम् ॥ ९२ ॥
वञ्चकानां नृशंसानां श्वापदानां पलादिनाम् ।
सृष्टिं द्विजानां योऽकार्षीन्निग्राह्यः प्रथमं हि सः ॥ ९३ ॥
इति जल्पन्ननल्पकृत् पृथ्वीपतिरघातयत् ।
सपुत्रबन्धुमित्रं तं विप्रं मशकमुष्टिवत् ॥ ९४ ॥
दृशोरन्धीकृतस्तेन हृदयेऽन्धीकृतः क्रुधा ।
विप्रान् सोऽघातयत् सर्वान् पुरोधःप्रभृतीनपि ॥ ९५ ॥

---

(१) ख च छ आस्फोटयत् ।
(२) ख च छ प्राप्त ।

सोऽमात्यमादिदेशैवं नेत्रैरेषां द्विजन्मनाम् ।
विशालं स्थालमापूर्य निधेहि पुरतो मम ॥ ९६ ॥
रौद्रमध्यवसायं तं राज्ञो विज्ञाय मन्त्र्यपि ।
श्लेष्मातकफलैः स्थालं पूरयित्वा पुरो न्यधात् ॥ ९७ ॥
मुमुदे ब्रह्मदत्तोऽपि पाणिना संस्पृशन्मुहुः ।
विप्राणां लोचनैः स्थालं साधु पूर्णमिति ब्रुवन् ॥ ९८ ॥
स्पर्शे स्त्रीरत्नरूपायाः पुष्पवत्यास्तथा नहि ।
यथाऽऽसीद्ब्रह्मदत्तस्य तत्स्थालस्पर्शने रतिः ॥ ९९ ॥
न कदाचन स स्थालमपसारयदग्रतः ।
दुर्मदो मदिरापात्रमिव दुर्गतिकारणम् ॥ ५०० ॥
विप्रनेत्रधियाऽमृद्नात् श्लेष्मातकफलानि सः ।
फलाभिमुखपापद्रोः सञ्जयन्निव दोहदम् ॥ १ ॥
तस्यानिवर्त्तको रौद्राध्यवसायोऽत्यवर्द्धत ।
अशुभं वा शुभं वाऽपि सर्वं हि महतां महत् ॥ २ ॥
तस्यैवं वसुधेशस्य रौद्रध्यानानुबन्धिनः ।
पापपङ्कवराहस्य ययुर्वर्षाणि षोडश ॥ ३ ॥
यातेषु षोडशयुतेषु समाशतेषु
सप्तस्वसौ क्षितिपतिः परिपूरितायुः ।
हिंसाऽनुबन्धिपरिणामफलानुरूपां
तां सप्तमीं नरकलोकभुवं जगाम ॥ ५०४ ॥ २७ ॥

॥ इति ब्रह्मदत्तचक्रवर्त्तिकथानकम् ॥

पुनरपि हिंसकान्निन्दति ।

कुणिर्वरं वरं पङ्गुरशरीरी वरं पुमान् ।
अपि सम्पूर्णसर्वाङ्गो न तु हिंसापरायणः ॥ २८ ॥

कुणिर्विकलपाणिः वरमिति मनागिष्टे मलमव्ययं पङ्गुः पादविकलः कुत्सितं शरीरमशरीरं नञः कुत्सार्थत्वात् तद्विद्यते यस्य सोऽशरीरी कुष्ठी विकलाङ्गः कुणिपङ्गुकुष्ठिनस्ते हि विकलाङ्गत्वादेव हिंसामकुर्वन्तो मनाक् श्रेष्ठाः सम्पूर्णसर्वाङ्गोऽपि कृतपरिकरबन्धं हिंसापरायणः पुमान्न तु श्रेष्ठः । ननु रौद्रध्यानपरायणस्य या हिंसा सा नरकहेतुत्वान्निन्द्याऽस्तु या तु शान्तिकनिमित्तं प्रायश्चित्तभूता हिंसा या वा कुलक्रमायाता मत्स्यबन्धानामिव सा रौद्रध्यानरहितत्वान्न दोषायेत्याह ॥ २८ ॥

हिंसा विघ्नाय जायेत विघ्नशान्त्यै कृताऽपि हि ।
कुलाचारधियाऽप्येषा कृता कुलविनाशनी ॥ २९ ॥

रौद्रध्यानमन्तरेणाप्यविवेकाल्लोभाद्वा या शान्तिनिमित्तं कुलक्रमाद्वा हिंसा सा न केवलं पापहेतुः प्रत्युत विघ्नशान्तिनिमित्तं क्रियमाणा समरादित्यकथोक्तस्य यशोधरजीवस्य सुरेन्द्रदत्तस्येव पिष्टमयकुक्कुटवधरूपा विघ्नाय जायेत कल्पेत अस्मत्कुलाचारोऽयमिति बुद्ध्याऽपि कृता हिंसा कुलमेव विनाशयति ॥ २९ ॥

इदानीं कुलक्रमायातामपि हिंसां परिहरन् पुमान् प्रशस्य एवेत्याह ।

अपि वंशक्रमायातां यस्तु हिंसां परित्यजेत् ।
स श्रेष्ठः सुलस इव कालसौकरिकात्मजः ॥ ३० ॥

वंशः कुलं कुलक्रमायातामपि हिंसां यः [1]परिहरेत् स श्रेष्ठः प्रशस्यतमः सुलस इव तस्य विशेषणं कालसौकरिकात्मजः कालसौकरिको नाम सौनिकस्तस्यात्मजः पुत्रः ।

यदाह—

[2]अवि इच्छन्ति य मरणं न य परपीडं कुणन्ति मणसा वि ।
जे सुविइअसुगइपहा सोयरिअसुओ जहा सुलसो ॥

सुलसकथानकं सम्प्रदायगम्यम् ।

तच्चायं—

महर्द्धि मगधेष्वस्ति पुरं राजगृहाभिधम् ।
तत्र श्रीवीरपादाब्जभृङ्गोऽभूच्छ्रेणिको नृपः ॥ १ ॥
तस्य प्रियतमे नन्दाचिल्लणे शीलभूषणे ।
अभूतां देवकीरोहिण्याविवानकदुन्दुभेः ॥ २ ॥
नन्दायां नन्दनो विश्वकुमुदानन्दचन्द्रमाः ।
नाम्नाऽभयकुमारोऽभूदुभयान्वयभूषणः ॥ ३ ॥

---

(१) क परित्यजेत् ।

(२) अपि इच्छन्ति च मरणं न च परपीडां कुर्वन्ति मनसापि ।
ये सुविदितसुगतिपथाः शौकरिक सुतो यथा सुलसः ॥ १ ॥

राजा तस्य परिज्ञाय प्रकृष्टं बुद्धिकौशलम् ।
ददौ सर्वाधिकारित्वं गुणा हि गरिमास्पदम् ॥ ४ ॥
अन्यदा श्रीमहावीरो विहरन् परमेश्वरः ।
जगत्पूज्यः पुरे तस्मिन्नागत्य समवासरत् ॥ ५ ॥
श्रुत्वा स्वामिनमायातं जङ्गमं कल्पपादपम् ।
कृतार्थमानी तत्रागात्मुदितः श्रेणिको नृपः ॥ ६ ॥
यथास्थानं निषण्णेषु देवादिषु जगद्गुरुः ।
प्रारेभे दुरितध्वंस[1]देशनीं धर्मदेशनाम् ॥ ७ ॥
तदा कुष्ठगलत्कायः कश्चिदेत्य प्रणम्य च ।
निषसादोपतीर्थेशमलर्क इव कुट्टिमे ॥ ८ ॥
ततो भगवतः पादौ निजपूयरसेन सः ।
निःशङ्कश्चन्दनेनेव चर्चयामास भूयसा ॥ ९ ॥
तद्वीक्ष्य श्रेणिकः क्रुद्धो दध्यौ वध्योऽयमुत्थितः ।
पापीयान् यज्जगद्भर्तुरेवमाशातनापरः ॥ १० ॥
अत्रान्तरे जिनेन्द्रेण क्षुते प्रोवाच कुष्ठिकः ।
म्रियस्वेत्यथ जीवेति श्रेणिकेन क्षुते सति ॥ ११ ॥
क्षुतेऽभयकुमारेण जीव वा त्वं म्रियस्व वा ।
कालसौकरिकेणापि क्षुते मा जीव मा मृथाः ॥ १२ ॥
जिनं प्रति म्रियस्वेति वचसा रुषितो नृपः ।
इतः स्थानादुत्थितोऽसौ ग्राह्य इत्यादिशद्भटान् ॥ १३ ॥

---

(१) क ग छ प्रत्यादेशनी ।

देशनान्ते महावीरं नत्वा कुष्ठी समुत्थितः ।
रुरुधे श्रेणिकभटैः किरातैरिव शूकरः ॥ १४ ॥
स तेषां पश्यतामेव दिव्यरूपधरः क्षणात् ।
उत्पपाताम्बरे कुर्वन्नर्कबिम्बविडम्बनाम् ॥ १५ ॥
पत्तिभिः कथिते राज्ञा क एष इति विस्मयात् ।
विज्ञप्तो भगवानस्मै देवोऽसावित्यचीकथत् ॥ १६ ॥
पुन'र्विज्ञपयामास सर्वज्ञमिति भूपतिः ।
देवः कथमभूदेष कुष्ठी वा केन हेतुना ॥ १७ ॥
पर्योचे भगवानेवमस्ति वत्सेषु विश्रुता ।
कौशाम्बी नाम पूस्तस्यां शतानीकोऽभवन्नृपः ॥ १८ ॥
तस्यां नगर्यामेकोऽभून्नामतः सेडुको द्विजः ।
सीमा सदा दरिद्राणां मूर्खाणामवधिः परः ॥ १९ ॥
गर्भिण्याऽभाणि सोऽन्येद्युर्ब्राह्मण्या सूतिकर्मणि ।
भट्टानय घृतं मह्यं सह्या नह्यन्यथा व्यथा ॥ २० ॥
सोऽप्यूचे तां प्रिये नास्ति मम कुत्रापि कौशलम् ।
येन किञ्चिल्लभे क्वापि कलाग्राह्या यदीश्वराः ॥ २१ ॥
उवाच सा च तं भट्ट गच्छ सेवस्व पार्थिवम् ।
पृथिव्यां पार्थिवादन्यो न कश्चित्कल्पपादपः ॥ २२ ॥
तथेति प्रतिपद्यासौ नृपं पुष्पफलादिना ।
प्रवृत्तः सेवितुं विप्रो रत्नेच्छुरिव सागरम् ॥ २३ ॥

---

(१) स विज्ञापयामास ।

कदाचिदथ कौशाम्बी चम्पेशेनामितैर्बलैः ।
घनर्तुनैव मेघौघैररुध्यत समन्ततः ॥ २४ ॥
शतानीकोऽपि शतानीको मध्यकौशाम्बि तस्थिवान् ।
प्रतीक्षमाणः समयमन्तर्बिलमिवोरगः ॥ २५ ॥
चम्पाधिपोऽपि कालेन बहुना सन्नसैनिकः ।
प्रावृषि स्वाश्रयं यातुं प्रवृत्तो राजहंसवत् ॥ २६ ॥
तदा पुष्पार्थमुद्याने गतः सेडुक ऐक्षत ।
तं क्षीणसैन्यं प्रत्यूषे निष्प्रभोडुमिवोडुपम् ॥ २७ ॥
तूर्णमेत्य शतानीकं व्यजिज्ञपदसाविदम् ।
याति क्षीणबलस्तेऽरिर्भग्नदंष्ट्र इवोरगः ॥ २८ ॥
यद्यद्योत्तिष्ठसे तस्मै तदा साध्यः सुखेन सः ।
बलीयानपि खिन्नः सन्नखिन्नेनाभिभूयते ॥ २९ ॥
तद्वचः साधु मन्वानो राजा सर्वाभिसारतः ।
निःससार शरासारसारनासीरदारुणः ॥ ३० ॥
ततः पश्चादपश्यन्तो नेशुश्चम्पेशसैनिकाः ।
अर्चिष्मत्तडित्पाते को वीक्षितुमपि क्षमः ॥ ३१ ॥
चम्पाधिपतिरेकाङ्गः कान्दिशीकः पलायितः ।
तस्य हस्त्यश्वकोशादि कौशाम्बीपतिरग्रहीत् ॥ ३२ ॥
हृष्टः प्रविष्टः कौशाम्बीं शतानीको महामनाः ।
उवाच सेडुकं विप्रं ब्रूहि तुभ्यं ददामि किम् ॥ ३३ ॥
विप्रस्तमूचे याचिष्ये पृष्ट्वा निजकुटुम्बिनीम् ।
पर्यालोचपदं नान्यो गृहिणां गृहिणीं विना ॥ ३४ ॥

भट्टः प्रहृष्टो भट्टिन्ये तदशेषं शशंस सः ।
चेतसा चिन्तयामास सा चैवं दुद्दिशालिनी ॥ ३५ ॥

यद्यमुना याहयिष्ये नृपाद्ग्रामादिकं तदा ।
करिष्यत्यपरान्दारान्मदाय विभवः खलु ॥ ३६ ॥

दिनं प्रत्येक मालोच्य[1] स्तथायामनभोजनम् ।
दीनारं दक्षिणायां च याच्य इत्यन्वशात्पतिम् ॥ ३७ ॥

ययाचे तत्तथा विप्रो राजाऽदात्तद्दर्विदम् ।
करङ्कोऽब्धिमपि प्राप्य स्तद्भात्याम्भोचितं पयः ॥ ३८ ॥

प्रत्यहं तत्तथा लेभे प्राप्य सम्भावनां च सः ।
पुंसा राजप्रसादो हि वितनोति महार्घताम् ॥ ३९ ॥

राजमान्योऽयमित्येष नित्यं लोकैर्न्यमन्त्रत ।
यस्य प्रसन्नो नृपतिस्तस्य कः स्यान्न सेवकः ॥ ४० ॥

अग्र भुक्तं वान्यित्वा बभुजेऽनेकशोऽप्यसौ ।
प्रत्यहं दक्षिणालोभाद्धिग्धिग्लोभो द्विजन्मनाम् ॥ ४१ ॥

उपाचीयत विप्रोऽसौ विविधैर्दक्षिणाधनैः ।
प्रामरत्यवपीविश्व पादैरिव वटद्रुमः ॥ ४२ ॥

स तु नित्यमजीर्णान्नवमनाद्दुर्गवसै: ।
आमैरभूद्दूषितत्वगश्वत्थ इव लाक्षया ॥ ४३ ॥

कुष्ठी क्रमेण सञ्जज्ञे शीर्णघ्राणाङ्घ्रिपाणिकः ।
तथैवाभुङ्क्त राजाग्रे सोऽलसो हव्यवाडिव ॥ ४४ ॥

---

(१) ख ग ड आलोच्य ।

एकदा मन्त्रिभिर्भूपो विज्ञप्तो देव कुष्ठ्यसौ ।
सञ्चरिष्णुः कुष्ठरोगो नास्य योग्यमिहाशनम् ॥ ४५ ॥
सन्त्यस्य नीरुजः पुत्रास्तेभ्यः कोऽप्यत्र भोज्यताम् ।
[1]व्यङ्गितप्रतिमायां हि स्थाप्यते प्रतिमान्तरम् ॥ ४६ ॥
एवमस्त्विति राज्ञोक्तेऽमात्यैर्विप्रस्तथोदितः ।
स्वस्थानेऽस्थापयत्पुत्रं गृहे तस्थौ स्वयं पुनः ॥ ४७ ॥
मधुमण्डकवद्रुद्रमक्षिकाजालमालितः ।
पुत्रैर्गृहादपि बहिः कुटीरेऽस्थापि स द्विजः ॥ ४८ ॥
बहिःस्थितस्य तस्याज्ञां पुत्रा अपि न चक्रिरे ।
दारुपात्रे ददुः किन्तु शुनकस्येव भोजनम् ॥ ४९ ॥
जुगुप्समाना वध्वोऽपि तं भोजयितुमाययुः ।
तिष्ठिवुर्वलितग्रीवं मोटनोत्पुटनासिकाः ॥ ५० ॥
अथ सोऽचिन्तयद्विप्रः श्रीमन्तोऽमी मया कृताः ।
एभिर्मुक्तोऽस्म्यमाहत्य तीर्णाब्धोभिस्तरण्डवत् ॥ ५१ ॥
तोषयन्ति न वाचाऽपि रोषयन्त्येव मामसौ ।
कुष्ठी रुष्टो न सन्तुष्टोऽभव्य इत्यनुलापिनः ॥ ५२ ॥
जुगुप्सन्ते यथैते मां जुगुप्स्याः स्युरमी अपि ।
यथा तथा करिष्यामीत्यालोच्यावोचदात्मजान् ॥ ५३ ॥
उद्विग्नो जीवितस्याहं कुलाचारस्त्वसौ सुताः ।
मुमूर्षुभिः कुटुम्बस्य देयो मन्त्रोक्षितः पशुः ॥ ५४ ॥

---

(1) ख ग ड व्यङ्गित- ।

पशुरागीयतामेक इत्याकर्ष्यानुमोदिनः ।
आनिन्धिरे तऽथ पशुं पशुवन्मन्दबुद्धयः ॥ ५५ ॥
उदर्य्योदर्य्य च स्वाङ्गमवेन व्याधिवर्त्तिका: ।
तेनाचारि पशुस्तावद्यावत् कुष्ठी बभूव सः ॥ ५६ ॥
ददौ विप्रः स्वपुत्रेभ्यस्तं हत्वा पशुमन्यदा ।
तदाशयमजानन्तो मुग्धा बुभुजिरे च ते ॥ ५७ ॥
तीर्थे स्वार्थाय यास्यामीत्यापृच्छ्य तनयान् द्विजः ।
ययावृद्धमुखोऽरण्यं शरण्यमिव चिन्तयन् ॥ ५८ ॥
अत्यन्ततर्षितः सोऽटन्नटव्यां पयसे चिरम् ।
अपश्यन्नुहृदमिव देशे नानाद्रुमे हृदम् ॥ ५९ ॥
नीरं तीरतरुस्रस्तपत्रपुष्पफलं द्विजः ।
ग्रीष्ममध्यन्दिनार्कांशुक्वथितं क्वाथवत्यपी ॥ ६० ॥
सोऽपाद्यथा यथा वारि भूयोभूयस्तृषातुरः ।
तथा तथा विरेकोऽस्य बभूव क्रमिभिः सह ॥ ६१ ॥
स तोकगामीत्कतिभिरप्यहोभिरुदाश्रमात् ।
संनीरुसर्वावयवो वसन्तेनेव पादपः ॥ ६२ ॥
आरोग्यहृष्टो ववले विप्रः क्षिप्रं स्ववेश्मने ।
पुंसां वपुर्विशेषोत्थशृङ्गारो जन्मभूमिषु ॥ ६३ ॥
स पुर्य्यां प्रविशन् पौरैर्ददृशे जातविस्मयैः ।
देदीप्यमानो निर्मुक्तो निर्मोक इव पन्नगः ॥ ६४ ॥
पौरैः पृष्टः पुनर्जात इवोल्लाघः कथं त्वसि ।
देवताराधनादस्मीत्याचचक्षे स तु द्विजः ॥ ६५ ॥

स गत्वा स्वगृहेऽपश्यत्स्वपुत्रान् कुष्ठिनो मुदा ।
मयाऽवज्ञाफलं साधु दत्तमित्यवदच्च तान् ॥ ६६ ॥
सुतास्तमेवमूचुश्च भवता तात निर्घृणम् ।
विश्वस्तेषु किमस्मासु द्विषेवेदमनुष्ठितम् ॥ ६७ ॥
लोकैराक्रुश्यमानोऽसौ राजन्नागत्य तं पुरम् ।
आश्रयज्जीविकाहारं द्वारपालं निराश्रयः ॥ ६८ ॥
तदाऽत्र वयमायाता द्वास्थोऽस्मद्धर्मदेशनाम् ।
श्रोतुं प्रचलितोऽमुञ्चत्तं विप्रं निजकर्मणि ॥ ६९ ॥
द्वारोपविष्टः स द्वारदुर्गाणामग्रतो बलिम् ।
जन्मादृष्टमिवाभुङ्क्त यथेष्टं कष्टितः क्षुधा ॥ ७० ॥
आकण्ठं परिभुक्तान्नदोषाद्ग्रीष्मोष्मणा च सः ।
उत्पन्नया तृषाऽकारि मरुपान्थ इवाकुलः ॥ ७१ ॥
तत्र द्वाःस्थभिया स्थानं त्यक्त्वा नागात्प्रपादिषु ।
असौ जलचरान् जीवान् धन्यान्मेने तृषातुरः ॥ ७२ ॥
आरटन् वारि वारीति स तृषार्त्तो व्यपद्यत ।
इहैव नगरद्वारवाप्यामजनि दर्दुरः ॥ ७३ ॥
विहरन्तो वयं भूयोऽप्यागमामिह पत्तने ।
लोकोऽस्मद्वन्दनार्थं च प्रचचाल ससम्भ्रमः ॥ ७४ ॥
अस्मदागमनोदन्तं श्रुत्वाऽम्भोहारिणीमुखात् ।
स भेकोऽचिन्तयदिदं क्वाप्येवं श्रुतपूर्व्वकम् ॥ ७५ ॥
ऊहापोहं ततस्तस्य कुर्वाणस्य मुहुर्मुहुः ।
स्वप्नस्मरणवज्जातिस्मरणं तत्क्षणादभूत् ॥ ७६ ॥

स दर्ध्वी दर्दुरश्चैवं द्वारे संस्थाप्य मां पुरा।
द्वास्थो यं वन्दितुमगात्स आगाद्भगवानिह॥ ७७॥

यथैते यान्ति तं द्रष्टुं लोका यास्याम्यहं तथा।
सर्वसाधारणी गङ्गा नहि कस्यापि पैतृकी॥ ७८॥

ततोऽस्मद्वन्दनाहेतोरुत्प्लुत्योत्प्लुत्य सोऽध्वनि।
आयांस्तेऽश्वखुरक्षुस्सो भेकः पञ्चत्वमासवान्॥ ७९॥

दर्दुराङ्कोऽयमुत्पेदे देवोऽस्मद्भक्तिभावितः।
भावना हि फलत्येव विनाऽनुष्ठानमप्यहो॥ ८०॥

इन्द्रः सदस्युवाचेदमुपश्रेणिकमार्हताः।
अश्रद्दधानस्तदसौ तत्परीक्षार्थमागतः॥ ८१॥

गोशीर्षचन्दनेनायमानश्च चरणौ मम।
त्वद्दृष्टिमोहनायान्यत्सर्वं व्यधित वैक्रियम्॥ ८२॥

अथोचे श्रेणिकः स्वामिन्नमङ्गल्यं प्रभोः क्षुते।
एषोऽन्येषां तु मङ्गल्यामङ्गल्यानि जगाद किम्॥ ८३॥

अथाचचक्षे भगवान् किं भवेऽद्यापि तिष्ठसि।
शीघ्रं मोक्षं प्रयाहीति मां म्रियस्वेत्युवाच सः॥ ८४॥

स त्वां जगाद जीवेति जीवतस्ते यतः सुखम्।
नरके नरशार्दूल मृतस्य हि गतिस्तव॥ ८५॥

जीवन् धर्मं विधत्ते स्वादिमार्केऽनुत्तरे मृतः।
जीव म्रियस्व वेत्येवं तेनाभयमभाषत॥ ८६॥

जीवन् पापपरो मृत्वा सप्तमं नरकं व्रजेत्।
कालसौकरिकस्तेन प्रोचे मा जीव मा मृथाः॥ ८७॥

तच्छ्रुत्वा श्रेणिको नत्वा भगवन्तं व्यजिज्ञपत् ।
त्वयि नाथे जगन्नाथ कथं मे नरके गतिः ॥ ८८ ॥
बभाषे भगवानेवं पुरा त्वमसि भूपते ।
बद्धायुर्नरके तेन तत्रावश्यं गमिष्यसि ॥ ८९ ॥
शुभानामशुभानां वा फलं प्राग् बद्धकर्मणाम् ।
भोक्तव्यं तद् द्वयमपि नान्यथा कर्तुमीश्महे ॥ ९० ॥
आद्यो भाविजिनचतुर्विंशतौ त्वं भविष्यसि ।
पद्मनाभाभिधो राजन् खेदं मा स्म कृथास्ततः ॥ ९१ ॥
श्रेणिकोऽथावदन्नाथ किमुपायोऽस्ति कोऽपि सः ।
नरकाद्येन रक्ष्येऽहमन्धकूपादिवान्धलः ॥ ९२ ॥
भगवान् व्याजहारेदं साधुभ्यो भक्तिपूर्वकम् ।
ब्राह्मण्या चेत्कपिलया भिक्षां दापयसे मुदा ॥ ९३ ॥
कालसौकरिकात्सूनां विमोचयसि वा यदि ।
तदा ते नरकान्मोक्षो राजन् जायेत नान्यथा ॥ ९४ ॥
अस्यगित्युपदेशं स हृदि हारमिवोद्वहन् ।
प्रणम्य श्रीमहावीरं चचाल स्वाश्रयं प्रति ॥ ९५ ॥
अत्रान्तरे परीक्षार्थं दर्दुराङ्केन भूपतेः ।
अकार्यं विदधत्साधुः कैवर्त्त इव दर्शितः ॥ ९६ ॥
तं दृष्ट्वा प्रवचनस्य मालिन्यं मा भवत्विति ।
निवार्याकार्यतः साक्षा स्वस्थकं प्रत्यगान्नृपः ॥ ९७ ॥
स देवो दर्शयामास साध्वीमुदरिणीं पुनः ।
नृपः शासनभक्तस्तां जुगोप निजवेश्मनि ॥ ९८ ॥

प्रत्यक्षीभूय देवोऽपि तमूचे साधु साधु भोः ।
सम्यक्त्वाच्चाल्यसे नैव पर्वतः स्वपदादिव ॥ ९९ ॥
त्वनाथ यादृशं शक्रः सदसि त्वामचीकथत् ।
दृष्टस्तादृश एवासि मिथ्यावाचो न तादृशाम् ॥ १०० ॥
दिव्यनिर्मितनक्षत्रश्रेणिकं [1]श्रेणिकाय सः ।
व्यश्राणयत्ततो हारं गोलकद्वितयं तथा ॥ १ ॥
योऽमुं सन्धास्यते हारं त्रुटितं स मरिष्यति ।
इत्युदीर्य तिरोधत्त स्वप्नदृष्ट इवामरः ॥ २ ॥
दिव्यं देव्यै ददौ हारं चेल्लणायै मनोहरम् ।
गोलकद्वितयं तत्तु नन्दायै नृपनिर्मुदा ॥ ३ ॥
दानस्यास्यास्मि योग्येति सेर्ष्यं नन्दा मनस्विनी ।
आस्फाल्य स्फोटयामास स्तम्भे तद्गोलकद्वयम् ॥ ४ ॥
एकस्मात्कुण्डलद्वन्द्वं चन्द्रद्वन्द्वमिवामलम् ।
देदीप्यमानमन्यस्मात्क्षौमयुग्मं च निःसृतम् ॥ ५ ॥
तानि दिव्यानि रत्नानि नन्दा सानन्दमग्रहीत् ।
महतां महतां स्यादचिन्तितः ॥ ६ ॥
राजा ययाचे कपिलां साधुभ्यः श्रद्धयाऽन्विता ।
भिक्षां प्रयच्छ निर्भिक्षां त्वां करिष्ये धनोच्चकैः ॥ ७ ॥
कपिलोचे विधत्से मां सर्वां स्वर्णमयीं यदि ।
छिनत्सि वा तथाप्येतदकृत्यं न करोम्यहम् ॥ ८ ॥

---

(१) ख श्रेणिकं च सः ।

कालसौकरिकोऽप्यूचे राज्ञा सूनां विमुञ्चयन् ।
दास्येऽहमर्थमर्थस्य लोभात्त्वमसि सौनिकः ॥ ९ ॥
सूनायां ननु को दोषो यया जीवन्ति मानवाः ।
तां न जातु त्यजामीति कालसौकरिकोऽवदत् ॥ १० ॥
सूनाव्यापारमेषोऽत्र करिष्यति कथं त्विति ।
नृपः क्षिप्त्वाऽन्धकूपे तमहोरात्रमधारयत् ॥ ११ ॥
अथ विज्ञपयामास गत्वा भगवते नृपः ।
सोऽत्याजि सौनिकः सूनामहोरात्रमिदं विभो ॥ १२ ॥
सर्वज्ञोऽभिदधे राजन्नन्धकूपेऽपि सोऽवधीत् ।
शतानि पञ्च महिषान् स्वयं निर्माय मृन्मयान् ॥ १३ ॥
तच्छ्रुत्वा श्रेणिकोऽपश्यत् स्वयमुद्विविजे ततः ।
धिगस्तु मे पुरा कर्म नान्यथा भगवद्गिरः ॥ १४ ॥
पञ्च पञ्च शतान्येवं महिषान्निघ्नतोऽन्वहम् ।
कालसौकरिकस्योच्चैः पापराशिरवर्द्धत ॥ १५ ॥
इहापि रोगास्तस्यामन्दाकर्णैरतिदारुणाः ।
पर्यन्तनरकप्राप्तिकपर्युत्कलितैरभवन्: ॥ १६ ॥
हा तात हा मातरिति व्याधिबाधाकदर्थितः ।
वध्यमानः शूकरवत्कालसौकरिकोऽरटत् ॥ १७ ॥
सोऽङ्गनातूलिकापुष्पवीणाक्वणितमार्जिताः ।
दृष्टित्वङ्नासिकाकर्णजिह्वाशूलान्यमन्यत ॥ १८ ॥
ततस्तस्य सुतस्तादृक् स्वरूपं सुलसोऽखिलम् ।
जगाद जगदाप्तायाभयायाभयदायिने ॥ १९ ॥

अथेऽभयस्त्वपिता यत्नको तस्येदृशं फलम् ।
सत्यमत्युग्रपापानां फलमत्रैव लभ्यते ॥ २० ॥
तथाऽप्यस्य कुरु प्रीत्यै विपरीतेन्द्रियार्थताम् ।
अमेध्यगन्धविध्वंसे भवेन्न जलमौषधम् ॥ २१ ॥
अथैत्य सुलसस्तं तु कटुतिक्तान्यभोजयत् ।
अपाययदपोऽत्युष्णास्तमलपुत्रकोदराः ॥ २२ ॥
भूयिष्ठविष्ठया सुष्ठु सर्वाङ्गीणं व्यलेपयत् ।
उद्दंकण्टकमय्यां च शय्यायां पर्यसूषुपत् ॥ २३ ॥
श्रावयामास चक्रीवत्क्रमेलकरवान् कटून् ।
रक्षोवेतालकङ्कालघोररूपाण्यदर्शयत् ॥ २४ ॥
तैः प्रीतः सोऽब्रवीत्पुत्रं चिरात्स्वाद्य भोजनम् ।
शीतं वारि मृदुः शय्या सुगन्धि च विलेपनम् ॥ २५ ॥
शब्दः श्रुतिसुधाऽमूनि रूपाण्येकं सुखं दृशोः ।
भक्तेनापि त्वयाऽस्मात् किं वञ्चितोऽस्मि चिरं सुखात् ॥२६॥
तच्छ्रुत्वा सुलसो दध्याविदमत्रैव जन्मनि ।
अहो पापफलं घोरं नरके किं भविष्यति ॥ २७ ॥
सुलसे चिन्तयत्येवं स मृत्वा प्राप दारुणम् ।
सप्तमे नरके स्थानमप्रतिष्ठानसंज्ञितम् ॥ २८ ॥
कृतौर्ध्वदेहिकोऽभाणि सुलसः स्वजनैरिति ।
पितुः श्रय पदं स्याम सनाथा हि त्वया यथा ॥ २९ ॥
सुलसस्तानुवाचेदं करिष्ये कर्म नाप्यदः ।
किञ्चिल्लेभे फलं पित्राऽप्यस्यैवामुष्य कर्मणः ॥ ३० ॥

यथा मम प्रिया प्राणास्तथाऽन्यप्राणिनामपि ।
स्वप्राणिताय धिगहो परप्राणप्रमारणम् ॥ ३१ ॥

हिंसाजीविकया जीवेत् कः प्रेक्ष्य फलमीदृशम् ।
मरणैकफलं ज्ञात्वा किंपाकफलमत्ति कः ॥ ३२ ॥

अथ तं स्वजना प्रोचुः पापं प्राणिवधेऽत्र यत् ।
तद्विभज्य ग्रहीष्यामो हिरण्यमिव गोत्रिणः ॥ ३३ ॥

त्वमेकं महिषं हत्वा हनिष्यामोऽपरान् वयम् ।
अत्यल्पमेव ते पापं भविष्यति ततो ननु ॥ ३४ ॥

आदाय सुलसः पित्र्यं कुठारं पाणिना ततः ।
तेनाजघ्ने निजां जङ्घां मूर्च्छितो निपपात च ॥ ३५ ॥

लब्धसंज्ञस्ततोऽवादीत् [१]माक्रन्दः करुणस्वरम् ।
हा कुठारप्रहारेण कठोरेणास्मि पीडितः ॥ ३६ ॥

गृह्णीत बान्धवा यूयं विभज्य मम वेदनाम् ।
स्यामल्पवेदनो येन पीडितं पात पात माम् ॥ ३७ ॥

सुलसं विस्मयनमस्ते च प्रतिवभाषिरे ।
पीडा कस्यापि केनापि ग्रहीतुं शक्यते किमु ॥ ३८ ॥

सुलसो व्याजहारेदं यद् व्यथामियतीमपि ।
न मे ग्रहीतुमीशिध्वे तत्कथं नरकव्यथाम् ॥ ३९ ॥

कृत्वा पापं कुटुम्बार्थं घोरां नरकवेदनाम् ।
एकोऽमुत्र सहिष्येऽहं स्यास्यन्त्यत्रैव बान्धवाः ॥ ४० ॥

---

(१) ख ग क्रन्दन् दारुणस्वरम् । ङ घ क्रन्दन् क- ।

हिंसां तन्न करिष्यामि पैत्रिकीमपि सर्वथा ।
पिता भवति यद्यन्धः किमन्धः स्यात्सुतोऽपि हि ॥ ४१ ॥
एवं व्याहरमाणस्य सुलसस्यातिपीडया ।
प्रतिजागरणायागादभयः श्रेणिकात्मजः ॥ ४२ ॥
परिरभ्य बभाषे तमभयः साधु साधु भोः ।
सर्वं ते श्रुतमस्माभिः प्रमोदाद्वयमागताः ॥ ४३ ॥
पापात्पित्र्यादपक्रामन् कर्दमादिव दूरतः ।
त्वमेकः श्लाघ्यसे हन्त पक्षपातो गुणेषु नः ॥ ४४ ॥
सुलसं पेशलैरेवमालापैर्धर्मवत्सलः ।
अनुमोद्य निजं धाम स जगाम नृपात्मजः ॥ ४५ ॥
स्वाननाहत्य सुलसो गृहीतद्वादशव्रतः ।
दौर्गत्यभीतोऽस्थाज्जैनधर्मे वीर इवेश्वरे ॥ ४६ ॥

कालसौकरिकसूनुरिवेदं यस्त्यजेत् कुलभवामपि हिंसाम् ।
स्वर्गसम्पदवीयसि तस्य स्वयमासविषयो न हि किञ्चित् ॥१४७॥३०॥

अथ हिंसां कुर्वन्नपि दमादिभिः पुण्यमर्जयत्येव
पापं च विशोधयेदित्याह —

दमो देवगुरूपास्तिर्दानमध्ययनं तपः ।
सर्वमप्येतदफलं हिंसां चेन्न परित्यजेत् ॥ ३१ ॥

दम इन्द्रियजयः, देवगुरूपास्तिर्देवसेवा गुरुसेवा च, दानं पात्रेषु द्रव्यविश्राणनं, अध्ययनं धर्मशास्त्रादेः पठनं, तपः कृच्छ्र-चान्द्रायणादि, एतद्दमादि सर्वमपि न तु किञ्चिदेव, अफलं

पुण्यार्जनपापक्षयादिफलरहितं चेद्यदि हिंसां शान्तिकहेतुं कुलक्रमायातां वा न परित्यजेत् परिहरेत् ॥ एवं तावन्मांसलुब्धानां शान्तिकार्थिनां कुलाचारमनुपालयतां च या हिंसा सा प्रतिषिद्धा ॥ ३१ ॥

इदानीं शास्त्रीयां हिंसां प्रतिषेधन् शास्त्रत्वेन वाऽऽक्षिपति—

विश्वस्तो मुग्धधीर्लोकः पात्यते नरकावनौ ।
अहो नृशंसैर्लोभान्धैर्हिंसाशास्त्रोपदेशकैः ॥ ३२ ॥

हिंसाशास्त्रं वक्ष्यमाणं तस्योपदेशका हिंसाशास्त्रोपदेशका मन्वादयस्तैः किं विशिष्टैर्नृशंसैर्निर्दयैः । दयावान् हि कथं हिंसाशास्त्रमुपदिशेत् । नृशंसत्वे हेतुमाह । लोभान्धैः मांसलोभान्धैः स्वाभाविकविवेकविवेकिसंसर्गचक्षूरहितैः ।

यदाह—

एकं हि चक्षुरमलं सहजो विवेक-
स्तद्वद्भिरेव सह संवसतिर्द्वितीयम् ।
एतद्द्वयं भुवि न यस्य स तत्त्वतोऽन्ध-
स्तस्यापमार्गचलने खलु कोऽपराधः ॥ १ ॥

अहो इति निर्वेदे यतो विश्वस्तो विस्रब्धः विश्वस्तत्वे हेतुर्मुग्धधीः । चतुरबुद्धिर्हि कृत्याकृत्यं विवेचयन् न प्रतारकवचस्सु विश्वसिति लोकः प्राकृतो जनः पात्यते क्षिप्यते नरकावनौ नरकपृथ्व्याम् ॥ ३२ ॥

हिंसाशास्त्रमेव यदाहुरित्यनेन प्रस्तुत्य निर्दिशति—

यज्ञार्थं पशव: सृष्टा: स्वयमेव स्वयंभुवा ।
यज्ञोऽस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवध: ॥३३॥

यज्ञार्थं यज्ञनिमित्तं स्वयंभुवा प्रजापतिना पशव: सृष्टा उत्पादिता: स्वयमेवेत्यर्थवाद: अस्य जगतो विश्वस्य यज्ञो ज्योतिष्टोमादि: भूत्यै भूतिर्विभव: तस्मात्तत्र यो वध: स न वधो विज्ञेय: हिंसाजन्यस्य पापस्यानुत्पत्ते: । एवमुच्यते । कथं पुनर्यज्ञे हिंसादोषो नास्ति । उच्यते । हिंसा हिंस्यमानस्य महानपकार: प्राणवियोगेन पुत्रदारधनादिवियोगेन वा सर्वानर्थोत्पत्तेर्दुष्कृतस्य वा नरकादिफलविपाकस्य प्रत्यासत्ते: । यज्ञे तु हतानामुपकारो नापकार: नरकादिफलानुत्पत्ते: ॥ ३३ ॥

एतदेवाह—

ओषध्य: पशवो वृक्षास्तिर्यञ्च: पक्षिणस्तथा ।
यज्ञार्थं निधनं प्राप्ता: प्राप्नुवन्त्युच्छ्रितिं पुन: ॥३४॥

ओषध्यो दर्भादय: पशवश्छागादय: वृक्षा यूपादय: तिर्यञ्चो गवाश्वादय: पक्षिण: कपिञ्जलादय: यज्ञार्थं यज्ञनिमित्तं निधनं विनाशं प्राप्ता: । यद्यपि केषाञ्चित्तत्र निधनं नास्ति तथापि या च यावती च पीडा विद्यत इति सा निधनशब्देन लक्ष्यते । प्राप्नुवन्ति यान्ति उच्छ्रितिमुत्कर्षं देवगन्धर्वयोनित्वमुत्तरकुर्वादिषु दीर्घायुष्कादि च ॥ ३४ ॥

यावत्यः काश्चिच्छास्त्रे चोदिता हिंसास्ताः संक्षिप्य दर्शयति—

मधुपर्के च यज्ञे च पितृदैवतकर्मणि ।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥ ३५ ॥

मधुपर्कः क्रियाविशेषः तत्र गोवधो विहितः यज्ञो ज्योतिष्टोमादिः तत्र पशुवधो विहितः पितरो दैवतानि यत्र कर्मण्यष्टकादौ तच्च श्राद्धं यद्वा पितृणां दैवतानां च कर्म महायज्ञादि ॥ ३५ ॥

एष्वर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद्द्विजः ।
आत्मानं च पशूंश्चैव गमयत्युत्तमां गतिम् ॥३६॥

एतानर्थान् साधयितुं पशून् हिंसन् द्विज आत्मानं पशूंश्चोत्तमां गतिं स्वर्गापवर्गलक्षणां गमयति प्रापयति वेदतत्त्वार्थविदिति विदुषोऽधिकारित्वमाह ॥ ३६ ॥

हिंसाशास्त्रमनूद्य पुनस्तदुपदेशकानाक्षिपति—

ये चक्रुः क्रूरकर्माणः शास्त्रं हिंसोपदेशकम् ।
क्व ते यास्यन्ति नरके नास्तिकेभ्योऽपि नास्तिकाः ॥३७॥

ये मन्वादयः क्रूरं निर्घृणं कर्म येषां ते क्रूरकर्माणः शास्त्रं स्मृत्यादि हिंसाया उपदेशकं चक्रुः ते हिंसाशास्त्रकर्त्तारः क्व नरके यास्यन्तीति विस्मयः ते चास्तिकाभासा अपि नास्तिकेभ्योऽपि नास्तिकाः परमनास्तिका इत्यर्थः ॥ ३७ ॥

उक्तं चेत्यनेन संवादश्लोकमुपदर्शयति—

वरं वराकश्चार्वाको योऽसौ प्रकटनास्तिकः ।
वेदोक्तितापसच्छद्मच्छन्नं रक्षो न जैमिनिः ॥ ३८ ॥

वरमिति मनागिष्टो जैमिन्यपेक्षया चार्वाको लौकायतिकः वराक इति दम्भरहितत्वादनुकम्प्यः । तदेवाह । योऽसौ प्रकट नास्तिकः । जैमिनिस्तु न वरं कुतः वेदोक्तितापसच्छद्म तापसवेषस्तेन छन्नं रक्षो राक्षसः अथ हि वेदोक्तिं मुखे कृत्वा सकलप्राणिवञ्चनात् मायावी राक्षस इव । यच्चोक्तम् । यज्ञार्थं पशवः सृष्टा इति तदाप्तानं निजनिजकर्मनिर्माण-माहात्म्येन नानायोनिषु जन्तवः समुत्पद्यन्त इति व्यलीकः कस्यचित् सृष्टिवादः यज्ञोऽस्य भूत्यै सर्वस्येति त्वर्थवादः पक्षपातमात्रं वधोऽवधो इति नृपक्षामपात्रं[1] वचः यज्ञार्थं विनि-हतानां चौषध्यादीनां पुनरुच्छ्रयप्राप्तिः अश्रद्धानभाषितं अकृत-सुकृतानां यज्ञवधमात्रेणोच्छ्रितगतिप्राप्त्ययोगात् । अपिच । यज्ञ-हननमात्रेण यदि उच्छ्रितगतिप्राप्तिस्तर्हि मातापित्रादीनामपि यज्ञे वधः किं न क्रियते ।

यदाहुः—

नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया
सन्तुष्टस्तृणभक्षणेन सततं साधो न युक्तं तव ।

---

(१) ख ङ -मात्रम् ।

स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो
यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बान्धवैः ॥१॥

मधुपर्कादिषु च हिंसा श्रेयसे नान्यत्रेति स्वच्छन्दभाषितं, को हि विशेषो हिंसाया येनैका श्रेयस्करी नान्येति। पुण्यात्मानस्तु सर्वाऽपि हिंसा न कर्त्तव्येत्याहुः।

यथा—

[1]सव्वे जीवा वि इच्छंति जीविउं न मरिज्जिउं।
तम्हा पाणिवहं घोरं निग्गंथा वज्जयंति णम् ॥ १ ॥

यत्तूक्तं—

आत्मानं च पशूंश्चैव गमयत्युत्तमां गतिमिति।

मदतिमहासाहसिकादन्यः को वक्तुमर्हति। अपि नाम पशोरहिंसस्याकामनिर्जरयोत्तमगतिलाभः संभवेत् द्विजस्य तु निशातकृपाणिकाप्रहारपूर्वं सौनिकस्येव निर्दयस्य हिंसतः कथमुत्तमगतिसंभावनाऽपि स्यात् ॥ ३८ ॥

एतदेव विशेषाभिधानपूर्वकमुपसंहरन्नाह—

देवोपहारव्याजेन यज्ञव्याजेन येऽथवा।
घ्नन्ति जन्तून् गतघृणा घोरां ते यान्ति दुर्गतिम् ॥३९॥

देवा भैरवचण्डिकादयस्तेभ्यः उपहारो बलिः स एव व्याजं छद्म तेन महानवमीमाघाष्टमीचैत्राष्टमीनमसितकादिषु देवपूजाच्छद्म-

(१) सर्वे जीवा अपि इच्छन्ति जीवितुं न मर्तुम्।
तस्मात् प्राणिवधं घोरं निर्ग्रन्था वर्जयन्ति ॥ १ ॥

ना ये जन्तुघातं कुर्वन्ति ये च यज्ञव्याजेन गतघृणा निर्दयास्ते घोरां रौद्रां दुर्गतिं नरकादिलक्षणां यान्ति अत्र देवोपहारव्याजेनेति विशेषाभिधानं यज्ञव्याजेनेत्युपसंहार: अपि च निराबाधे धर्मसाधने स्वाधीने साबाधपराधीनधर्मसाधनपरिग्रहो न श्रेयान् ।

यदाहु:—

अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदिति ॥ ३८ ॥

एतदेवाह—

शमशीलदयामूलं हित्वा धर्मं जगद्धितम् ।
अहो हिंसाऽपि धर्माय जगदे मन्दबुद्धिभि: ॥४०॥

शम: कषायेन्द्रियजय: शीलं सुस्वभावता दया भूतानुकम्पा एतानि मूलं कारणं यस्य स तथा धर्मोऽभ्युदयनि:श्रेयसकारणं तं किं विशिष्टं जगद्धितं, हित्वा उपेक्ष्य शमशीलादीनि धर्मसाधनान्युपेक्ष्येत्यर्थ:, अहो इति विस्मये हिंसा अपि धर्मसाधनबहिर्भूता धर्मसाधनत्वेन मन्दबुद्धिभिरुक्ता सर्वजनप्रसिद्धानि शमशीलादीनि धर्मसाधनान्युपेक्ष्य अधर्मसाधनमपि हिंसां धर्मसाधनत्वेन प्रतिपादयतां परेषां व्यक्तैव मन्दबुद्धिता । एवं तावल्लोभमूला शान्त्यर्था कुलक्रमायाता यज्ञनिमित्ता देवोपहारहेतुका च हिंसा प्रतिषिद्धा ॥ ४० ॥

पितृनिमित्ता अवशिष्यते तां प्रति निषेधितुं परशास्त्रीयां षट्श्लोकीमनुवदति—

हविर्यच्चिरराचाय यच्चानन्त्याय कल्पते ।

पितृभ्यो विधिवद्दत्तं तत्प्रवच्याम्यशेषतः ॥ ४१ ॥

चिररात्रशब्दो दीर्घकालवचनः यच्चानन्त्याय केनचिद्धविषा दीर्घ-कालतृप्तिर्जायते केनचिदनन्तैव तदुभयं प्रवच्यामि ॥ ४१ ॥

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।

दत्तेन मासं प्रीयन्ते विधिवत्पितरो नृणाम् ॥४२॥

तिलादिग्रहणं नेतरपरिसंख्यानार्थमपि तूपात्तानां फलविशेषप्रद-र्शनार्थम् । एतैर्विधिवद्दत्तैः पितरो मासं प्रीयन्ते ॥ ४२ ॥

द्वौ मासौ मत्स्यमांसेन त्रीन् मासान् हारिणेन तु ।

औरभ्रेणाथ चतुरः शाकुनेनेह पञ्च तु ॥ ४३ ॥

मत्स्याः पाठीनकाद्याः, हरिणा मृगाः, औरभ्रा मेषाः, शकुनय आरण्यकुक्कुटाद्याः ॥ ४३ ॥

षण्मासांश्छागमांसेन पार्षतेनेह सप्त वै ।

अष्टावेणस्य मांसेन रौरवेण नवैव तु ॥ ४४ ॥

छागश्छगलः, पृषतैणरुरवो मृगजातिविशेषवचनाः ॥ ४४ ॥

दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः ।

शशकूर्मयोर्मांसेन मासानेकादशैव तु ॥ ४५ ॥

वराह आरण्यशूकरः ॥ ४५ ॥

संवत्सरं तु गव्येन पयसा पायसेन तु ।

वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥ ४६ ॥

श्रुतानुमितयोः श्रुतसंबन्धस्य बलीयस्त्वाद्गव्येन पयसा पायसेन च संबन्धो न मांसेन प्राकरणिकेन, अन्ये तु व्याख्यानयन्ति मांसेन गव्येन पयसा पायसेन वा पयसो विकारः पायसं दध्यादि पयःसंस्कृते त्वोदने प्रसिद्धिः वार्ध्रीणसो जरच्छागः यस्य पिबतो जलं त्रीणि स्पृशन्ति जिह्वा कर्णौ च ॥

यदाह—

त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् ।

वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाः पितृकर्मसु ॥ १ ॥ ४६ ॥

पितृनिमित्तहिंसोपदेशकं शास्त्रमनूद्य तदुपदिष्टां हिंसां दूषयति—

इति स्मृत्यनुसारेण पितॄणां तर्पणाय या ।

मूढैर्विधीयते हिंसा साऽपि दुर्गतिहेतवे ॥ ४७ ॥

इति पूर्वोक्ता या स्मृतिर्धर्मसंहिता तस्या अनुसारेणालम्बनेन पितरः पितुर्वंश्याः ।

यच्छ्रुतिः—

पित्रे पितामहाय प्रपितामहाय पिण्डं निर्वपेदिति ।

तेषां तर्पणाय तृप्तये मूढैरविचारकैर्या हिंसा विधीयते सापि न केवलं मांसलोभादिनिमित्ता दुर्गतिहेतवे नरकाय न हि स्वल्पाऽपि काचिद्धिंसा न नरकादिनिबन्धनं यत्तु पितृतृप्तिप्रपञ्चवर्णनं

तन्मुग्धबुद्धिप्रतारणमात्रं न हि तिलव्रीह्यादिभिर्मत्स्यमांसादिभिर्वा परामूनां पितॄणां तृप्तिरुत्पद्यते ।

यदाह —

मृतानामपि जन्तूनां यदि तृप्तिर्भवेदिह ।

निर्वाणस्य प्रदीपस्य स्नेहः संवर्द्धयेच्छिखाम् ॥ १ ॥ इति

न केवलं हिंसा दुर्गतिहेतुरेव किं तु हिंस्यमानैर्जन्तुभिर्विरोध-निबन्धनत्वेन स्वस्यापि इहामुत्र च हिंसाहेतुतया भयहेतुः ॥४७॥

अहिंसस्य तु सर्वजीवाभयदानशौण्डस्य न कुतोऽपि भयमस्तीत्याह—

यो भूतेष्वभयं दद्याद्भूतेभ्यस्तस्य नो भयम् ।

यादृग्वितीर्यते दानं तादृगासाद्यते फलम् ॥ ४८ ॥

स्पष्टम् ॥ ४८ ॥

एवं तावद्धिंसापराणां मनुष्याणां नरकादि हिंसाफलमभिहितं सुराणामपि हिंसकानां जुगुप्सनीयचरितानां मूढजनप्रसिद्धं पूज्यत्वं परिदेवयते—

कोदण्डदण्डचक्रासिशूलशक्तिधराः सुराः ।

हिंसका अपि हा कष्टं पूज्यन्ते देवताधिया ॥४९॥

हा कष्टमित्यतिशयनिर्वेदे हिंसका अपि रुद्रप्रभृतयः सुराः प्राकृते-र्जनैः पूज्यन्ते विविधपुष्पोपहारादिभिरर्च्यन्ते ते च यथाकथञ्चिद-भ्यर्चितां नाम केवलं देवताबुद्धिस्तत्र विरुद्धा इत्याह देवताधिया हिंसकत्वे विशेषणद्वारेण हेतुमाह कोदण्डदण्डचक्रासिशूलशक्ति-

धरा इति कोदण्डादिधरत्वाद्धिंसकाः हिंसकत्वमन्तरेण कोदण्डादीनां धारयितुमयुक्तत्वात् कोदण्डधरः शङ्करः दण्डधरो यमः चक्रासिधरो विष्णुः शूलधरो शिवो शक्तिधरः कुमारः उपलक्षणमन्येषां शस्त्राणां शस्त्रधराणां च ॥ ४८ ॥

एवं प्रपञ्चतो हिंसां प्रतिषिध्य तद्विपक्षभूतमहिंसाव्रतं श्लोकद्वयेन स्तौति—

मातेव सर्वभूतानामहिंसा हितकारिणी ।
अहिंसैव हि संसारमरावमृतसारणिः ॥ ५० ॥
अहिंसा दुःखदावाग्निप्रावृषेण्यघनावली ।
भवभ्रमिरुगार्त्तानामहिंसा परमौषधी ॥ ५१ ॥

स्पष्टम् ॥ ५० ॥ ५१ ॥

अहिंसाव्रतस्य फलमाह—

दीर्घमायुः परं रूपमारोग्यं श्लाघनीयता ।
अहिंसायाः फलं सर्वं किमन्यत्कामदैव सा ॥५२॥

अहिंसापरो हि परेषामायुर्वर्द्धयन्ननुरूपमेव जन्मान्तरे दीर्घायुष्टं लभते तथैव पररूपमविनाशयन् प्रकृष्टं रूपमाप्नोति तथैव चास्वास्थ्यहेतुं हिंसां परिहरन् परमस्वास्थ्यरूपमारोग्यं लभते सर्वभूताभयप्रदश्च तेभ्य आत्मनः श्लाघनीयतामश्नुते एतत्सर्वमहिंसायाः फलं कियद्वा शृङ्गग्राहिकया वक्तुं शक्यते । इत्याह किमन्यत्कामदेव सा यद्यत्कामयते तत्तस्मै ददाति उपलक्षणमेतदकामितस्यापि स्वर्गापवर्गादेः फलस्य दानात् ।

अत्रान्तरे श्लोकः—

हेमाद्रिः पर्वतानां हरिरमृतभुजां चक्रवर्त्ती नराणां
शीतांशुर्ज्योतिषां स्वस्तरुरवनिरुहां चण्डरोचिर्ग्रहाणाम् ।
सिन्धुस्तोयाशयानां जिनपतिरसुरामर्त्यमर्त्याधिपानां
यद्वत्तद्वद्व्रतानामधिपतिपदवीं यात्यहिंसा किमन्यत् ॥ १ ॥

उक्तमहिंसाव्रतम् ॥ ५२ ॥

अथ सूनृतव्रतस्यावसरस्तच्च नालीकविरतिव्रतमन्तरेणोपपद्यते, न च तत्फलमनुपदर्श्यालीकाद्विरतिं कारयितुं शक्यः पर इत्यलीकफलमुपदर्श्य तद्विरतिमुपदर्शयति—

मन्मनत्वं काहलत्वं मूकत्वं मुखरोगिताम् ।
वीक्ष्यासत्यफलं कन्यालीकाद्यसत्यमुत्सृजेत् ॥५३॥

मन एव मन्तृ यत्र तन्मन्मनं परस्याप्रतिपादकं वचनं तद्योगात्पुरुषोऽपि मन्मनस्तस्य भावो मन्मनत्वं १ काहलमव्यक्तवर्णं वचनं तद्योगात्पुरुषोऽपि काहलस्तस्य भावः काहलत्वं २ मूकोऽवाक् तस्य भावो मूकत्वं ३ मुखस्य रोगा उपजिह्वादयस्तेऽस्य सन्ति मुखरोगी तस्य भावो मुखरोगिता ४ एतत्सर्वमसत्यफलं वीक्ष्य शास्त्रबलेनोपलभ्यासत्यं स्थूलासत्यमुत्सृजेच्छ्रावकः ।

यदाह—

मूका जडाश्च विकला वाग्घीना वाग्जुगुप्सिताः ।
पूतिगन्धमुखाश्चैव जायन्तेऽनृतभाषिणः ॥ १ ॥ ५३ ॥

असत्यं च तत्र कन्यालीकादि वक्ष्यमाणम् तदेवाह—

कन्यागोभूम्यलीकानि न्यासापहरणं तथा ।
कूटसाक्ष्यं च पञ्चेति स्थूलासत्यान्यकीर्त्तयन् ॥ ५४ ॥

कन्यालीकं १ गवालीकं २ भूम्यलीकं ३ न्यासापहरणं ४ कूटसाक्ष्यं च ५ एतानि पञ्च स्थूलासत्यान्यकीर्त्तयन् जिनाः । तत्र कन्याविषयमलीकं कन्यालीकं भिन्नकन्यामभिन्नां विपर्ययं वा वदतो भवति; इदं च सर्वस्य कुमारादिद्विपदविषयस्यालीकस्योपलक्षणं १ गवालीकमल्पक्षीरां बहुक्षीरां विपर्ययं वा वदतः, इदमपि सर्वचतुष्पदविषयस्यालीकस्योपलक्षणं २ भूम्यलीकं परसत्कामप्यात्मादिसत्कां विपर्ययं वा वदतः, इदं च शेषपादपाद्यपदद्रव्यविषयालीकस्योपलक्षणं ३ अथ द्विपदचतुष्पदापदग्रहणमेव कस्मान्न कृतम् । उच्यते । कन्याद्यलीकानां लोके अतिगर्हितत्वेन रूढत्वादिति । न्यस्यते रक्षणायान्यस्मै समर्प्यत इति न्यासः सुवर्णादिः तस्यापहरणमपलापस्तद्वचनं स्थूलमृषावादः इदं चानेनैव विशेषेण पूर्वालीकेभ्यो भेदेनोपात्तं; कूटसाक्ष्यं प्रमाणीकृतस्य लञ्चामत्सरादिना कूटं वदतः, यथाहमत्र साक्षी अस्य च परकीयपापसमर्थकत्वलक्षणविशेषमाश्रित्य पूर्वेभ्यो भेदेनोपन्यासः, एतानि क्लिष्टाशयसमुत्थत्वात् स्थूलासत्यानि ॥ ५४ ॥

एतेषां स्थूलालीकत्वे विशेषणद्वारेण हेतुमुपन्यस्य प्रतिषेधमाह—

सर्वलोकविरुद्धं यद्यद्विश्वसितघातकम् ।
यद्विपक्षस्य पुण्यस्य न वदेत्तदसूनृतम् ॥ ५५ ॥

सर्वलोके विरुद्धत्वात् कन्यागोभूम्यलीकानि न वदेत् विश्व-
सितघातकत्वान्न्यासापलापं न वदेत् पुण्यस्य धर्मस्य विपक्षरूपोऽ-
धर्मस्तं हि वदन् प्रमाणीकृतो विवादिभिरभ्यर्थितो धर्मं ब्रूया-
दधर्ममिति । इति धर्मविपक्षत्वात्कूटसाक्ष्यं न वदेत् ॥ ५५ ॥

असत्यस्य फलविशेषमुपदर्शयंस्तत्परिहारमुपदिशति—

असत्यतो लघीयस्त्वमसत्याद्वचनीयता ।

अधोगतिरसत्याच्च तदसत्यं परित्यजेत् ॥ ५६ ॥

लघीयस्त्वं वचनीयता चासत्यस्यैहिकं फलं, अधोगतिरामु-
ष्मिकम् ॥ ५६ ॥

अथ भवतु क्लिष्टाशयपूर्वस्यासत्यस्य निषेधः, प्रामादिकस्य
तु का वार्तेत्याह—

असत्यवचनं प्राज्ञः प्रमादेनापि नो वदेत् ।

श्रेयांसि येन भज्यन्ते वात्ययेव महाद्रुमाः ॥ ५७ ॥

आस्तां क्लिष्टाशयपूर्वकमसत्यवचनं, प्रामादिकमप्यज्ञानसंशयादि-
जनितवचनं न वदेत् येन प्रामादिकेनासत्यवचनेन श्रेयांसि भङ्ग-
मुपयान्ति वात्ययेव महाद्रुमा इति दृष्टान्तः ।

यदाहुर्महर्षयः—

'अइअम्मि य कालम्मि* पच्चुप्पन्नमणागए ।

जमट्ठं तु न जाणिज्जा एवमेअं ति णो वए ॥ १ ॥

---

(१) अतीते च काले प्रत्युत्पन्नमनागते ।

यमर्थं तु न जानीयात एवमेतत् इति नो वदेत् ॥ १ ॥

* क ख ग छ ह अइअम्मि ।

'अइअम्मि य कालम्मि* पच्चुप्पन्नमणागए।
जत्थ संका भवे तं तु, एवमेअं ति णो वए ॥ २ ॥

'अइअम्मि य कालम्मि* पच्चुप्पन्नमणागए।
निस्संकिअं भवे जं तु, एवमेअं तु निद्दिसे ॥ ३ ॥

एतच्चासत्यं चतुर्धा। भूतनिह्नवो, अभूतोद्भावनं, अर्थान्तरं, गर्हा च। भूतनिह्नवो यथा। नास्त्यात्मा, नास्ति पुण्यं, नास्ति पापं चेत्यादि। अभूतोद्भावनं यथा। सर्वगत आत्मा श्यामाक-तन्दुलमात्रो वा। अर्थान्तरं यथा। गामश्वमभिदधतः। गर्हा तु त्रिधा। एका सावद्यव्यापारप्रवर्त्तनी; यथा क्षेत्रं कृषेत्यादि। द्वितीया अप्रिया; काणं काणमिति वदतः। तृतीया आक्रोश-रूपा; यथा अरे बान्धकिनेय इत्यादि ॥ ५७ ॥

अतिपरिहरणीयत्वमसत्यवचनस्य दर्शयन् पुनरप्यैहिकान् दोषानाह—

असत्यवचनाद्वैरविषादाप्रत्ययादयः।
प्रादुःषन्ति न के दोषाः कुपथ्याद्व्याधयो यथा ॥५८॥

वैरं विरोधः, विषादः पश्चात्तापः, अप्रत्ययोऽविश्वासः। आदि-ग्रहणाद्राजावमानादयो गृह्यन्ते ॥ ५८ ॥

---

(१) अतीते च काले प्रत्युत्पन्नमनागते।
यत्र शङ्का भवेत्तत्तु एवमेतत् इति नो वदेत् ॥ २ ॥

(२) अतीते च काले प्रत्युत्पन्नमनागते।
निःशङ्कितं भवेत्तत्तु एवमेतत् तु निर्दिशेत् ॥ ३ ॥

* क ख ग क ङ अइअम्मि।

आमुष्मिकं मृषावादस्य फलमाह—

निगोदेष्वथ तिर्यक्षु तथा नरकवासिषु ।
उत्पद्यन्ते मृषावादप्रसादेन शरीरिणः ॥ ५८ ॥

निगोदा अनन्तकायिका जीवास्तेषु, तिर्यक्षु गोबलीवर्दन्यायेन शेषतिर्यग्योनिषु, नरकवासिषु नैरयिकेषु ॥ ५८ ॥

इदानीं मृषावादपरिहारे अन्वयव्यतिरेकाभ्यां कालिकाचार्यवसुराजौ दृष्टान्तावाह—

ब्रूयाद्भियोपरोधाद्वा नासत्यं कालिकार्यवत् ।
यस्तु ब्रूते स नरकं प्रयाति वसुराजवत् ॥ ६० ॥

भिया मरणादिभयेन, उपरोधाद्दाक्षिण्यादसत्यं न ब्रूयात् । यस्तु ब्रूते भियोपरोधाद्वा इत्यत्रापि संबन्धनीयं, दृष्टान्तौ संप्रदायगम्यौ ।

स चायम् ।

अस्ति भूरमणीमौलिमणिस्तुरमणी पुरी ।
यथार्थनामा तत्रासीज्जितशत्रुर्महीपतिः ॥ १ ॥
रुद्रेति नामधेयेन ब्राह्मणी तत्र विश्रुता ।
दत्त इत्यभिधानेन तस्याः पुत्रो बभूव च ॥ २ ॥
दत्तो नितान्तदुर्दान्तो द्यूतमद्यप्रियः सदा ।
सेवितुं तं महीपालं प्रवृत्तो वर्त्तनेच्छया ॥ ३ ॥
राज्ञः प्रधानीचक्रेऽसौ क्रायावत्यारिपार्श्वकः ।
आरोहायोपसर्पन्त्या विषवल्लेरपि द्रुमः ॥ ४ ॥

विभेद्य प्रकृतीरेष राजानं निरवासयत् ।
पापात्मानः कपोताश्च स्वाश्रयोच्छेददायिनः ॥ ५ ॥
तस्य राज्ञो दुरात्माऽसौ राज्ये स्वयमुपाविशत् ।
क्षुद्रः पादान्तदानेऽपि क्रामत्युच्छीर्षकावधि ॥ ६ ॥
पशुहिंसोत्कटान् यज्ञानसौ धर्मधिया व्यधात् ।
धूमैर्मलिनयन् विश्वं समूर्त्तैरिव पातकैः ॥ ७ ॥
विहरन् कालिकार्याख्यस्याचार्यस्तस्य मातुलः ।
तत्राजगाम भगवानङ्गवानिव संयमः ॥ ८ ॥
तत्समीपमनापित्सुर्दत्तो मिथ्यात्वमोहितः ।
अत्यर्थं प्रार्थितो मात्रा मातुलाभ्यर्णमाययौ ॥ ९ ॥
मत्तोऽमत्तप्रमत्ताभो दत्तोऽपृच्छत्तमुद्भटम् ।
आचार्य यदि जानासि यज्ञानां ब्रूहि किं फलम् ॥ १० ॥
उवाच कालिकाचार्यो धर्मं पृच्छसि तच्छृणु ।
तत्परस्य न कर्त्तव्यं यदाहितमात्मनः ॥ ११ ॥
ननु यज्ञफलं पृच्छामीति दत्तोदिते पुनः ।
सूरिरूचे न हिंसादि श्रयमे किन्तु पाप्मने ॥ १२ ॥
पुनस्तदेव साक्षेपं पृष्टो दत्तेन दुर्धिया ।
सर्मोद्भवमुवाचार्यो यज्ञानां नरकः फलम् ॥ १३ ॥
दत्तः क्रुद्धोऽभ्यधादेवमिह कः प्रत्ययो वद ।
आर्योऽप्यूचे श्वकुम्भ्यां त्वं पक्ष्यसे सप्तमेऽहनि ॥ १४ ॥
दत्तः कोपादुदस्तभ्रूरक्तीकृतलोचनः ।
भूताविष्ट इवोवाच प्रत्ययोऽत्रापि को ननु ॥ १५ ॥

अथोचे कालिकार्योऽपि श्वकुम्भीपचनात्पुर: ।
तस्मिन्नेवाह्नाकस्मात्ते मुखे विष्ठा प्रवेक्ष्यति ॥ १६ ॥
रोषाद् दत्तो जगादेदं तव मृत्यु: कुत: कदा ।
न कुतोऽपि स्वकाले द्यां यास्यामीत्यवदन्मुनि: ॥ १७ ॥
अमुं निरुन्ध दुर्बुद्धिमिति दत्तेन रोषत: ।
आदिष्टै: कालिकाचार्यो रुरुधे दण्डपूरुषै: ॥ १८ ॥
अथ दत्तात् समुद्विग्ना: सामन्ता: पापकर्मण: ।
आह्वयाद्यं नृपं तस्मै दत्तमर्पयितुं किल ॥ १९ ॥
दत्तोऽपि शङ्कितस्तस्थौ निलीनो निजवेश्मनि ।
कण्ठीरवरवत्रस्तो निकुञ्ज इव कुञ्जर: ॥ २० ॥
स विस्मृतदिनो दैवादागते सप्तमे दिने ।
बहिर्निर्गन्तुमारब्धे राजमार्गानरक्षयत् ॥ २१ ॥
तत्रैको मालिक: प्रातर्विशन् पुष्पकरण्डवान् ।
चक्रे वेगातुरो विष्ठां भीत: पुष्पै: न्यधत्त च ॥ २२ ॥
इहाहनि हनिष्यामि पशुवन्मुनिपांसनम् ।
चिन्तयन्निति दत्तोऽपि निर्ययौ सादिभिर्वृत: ॥ २३ ॥
एकेन वलाताऽश्वेन विष्ठोत्क्षिप्ता खुरेण सा ।
दत्तस्य प्राविशच्चास्ये सामन्ता [1]यमिनां गिर: ॥ २४ ॥
शिलास्फालितवत्सद्य: श्रयाङ्गो विमनास्तत: ।
स सामन्तानन्नापृच्छ्य ववले स्वगृहं प्रति ॥ २५ ॥

---

(१) क ख ग ङ यमिनाम् ।

माऽसम्भवोऽमुना ज्ञात इति प्रकृतिपूरुषैः ।
स्थानप्रविशन्नेव बद्धा दध्रे स गौरिव ॥ २६ ॥

अथ प्रकाशयंस्तेजो निजं राजा चिरन्तनः ।
प्रादुरासीत्तदानीं स निशात्यय इवार्यमा ॥ २७ ॥

सोऽहिः करण्डनिर्यात इव दूरं ज्वलन् क्रुधा ।
दत्तं स्वकुम्भ्यां नरककुम्भ्यामिव तदाऽक्षिपत् ॥ २८ ॥

अधस्तात्ताप्यमानायां कुम्भ्यां श्वानोऽन्तरा स्थिताः ।
दत्तं विदद्रुः परमाधार्मिका इव नारकम् ॥ २९ ॥

निरस्तभूपालभयोपरोधः श्रीकालिकाचार्य इवैवमुच्चैः ।
सत्यव्रतत्राणकृतप्रतिज्ञो न जातु भाषेत मृषा मनीषी ॥३०॥

॥ इति कालिकाचार्यदत्तकथानकम् ॥

अस्ति चेदिषु विख्याता नाम्ना शुक्तिमती पुरी ।
शुक्तिमत्याख्यया नद्या नर्मसख्येव शोभिता ॥ १ ॥

पृथ्वीमुकुटकल्पायां तस्यां तेजोभिरद्भुतः ।
माणिक्यमिव पृथ्वीशोऽभिचन्द्रो नामतोऽभवत् ॥ २ ॥

सूनुः सूनृतवाक्तस्य वसुरित्यभिधानतः ।
अजायत महाबुद्धिः पाण्डोरिव युधिष्ठिरः ॥ ३ ॥

पार्श्वे क्षीरकदम्बस्य गुरोः पर्वतकः सुतः ।
राजपुत्रो वसुश्छात्रो नारदश्चापठंस्त्रयः ॥ ४ ॥

सौधोपरि शयानेषु तेषु पाठश्रमाच्चिशि ।
चारणश्रमणौ व्योम्नि यान्तावित्यूचतुर्मिथः ॥ ५ ॥

एषामेकतमः स्वर्गं गमिष्यत्यपरौ पुनः ।
नरकं यास्यतस्तच्छ्रुत्वाऽशौषीत्क्षीरकदम्बकः ॥ ६ ॥
तच्छ्रुत्वा चिन्तयामास खिन्नः क्षीरकदम्बकः ।
मय्यप्यध्यापके शिष्यौ यास्यतो नरकं हहा ॥ ७ ॥
एभ्यः को यास्यति स्वर्गं नरकं कौ च यास्यतः ।
जिज्ञासुरित्युपाध्यायस्तांस्त्रीन् युगपदाह्वत ॥ ८ ॥
यावपूर्णं समर्प्यैषामेकैकं पिष्टकुक्कुटम् ।
स ऊचेऽमी तत्र वध्या यत्र कोऽपि न पश्यति ॥ ९ ॥
वसुपर्वतकौ तत्र गत्वा शून्यप्रदेशयोः ।
आत्मनोनां गतिमिव जघ्नतुः पिष्टकुक्कुटौ ॥ १० ॥
महात्मा नारदस्तत्र व्रजित्वा नगराद्बहिः ।
स्थित्वा च विजने देशे दिशः प्रेक्ष्य व्यतर्कयत् ॥ ११ ॥
गुरुपादैरदस्तावदादिष्टं वत्स यत्त्वया ।
वध्योऽयं कुक्कुटस्तत्र यत्र कोऽपि न पश्यति ॥ १२ ॥
असौ पश्यत्यहं पश्याम्यमी पश्यन्ति खेचराः ।
लोकपालाश्च पश्यन्ति पश्यन्ति ज्ञानिनोऽपि च ॥ १३ ॥
नास्त्येव स्थानमपि तद्यत्र कोऽपि न पश्यति ।
तात्पर्यं तद्गुरुगिरां न वध्यः खलु कुक्कुटः ॥ १४ ॥
गुरुपादा दयावन्तः सदा हिंसापराङ्मुखाः ।
अस्मत्प्रज्ञां परिज्ञातुमेतन्नियतमादिशन् ॥ १५ ॥
विमृश्यैवमहत्वैव कुक्कुटं स समाययौ ।
कुक्कुटाहनने हेतुं गुरोर्व्यज्ञपयच्च तम् ॥ १६ ॥

स्वर्गं यास्यत्यसौ तावदिति निश्चित्य सत्वरं ।
गुरुणा नारदः स्नेहात् साधु साध्विति भाषिणा ॥ १७ ॥
वसुपर्वतकौ पश्चादागत्यैवं शशंसतुः ।
निहतौ कुक्कुटौ तत्र यत्र कोऽपि न पश्यति ॥ १८ ॥
अपश्यतं युवामादावपश्यन् खेचरादयः ।
कथं हतौ कुक्कुटौ रे पापावित्यशपद्गुरुः ॥ १९ ॥
ततः खेदादुपाध्यायो दध्यौ विध्यातपाठधीः ।
मुधा मेऽध्यापनक्लेशो वसुपर्वतयोरभूत् ॥ २० ॥
गुरूपदेशो हि यथापात्रं परिणमेदिह ।
अम्भोऽभ्रः स्थानभेदेन मुक्तालवणतां व्रजेत् ॥ २१ ॥
प्रियः पर्वतकः पुत्रः पुत्रादप्यधिको वसुः ।
नरकं यास्यतस्तस्माद्गृहवासेन किं मम ॥ २२ ॥
निर्वेदादित्युपाध्यायः प्रव्रज्यामग्रहीत्तदा ।
तत्पदं पर्वतोऽध्यास्त व्याख्यालक्षणविचक्षणः ॥ २३ ॥
भूत्वा गुरोः प्रसादेन सर्वशास्त्रविशारदः ।
नारदः शारदाम्भोदशुद्धधीः स्वां भुवं ययौ ॥ २४ ॥
नृपचन्द्रोऽभिचन्द्रोऽपि जग्राह समये व्रतम् ।
तत्रासीद्दसुः राजा वासुदेवसमः श्रिया ॥ २५ ॥
सत्यवादीति स प्राप प्रसिद्धिं पृथिवीतले ।
तां प्रसिद्धिमपि त्रातुं सत्यमेव जगाद सः ॥ २६ ॥
अथैकदा मृगयुणा मृगाय मृगयाजुषा ।
चिक्षिपे विशिखो विन्ध्यनितम्बे सोऽन्तरा स्खलत् ॥ २७ ॥

इषुस्खलनहेतुं स ज्ञातुं तत्र ययौ ततः ।
आकाशस्फटिकशिलामज्ञासीत्पाणिना स्पृशन् ॥ २८ ॥
स दध्याविति मन्येऽस्यां संक्रान्तः परतश्चरन् ।
भूमिच्छायेव शीतांशौ ददृशे हरिणो मया ॥ २९ ॥
पाणिस्पर्शं विना नेयं सर्वथाऽप्युपलक्ष्यते ।
अवश्यं तदसौ योग्या वसोर्वसुमतीपतेः ॥ ३० ॥
रहो व्यज्ञपयद्राज्ञे गत्वा तां मृगयुः शिलाम् ।
हृष्टो राजाऽपि जग्राह ददौ चास्मै महद्धनम् ॥ ३१ ॥
स तया घटयामास छन्नं स्वासनवेदिकाम् ।
तच्छिल्पिनोऽघातयच्च नात्मीयाः कस्यचिन्नृपाः ॥ ३२ ॥
तस्यां सिंहासनं वेदौ चेदीशस्य निवेशितम् ।
सत्यप्रभावादाकाशस्थितमित्यबुधज्जनः ॥ ३३ ॥
सत्याद्धि तुष्टाः सान्निध्यमस्य कुर्वन्ति देवताः ।
एवमूर्जस्विनी तस्य प्रसिद्धिर्व्यानशे दिशः ॥ ३४ ॥
तया प्रसिद्धया राजानो भीतास्तस्य वशं [1]गताः ।
सत्या वा यदि वा मिथ्या प्रसिद्धिर्जयिनी नृणाम् ॥ ३५ ॥
आगाच्च नारदोऽन्येद्युस्तत्रैक्षिष्ट पर्वतम् ।
व्याख्यानयन्तमृग्वेदं शिष्याणां शेमुषीजुषाम् ॥ ३६ ॥
अजैर्यष्टव्यमित्यस्मिन् मेषैरित्युपदेशकम् ।
बभाषे नारदो भ्रातर्भ्रान्त्या किमिदमुच्यते ॥ ३७ ॥

---

(१) क ग ख वशु° ।

त्रिवार्षिकाणि धान्यानि न हि जायन्त इत्यजाः ।
व्याख्याता गुरुणाऽस्माकं व्यस्मार्षीः केन हेतुना ॥ ३८ ॥
ततः पर्वतकोऽवादीदिदं तातेन नोदितम् ।
उदिताः किं त्वजा मेषास्तथैवोक्ता निघण्टुषु ॥ ३९ ॥
जगाद नारदोऽप्येवं शब्दानामर्थकल्पना ।
मुख्या गौणी च तत्रेह गौणीं गुरुरचीकथत् ॥ ४० ॥
गुरुर्धर्मोपदेष्टैव श्रुतिर्धर्मात्मिकैव च ।
द्वयमप्यन्यथाकुर्वन्मित्र मा पापमर्जय ॥ ४१ ॥
[1]साक्षेपं पर्वतोऽजल्पदजान्मेषान् गुरुर्जगौ ।
गुरूपदेशशब्दार्थोल्लङ्घनाद्धर्ममर्जसि ॥ ४२ ॥
मिथ्याभिमानवाचो हि न स्युर्दण्डभयान्नृणाम् ।
स्वपक्षस्थापने तत्र जिह्वाच्छेदः पणोऽस्तु नः ॥ ४३ ॥
प्रमाणमुभयोरत्र सहाध्यायी वसुर्नृपः ।
नारदः [2]प्रतिपेदे तत्र क्षोभः सत्यभाषिणाम् ॥ ४४ ॥
रहः पर्वतमूचेऽम्बा गृहकर्मरताऽप्यहम् ।
अजास्त्रिवार्षिकं धान्यमित्यश्रौषं भवत्पितुः ॥ ४५ ॥
जिह्वाच्छेदं पणोऽकार्षीर्यद्दर्पात्तदसाम्प्रतम् ।
अविमृश्य विधातारो भवन्ति विपदां पदम् ॥ ४६ ॥
अवदत्पर्वतोऽप्येवं कृतं तावदिदं मया ।
यथा तथा कृतस्यास्य करणं न हि विद्यते ॥ ४७ ॥

---

(१) क ग घ ङ ड साक्षेपः । (२) ख तद्दुरीचक्रे न ।

साऽथ पर्वतकापायपीडया हृदि शल्यिता ।
वसुराजमुपेयाय पुत्रार्थे क्रियते न किम् ॥ ४८ ॥

दृष्टः क्षीरकदम्बोऽद्य यदम्ब त्वमसौ चिता ।
किं करोमि प्रयच्छामि किं चेत्यभिदधे वसुः ॥ ४९ ॥

साऽवादीद्दीयतां पुत्रभिक्षा मह्यं महीपते ।
धनधान्यैः किमन्यैर्मे विना पुत्रेण पुत्रक ॥ ५० ॥

वसुरूचे मम मातः पाल्यः पूज्यश्च पर्वतः ।
गुरुवद् गुरुपुत्रेऽपि वर्त्तितव्यमिति श्रुतेः[1] ॥ ५१ ॥

कस्याद्य पत्रमुत्क्षिप्तं कालेनाकालरोषिणा ।
को जिघांसुर्भ्रातरं मे ब्रूहि मातः किमातुरा ॥ ५२ ॥

अजव्याख्यानवृत्तान्तं स्वपुत्रस्य पणं च तम् ।
त्वं प्रमाणीकृतश्चासीत्याख्यायार्थयते स्म मा ॥ ५३ ॥

कुर्वाणो रक्षणं भ्रातुरजाऽऽर्षानुदीरय ।
प्राणैरप्युपकुर्वन्ति महान्तः किं पुनर्गिरा ॥ ५४ ॥

अवोचत वसुर्मातर्मिथ्या वच्मि वचः कथम् ।
प्राणात्ययेऽपि शंसन्ति नासत्यं सत्यभाषिणः ॥ ५५ ॥

अन्यदप्यभिधातव्यं नासत्यं पापभीरुणा ।
गुरुवागन्यथाकारे कूटसाक्ष्ये च का कथा ॥ ५६ ॥

[2]वधं कुरु गुरोः सूनुं यद्वा सत्यव्रताग्रहम् ।
तया सरोषमित्युक्तस्तद्वचोऽमंस्त पार्थिवः ॥ ५७ ॥

---

(१) च ङ स्मृतेः ।
(२) ख ग च छ ङ अङ्गाक ।

ततः प्रमुदिता क्षीरकदम्बगृहिणी ययौ ।
आजग्मतुश्च विद्वांसौ तत्र नारदपर्वतौ ॥ ५८ ॥
सभायाममिलन् सभ्या माध्यस्थ्यगुणशालिनः ।
वादिनौः मदसद्वादक्षीरनीरसितच्छदाः ॥ ५९ ॥
आकाशस्फटिकशिलावेदिसिंहासनं वसुः ।
सभापतिरलञ्चक्रे नभस्तलमिवोडुपः ॥ ६० ॥
ततो निजनिजव्याख्यापक्षं नारदपर्वतौ ।
कथयामासतू राज्ञे सत्यं ब्रूहीति भाषिणौ ॥ ६१ ॥
विप्रवृद्धैरथोचे स विवादस्त्वयि तिष्ठते ।
प्रमाणमनयोः साक्षी त्वं रोदस्योरिवार्यमा ॥ ६२ ॥
घटप्रभृतिदिव्यानि वर्त्तन्ते हन्त सत्यतः ।
सत्याद्वर्षति पर्जन्यः सत्यात्सिद्ध्यन्ति देवताः ॥ ६३ ॥
त्वयैव सत्ये लोकोऽयं स्थाप्यते पृथिवीपते ।
त्वामिहार्थे ब्रूमहे किं ब्रूहि सत्यव्रतोचितम् ॥ ६४ ॥
वचोऽश्रुत्वेव तत्सत्यप्रसिद्धिं स्वां निरस्य च ।
अजानेषान् गुरुर्व्याख्यदिति साक्ष्यं वसुर्व्यधात् ॥ ६५ ॥
असत्यवचसा तस्य क्रुद्धास्तत्रैव देवताः ।
दलयामासुराकाशस्फटिकासनवेदिकाम ॥ ६६ ॥
वसुर्वसुमतीनाथस्ततो वसुमतीतले ।
पपात सद्यो नरकपात प्रस्तावयन्निव ॥ ६७ ॥
कूटसाक्ष्यं प्रदातुस्ते श्वपचस्येव को मुखम् ।
पश्येदिति वसुं निन्दन्नारदः स्वास्पदं ययौ ॥ ६८ ॥

देवताभिरसत्योक्तिकुपिताभिर्निपातितः ।
जगाम घोरं नरकं नरनाथो वसुस्ततः ॥ ६९ ॥
यो यः सूनुरुपाविक्षद्राज्ये तस्यापराधिनः ।
प्रजघ्नुर्देवतास्तं तं यावदष्टौ निपातिताः ॥ ७० ॥

इति वसुनृपतेरसत्यवाचः
फलमाकर्ण्य जिनोक्तिविद्धकर्णः ।
कथमप्युपरोधतोऽपि जल्प
दनृतं प्राणितसंशयेऽपि नैव ॥ ७१ ॥ ६० ॥

॥ इति नारदपर्वतकथानकम् ॥

सद्भ्यो हितं सत्यमिति व्युत्पत्त्या अवितथमपि परपीडाकरं
वचनमसत्यमेवाहितत्वादिति सत्यमपीदृशं
न भाषेतेत्याह –

न सत्यमपि भाषेत परपीडाकरं वचः ।
लोकेऽपि श्रूयते यस्मात् कौशिको नरकं गतः ॥६१॥

सत्यमवितथं लोकरूढ्या परमार्थतस्तु परपीडाकरत्वादसत्यमेवे-
त्यर्थः, तन्न भाषेत ; तद्भाषणान्नरकगमनश्रुतेः ।

अत्रार्थे लौकिकं दृष्टान्तमाह—

लोकेऽपि समयान्तरेऽपि श्रूयते निशम्यते परपीडाकरसत्य-
भाषणेन कौशिको नरकं गत इति ।

कौशिकस्तु संप्रदायगम्यः । स चायम्—

आसीत्सत्यधनः कोऽपि कौशिको नाम तापसः ।
अपास्य ग्रामसंवासमनुगङ्गमुवास सः ॥ १ ॥
कन्दमूलफलाहारो निर्ममो निष्परिग्रहः ।
सत्यवादितया प्राप प्रसिद्धिं परमामसौ ॥ २ ॥
मुषित्वा ग्राममन्येद्युर्दस्यवस्तस्य पश्यतः ।
आश्रमं निकषा जग्मुर्वनं बिलमिवोरगाः ॥ ३ ॥
तेषामनुपदिनस्तु ग्राम्याः पप्रच्छुरेत्य तम् ।
सत्यवाद्यसि तद्ब्रूहि तस्कराः कुत्र वव्रजुः ॥ ४ ॥
धर्मतत्त्वानभिज्ञोऽथ कथयामास कौशिकः ।
'घने तरुनिकुञ्जेऽस्मिन् दस्यवः प्राविशन्निति ॥ ५ ॥
तस्योपदेशात्सन्नह्य ग्रामीणाः शस्त्रपाणयः ।
वनं प्रविश्य निर्जघ्नुर्दस्यून् व्याधा मृगानिव ॥ ६ ॥
ऋतमप्यनृतं पर्यग्राकर्णनैदमुदीरयन् वचः ।
परिपूर्य निजायुस्तद्गतं नरकं कौशिकतापसो ययौ ॥ ७ ॥ ६१ ॥

अल्पमप्यसत्यवचनं प्रतिषेद्धुं महदसत्यं वदतः परिदेवयते—

अल्पादपि मृषावादाद्रौरवादिषु संभवः ।
अन्यथा वदतां जैनीं वाचं त्वहह का गतिः ॥ ६२ ॥

अल्पादप्यैहिकार्थविषयत्वेन स्तोकादपि मृषावादादसत्या-द्रौरवादिषु रौरवमहारौरवप्रभृतिषु नरकावासेषु संभव उत्पत्तिः लोकप्रसिद्धत्वाद्रौरवग्रहणम् । अन्यथा सर्वनरकेष्वित्युच्यते । अन्यथा

(१) च इ वनं ।

विपरीतार्थतया जैनीं वाचं वदतामतीवासत्यवादिनां कुतीर्थिकानां स्वयूथ्यानां च निह्नवादीनां का गतिर्नरकादप्यधिका तेषां गतिः प्राप्नोतीत्यर्थः। अहहेति खेदे अशक्यप्रतीकाराः परिदेवनीयाः खल्वेत इति।

यदाह —

[1]अहह सयलन्नपावाहि वितहपरूवणमणुमवि दुरंतं।
जं मिरिइभवतदज्जियदुक्कयअवसेसलेसवसा ॥ १ ॥
[2]सुरथुयगुणोवि तित्थंकरोवि तिहुयणअतुल्लमल्लोवि।
गोवाइहिं वि बहुसो कयत्थिओ तिजयपहुत्तंसि ॥ २ ॥
[3]थीगोबंभणभूणंतगा वि केवि इह दिढपहाराई।
बहुपावावि पसिद्धा सिद्धा किर तम्मि चेव भवे ॥३॥६२॥

असत्यवादिनो निन्दित्वा सत्यवादिनः स्तौति—

ज्ञानचारित्रयोर्मूलं सत्यमेव वदन्ति ये।
धात्री पवित्री क्रियते तेषां चरणरेणुभिः ॥ ६३ ॥

ज्ञानचारित्रयोर्ज्ञानक्रिययोर्मूलं कारणं यत्सत्यं तदेव वदन्ति ये

(१) अहह सकलान्यपापेभ्यो वितथप्ररूपणमण्वपि दुरन्तम्।
यन्मरीचिभवतदर्जितदुष्कृतावशेषलेशवशात ॥ १ ॥
(२) सुरस्तुतगुणोऽपि तीर्थंकरोऽपि त्रिभुवनातुल्यमल्लोऽपि।
गोपादिभिरपि बहुशः कदर्थितः त्रिजगत्प्रभुत्वमसि ॥ २ ॥
(३) स्त्रीगोब्राह्मणभ्रूणान्तका अपि केऽपि दृढप्रहार्यादयः।
बहुपापा अपि प्रसिद्धाः सिद्धा किल तस्मिन्नेव भवे ॥ ३ ॥

ज्ञानचारित्रग्रहणं "नाणकिरियाहिं मोक्खो' इति भगवद्भाष्यकार-वचनानुवादार्थं ज्ञानग्रहणेन दर्शनमप्याक्षिप्यते । दर्शनमन्तरेण ज्ञानस्याज्ञानत्वात । मिथ्यादृष्टिर्हि सत्त्वासत्त्वे वैपरीत्येन जानाति, भवहेतुश्च तज्ज्ञानं यदृच्छया चार्थनिरपेक्षमुपलभ्यते न च ज्ञान-फलमस्य ।

यदाह—

'सयसयविसेसणाओ भवहेउं जदिच्छओपलंभाओ ।

नाणफलाभावाओ मिच्छद्दिट्ठिस्स अन्नाणं ॥ १ ॥

स्पष्टमन्यत् ॥ ६३ ॥

सत्यवादिनामैहिकमपि प्रभावं दर्शयति—

अलीकं ये न भाषन्ते सत्यव्रतमहाधनाः ।

नापराद्धुमलं तेभ्यो भूतप्रेतोरगादयः ॥ ६४ ॥

भूता भूतोपलक्षिता व्यन्तराः प्रेताः पितरो ये स्वसंबन्धिनो मनुष्यान् पीडयन्ति भूतप्रेतग्रहणं भुवनपत्यादीनामुपलक्षणार्थम् । उरगा सर्पाः आदिग्रहणाद् व्याघ्रादीनां परिग्रहः ।

अत्रान्तरे श्लोकाः—

अहिंसापयसः पालिभूतान्यन्यव्रतानि यत् ।

सत्यभङ्गात्पालिभङ्गेऽनर्गलं विप्लवेत तत् ॥ १ ॥

(१) 'ज्ञानक्रियाभ्यां मोक्षः'

(२) सदसदविशेषणात् भवहेतुर्यदृच्छोपलम्भात् ।

ज्ञानफलाभावात् मिथ्यादृष्टेरज्ञानम् ॥ १ ॥

सत्यमेव वदेत्प्राज्ञ: सर्वभूतोपकारकम् ।
यद्वा तिष्ठेत् समालम्ब्य मौनं सर्वार्थसाधकम् ॥ २ ॥
पृष्टेनापि न वक्तव्यं वचो वैरस्य कारणम् ।
मर्माविल्ककर्कशं शङ्कास्पदं हिंस्रमसत्यकम् ॥ ३ ॥
धर्मध्वंसे क्रियालोपे स्वसिद्धान्तार्थविप्लवे ।
अपृष्टेनापि शक्तेन वक्तव्यं तं निषेधितुम् ॥ ४ ॥
चार्वाकै: कौलिकैर्विप्रै: सौगतै: पाञ्चरात्रिकै: ।
असत्येनैव विक्रम्य जगदेतद्विडम्बितम ॥ ५ ॥
अहो पुरजनस्रोत:सोदरं तन्मुखोदरम् ।
नि:सरन्ति यतो वाच: पङ्काकुलजलोपमा: ॥ ६ ॥
दावानलेन ज्वलता परिप्लुष्टोऽपि पादप: ।
सान्द्रीभवति लोकोऽयं नतु दुर्वचनाग्निना ॥ ७ ॥
चन्दनं चन्द्रिकाचन्द्रमणयो मौक्तिकस्रज: ।
आह्लादयन्ति न तथा यथा वाक् सूनृता नृणाम् ॥ ८ ॥
शिखी मुण्डी जटी नग्नश्चीवरी यस्तपस्यति ।
सोऽपि मिथ्या यदि ब्रूते निन्द्य: स्यादन्त्यजादपि ॥ ९ ॥
एकत्रासत्यजं पापं पापं नि:शेषमन्यत: ।
द्वयोस्तुलाविधृतयोराद्यमेवातिरिच्यते ॥ १० ॥
पारदारिकदस्यूनामस्ति काचित्प्रतिक्रिया ।
असत्यवादिन: पुंस: प्रतीकारो न विद्यते ॥ ११ ॥
कुर्वन्ति देवा अपि पक्षपातं
नरेश्वरा: शासनमुद्वहन्ति ॥

शीतीभवन्ति ज्वलनादयो य-

त्तत् सत्यवाचां फलमामनन्ति ॥ १२ ॥

इति द्वितीयं व्रतम् ॥ ६४ ॥

इदानीं तृतीयमस्तेयव्रतमुच्यते। तत्रापि फलानुपदर्शनेन न स्तेयान्निवर्त्तत इति फलोपदर्शपूर्वं स्तेयनिवृत्तिमाह—

दौर्भाग्यं प्रेष्यतां दास्यमङ्गच्छेदं दरिद्रताम् ।
अदत्तात्तफलं ज्ञात्वा स्थूलस्तेयं विवर्जयेत् ॥६५॥

दौर्भाग्यमुद्वेजनीयता, प्रेष्यता परकर्मकरत्वं, दास्यमङ्कपातादिना पराधीनशरीरता, अङ्गच्छेदः करचरणादिच्छेदः, दरिद्रता निर्धनत्वं, एतानीहामुत्र चादत्तादानफलानि शास्त्रतो गुरुमुखाद्वा ज्ञात्वा स्थूलं चौरादिव्यपदेशनिबन्धनं स्तेयं विवर्जयेच्छ्रावकः ॥ ६५ ॥

स्थूलस्तेयपरिहारमेव प्रपञ्चयति-

पतितं विस्मृतं नष्टं स्थितं स्थापितमाहितम् ।
अदत्तं नाददीत स्वं परकीयं क्वचित्सुधीः ॥ ६६ ॥

पतितं गच्छतो वाहनादेर्भ्रष्टं, विस्मृतं क्वापि मुक्तमिति स्वामिना यन्न स्मर्यते, नष्टं क्वापि गतमिति स्वामिना यन्न ज्ञायते, स्थितं स्वामिपार्श्वे यदवस्थितं, स्थापितं न्यासीकृतं, आहितं निधीकृतं, तदेवंविधं परकीयं स्वं धनमदत्तं नाददीत क्वचिद्व्यसनेनापदापद्यपि सुधीः प्राज्ञः ॥ ६६ ॥

इदानीं स्तेयकारिणो निन्दति—

अयं लोकः परलोको धर्मो धैर्यं धृतिर्मतिः ।
मुष्णता परकीयं स्वं मुषितं सर्वमप्यदः ॥ ६७ ॥

परकीयं स्वं धनं मुष्णता अपहरता सर्वमप्यदः एतत् स्वं स्वकीयं मुषितं स्वशब्दस्योभयत्र संबन्धात् । किं तदित्याह, अयं लोकः अयं प्रत्यक्षेणोपलभ्यमानो लोक इदं जन्मेत्यर्थः, परलोको जन्मान्तरं, धर्मः पुण्यं, धैर्यमापत्स्वप्यवैक्लव्यं, धृतिः स्वास्थ्यं, मतिः कृत्याकृत्यविवेकः ॥ ६७ ॥

अथ हिंसाकारिभ्योऽपि स्तेयकारिणो बहुदोषत्वमाह —

एकस्यैकं क्षणं दुःखं मार्यमाणस्य जायते ।
सपुत्रपौत्रस्य पुनर्यावज्जीवं हृते धने ॥ ६८ ॥

एकस्य न तु बहूनां, एकं क्षणं न तु बहुकालं, दुःखमसातं, मार्यमाणस्य हिंस्यमानस्य, स्तेयकारिणा त्वपहृते धने परस्य सपुत्रपौत्रस्य नत्वेकस्य, यावज्जीवं नत्वेकं क्षणं, दुःखं जायत इति संबन्धः ॥ ६८ ॥

उक्तमपि स्तेयफलं प्रपञ्चनाह—

चौर्यपापद्रुमस्येह वधबन्धादिकं फलम् ।
जायते परलोके तु फलं नरकवेदना ॥ ६९ ॥

चौर्यात्पापं तदेव द्रुमस्तस्येह लोके फलं वधबन्धादिकं, परलोके तु फलं नरकभाविनी वेदना ॥ ६९ ॥

अथ कदाचित्प्रमादात् स्तेयकारी नृपतिभिर्न निगृह्येत तथा-प्यस्वास्थ्यलक्षणमैहिकं फलमवस्थितमेव इत्याह —

दिवसे वा रजन्यां वा स्वप्ने वा जागरेऽपि वा ।
सशल्य इव चौर्येण नैति स्वास्थ्यं नरः क्वचित् ॥७०॥

स्वप्नः स्वापः, जागरो निद्राया अभावः, चौर्येण हेतुना क्वचिदपि स्थाने ॥ ७० ॥

न केवलं स्तेयकर्तुः स्वास्थ्याभाव एव किन्तु बन्धुभिः परित्यागोऽपीत्याह —

मित्रपुत्रकलत्राणि भ्रातरः पितरोऽपि हि ।
संसजन्ति क्षणमपि न म्लेच्छैरिव तस्करैः ॥७१॥

पिता जनकः पितृतुल्याः पितरः पिता च पितरश्च पितरः न संसजन्ति न मिलन्ति पापभयात् ।

यदाहुः—

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुस्तत्संसर्गं च पञ्चमम् ॥ १ ॥

राजदण्डभयाद्वा ।

यदाहुः—

चौरश्चौरापको मन्त्री भेदज्ञः काणकक्रयी ।
स्थानदो भक्तदश्चैव चौरः सप्तविधः स्मृतः ॥ १ ॥

तस्करैरिति । तदेव चौर्यं कुर्वन्तीत्येवंशीलास्तस्करास्तैः ॥ ७१ ॥

स्तेयप्रवृत्तानां तन्निवृत्तानां च दोषान् गुणांश्च प्रत्येकं दृष्टान्तद्वारेणाह —

संबन्ध्यपि निगृह्येत चौर्यान्मण्डिकवन्नृपैः ।
चौरोऽपि त्यक्तचौर्य्यः स्यात्स्वर्गभाग्रौहिणेयवत् ॥ ७२ ॥

दृष्टान्तद्वयमपि संप्रदायगम्यं तच्चायम् –

अलब्धमध्यमम्भोधिरिवाम्भो बहुरत्नभूः ।
अस्तीह पाटलीपुत्रं नाम गौडेषु पत्तनम् ॥ १ ॥

कलाकलापनिलयः साहसस्यैकमन्दिरम् ।
राजपुत्रो मूलदेवस्तत्र मूलं धियामभूत् ॥ २ ॥

स धूर्त्तविद्यैकधवः कृपणानाथबान्धवः ।
कूटचेष्टामधुरिपुः रूपलावण्यमन्मथः ॥ ३ ॥

चौरे चौरः साधौ साधुर्वक्रे वक्र ऋजावृजुः ।
ग्राम्ये ग्राम्यश्छेके च्छेको विटे विटो भटे भटः ॥ ४ ॥

द्यूतकारे द्यूतकारो वार्त्तिके वार्त्तिकश्च सः ।
तत्काल स्फटिकाश्मेव जग्राह पररूपताम् ॥ ५ ॥

चित्रैः कौतूहलैस्तत्र लोकं विस्माययन्नसौ ।
विद्याधर इव स्वैरं चचार चतुराग्रणीः ॥ ६ ॥

द्यूतैकव्यसनासक्तिदोषात्पित्राऽपमानितः ।
द्युसत्पुरश्रीजयिन्यामुज्जयिन्यां जगाम सः ॥ ७ ॥

गुलिकायाः प्रयोगेण स भूत्वा कुब्जवामनः ।
पौरान् विस्माययंस्तत्र कलाभिः ख्यातिमासदत् ॥ ८ ॥

तत्रासीद्रूपलावण्यकलाविज्ञानकौशलैः ।
दत्तक्षपा रतेर्देवदत्तेति गणिकोत्तमा ॥ ९ ॥
गुणः कलावतां यो यः प्रकृष्टा तत्र तत्र सा ।
केकाया रञ्जने तस्याः प्रतिच्छंको न कोऽप्यभूत् ॥ १० ॥
मूलदेवस्ततस्तस्याः क्षोभार्थं तद्गृहान्तिके ।
प्रभाते गातुमारेभे प्रत्यक्ष इव तुम्बुरुः ॥ ११ ॥
आकर्ण्य देवदत्ताऽपि कोऽप्येष मधुरो ध्वनिः ।
कस्येति विस्मयाद्दास्याऽन्वेषयामास तं बहिः ॥ १२ ॥
शशंसागत्य सा देवि गन्धर्वः कोऽपि गायति ।
मूर्त्त्येव वामनः पूर्णैर्गुणैः पुनरवामनः ॥ १३ ॥
देवदत्ता ततः कुब्जां माधवीं नाम चेटिकाम् ।
प्रजिघाय तमाह्वातुं प्रायो वेश्याः कलाप्रियाः ॥ १४ ॥
सा गत्वा तं जगादेदं महाभाग कलानिधे ।
देवदत्ता स्वामिनी मे त्वामाह्वयति गौरवात् ॥ १५ ॥
मूलदेवोऽवदद्गच्छ नागमिष्यामि कुब्जिके ।
कुट्टिनीवश्यवेश्यानां स्ववशो वेश्म को विशेत् ॥ १६ ॥
व्याघुटन्तीं विनोदेच्छुः कलाकौशलयोगतः ।
स आस्फाल्य ऋजूचक्रे तां कुब्जीमब्जनालवत् ॥ १७ ॥
वपुर्नवमिवासाद्य सानन्दा साऽपि चेटिका ।
उपेत्य देवदत्तायै तच्चेष्टितमचीकथत् ॥ १८ ॥
देवदत्तवरेणेव देवदत्ताऽपि तेन ताम् ।
कुब्जामृजूकृतां वीक्ष्य परमं प्राप विस्मयम् ॥ १९ ॥

देवदत्ता ततोऽवादीदीदृक्षमुपकारिणम् ।
निजाङ्गुलिमपि च्छित्त्वा तमेकच्छेकमानय ॥ २० ॥
ततो गत्वा समभ्यर्च्य चाटुभिश्चतुरोचितैः ।
अचालि वेश्माभिमुखं धूर्त्तराजो भुजिष्यया ॥ २१ ॥
तया निर्दिश्यमानाध्वा प्रविवेश निवेशनम् ।
ततोऽसौ देवदत्ताया राधाया इव माधवः ॥ २२ ॥
तं वामनमपि प्रेक्ष्य कान्तिलावण्यशालिनम् ।
सा मन्वाना सुरं छन्नमुपावेशयदासने ॥ २३ ॥
मिथो हृदयसंवादिसंलापसुभगा ततः ।
तयोः प्रववृते गोष्ठी तुल्यवैदग्ध्यशालिनोः ॥ २४ ॥
अथाऽऽगात्तत्र कोऽप्येको वीणाकारः प्रवीणधीः ।
वीणामवीवदत्तेन देवदत्ताऽतिकौतुकात् ॥ २५ ॥
वल्लकीं वादयन्तं च व्यक्तग्रामश्रुतिस्वराम् ।
धूनयन्ती शिरो देवदत्ताऽपि प्रशशंस तम् ॥ २६ ॥
स्मित्वाऽवदन्मूलदेवोऽप्यहो उज्जयिनीजनः ।
जानात्यत्यन्तनिपुणो गुणागुणविवेचनम् ॥ २७ ॥
साशङ्का साऽप्युवाचैवं किमत्र न्यूनमस्त्यहो ।
छेकच्छेकप्रशंसायामुपहासं हि शङ्कते ॥ २८ ॥
सोऽप्याचचक्षे किं न्यूनमस्ति क्वापि भवादृशाम् ।
सगर्भा किन्त्वसौ तन्त्री किञ्च वंशोऽपि शल्यवान् ॥ २९ ॥
कथं ज्ञायत इत्युक्तस्तयाऽऽदाय स वल्लकीम् ।
वंशादश्मानमाकृष्य तन्त्र्याः केशमदर्शयत् ॥ ३० ॥

समारचय्य तां वीणां ततः स्वयमवादयत् ।
श्रोतृकर्णेषु पीयूषच्छटामिव परिक्षिपन् ॥ ३१ ॥
देवदत्ताऽब्रवीदेव सामान्यस्त्वं कलानिधे ।
नररूपं प्रपेदाना साक्षादसि सरस्वती ॥ ३२ ॥
वीणाकारस्वरगयोः प्रणिपत्यत्यवोचत ।
स्वामिन् शिक्षे भवत्पार्श्वे वीणावाद्यं प्रसीद मे ॥ ३३ ॥
मूलदेवो जगादैवं सम्यग जानामि नह्यहम् ।
किन्तु जानामि तान् ये हि सम्यग जानन्ति वल्लकीम् ॥३४॥
के नाम ते क्व सन्तीति पृष्टोऽसौ देवदत्तया ।
अवोचदस्ति पूर्वस्यां पाटलीपुत्रपत्तनम ॥ ३५ ॥
तस्मिन् विक्रमसेनोऽस्ति कलाचार्यो महागुणः ।
मूलदेवोऽहं च तस्य सदाप्यासन्नसेवकः ॥ ३६ ॥
अत्रान्तरे विश्वभूतिर्नाम्याचार्यः समागतः ।
साक्षाद्भरत इत्यस्मै कथितो देवदत्तया ॥ ३७ ॥
मूलदेवोऽप्येवमूचे सत्यमेवायमीदृशः ।
आकृताभिः कलां युष्मादृशोभिरपि लभ्यते ॥ ३८ ॥
विश्वभूतिरुपक्रान्ते विचारे भारते ततः ।
तं सर्वं इत्यवाप्नामोद्दाप्तार्थज्ञा हि तादृशाः ॥ ३९ ॥
मेने च धूर्त्तराजेन विद्वन्मान्यमस्य तत् ।
ताम्रस्वर्णालङ्करणस्येवान्तर्दर्श्ययाम्यहम् ॥ ४० ॥
स्वच्छन्दं भरते तस्य गल्भमानस्य धूर्त्तराट् ।
पूर्वापरविरोधाख्यं व्याख्याने दोषमग्रहीत् ॥ ४१ ॥

विश्वभूतिस्ततः कोपादसंबद्धमभाषत ।
प्राश्नैः पृष्टा ह्युपाध्यायाश्छादयन्त्यज्ञतां रुषा ॥ ४२ ॥
त्वमेवं 'नाटयेर्नाम्नाचार्यं नारीषु नान्यतः ।
इत्थमितो मूलदेवेन तूष्णीकः सोऽप्यजायत ॥ ४३ ॥
स्मेराक्षो देवदत्ताऽपि पश्यन्ती वामनं मुदा ।
उपाध्यायस्य वैलक्ष्यमपनेतुमवोचत ॥ ४४ ॥
इदानीमुत्सुका यूयमुपाध्यायाः क्षणान्तरे ।
परिभाव्याभिधातव्यं प्रश्नं विज्ञानशालिनाम् ॥ ४५ ॥
देवदत्ते वयं यामो नाट्यस्यावसरोऽधुना ।
सज्जस्व त्वमपीत्युक्त्वा विश्वभूतिस्ततो ययौ ॥ ४६ ॥
देवदत्ताऽप्यथादिक्षद्दासयोः स्नानकृतये ।
अङ्गमर्दो 'निर्विमर्दः कश्चिदाहूयतामिति ॥ ४७ ॥
अजल्पत्कुब्जरूपोऽपि व्याहार्षीमाऽङ्गमर्दकम् ।
सुभ्रु यद्यनुजानासि तवाभ्यङ्गं करोमि तत् ॥ ४८ ॥
किमेतदपि वेत्सीति तयोक्तः प्रत्युवाच सः ।
न जानामि स्थितः किन्तु तज्ज्ञानामहमन्तिके ॥ ४९ ॥
आदेशाद्देवदत्तायाः पक्वतैलान्ययाययुः ।
अभ्यङ्गं कर्तुमारेभे स मायावामनस्ततः ॥ ५० ॥
मृदुमध्यदृढं स्थानौचित्यात् पाणिं प्रसारयन् ।
अङ्गे तस्या मूलदेवः सुखमर्दनमादधे ॥ ५१ ॥

---

(१) ख घ ङ कारये- ।
(२) ख निर्विमर्दः ।

सर्वार्थेषु कलादाक्ष्यमीदृग्नान्यस्य कस्यचित् ।
न सामान्योऽयमित्यंक्षोः पतित्वा साऽब्रवीदिति ॥ ५२ ॥
गुणैरपि त्वमाख्यातः कोऽप्युत्कृष्टः पुमानिति ।
मयूरव्यंसकात्मानं किं गोपयसि मायया ॥ ५३ ॥
प्रसीद दर्शयात्मानं किं मोहयसि मां मुहुः ।
भक्तानामुपरोधेन साक्षात्स्युर्देवता अपि ॥ ५४ ॥
आकृष्य गुलिकामास्याद् रूपं तत्परिवर्त्य सः ।
प्रतिपेदे निजं रूपं शैलूष इव तत्क्षणात् ॥ ५५ ॥
अनङ्गमिव जाताङ्गं तं लावण्यैकसागरम् ।
उद्वीक्ष्य विस्मिता सोचे प्रसादः साधु मे कृतः ॥ ५६ ॥
तस्यार्पयित्वा स्नानीयं [१]पोतं प्रीता स्वपाणिना ।
अङ्गाभ्यङ्गं व्यरचयद्देवदत्ताऽनुरागिणी ॥ ५७ ॥
खलिप्रक्षालनापूर्वं पिष्टातकसुगन्धिभिः ।
कवोष्णवारिधाराभिस्ततो द्वावपि सस्नतुः ॥ ५८ ॥
देवदूष्ये देवदत्तोपनीते पर्यधत्त सः ।
सुगन्ध्याढ्यानि भोज्यानि बुभुजाते समं च तौ ॥ ५९ ॥
रहःकलारहस्यानि वयस्योभूतयोस्तयोः ।
मिथः कथयतोरेकः क्षणः सुखमयो ययौ ॥ ६० ॥
ततः सा व्याजहारैवं हृतं मे हृदयं त्वया ।
गुणैर्लोकोत्तरैर्नाथ प्रार्थयेऽहं तथाऽप्यदः ॥ ६१ ॥

(१) ख पात्रं प्रीत्या ।

यथा पट्टमकार्षीस्त्वं हृदये मम सुन्दर ।
विदधीथास्तथा नित्यमस्मिन्नेव निकेतने ॥ ६२ ॥
मूलदेवोऽप्युवाचैवं निर्धनेषु विदेशिषु ।
अस्मादृशेषु युष्माकमनुबन्धो न युज्यते ॥ ६३ ॥
गुणानां पक्षपातेनानुरागो निर्धनेऽपि चेत् ।
वेश्यानामर्जनाभावात्कुलं सीदेत्तदाऽखिलम् ॥ ६४ ॥
बभाषे देवदत्ताऽपि को विदेशो भवादृशाम् ।
सर्वः स्वदेशो गुणिनां नृणां केसरिणामिव ॥ ६५ ॥
आत्मानमर्थयन्त्यर्थमूर्खा हि बहिरेव नः ।
प्रवेशं न लभन्तेऽन्तर्विना त्वां गुणमन्दिर ॥ ६६ ॥
सर्वथा प्रतिपत्तव्यं त्वया सुभग मद्वचः ।
इत्युक्ते मूलदेवेनाप्यामिति जगदे वचः ॥ ६७ ॥
ततश्च क्रीडतोः स्वैरं विनोदैर्विविधैस्तयोः ।
राजद्वाःस्थोऽब्रवीदेत्यागच्छ प्रेक्षाक्षणोऽधुना ॥ ६८ ॥
छन्नवेषं मूलदेवं सा नीत्वा राजवेश्मनि ।
राज्ञोऽग्रे नृत्यमारेभे रम्भेव करणोज्ज्वलम् ॥ ६९ ॥
शक्रपाटहिकमसः पाटमकटने पटुः ।
मूलदेवोऽपि निपुणोऽवादयत्पटहं ततः ॥ ७० ॥
राजाऽरज्यत नृत्तेन तस्याः करणशालिना ।
प्रसाद मार्गयेत्यूचे तं च न्यासीचकार सा ॥ ७१ ॥
सा मूलदेवसहिता जगौ चानु ननर्त्त च ।
ददौ चास्यै नृपस्तुष्टः स्वाङ्गलग्नं विभूषणम् ॥ ७२ ॥

पाटलीपुत्रराजस्य राजदौवारिकस्ततः ।
हृष्टो विमलसिंहाख्य इत्युवाच महीपतिम् ॥ ७३ ॥
अयं हि पाटलीपुत्रे मूलदेवस्य धीमतः ।
कलाप्रकर्षोऽमुष्या वा न तृतीयस्य कस्यचित् ॥ ७४ ॥
ततः प्रदीयतां देव मूलदेवादनन्तरम् ।
विज्ञानिषु च पट्टोऽस्मै पताका नर्त्तकीषु च ॥ ७५ ॥
ततो राज्ञा तथा दत्ते साऽब्रवीदेष मे गुरुः ।
ततः प्रसादमादास्ये स्वामिनस्याभ्यनुज्ञया ॥ ७६ ॥
राजाऽप्यवोचत्तदियं महाभागानुमन्यताम् ।
धूर्त्तोऽप्यवादीद्यद्देव आज्ञापयति तत्कुरु ॥ ७७ ॥
अत्रान्तरे धूर्त्तराजो वीणां स्वयमवादयत् ।
हरन्मनांसि विश्वेषां विश्वावसुरिवापरः ॥ ७८ ॥
ततो विमलसिंहेन बभाषे देव खल्वयम् ।
मूलदेवश्छद्मरूपो नापरस्येदृशी कला ॥ ७९ ॥
विज्ञानातिशयस्यास्य प्रयोक्ता नापरः क्वचित् ।
मूलदेवं विना देव सर्वथाऽसौ स एव तत् ॥ ८० ॥
राजा जगाद यद्येवं तदाहो स्वं प्रदर्शय ।
दर्शने मूलदेवस्य रत्नस्येवास्मि कौतुकी ॥ ८१ ॥
गुलिकां मूलदेवोऽपि मुखादाकृष्य तत्क्षणात् ।
व्यक्तोऽभूत्कान्तिमान्मेघनिर्मुक्त इव चन्द्रमाः ॥ ८२ ॥
साधु ज्ञातोऽसि विज्ञानिन्निति सम्भ्रमभाषिणा ।
ततो विमलसिंहेन धूर्त्तसिंहः स सस्वजे ॥ ८३ ॥

'अपतन्मूलदेवोऽपि नृदेवस्य पदाब्जयोः ।
राजाऽपि तं प्रसादेन सगौरवमपूजयत् ॥ ८४ ॥
एवं च देवदत्ताऽपि तस्मिन्नत्यनुरागिणी ।
पुष्करवत्सुवंशीवान्वभूद्विषयजं सुखम् ॥ ८५ ॥
अतिष्ठन्मूलदेवोऽपि न विना द्यूतदेवनम् ।
भवितव्यं हि केनापि दोषेण गुणिनामपि ॥ ८६ ॥
ययाचे देवदत्ताऽपि धिग् द्यूतं त्यज्यतामिति ।
नात्यजन्मूलदेवस्तत्प्रकृतिः खलु दुस्त्यजा ॥ ८७ ॥
तस्यां नगर्यामासोद्य धनेन धनदोपमः ।
सार्थवाहोऽचलो नाम मूर्त्योऽपर इव स्मरः ॥ ८८ ॥
आसक्तो देवदत्तायां मूलदेवाग्रतोऽपि सः ।
कृतस्वीकरणो भाव्या बुभुजे तां निरन्तरम् ॥ ८९ ॥
ईर्ष्यां स मूलदेवाय मन्दतीं वहति स्म च ।
अन्विष्यति स्म तच्छिद्राण्युपद्रवचिकीर्षया ॥ ९० ॥
तच्छङ्कया मूलदेवोऽप्यगात्तद्देश्मनि च्छलात् ।
पारवश्येऽप्यविच्छिन्नो रागः प्रायेण रागिणाम् ॥ ९१ ॥
देवदत्तां जनन्यूचे धूर्त्तामग्रधूर्त्तकम् ।
निर्धनं द्यूतकारं च मूलदेवं सुते त्यज ॥ ९२ ॥
प्रत्यहं विविधं द्रव्यं यच्छत्यस्मिन् रमस्व तत् ।
अचले निश्चलरती रम्भेव धनदात्मजे ॥ ९३ ॥

---

(१) च न्यपतत् ।

देवदत्ता प्रत्युवाच मातरेकान्ततो भ्रमम् ।
धनानुरागिणी नासि किं त्वसि गुणरागिणी ॥ ९४ ॥
अमुष्य द्यूतकारस्य गुणास्तिष्ठन्ति कीदृशाः ।
इति कोपाज्जनन्योक्ता देवदत्तेत्यभाषत ॥ ९५ ॥
धीरो वदान्यो विद्याविद्गुणरागी स्वयं गुणी ।
विशेषज्ञः शरण्योऽयं नामुं त्यक्ष्यामि तत् खलु ॥ ९६ ॥
ततश्च कुट्टिनी रुष्टा कूटजुष्टा प्रचक्रमे ।
उच्चाटयितुं तनयां स्वैरिणी वैरिणीमिव ॥ ९७ ॥
साऽदात्तयाऽर्थिते माल्ये निर्माल्यं शरके पयः ।
इक्षुखण्डे वंशखण्डं श्रीखण्डे नीपखण्डलम् ॥ ९८ ॥
सकोपं देवदत्तोक्ता कुट्टिनी कुटिलाऽब्रवीत् ।
मा कुपः पुत्रि यादृक्षो यत्तस्मादृग्बलिः किल ॥ ९९ ॥
लतेव कण्टकितरुं किमालम्ब्य स्थितास्यमुम् ।
सर्वथा मूलदेवं तत्त्यजापात्रमिमं पतिम् ॥ १०० ॥
अवादीद्देवदत्तैवं मातः किमिति मुह्यसि ।
पुमान् पात्रमपात्रं वा किमुच्येतापरीक्षितः ॥ १ ॥
परीक्षा क्रियतां तर्हीत्युक्ता साक्षेपमम्बया ।
मुदिता देवदत्तैवमादिदेश स्वचेटिकाम् ॥ २ ॥
यदिक्षौ देवदत्ताया अभिलाषोऽद्य विद्यते ।
प्रेष्यन्तामिक्षवः सार्थवाहाचल ततस्त्वया ॥ ३ ॥
तयोक्तः सार्थवाहोऽपि धन्यमानी प्रमोदतः ।
शकटानीक्षुपूर्णानि प्रेषयामास तत्क्षणात् ॥ ४ ॥

दृष्ट्वा कुट्टिन्युवाचैवमचलस्वामिनो छले ।
अचिन्तनीयमौदार्यं पश्य चिन्तामणेरिव ॥ ५ ॥
विषण्णा देवदत्तोचे किमस्वाऽस्मि करेणुका ।
भक्षणायेक्षवः क्षिप्ता यत्समूलदलाग्रकाः ॥ ६ ॥
आदिश्यतां मूलदेवोऽप्यस्मिन्नर्थे भुजिष्यया ।
विवेके ज्ञायते मातर्द्वयोरपि यथाऽन्तरम् ॥ ७ ॥
मूलदेवोऽपि चेट्योक्त इक्षूनादाय पञ्चषान् ।
मूलाग्राणि त्यजन्निक्षु निस्त्वचं विचक्षणः ॥ ८ ॥
कठोरत्वेन दुश्चर्वपर्वग्रन्थीन् परित्यजन् ।
अकरोत् गण्डिकाश्चक्रे पीयूषस्येव कुण्डिकाः ॥ ९ ॥
चतुर्जातेन संस्कृत्य कर्पूरेणाधिवास्य च ।
शूलप्रोता वर्द्धमानसंपुटे प्राहिणोत्स ताः ॥ १० ॥
देवदत्ताऽपि ताः प्रेक्ष्य बभाषे अम्बलोमिति ।
धूर्त्तेशाचलयोः पश्य स्वर्णरीर्योरिवान्तरम् ॥ ११ ॥
कुट्टिन्यचिन्तयदहो महामोहान्धमानसा ।
मृगीव मृगतृष्णाभ्यो धूर्त्तमेषाऽनुधावति ॥ १२ ॥
स कोऽप्युपायः क्रियते येन निष्कास्यते पुरात् ।
अत्युष्णजलसेकेन बिलादिव महोरगः ॥ १३ ॥
कुट्टिनी मूलदेवस्योच्चाटनायाचलं जगौ ।
कर्त्तव्यः कृत्रिमो ग्रामगमनोपक्रमस्त्वया ॥ १४ ॥
ग्रामे यास्यामीत्यलीकं सार्थवाह त्वमञ्जसा ।
कथयेर्देवदत्ताया विश्रब्धा सा यथा भवेत् ॥ १५ ॥

ततो ग्रामान्तरगतं श्रुत्वा त्वां धूर्त्तपांसनः ।
निःशङ्कं देवदत्तायाः स समीपमुपैष्यति ॥ १६ ॥
देवदत्तान्तिके मूलदेवे दीव्यति निर्भरम् ।
आगच्छेः सर्वसामग्र्या मल्लक्रैतेन सुन्दर ॥ १७ ॥
ततस्तथा कथमपि त्वमेतमवमानयेः ।
यथैतां न भजेद्भूयस्त्विषिरोमिव तित्तिरः ॥ १८ ॥
तत्तथा प्रतिपद्याथ यास्यामि ग्राममित्यसौ ।
आख्याय देवदत्ताया द्रव्यं दत्त्वा च निर्ययौ ॥ १९ ॥
ततस्तया निरातङ्कं मूलदेवे प्रवेशिते ।
आक्षास्त कुट्टिन्यचलं कुट्टाकभटवेष्टितम् ॥ २० ॥
देवदत्ता च सहसा प्रविशन्तं ददर्श तम् ।
मूलदेवं च खट्वाऽधो न्यधात्पत्रकरण्डवत् ॥ २१ ॥
तथास्थितं मूलदेवं कुट्टिन्या ज्ञापितोऽचलः ।
पर्यङ्के कृतपर्य्यङ्को निषसाद स्मिताननः ॥ २२ ॥
अवोचदचलस्तत्र कुर्वन् कैतवनाटितम् ।
देवदत्ते वयं श्रान्ताः स्नास्यामः प्रगुणीभव ॥ २३ ॥
देवदत्ताऽब्रवीदेवं विलक्षवितथस्मिता ।
स्नानयोग्यासने तर्हि स्नातुं पादोऽवधार्यताम् ॥ २४ ॥
एवमुत्थाप्यमानोऽपि सादरं देवदत्तया ।
विशेषतोऽभूत् खट्वायामचलो निश्चलासनः ॥ २५ ॥
शशाक धूर्त्तराजोऽपि स्थातुं गन्तुं च नो तदा ।
प्रायेण विगलत्स्थैर्यास्वस्थे मनसि शङ्कयः ॥ २६ ॥

अथोचदचलो देवदत्ते स्वप्नो मयेक्षितः ।
पर्यङ्केऽस्मिन् कृताभ्यङ्गः सचेलस्नातवानहम् ॥ २७ ॥
स्वप्नं सत्यापयिष्यामि तदर्थमहमागमम् ।
सत्यीकृतो ह्ययं स्वप्नः शुभोदर्काय जायते ॥ २८ ॥
कुट्टिन्यवोचदादेशः प्रमाणं जीवितेशितुः ।
पुत्रि किं न श्रुतं स्वामी यदिच्छति करोति तत् ॥ २९ ॥
देवदत्ताऽब्रवीदार्ये किमेतदुचितं तव ।
अदृष्टदेवदूष्येयं तूलिका यद्विनश्यति ॥ ३० ॥
अचलोऽप्यवदद्भद्रे कार्पण्यं किमिदं तव ।
शरीरमपि यच्छन्ति पत्यर्थे त्वादृशः स्त्रियः ॥ ३१ ॥
किं तेऽन्यास्तूलिका न स्युः पतिर्यस्याः किलाचलः ।
लवणेन स किं सीदेद्यस्य रत्नाकरः सखा ॥ ३२ ॥
ततो भाटीविवशया कारितो देवदत्तया ।
अभ्यङ्गोद्वर्तनादीनि पर्यङ्कस्थित एव सः ॥ ३३ ॥
स्नप्यमाने ततस्तस्मिन्नोर्णे खलिजलादिना ।
मूलदेवश्चण्ड इव भ्रियते स्म समन्ततः ॥ ३४ ॥
आजुहावाचलभटान् कुट्टिनी दृष्टिसंज्ञया ।
निर्दिदेशाचलं चाशु धूर्ताकर्षणकर्मणि ॥ ३५ ॥
कोपाटोपसमाविष्टो मूलदेवं ततोऽचलः ।
चकर्ष धृत्वा केशेषु द्रौपदीमिव कौरवः ॥ ३६ ॥
तं चोवाच नयज्ञोऽसि विद्वानसि सुधीरसि ।
कर्मणोऽस्यानुरूपोऽद्य ब्रूहि कस्तेऽस्तु निग्रहः ॥ ३७ ॥

धनाधीनशरीरेयं वेश्या तां चेद्रिरंससे ।
ग्रामपट्टकवद्भूरिधनेन न किमग्रहीः ॥ ३८ ॥
मूलदेवोऽपि निष्पन्दस्तदा मुकुलितेक्षणः ।
विफलीभूतकालस्योद्वाहं दीपिनमुत्लाम् ॥ ३९ ॥
एवं च चिन्तयामास सार्थवाहपतिस्ततः ।
न निग्राह्यो महात्माऽसौ दैवादेवं दशां गतः ॥ ४० ॥
इति चोवाच मुक्तोऽद्य त्वमस्मादागसो मया ।
कृतघ्नोऽस्युपकर्त्तव्यं त्वयाऽपि समये मम ॥ ४१ ॥
मुक्तोऽथ तेन धूर्त्तेशो वेश्मतो निर्ययौ ततः ।
तूर्णं तूर्णं परिक्रामन् रुषाकृष्ट इव द्विपः ॥ ४२ ॥
गत्वा पुरीपरिसरे मग्नो सरसि विस्तृते ।
शरत्काल इव भेजे तत्क्षणात् क्षालिताम्बरः ॥ ४३ ॥
अचलस्यापकर्तुं चोपकर्तुं च स धूर्त्तराट् ।
मनोरथरथारूढोऽचलद्वेणातटं प्रति ॥ ४४ ॥
द्वादशयोजनायामां सः श्वापदकुलाकुलाम् ।
दुर्दशायाः प्रियसखीमिव प्राप महाटवीम् ॥ ४५ ॥
पारावारमिवापारां तितीर्षुस्तां महाटवीम् ।
सहायं चिन्तयामास तरण्डमिव धूर्त्तराट् ॥ ४६ ॥
कस्मादप्यागतोऽकस्मादभ्रादिव परिच्युतः ।
शम्बलस्थगिकां बिभ्रत्कोऽपि टक्को द्विजस्तदा ॥ ४७ ॥
असहायः सहायोयं तं विप्रं क्षिप्रमागतम् ।
वृद्धो यष्टिमिव प्राप्य मूलदेवो मुदं ययौ ॥ ४८ ॥

जगाद मूलदेवस्तं ममारण्ये प्रपेतुषः ।
ग्रामच्छायाद्वितीयस्य दिष्ट्या मिलितवानसि ॥ ४९ ॥
स्वच्छन्दं वार्त्तयिष्यावस्तदावां द्विजसत्तम ।
मार्गखेदापहरणी विद्या वार्त्ता हि या पथि ॥ ५० ॥
दूरे कियति गन्तव्यं स्थाने जिगमिषा क्व ते ।
कथ्यतां भो महाभाग मार्गमैत्रीं वयो कुरु ॥ ५१ ॥
विप्रोऽप्याख्यद्गमिष्यामि पारेऽरण्यमिव स्थितम् ।
स्थानं वीरनिधानाख्यं ब्रूहि त्वं कुत्र यास्यसि ॥ ५२ ॥
मूलदेवोऽब्रवीद्यास्याम्यहं वेणातटे पुरे ।
विप्रोऽप्यूचे तदेहि त्वमेकोऽध्वा दूरमावयोः ॥ ५३ ॥
ललाटन्तपतपने मध्याह्नेऽथ समागते ।
मिलिताभ्यां च गच्छद्भ्यां ताभ्यां प्रापि महासरः ॥ ५४ ॥
पाणिपादमुखं मूलदेवः प्रक्षाल्य वारिणा ।
निरन्तरतरुच्छाये भूतले समुपाविशत् ॥ ५५ ॥
स्थगिकायाः समाकृष्य सक्तूनालोड्य वारिणा ।
एकोऽपि भोक्तुमारेभे टक्को रङ्क इव द्रुतम् ॥ ५६ ॥
धूर्त्तोऽप्यचिन्तयदसौ नाऽऽदौ मे भोजनं ददौ ।
अतिक्षुधाऽऽतुरो भुङ्क्ते भुक्तः सन् खलु दास्यति ॥ ५७ ॥
भुक्त्वा ततोत्थिते विप्रे बध्नाति स्थगिकामुखम् ।
दध्यौ धूर्त्तोऽपि यदद्य नादास्वः प्रदास्यति ॥ ५८ ॥
तस्मिन्नदत्वा भुञ्जाने मूलदेवस्तदाशया ।
लोन्वासरानगमयत्तृष्णामाशा हि जीवितम् ॥ ५९ ॥

अटवीं तां परित्यज्य धूर्त्तराजं द्विजोऽवदत् ।
स्वस्ति तुभ्यं महाभाग यास्याम्यहमितोऽधुना ॥ ६० ॥
तमूचे मूलदेवोऽपि त्वत्प्रसादादियं मया ।
द्वादशयोजनायामा क्रोशवल्लङ्घिताऽटवी ॥ ६१ ॥
वेणातटे गमिष्यामि मूलदेवाभिधोऽस्म्यहम् ।
तत्र मे कथयेः कार्यं कथ्यतां किं च नाम ते ॥ ६२ ॥
लोकैर्निर्घृणशर्मेति विहितापरनामकः ।
विप्रोऽहं सद्दडो नामेत्युक्त्वा टक्कस्ततो ययौ ॥ ६३ ॥
गच्छता मूलदेवेन ततो वेणातटं प्रति ।
दृष्टः संवसथः कश्चिद्वसटावसथः पथि ॥ ६४ ॥
प्रविष्टस्तत्र भिक्षार्थं क्षामकुक्षिर्बुभुक्षया ।
भ्रमन्नासादयामास कुल्माषान् कुत्रचिद्गृहे ॥ ६५ ॥
ग्रामान्निष्क्रामतस्तस्याभिमुखः कोऽप्यभून्मुनिः ।
मासक्षपणपुण्यात्मा पुण्यपुञ्ज इवाङ्गवान् ॥ ६६ ॥
तं दृष्ट्वा मुदितः सोऽभूदहो मे सुकृतोदयः ।
यन्मयाप्तमिदं पात्रं यानपात्रं भवोदधौ ॥ ६७ ॥
साधोः कुल्माषदानेन रत्नत्रितयशालिनः ।
उन्मीलतु चिरादद्य मद्विवेकतरोः फलम् ॥ ६८ ॥
कुल्माषान् साधवे दत्त्वा मूलदेवः पपाठ च ।
धन्यास्ते खलु येषां स्युः कुल्माषाः साधुपारणे ॥ ६९ ॥
तस्य भावनया हृष्टा बभाषे व्योम्नि देवता ।
अर्द्धश्लोकेन याचस्व भद्र किं ते प्रदीयताम् ॥ ७० ॥

प्रार्थयामास सद्यस्तां मूलदेवोऽपि देवताम् ।
गणिकादेवदत्तेभसहस्रं राज्यमस्तु मे ॥ ७१ ॥
एवमस्त्विति देव्यूचे मूलदेवोऽपि तं मुनिम् ।
वन्दित्वाऽथ ग्राममध्ये भिक्षित्वा बुभुजे स्वयम् ॥ ७२ ॥
मार्गं क्रामन् क्रमेणासौ प्राप वेण्णातटं पुरम् ।
सुष्वाप पान्थशालायां निद्रासुखमवाप च ॥ ७३ ॥
यामिन्याः पश्चिमे यामे स सुप्तः स्वप्नमैक्षत ।
यत्पूर्णमण्डलश्चन्द्रः प्रविवेश मुखे मम ॥ ७४ ॥
तमेव स्वप्नमद्राक्षीत्कोऽपि कार्पटिकस्तदा ।
अन्यकार्पटिकानां च प्रबुद्धस्तमचीकथत् ॥ ७५ ॥
तेषु कार्पटिकेष्वेकः स्वप्नमेवं व्यचारयत् ।
अचिरेण लप्स्यसे त्वं सखण्डघृतमण्डकम् ॥ ७६ ॥
हृष्टः कार्पटिकः सोऽभूदेवं भूयादिति ब्रुवन् ।
जायेत बदरेणापि शृगालस्य महोत्सवः ॥ ७७ ॥
स्वप्नं नाचीकथत्तेषामज्ञानां धूर्त्तराट् निजम् ।
मूर्खाः किं दर्शितं रत्नं दृषत्खण्डं प्रचक्षते ॥ ७८ ॥
मण्डकं कर्पटिः प्राप गृहाच्छादनपर्वणि ।
प्रायेण फलति स्वप्नो विचारस्यानुसारतः ॥ ७९ ॥
धूर्त्तोऽपि प्रातरारामे गत्वा पुष्पोच्चयादिना ।
अप्रीणान्मालिकं लोकंपृणं कर्मापि तादृशम् ॥ ८० ॥
गृहीत्वा मालिकात्तस्मात्स पुष्पाणि फलानि च ।
शुचिर्भूत्वा ययौ वेश्म स्वप्नशास्त्रविपश्चितः ॥ ८१ ॥

मूलदेवस्ततो नत्वा दत्त्वा पुष्पफलानि च ।
उपाध्यायाय तज्ज्ञाय शशंस स्वप्नमात्मनः ॥ ८२ ॥
मुदितः सोऽवदद्विद्वान्वक्ष्ये स्वप्नफलं तव ।
सुमुहूर्ते कथयिष्याम्यद्यास्माकं भवातिथिः ॥ ८३ ॥
मूलदेवं स्नपयित्वा भोजयित्वा च गौरवात् ।
परिणाययितुं कन्यामुपाध्याय उपानयत् ॥ ८४ ॥
बभाषे मूलदेवोऽपि ताताऽज्ञातकुलस्य मे ।
कन्यां प्रदास्यसि कथं विचारयसि किं नहि ॥ ८५ ॥
उपाध्यायोऽप्युवाचैवं त्वन्मूर्त्याऽपि कुलं गुणाः ।
ज्ञातास्तत्सर्वथा कन्या ममेयं परिणीयताम् ॥ ८६ ॥
तद्वाचा मूलदेवोऽपि कन्यकां तामुपायत ।
कार्यसिद्धेर्भविष्यन्त्याः प्रादुर्भूतमिवाननम् ॥ ८७ ॥
मध्ये दिनानां सप्तानां त्वं राजेह भविष्यसि ।
इति तस्य स्वप्नफलमुपाध्यायो न्यवेदयत् ॥ ८८ ॥
हृष्टस्तत्र वसन् धूर्त्तराजो गत्वा बहिः पुरात् ।
सुष्वाप चम्पकतले संप्राप्ते पञ्चमेऽहनि ॥ ८९ ॥
तदा च नगरे तस्मिन्नयेतनमहीपतिः ।
अपुत्रो निधनं प्राप निष्पाद इव पादपः ॥ ९० ॥
मन्त्रोक्षिताः पुरोभाग्यच्छत्रभृङ्गारचामराः ।
भ्रेमुः प्रापुर्न राज्यार्हं दुष्प्रापस्तादृशो जनः ॥ ९१ ॥
ततो बहिः पर्यटन्तो निकषा चम्पकद्रुमम् ।
अपश्यन्मूलदेवं ते नरदेवपदोचितम् ॥ ९२ ॥
हयेन हेषितं चक्रे गजेनोर्जितगर्जितम् ।

भृङ्गारेण च तस्याऽथैवामराभ्यां च वीजनम् ॥ ९३ ॥
पुण्डरीकं स्वर्णदण्डमखिलतं तस्य चोपरि ।
शरदभ्रमिवादभ्रतडिद्दण्डमजृम्भत ॥ ९४ ॥
तं चाधिरोहयामास स्वस्कन्धे जयकुञ्जरः ।
स्वाम्याभिमुदितैर्लोकैश्चक्रे जयजयारवः ॥ ९५ ॥
पुरं महातूर्यरवैः पूर्यमाणदिगन्तरम् ।
तत्राविशन्मूलदेवो राजराज इवालकाम् ॥ ९६ ॥
उत्तीर्णो राजहर्म्येऽसौ सिंहासनमधिष्ठितः ।
समन्ततः समायातैः सामन्तैरभ्यषिच्यत ॥ ९७ ॥
अथोचे देवता व्योम्नि देवतानां प्रसादतः ।
अयं विक्रमराजाख्यो राजा जज्ञे कलानिधिः ॥ ९८ ॥
वर्तिष्यन्ते न येऽमुष्य शासने क्षितिशासितुः ।
तानहं निग्रहीष्यामि महीभृत इवाशनिः ॥ ९९ ॥
तद्गिरा विस्मितं भीतं सर्वं प्रकृतिमण्डलम् ।
यतेरिवेन्द्रियग्रामः सदा तस्य वशेऽभवत् ॥ २०० ॥
ततः स राजा विषयसुखान्यनुभवन् व्यधात् ॥
प्रीतिमुज्जयिनीशेन मिथः संव्यवहारतः ॥ १ ॥
तदानीं देवदत्ताऽपि मूलदेवविडम्बनाम् ।
तादृशीं प्रेक्ष्य साक्षेपा व्यब्रवीदचलं प्रति ॥ २ ॥
किं शाता द्रव्यदर्पान्ध त्वया कुलस्त्रियहम् ।
मुमूर्षो 'मूर्खं मद्गेहे व्यवाहार्षीर्यदीदृशम् ॥ ३ ॥

---

(१) क ख मूर्खगृहेहे ।

त्वयाऽस्मदीयसदने नागन्तव्यमतः परम् ।
इति निष्कास्य तं गेहात्समीपे नृपतेरगात् ॥ ४ ॥

तया च याचितो राजा स वरो दीयतामिति ।
यथेच्छं ब्रूहि यच्छामि तं येनेत्यवदन्नृपः ॥ ५ ॥

सोचे मां प्रति नागम्यो मूलदेवं विना पुमान् ।
वारणीयोऽचलश्चायमागच्छन्मम वेश्मनि ॥ ६ ॥

एवमस्त्विति राज्ञोक्ता हेतुः कोऽत्रेति पृष्टवान् ।
शशंस माधवी देवदत्ताभ्रूसंज्ञया ततः ॥ ७ ॥

जितशत्रुनृपः कोपाच्चलितभ्रूलतस्ततः ।
सार्थवाहं तमाहूय साक्षेपमिदमब्रवीत् ॥ ८ ॥

मत्पुरीमण्डनावेतौ रत्नभूतावरे त्वया
मूर्खेण धनमत्तेन ग्रावणीव निघर्षितौ ॥ ९ ॥

ततोऽमुष्यापराधस्य प्राणापहरणं तव ।
दण्डोऽस्त्विति नरेन्द्रोक्ते देवदत्ता न्यवारयत् ॥ १० ॥

त्वं यद्यप्यनया त्रातोऽधुना त्राणं तथापि ते ।
मूलदेवे समानीते भवेदित्यभ्यधान्नृपः ॥ ११ ॥

नृपं नत्वा ततो गत्वा सार्थवाहः प्रचक्रमे ।
नष्टरत्नमिवान्वेष्टुं मूलदेवं समन्ततः ॥ १२ ॥

मूलदेवमपश्यन् स भीतो न्यूनतया तया ।
भाण्डं भृत्वा ययौ शीघ्रं पारसकूलमण्डलम् ॥ १३ ॥

दध्यौ च मूलदेवोऽपि विना मे देवदत्तया ।
भोग्यैर्मालवकेनैव प्राज्यराज्यश्रियाऽपि किम् ॥ १४ ॥

ततः स देवदत्ताया जितशत्रोश्च भूपतेः ।
चतुरं प्रेषयामास दूतं प्राभृतसंयुतम् ॥ १५ ॥
गत्वोज्जयिन्यां दूतोऽपि जितशत्रुं व्यजिज्ञपत् ।
देवतादत्तराज्यश्रीर्मूलदेवो वदत्यदः ॥ १६ ॥
यथा मे देवदत्तायां प्रेम जानीथ तत्तथा ।
यद्यस्यै रोचते वोऽपि तदियं प्रेष्यतामिति ॥ १७ ॥
ततोऽवददवन्तीशस्तेनेदं कियदर्थितम् ।
राज्ञा विक्रमराजेन भेदो राज्येऽपि नास्ति नः ॥ १८ ॥
आकार्य देवदत्तां च जगादोज्जयिनीपतिः ।
दिष्ट्या जाताऽसि भद्रे त्वं चिरात् पूर्णमनोरथा ॥ १९ ॥
राजा जज्ञे मूलदेवो देवतायाः प्रसादतः ।
त्वामानेतुं च स प्रैषीत्प्रधानपुरुषं निजम् ॥ २० ॥
ततस्त्वं तत्र गच्छेति प्रसादाज्जितशत्रुणा ।
आदिष्टा देवदत्ताऽगाद्वेण्णातटपुरं क्रमात् ॥ २१ ॥
राजा विक्रमराजोऽपि महोत्सवपुरःसरम् ।
स्वचेतसीव विपुले स्ववेश्मनि निनाय ताम् ॥ २२ ॥
जिनार्चामर्चतस्तस्य सम्यक् पालयतः प्रजाः ।
दीव्यतो देवदत्तां च त्रिवर्गोऽभूदबाधितः ॥ २३ ॥
इतश्च पारसकूलाद्बहुशःक्रेयवस्तुकः ।
आययावचलस्तत्र जलपूर्ण इवाम्बुदः ॥ २४ ॥
लक्ष्मीमहत्त्वपिशुनैर्मणिमौक्तिकविद्रुमैः ।
भृत्वा विशालं स स्थालं महीनाथमुपास्थितः ॥ २५ ॥

अचलोऽयमिति क्षिप्रमुपलक्षितवान् नृपः ।
दृष्टा प्रागजन्मसम्बन्धमपि प्राज्ञाः स्मरन्ति हि ॥ २६ ॥
राजानं मूलदेवोऽयमित्यज्ञासीत्तु नाचलः ।
आत्तवेषं नटमपि स्थूलप्रज्ञा न जानते ॥ २७ ॥
कुतस्त्वमिति राज्ञोक्तः पारसादित्युवाच सः ।
ययाचे पञ्चकुलं च भाण्डालोकनकर्मणि ॥ २८ ॥
कौतुकात्स्वयमेष्याम इत्युक्तो भूभुजा स तु ।
महाप्रसाद इत्यूचे कोपं को वेत्ति तादृशाम् ॥ २९ ॥
ततः पञ्चकुलोपेतो ययौ राजा तदाश्रये ।
मञ्जिष्ठापट्टसूत्रादि सोऽपि भाण्डमदर्शयत् ॥ ३० ॥
भाण्डं किमियदेवेदं सत्यं ब्रूहीति भूभुजा ।
उक्त इत्युक्तवान् श्रेष्ठी सत्यमेतावदेव मे ॥ ३१ ॥
नृपेण पुनरप्यूचे सम्यग् ज्ञात्वा निवेदय ।
अस्मद्राज्ये शुल्कचौर्यां यच्छरीरेण निग्रहः ॥ ३२ ॥
अथोचदचलोऽप्येवमस्माभिः कथ्यतेऽन्यथा ।
पुरतो नापरस्यापि स्वयं देवस्य किं पुनः ॥ ३३ ॥
राजेत्युवाच तच्छ्रेष्ठिनः सत्यभाषिणः ।
क्रियतामर्धदानं च सम्यग्भाण्डं च वीक्ष्यताम् ॥ ३४ ॥
ततः पञ्चकुलेनांघ्रिप्रहाराद्दंशवेधनः ।
असारभाण्डमध्यस्थं सारभाण्डमशङ्क्यत ॥ ३५ ॥
जाताशङ्कैस्ततो राजपुंभिर्बिभिदिरे क्षणात् ।
शल्कदस्युमर्मासीव भाण्डस्थानानि सर्वतः ॥ ३६ ॥

तैर्यथा शङ्कितं भाण्डं वित्तशाल्यं तथाऽभवत् ।
परपुरान्तःप्रवेशकारिणो ह्यधिकारिणः ॥ ३७ ॥
तज् ज्ञात्वा कुपितो राजा बन्धयामास तं क्षणात् ।
सामन्ता अपि बध्यन्ते राजादेशाद्वणिक् कियान् ॥ ३८ ॥
ततस्तं सद्म नीत्वा छोटयित्वा च बन्धनम् ।
किं मां प्रत्यभिजानासि पप्रच्छेति महीपतिः ॥ ३९ ॥
अचलोऽपि जगादैवं जगदुद्योतकारिणम् ।
भानुमन्तं भवन्तं च बालिशोऽपि न वेत्ति कः ॥ ४० ॥
पर्याप्तं चाटुवचनैः सम्यक् त्वं वेत्सि तद्वद ।
राज्ञेत्युक्तोऽचलोऽवोचत्तर्हि जानामि नह्यहम् ॥ ४१ ॥
देवदत्तामथाहूय भूपतिस्तमदर्शयत् ।
इष्टैर्दृष्टा कृतार्था स्यात्मनःसिद्धिर्हि मानिनाम् ॥ ४२ ॥
देवदत्तामसौ दृष्ट्वा भीतः कष्टां दशां ययौ ।
अग्रे स्वापभ्राजना हि मृत्योरप्यधिका नृणाम् ॥ ४३ ॥
माऽप्यूचे मूर्नदेवोऽयमित्युक्तो यस्तदा त्वया ।
एवं कुर्या ममापि त्वं देवाद्दासममीयुषः ॥ ४४ ॥
तदसि व्यसनं प्राप्तः प्राणसन्देहकारणम् ।
मुक्तोऽसि चार्यपुत्रेण मेदृशाः क्षुद्रघातिनः ॥ ४५ ॥
ततो विलक्षः स वणिक् पतित्वा पादयोस्तयोः ।
जवे सर्वापराधाक्षे तितिक्षध्वं तदा कृतान् ॥ ४६ ॥
तुष्टस्तेनापराधेन जितशत्रुर्महीपतिः ।
प्रवेशमुज्जयिन्यां मे युष्मद्वाचा प्रदास्यति ॥ ४७ ॥

अथोचे मूलदेवोऽपि मया ज्ञातं तदैव ते।
यदा प्रसादो विदधे देव्या श्रीदेवदत्तया॥ ४८॥
ततः प्रसादं दत्त्वोच्चैर्दूतमेकं समर्प्य च।
पुरीमुज्जयिनीं गन्तुं विससर्जाचलं नृपः॥ ४९॥
प्रवेशोऽवन्तिनाथेन तस्यावन्त्यामदीयत।
मूलदेवस्य वचसा कोपस्तन्मूल एव यत्॥ ५०॥
अन्येद्युर्दुःखविधुराः प्रजाकार्यधुरन्धरम्।
मिलित्वा वणिजो मूलदेवमेवं व्यजिज्ञपन्॥ ५१॥
जाग्रत्यपि प्रजात्रातुं त्वयि देव दिवानिशम्।
अमुष्यतेद नगरं परितः परिमोषिभिः॥ ५२॥
कोला इव [1]चिरं चौराः पुरेऽस्मिन्मन्दिराणि नः।
प्रतिक्षेपं खनन्त्युच्चैर्नारक्षा रक्षितुं क्षमाः॥ ५३॥
अदृश्यमानाः केनापि कृतसिद्धाञ्जना इव।
भ्राम्यन्ति चौराः स्वैरं नो गृहेषु स्वगृहेष्विव॥ ५४॥
अचिरान्निग्रहीष्यामि तस्करानयशस्करान्।
[1]मूलदेवोऽभिधायैवं वणिजो विससर्ज तान्॥ ५५॥
आदिशन्नगराध्यक्षं साक्षेपं क्ष्मापतिस्ततः।
अन्विष्य तस्करान् सर्वान् गृहाण निगृहाण च॥ ५६॥
अथोवाच पुराध्यक्षः स्वामिन्नेकोऽस्ति तस्करः।
असौ न शक्यते धर्तुं दृष्टनष्टः पिशाचवत्॥ ५७॥

---

(1) ग घ [1]विभो।

जातामर्षस्ततो राजा महौजा निर्ययौ निशि ।
नीलाम्बरप्रावरणो नीलाम्बर इवापरः ॥ ५८ ॥
स्थानेषु शङ्कास्थानेषु बभ्राम स्थामधाम सः ।
द्रष्टुं कमपि नापश्यदहिः पदमिवाम्भसि ॥ ५९ ॥
स सर्वं नगरं भ्रान्तः श्रान्तः सुष्वाप कुत्रचित् ।
खण्डदेवकुले शैलगुहायामिव केसरी ॥ ६० ॥
निशाचर इवाकस्मान्निशाचरणदारुणः ।
तस्कराग्रेसरस्तत्रोपागमन्मण्डिकाभिधः ॥ ६१ ॥
कोऽत्रेति व्याहरन्नुच्चैर्मलिम्लुचपतिस्ततः ।
रुष्टः सुप्तमिव व्यालं पदा नृपमघट्टयत् ॥ ६२ ॥
चेष्टां स्थानं च वित्तं च जिज्ञासुस्तस्य भूपतिः ।
ऊचे कार्पटिकोऽस्मीति क क निष्णा न तादृशाः ॥ ६३ ॥
एहि कार्पटिकाद्य त्वामदरिद्रीकरोम्यहम् ।
इत्यूचे तस्करो भूपं मदान्धानां धिगज्ञताम् ॥ ६४ ॥
तमन्वचालीत्सोऽर्थेच्छुः पत्तिवत्पृथिवीपतिः ।
ममर्द गर्दभस्यापि पादौ कार्याज्जनार्दनः ॥ ६५ ॥
अजानानः स राजानं पार्श्वे मृत्युमिवात्मनः ।
जगाम धाम कस्यापि श्रेष्ठिनः श्रेष्ठसम्पदः ॥ ६६ ॥
तत्र खात्रं खनित्रेण पातयित्वा स वेश्मनः ।
जग्राह सारद्रविणं राहुः कुण्डात्सुधामिव ॥ ६७ ॥
अग्रो राज्ञा समस्तं तद्वाहयामास तस्करः ।
उदरं दर्शयामास शाकिन्येव स मूढधीः ॥ ६८ ॥

तमुन्मूलयितुं मूलान्मूलदेव उवाह तत् ।
धूर्त्ता हि कारणोपात्तमार्दवाः कार्यराक्षसाः ॥ ६९ ॥

जीर्णोद्यानं ततो गत्वा गुहामुद्घाट्य सोऽविशत् ।
निनाय तत्र भूपं च च्छगणारोपितालिवत् ॥ ७० ॥

आसीन्नागकुमारीव कुमारी तत्र तत्स्वसा ।
नवयौवनलावण्यपुण्यावयवशालिनी ॥ ७१ ॥

क्षालयास्यातिथेः पादावित्यादिष्टा स्वबन्धुना ।
सोपकूपं ततो भूपमुपावेशयदासने ॥ ७२ ॥

प्रक्षालयन्ती तत्पादकमले कमलेक्षणा ।
अनुभूय मृदुस्पर्शं तं सर्वाङ्गमुदैक्षत ॥ ७३ ॥

अहो कोऽप्येष कन्दर्पः साक्षादिति सविस्मया ।
सानुरागा सानुकम्पा साऽब्रवीदिति भूपतिम् ॥ ७४ ॥

पादप्रक्षालनव्याजात्कूपेऽस्मिन्नपरे [1]नराः ।
अपात्यन्त महाभाग तस्कराणां कुतः कृपा ॥ ७५ ॥

क्षेप्स्यामि नेह कूपे त्वां त्वत्प्रभाववशीकृता ।
महतामनुभावो हि वशीकरणमद्भुतम् ॥ ७६ ॥

ततो मदुपरोधेन सुन्दरापसर द्रुतम् ।
द्वयोरप्यन्यथा नाथ कुशलं न भविष्यति ॥ ७७ ॥

विमृश्याथ महीनाथो निर्जगाम द्रुतं ततः ।
धीमन्तो हि धिया घ्नन्ति द्विषः सत्यपि विक्रमे ॥ ७८ ॥

गते नृपे तु व्याहारि तया गच्छत्यसाविति ।

(1) च छ जनाः ।

स्वभूपरक्षणार्थं हि प्रयत्नो धीमतामयम् ॥ ७९ ॥
आकृष्टकङ्कासिजिह्वालो वेताल इव दारुणः ।
अनुभूपालमुत्तालो दधावे मण्डिकस्ततः ॥ ८० ॥
तं समासन्नमालोक्य भूपतिर्धीबृहस्पतिः ।
चत्वरोत्तम्भितग्रावस्तंभेनान्तरितोऽभवत् ॥ ८१ ॥
कोपान्धनयनश्चासौ स एवैष पुमानिति ।
कङ्कासिना द्विधत्स्तम्भं छित्त्वाऽगात्स्वाम मण्डिकः ॥ ८२ ॥
ययौ स्वं धाम राजाऽपि हृष्टश्चौरोपलम्भतः ।
प्रायः सौख्याय जायेत दोषकारी न कस्य वा ॥ ८३ ॥
राजा प्रातस्ततो राजपाटिकाव्याजतो बहिः ।
दस्युं विश्वमनोदस्युं तं निरूपयितुं ययौ ॥ ८४ ॥
अथ वस्त्रापणद्वारे कुर्वाणं तुन्नकारताम् ।
पट्टवेष्टितजङ्घोरुं किञ्चिदुद्घाटिताननम् ॥ ८५ ॥
तस्करं मस्करलतोपेतं छद्मस्थयाकृतिम् ।
दृष्ट्वोपालक्षयत् क्ष्मापः स्वपादृष्टानुमानतः ॥ ८६ ॥ (युग्मम्)
गत्वा हर्म्यं महीनाथोऽभिज्ञानानि निवेदयन् ।
पुरुषान् प्रेषयामास तस्याकारणहेतवे ॥ ८७ ॥
न ज्ञातः स पुमानूनं तद्विजृम्भितमित्यसौ ।
आहूतोऽमंस्त चौरा हि महाराजिकवेदिनः ॥ ८८ ॥
सोऽगात्ततो राजकुले राज्ञाऽऽस्यत महासने ।
महाप्रसादं कुर्वन्ति नीतिज्ञा हि जिघांसवः ॥ ८९ ॥
तं भूपतिरभाषिष्ट प्रसादमुखया गिरा ।

स्वस्वसा दीयतां मह्यं दातव्या एव कन्यका ॥ ८० ॥
दृष्टपूर्वी स्वसारं मे नापरो निरगात्ततः ।
अयं स एव राजेति निश्चिक्ये मण्डिको हृदि ॥ ८१ ॥
उह्यतां मत्स्वसा देव देवकीयैव सा किल ।
मदीयमन्यदप्येवमवोचत स पार्थिवम् ॥ ८२ ॥
तदानीमप्युपायंस्त रूपातिशयशालिनीम् ।
तस्य स्वसारं नृपतिः कंसारिरिव रुक्मिणीम् ॥ ८३ ॥
महामात्यपदे चक्रे तस्करं तं नरेश्वरः ।
को वेत्ति भूभुजां भावं मध्यं पत्युरिवाश्वसाम् ॥ ८४ ॥
तस्माद्धूषणवस्त्रादि तद्गृहिण्येव भूपतिः ।
नित्यमानाययद्दक्षो धूर्त्तो धूर्त्तैरधृष्यत ॥ ८५ ॥
बहु यावत्समाकृष्टं द्रव्यं तावन्नृपेण सा ।
अभाणि वित्तं त्वद्बन्धोः कियदद्यापि तिष्ठति ॥ ८६ ॥
वित्तमेतावदेवासीदस्य दस्योः स्वसाऽपि हि ।
एवं न्यवेदयद्राज्ञो गोप्यं प्रियतमे न हि ॥ ८७ ॥
विडम्बनाभिर्बह्वीभिर्मण्डिकं चण्डशासनः ।
निजघान ततो राजा पापानां कुशलं कियत् ॥ ८८ ॥
चौर्यात् स्वशुरमपि विक्रमराजराजः,
आनीय मण्डिकमखण्डनयो जघान ।
स्तैन्यं न तेन विदधीत सुधीः कथञ्चि-
दत्रापि जन्मनि विरुद्धफलानुबन्धि ॥ २८८ ॥
॥ इति मूलदेवमण्डिकयोः कथानकम् ॥

आसीद्राजगृहे सम्यग्जितामरपुरे पुरे ।
पादाक्रान्तनृपश्रेणिः श्रेणिको नाम पार्थिवः ॥ १ ॥
राज्ञस्तस्य च तनयो नयविक्रमभाजनम् ।
नाम्नाऽभयकुमारोऽभूत् प्रद्युम्नः श्रीपतेरिव ॥ २ ॥
इतश्च तन्निनगरे वैभारगिरिकन्दरे ।
चौरो लोहखुराख्योऽभूद्रौद्रो रस इवाङ्गवान् ॥ ३ ॥
स तु राजगृहे नित्यं पौराणामुत्सवादिषु ।
लब्ध्वा छिद्राणि विदधे पिशाचवदुपद्रवम् ॥ ४ ॥
आददानस्ततो द्रव्यं भुञ्जानश्च परस्त्रियः ।
भाण्डागारं निशान्तं वा निजं मेने स तत्पुरम् ॥ ५ ॥
चौर्यमेवाभवत्तस्य प्रीत्यै वृत्तिर्न चापरा ।
अपास्य क्रव्यं क्रव्यादा भक्ष्यैस्तृप्यन्ति नापरैः ॥ ६ ॥
तस्यानुरूपो रूपेण चेष्टया च सुतोऽभवत् ।
भार्यायां रोहिणीनाम्न्यां रौहिणेयोऽभिधानतः ॥ ७ ॥
स मृत्युसमये प्राप्ते पित्राऽऽहूयेत्यभाषि सः ।
यद्यवश्यं करोषि त्वमुपदेशं ददामि तत् ॥ ८ ॥
अवश्यमेव कर्त्तव्यमादिष्टं भवता मया ।
कः पितुः पातयेदाज्ञां पृथिव्यामित्युवाच सः ॥ ९ ॥
प्रहृष्टो वचसा तेन चौरो लोहखुरस्ततः ।
पाणिना संस्पृशन् पुत्रमभाषिष्टेति निष्ठुरम् ॥ १० ॥
योऽसौ समवसरणे स्थितः सुरविनिर्मिते ।
विधत्ते देशनां वीरो मा श्रौषीस्तस्य भाषितम् ॥ ११ ॥

अन्यस्तु स्वेच्छया वत्स कुर्यास्त्वमनियन्त्रितः ।
उपदिश्येति पञ्चत्वं प्राप लोहखुरस्ततः ॥ १२ ॥
मृतकार्यं पितुः कृत्वा रौहिणेयस्ततोऽनिशम् ।
चकार चौरिकां लोहखुरोऽपर इवोद्धतः ॥ १३ ॥
पालयन् पितुरादेशं जीवितव्यमिवात्मनः ।
स्वदासेरमिवामुष्णात् स राजगृहपत्तनम् ॥ १४ ॥
तदा च नगरग्रामाकरेषु विहरन् क्रमात् ।
चतुर्दशमहासाधुसहस्रपरिवारितः ॥ १५ ॥
सुरैः संचार्यमाणेषु स्वर्णाम्भोजेषु चारुषु ।
न्यस्यन् पदानि तत्रागाद्वीरश्चरमतीर्थकृत् ॥ १६ ॥
[1]व्यन्तरैरसुरैर्ज्योतिषिकैर्वैमानिकैरपि ।
सुरैः समवसरणं चक्रे जिनपतेस्ततः ॥ १७ ॥
आयोजनविसर्पिण्या सर्वभाषानुयातया ।
भारत्या भगवान् वीरः प्रारेभे धर्मदेशनाम् ॥ १८ ॥
तदानीं रौहिणेयोऽपि गच्छन् राजगृहं प्रति ।
मार्गान्तराले समवसरणाभ्यर्णमाययौ ॥ १९ ॥
एवं स चिन्तयामास यथाऽनेन व्रजामि चेत् ।
शृणोमि वीरवचनं तदाज्ञा भज्यते पितुः ॥ २० ॥
न चान्यो विद्यते पन्था भवत्वेवं विमृश्य सः ।
कर्णौ पिधाय पाणिभ्यां द्रुतं राजगृहं ययौ ॥ २१ ॥

---

(१) ख ग घ ङ वैमानिकैर्ज्योतिषिकैर्व्यन्तरैरसुरैरपि ।

एवमन्वहमप्यस्य यातायातकृतोऽन्यदा ।
उपसमवसरणं पादेऽभज्यत कण्टकः ॥ २२ ॥

औत्सुक्यगमनाद्गाढमग्नं पादे स कण्टकम् ।
अनुद्धृत्य समुद्धर्त्तुं न शशाक क्रमात् क्रमम् ॥ २३ ॥

नास्त्युपायोऽपरः कोऽपीत्याकृष्य श्रवणात्करम् ।
कर्षन् कण्टकमश्रौषीदिति विश्वगुरोर्गिरम् ॥ २४ ॥

महीतलास्पर्शिपादा निर्निमेषविलोचनाः ।
अम्लानमाल्या निःस्वेदा नीरजोऽङ्गाः सुरा इति ॥ २५ ॥

बहुश्रुतमिदं धिग् धिगित्याशूद्धृतकण्टकः ।
पिधाय पाणिना कर्णं तथैवापससार सः ॥ २६ ॥

अथान्वहं मुष्यमाणे पत्तने तेन दस्युना ।
उपेत्य श्रेणिकं श्रेष्ठिश्रेष्ठा व्यज्ञपयन्निति ॥ २७ ॥

त्वयि शासति देवान्यस्माद् भयं द्रविणं तु नः ।
आकृष्य गृह्यते चौरैरदृष्टैर्घटकैरिव ॥ २८ ॥

बन्धूनामिव तेषां तु गृहीतः पीडया ततः ।
सकोपाटोपमित्यूचे नृपतिर्दण्डपाशिकम् ॥ २९ ॥

किं चौरीभूय दायादीभूय वा मम वेतनम् ।
गृह्णासि चौरैर्गृह्णन्तं यदेतं त्वदुपेक्षितः ॥ ३० ॥

सोऽप्यूचे देव कोऽप्येष चौरः पौरान् विलुण्टति ।
रौहिणेयाह्वयो धर्त्तुं दृष्टोऽपि न हि शक्यते ॥ ३१ ॥

विद्युदुत्क्षिप्तकरणेनोत्प्लुत्यायं प्लवङ्गवत् ।
गेहाद्गेहं ततो वप्रमुल्लङ्घयति हेलया ॥ ३२ ॥

मार्गेण यामस्तन्मार्गं यावत्तावत्त नेष्यते।
त्यक्तो ह्येकक्रमेणापि यतेन त्यज्यते क्रमैः॥ ३३॥
न तं हन्तुं नवा धर्त्तुमहं शक्नोमि तस्करम्।
गृह्णातु तदिमां देवो दाण्डपाशिकतां निजाम्॥ ३४॥
नृपेणोल्लासितैकभ्रूसंज्ञया भाषितस्ततः।
कुमारोऽभयकुमारस्तमूचे दाण्डपाशिकम्॥ ३५॥
चतुरङ्गचमूं सज्जीकृत्य मुञ्च बहिष्पुरात्।
यदान्तःप्रविशेच्चौरः पत्तनं वेष्टयेस्तदा॥ ३६॥
अन्तश्च त्रासितो विद्युदुत्क्षिप्तकरणेन सः।
पतिष्यति बहिः सैन्ये वागुरायां कुरङ्गवत्॥ ३७॥
प्रतिभूभिरिवानीतो निजपादैस्ततश्च सः।
ग्रहीतव्यो महान् दस्युरप्रमत्तैः पदातिभिः॥ ३८॥
तथेत्यादेशमादाय निर्ययौ दाण्डपाशिकः।
तथैव च चमूं सज्जां प्रच्छन्नं निर्ममे सुधीः॥ ३९॥
तद्दिने रौहिणेयोऽपि ग्रामान्तरसमागमात्।
अजानानः पुरीं रुद्धां वारीं गज इवाविशत्॥ ४०॥
तैरुपायैस्ततो धृत्वा बद्धा च स मलिम्लुचः।
आनीय नृपतेर्दाण्डपाशिकेन समर्पितः॥ ४१॥
यथा न्याय्यं सतां त्राणमसतां निग्रहस्तथा।
निगृह्यतामसौ तस्मादित्यादिशन्महीपतिः॥ ४२॥
अलोप्त्रः प्राप्त इत्येष न हि निग्रहमर्हति।
विचार्य निग्रहीतव्य इत्युवाचाभयस्ततः॥ ४३॥

अथ पप्रच्छ तं राजा कस्त्वं कीदृशजीविकः ।
कुतो हेतोरिहायातो रौहिणेयः स चासि किम् ॥ ४४ ॥
स्वनामशङ्कितः सोऽपि प्रत्युवाचेति भूपतिम् ।
शालिग्रामे दुर्गचण्डाभिधानोऽहं कुटुम्बिकः ॥ ४५ ॥
प्रयोजनवशेनेहायातः संजातकौतुकात् ।
एकदेवकुले रात्रिं महतीमस्मि च स्थितः ॥ ४६ ॥
स्वधाम गच्छन्नारक्षैराक्षिप्तो राक्षसैरिव ।
प्रलङ्घ्यमहं वप्रं प्राणभीर्महती हि भीः ॥ ४७ ॥
मध्यारक्षविनिर्यातो बाह्यारक्षगणेष्वहम् ।
कैवर्तहस्तविस्रस्तो जाले मत्स्य इवापतम् ॥ ४८ ॥
ततो निरपराधोऽपि बद्धा चौर इवाधुना ।
अहमेभिरिहानीतो नीतिसार विचारय ॥ ४९ ॥
ततस्तं भूपतिर्गुप्तौ प्रेषयामास तत्क्षणात् ।
तत्प्रवृत्तिज्ञानहेतोस्तत्र ग्रामे च पूरुषम् ॥ ५० ॥
सोऽग्रेऽपि ग्राहितो ग्रामः सङ्केतं तेन दस्युना ।
चौराणामपि केषाञ्चिच्चित्रमायतिचिन्तनम् ॥ ५१ ॥
तत्स्वरूपं राजपुंसा ग्रामः पृष्टोऽब्रवीदिदम् ।
दुर्गचण्डोऽत्र वास्तव्यः परं ग्रामान्तरं गतः ॥ ५२ ॥
तत्रार्थे तेन विज्ञप्ते दध्यौ श्रेणिकसूरिदम् ।
अहो सुकृतदम्भस्य ब्रह्माऽप्यन्तं न गच्छति ॥ ५३ ॥
अभयोऽसज्जयदथ प्रासादं सप्तभूमिकम् ।
महार्घरत्नखचितं विमानमिव नाकिनाम् ॥ ५४ ॥

श्रियाऽस्मरावमाणाभीरमणीभिरलङ्कृतम् ।
दिवोऽमरावतीखण्डमिव भ्रष्टमतर्कि सः ॥ ५५ ॥
गन्धर्ववर्गप्रारब्धसङ्गीतकमहोत्सवः ।
सोऽधादकस्मादुद्भूतगन्धर्वनगरश्रियम् ॥ ५६ ॥
ततोऽभयो मद्यपानमूढं निर्माय तस्करम् ।
परिधाप्य देवदूष्ये '१अभितल्पमशाययत् ॥ ५७ ॥
मदे परिणते यावदुदस्थात्तावदैक्षत ।
सोऽकस्माद्विस्मयकरीमपूर्वां दिव्यसंपदम् ॥ ५८ ॥
अत्रान्तरेऽभयादिष्टैर्नरनारीगणैस्ततः ।
उदचारि जय जय नन्देत्यादिकमङ्गलम् ॥ ५९ ॥
अस्मिन्महाविमाने त्वमुत्पन्नस्त्रिदशोऽधुना ।
अस्माकं स्वामिभूतोऽसि त्वदीयाः किङ्करा वयम् ॥ ६० ॥
अप्सरोभिः सहैताभी रमस्व स्वैरमिन्द्रवत् ।
इत्यादि चतुरं चाटुगर्भमूचे च तैरसौ ॥ ६१ ॥
जातः सुरः किमस्मीति दध्यौ यावत्स तस्करः ।
संगीतकार्यं तावत्तैः प्रदत्तः समहस्तकः ॥ ६२ ॥
उपेत्य पुंसा केनापि स्वर्णदण्डभृता ततः ।
सहसा भोः किमारब्धमेतदेवमभाष्यत ॥ ६३ ॥
ततः प्रतिबभाषे तैः प्रतीहार निजप्रभोः ।
प्रदर्शयितुमारब्धं स्वकं विज्ञानकौशलम् ॥ ६४ ॥
सोऽप्युवाच स्वनाथस्य दर्श्यतां निजकौशलम् ।

(१) ख ग घ ऽभितल्प- ।

देवलोकसमाचारं कार्यतां किं त्वसाविति ॥ ६५ ॥
तैरुक्तं कीदृगाचार इति श्रुत्वा स पूरुषः ।
साक्षेपमित्यभाषिष्ट किमेतदपि विस्मृतम् ॥ ६६ ॥
य इहोत्पद्यते देवः स स्वे सुकृतदुष्कृते ।
आख्याति प्राक्तने स्वर्गभोगाननुभवेत्ततः ॥ ६७ ॥
विस्मृतं स्वामिलाभेन सर्वमेतत्प्रसीदतः ।
देवलोकस्थितिं देवः कार्यतामिति तेऽवदन् ॥ ६८ ॥
स रौहिणेयमित्यूचे निजे कृत्ये शुभाशुभे ।
प्राक्तने शंस नः स्वर्गभोगान् भुङ्क्ष्व ततः परम् ॥ ६९ ॥
ततः सोऽचिन्तयद्दस्युः किमेतत् सत्यमीदृशम् ।
मां ज्ञातुमभयेनैष प्रपञ्चो रचितोऽथवा ॥ ७० ॥
ज्ञेयं कथमेतदिति ध्यायता तेन संस्मृतम् ।
कण्टकोद्धरणकालाकर्णितं भगवद्वचः ॥ ७१ ॥
देवस्वरूपं श्रीवीराच्छ्रुतं चेत् संवदिष्यति ।
तत्सत्यं कथयिष्यामि करिष्याम्यन्यथोत्तरम् ॥ ७२ ॥
इति बुद्ध्वा स तानैक्षाञ्चक्रे चिन्तितलक्षणः ।
प्रस्वेदमलिनान् म्लानमाल्यानिमिषदीक्षणान् ॥ ७३ ॥
तत्सर्वं कपटं ज्ञात्वाऽचिन्तयत् दस्युरुत्तरम् ।
तेनोचे कथ्यतां देवलोकः सर्वोऽयमुत्सुकः ॥ ७४ ॥
रौहिणेयस्ततोऽवादीन्मया पूर्वत्र जन्मनि ।
अदीयत सुपात्रेभ्यो दानं चैत्यानि चक्रिरे ॥ ७५ ॥
प्रत्यष्ठाप्यन्त बिम्बानि पूजितान्यष्टधाऽर्चया ।

विहितास्तीर्थयात्राश्च गुरवः पर्युपासिताः ॥ ७६ ॥
इत्यादि सदनुष्ठानं मया कृतमिति ब्रुवन् ।
अवे दम्भभृता शंस दुश्चरितमपि स्वकम् ॥ ७७ ॥
रौहिणेयोऽप्युवाचेदं साधुसंसर्गशालिना ।
कदाचिदप्याचरितं किञ्चिन्नाशोभनं मया ॥ ७८ ॥
व्याजहार प्रतीहारो जन्म नैकस्वभावतः ।
याति तत्कथ्यतां चौर्यपारदारिकतादिकम् ॥ ७९ ॥
रौहिणेयोऽभ्यधत्तैवं किमेवंविधचेष्टितः ।
स्वर्लोकं प्राप्नुयादन्धः किमारोहति पर्वतम् ॥ ८० ॥
गत्वा ततस्तैस्तत्सर्वमभयाय निवेदितम् ।
अभयेन च विज्ञप्त श्रेणिकस्य महीपतेः ॥ ८१ ॥
एवंविधैरुपायैर्यश्चौरो ज्ञातुं न शक्यते ।
स चौरोऽपि विमोक्तव्यः शक्या नीतिर्न लङ्घितुम् ॥ ८२ ॥
अभयः पार्थिवादेशाद्रौहिणेयममुचत् ।
वञ्चास्ते वञ्चनादक्षैर्दक्षा अपि कदाचन ॥ ८३ ॥
ततः सोऽचिन्तयच्चौरो धिगादेशं पितुर्मम ।
वञ्चितोऽस्मि चिरं येन भगवद्वचनामृतात् ॥ ८४ ॥
नागमिष्यत् प्रभुवचो यदि मे कर्णकोटरम् ।
तदा विविधमारैर्णागमिष्यं यमगोचरम् ॥ ८५ ॥
अनिच्छयाऽपि हि तदा गृहीतं भगवद्वचः ।
मम जीवातवे जज्ञे भैषज्यमिव रोगिणः ॥ ८६ ॥
त्यक्त्वाऽर्हद्वचनं हा धिक् चौरवाचि रतिर्मया ।

आम्रानपास्य निम्बेषु काकेनेव चिरं हृता ॥ ८७ ॥
उपदेशैकदेशोऽपि यदीयः फलतीदृशम् ।
तस्योपदेशः सामस्त्यात् सेवितः किं करिष्यति ॥ ८८ ॥
एवं विमृश्य मनसा ययौ भगवतोऽन्तिके ।
पादाम्बुजे च नत्वैवं रौहिणेयो व्यजिज्ञपत् ॥ ८९ ॥
भवाब्धौ प्राणिनां घोरविपन्नक्रकुलाकुले ।
महापोतायते ते गीरायोजनविसर्पिणी ॥ ९० ॥
निषिद्धस्त्वद्वचः श्रोतुमनार्येणाप्तमानिना ।
इयत्कालमहं पित्रा वञ्चितस्त्वज्जगद्गुरो ॥ ९१ ॥
त्रैलोक्यनाथ ते धन्याः श्रद्दधानाः पिबन्ति ये ।
भवद्वचनपीयूषं कर्णाञ्जलिपुटैः सदा ॥ ९२ ॥
अहं तु पापोऽश्रौषुर्भगवन् भवतो वचः ।
पिधाय कर्णौ हा कष्टमिदं स्थानमलङ्घयम् ॥ ९३ ॥
एकदाऽनिच्छताऽप्येकं श्रुतं युष्मद्वचो मया ।
तेन मन्त्राक्षरेणेव रक्षितो राजराक्षसात् ॥ ९४ ॥
यथाऽहं मरणात्त्रातस्तथा त्रायस्व नाथ माम् ।
संसारसागरावर्त्ते निमज्जन्तं जगत्पते ॥ ९५ ॥
ततस्तत्कृपया स्वामी निर्वाणपददायिनीम् ।
विशुद्धां विदधे साधु साधुधर्मस्य देशनाम् ॥ ९६ ॥
ततः प्रबुद्धः प्रणमन् रौहिणेयोऽब्रवीदिदम् ।
यतिधर्मस्य योग्योऽस्मि नवे[1]त्यादिश मां प्रभो ॥ ९७ ॥

(१) क ख ग -त्यादिशतां ।

योग्योऽसीति स्वामिनोक्ते, ग्रहीष्यामि विभो व्रतम् ।
परं किञ्चिद्ददिष्यामि, श्रेणिकेनेत्युवाच सः ॥ ९८ ॥
निर्विकल्पं निर्विशङ्कं स्ववक्त्राव्यमुदीरय ।
इत्युक्तः श्रेणिकनृपेणोचे लोहखुरात्मजः ॥ ९९ ॥
दृष्ट देव भवद्भिर्यः श्रुतोऽहं लोकवार्त्तया ।
स एव रौहिणेयोऽस्मि भवत्पत्तनमोषकः ॥ १०० ॥
भगवद्वचसैकेन दुर्लङ्घ्या लङ्घिता मया ।
प्रज्ञाऽभयकुमारस्य तरण्डेनेव निम्नगा ॥ १ ॥
अशेषमेतन्मुषितं पत्तनं भवतो मया ।
नान्वेषणीयः कोऽप्यन्यस्तस्करो राजभास्कर ॥ २ ॥
कमपि प्रेषय यथा तल्लोप्त्रं दर्शयाम्यहम ।
करिष्ये सफलं जन्म ततः प्रव्रज्यया निजम् ॥ ३ ॥
अभयोऽथ समुत्थाय श्रेणिकादेशतः स्वयम् ।
कौतुकात्पौरलोकश्च सहागात्तेन दस्युना ॥ ४ ॥
ततो गिरिनदीकुञ्जश्मशानादिषु तद्धनम् ।
स्थगितं दर्शयामास सोऽथ श्रेणिकसूनवे ॥ ५ ॥
अभयोऽपि हि यद्यस्य तत्तस्य धनमार्पयत् ।
नीतिज्ञानामलोभानां मन्त्रिणां नापरा स्थितिः ॥ ६ ॥
परमार्थं कथयित्वा प्रबोध्य निजमानुषान् ।
श्रद्धालुर्भगवत्पार्श्वे रौहिणेयः समाययौ ॥ ७ ॥
ततः श्रेणिकराजेन कृतनिष्क्रमणोत्सवः ।
[1]स जग्राह परिव्रज्यां पार्श्वे श्रीवीरपादयोः ॥ ८ ॥

(१) ख ङ जग्राह स- ।

ततश्चतुर्थादारभ्य षण्मासान् यावदुज्ज्वलम् ।
विनिर्ममे तपःकर्म कर्मनिर्मूलनाय सः ॥ ९ ॥
तपोभिः कर्शितः कृत्वा भावसंलेखनां च सः ।
श्रीवीरमापृच्छ्य गिरौ पादपोपगमं व्यधात् ॥ १० ॥
शुभध्यानः स्मरन् पञ्चपरमेष्ठिनमस्क्रियाम् ।
त्यक्त्वा देहं जगाम द्यां रौहिणेयो महामुनिः ॥ ११ ॥

रौहिणेय इव चौर्यनिवृत्तः
स्वर्गलोकमचिरादुपयाति ।
तत्सुधीर्न विदधीत कथंचि-
च्चौरिकामुभयलोकविरुद्धाम् ॥ ११२ ॥

॥ इति रौहिणेयकथानकम् ॥ ७२ ॥

स्तेयस्यातिपरिहरणीयतामाह --

दूरे परस्य सर्वस्वमपहर्तुमुपक्रमः ।
उपाददीत नादत्तं तृणमात्रमपि क्वचित् ॥ ७३ ॥

दूरे आस्तां तावत्परस्य सर्वस्व निःशेषधनम्, अपहर्तुमुपक्रमः प्रारम्भः, अदत्तं स्वामिना, तृणमात्रमपि नोपाददीत न गृह्णीयात् न तदर्थं यत्नं कुर्यादिति यावत् ॥ ७३ ॥

स्तेयनिवृत्तानां फलं श्लोकद्वयेनाह--

परार्थग्रहणे येषां नियमः शुद्धचेतसाम् ।
अभ्यायान्ति श्रियस्तेषां स्वयमेव स्वयम्वराः ॥७४॥

परार्थग्रहणे परधनहरणे येषां नियमो निवृत्तिः शुद्धचेतसां

निर्मलचित्तानां न तु बकवृत्तीनां कश्मलमनसां तेषामभ्यायान्ति अभिमुखमायान्ति श्रियः सम्पदः, स्वयमेव न तु परप्रेरणया व्यवसायेन वा। स्वयंवरा इत्युपमानगर्भम्। स्वयम्वरा इव कन्याः॥ ७४॥

तथा—

अनर्था दूरतो यान्ति साधुवादः प्रवर्त्तते।
स्वर्गसौख्यानि ढौकन्ते स्फुटमस्तेयचारिणाम्॥७५॥

अनर्था विपदः, दूरतो यान्त्यासन्ना अपि न भवन्ति; साधुरय-मिति प्रवादः साधुवादः श्लाघा, प्रवर्त्तते प्रसरति, एतावदैहिक[1] फलम्; स्वर्गसौख्यानीति तु पारलौकिकम्, अस्तेयव्रतेनावश्यं चरन्तीत्यस्तेयचारिणस्तेषाम्।

अत्रान्तरे श्लोकाः—

वरं वह्निशिखा पीता सर्पास्यं चुम्बितं वरम्।
वरं हालाहलं लीढं परस्वहरणं न तु॥ १॥
प्रायः परस्वलुब्धस्य निःशूका बुद्धिरेधते।
हन्तुं भ्रातॄन् पितॄन् दारान् सुहृदस्तनयान् गुरून्॥ २॥
परस्वं तस्करो गृह्णन् वधबन्धादि नेक्षते।
पयःपायीव लगुडं बिडाल उपरि स्थितम्॥ ३॥
व्याधधीवरमार्जारादिभ्यश्चौरोऽतिरिच्यते।
निगृह्यते नृपतिभिर्यदसौ नेतरे पुनः॥ ४॥

(१) ग छ एतावदैहिकं।

स्वर्णादिकेऽप्यन्यधने पुरःस्थे
मदा मनीषा दृषदीव येषाम् ।
सन्तोषपीयूषरसेन तृप्ता-
स्ते यां लभन्ते गृहमेधिनोऽपि ॥ ५ ॥ ७५ ॥

इदानीमामुष्मिकमैहिकं चाब्रह्मफलमुपदर्श्य
गृहस्थोचितं ब्रह्मचर्यव्रतमाह—

षण्ढत्वमिन्द्रियच्छेदं वीक्ष्याब्रह्मफलं सुधीः ।
भवेत् स्वदारसन्तुष्टोऽन्यदारान् वा विवर्जयेत् ॥ ७६ ॥

षण्ढत्वमामुष्मिकं परदाररतानां फलं, इन्द्रियच्छेदश्च राजादिकृत [1]ऐहिकं, अब्रह्मणः प्रतिषिद्धस्य मैथुनस्य, वीक्ष्य शास्त्रात्प्रत्यक्षेण वा ज्ञात्वा, स्वदारेषु धर्मपत्नीषु सन्तुष्टो भवेदित्येकं गृहस्थब्रह्मचर्य्यम्, अन्यदारान् वा परसम्बन्धिनीः स्त्रियो विवर्जयेत् । स्वस्त्रीसाधारणस्त्रीसेवीत्यर्थः इति द्वितीयम् ॥ ७६ ॥

यद्यपि गृहस्थस्य प्रतिपन्नं व्रतमनुपालयतो न तादृशः पापसम्बन्धोऽस्ति तथापि यतिधर्मानुरक्तो यतिधर्मप्राप्तेः पूर्वं गार्हस्थ्येऽपि कामभोगविरक्तः सन् श्रावकधर्मं परिपालयति इति तं वैराग्यकाष्ठामुपनेतुं सामान्येनाब्रह्मदोषानाह—

रम्यमापातमात्रे यत् परिणामेऽतिदारुणम् ।
किंपाकफलसंकाशं तत्कः सेवेत मैथुनम् ॥ ७७ ॥

आपातमात्रे प्रथमारम्भमात्रे, रम्यं मनोहरं, परिणामे

---

(१) क -ज्ञातमैहिकं ।

प्रारम्भादुत्तरोत्तरावस्थायां, दारुणं रौद्रं, किंपाकफलसंकाशं किंपाको वृक्षविशेषस्तत्फलसदृशं, किंपाकफलं ह्यापाते रम्यं परिणामे दारुणं मारणात्मकत्वात्।

यदाह —

'वसुड्ढा हलहलया' दीसन्ता दिन्ति हिययपरिओसं।
किंपागफला पुत्तय आसायन्तो विणस्सिहिसि ॥ १ ॥

एवंविधं यन्मैथुनं मिथुनकर्म तत्कः सेवेतेति सम्बन्धः।

यदाह —

यद्यपि निषेव्यमाणा मनसः परितुष्टिकारका विषयाः।
किंपाकफलादनवत् भवन्ति पश्चादतिदुरन्ताः ॥ २ ॥ ७७ ॥

मैथुनस्य परिणामदारुणत्वमाह —

कम्पः स्वेदः श्रमो मूर्च्छा भ्रमिर्ग्लानिर्बलक्षयः।
राजयक्ष्मादिरोगाश्च भवेयुर्मैथुनोत्थिताः ॥ ७८ ॥

कम्पो वेपथुः, स्वेदो घर्मः, श्रमः क्लमः, मूर्च्छा मोहः, भ्रमिर्भ्रमः, ग्लानिरङ्गसादः, बलक्षयः शक्तिनाशः, राजयक्ष्मा क्षयरोगः, स आदिर्येषां कासश्वासादीनां रोगाणां ते तथा मैथुनोत्थिता मैथुनप्रभवाः ॥ ७८ ॥

---

(१) वर्णाढ्याः कौतुका दृश्यमाना ददति हृदयपरितोषम्।
किंपाकफलान् पुत्रक आस्वादमानो विनङ्क्ष्यसि ॥ १ ॥

(२) 'तुमुलम्मि कोउए हलहलं' इति श्रीहेमचन्द्राचार्याः देशीनाममालायाँ अष्टमवर्गे अनेकार्थप्रकरणे ७४ श्लोके व्याचख्युः।

अहिंसापरिवारत्वाच्छेषव्रतानां मैथुने
अहिंसाया एवाभावमाह—

योनियन्त्रसमुत्पन्नाः सुसूक्ष्मा जन्तुराशयः ।
पीड्यमाना विपद्यन्ते यत्र तन्मैथुनं त्यजेत् ॥ ७९ ॥

योनिः प्रसवमार्गः, सैव यन्त्राकारत्वाद्यन्त्रं, तत्र समुत्पन्नाः संमूर्च्छनेनोत्पन्नाः, ते च न चक्षुर्ग्राह्या इत्याह—सुसूक्ष्माः, जन्तुराशयो जन्तुसमूहाः, पीड्यमाना मृद्यमानाः पुंध्वजेनेति शेषः, रूतनालिकायां तप्तायःकणकप्रवेशे रूतानीव, विपद्यन्ते विनश्यन्ति, यत्र मैथुने तन्मैथुनं त्यजेत् ॥ ७९ ॥

योनौ जन्तुसद्भावं संवादेन दृढयति—

जन्तुसद्भावं वात्स्यायनोऽप्याह ।

वात्स्यायनः कामशास्त्रकारः । अनेन च वात्स्यायनसंवादाधीनमस्य प्रामाण्यमिति नोच्यते, न हि जैनं शासनमन्यसंवादाधीनप्रामाण्यं किन्तु येऽपि कामप्रधानास्तैरपि जन्तुसद्भावो नापह्नुत इत्युच्यते ।

वात्स्यायनश्लोको यथा—

रक्तजाः कृमयः सूक्ष्मा मृदुमध्याधिशक्तयः ।
जन्मवर्त्मसु कण्डूतिं जनयन्ति तथाविधाम् ॥ ८० ॥

रक्तजा रक्तोद्भवाः, कृमयो जन्तुविशेषाः, सूक्ष्मा अप्रत्यक्षाः,

मृदुमध्याधिशक्तयः मृदुशक्तयो मध्यशक्तयोऽधि[1]शक्तयश्च, तथाविधां मृदुमध्याधिमात्रशक्त्यनुरूपां ; मृदुशक्तयो मृद्वीं, मध्यशक्तयो मध्यां, [2]अधिकशक्तयोऽधिकां कण्डूतिं कण्डूं जन्मवर्त्मसु योनिषु जनयन्ति ॥ ८० ॥

कामज्वरचिकित्सार्थमौषधमिव मैथुनसेवनमिति यो मन्येत तं प्रत्याह —

स्त्रीसम्भोगेन यः कामज्वरं प्रतिचिकीर्षति ।
स हुताशं घृताहुत्या विध्यापयितुमिच्छति ॥८१॥

प्रतिचिकीर्षति प्रतिकर्तुमिच्छति, विध्यापयितुं शमयितुम् ; अयमर्थो नायं कामज्वरस्य प्रतीकारोऽनुगुणः, अपि तु वृद्धिहेतुः नहि हुताशे घृताहुतिप्रक्षेपस्तच्छान्त्यै भवति किन्तु तद्वृद्धैः ।

बाह्या अप्याहुः—

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ १ ॥

[3]किन्तु कामज्वरप्रतीकारा ईषत्करा वैराग्यभावनाप्रतिपक्षसेवाधर्मशास्त्रश्रवणादयः ; तदेतेषु कामज्वरप्रशान्त्युपायेषु सत्सु किं भवभ्रमणहेतुना मैथुनसेवनेन ॥ ८१ ॥

---

(१) क ख ग ङ -ऽधिक- ।
(२) च अधिशक्त- ।
(३) ग ङ किंच ।

¹एतदेवाह—

वरं ज्वलदयस्तम्भपरिरम्भो विधीयते।

न पुनर्नरकद्वाररामाजघनसेवनम्॥ ८२॥

अयमर्थः। भवतु कामज्वरोपशमहेतुर्मैथुनं परं नरकहेतुत्वान्न प्रशस्यम्॥ ८२॥

अपि च स्त्रीसम्बन्धनिबन्धनं निधुवनं, स्त्रियश्च स्मृता अपि सकलगुणगरिमविघातहेतव इत्याह,—

सतामपि हि वामभ्रूर्ददाना हृदये पदम्।

अभिरामं गुणग्रामं निर्वासयति निश्चितम्॥८३॥

सतामपि हि महात्मनामपि, वामभ्रूर्विरचितलोचनविकारा, हृदये पदं ददाना स्मृतिमात्रेणापि सन्निधापिता, अभिरामं रमणीयं, गुणग्रामं गुणसमूहं, निर्वासयति उद्वासयति। श्लेषच्छाया चेयम्। यथा कुनियोगी कश्चिद्देशमध्ये पदं ²ददान एव रक्षितव्यान् ग्रामान् लोभमोहादिनोद्वासयति, एवं हृदये लब्धपदा कामिन्यपि पालनीयं गुणग्राममुच्छेदयति। अथवा सतामपि गुणग्रामं सतामिव हृदये पादं दत्त्वा वामभ्रूर्निर्वासयति॥ ८३॥

हृदयसन्निधापनमपि स्त्रीणां बहुदोषत्वाद्गुणहानिहेतुः किं पुना रमणमित्येतदेवाह—

---

(१) ख एतदेवमाह।

(२) च ददानः प्रवररक्षितव्यान्।

वञ्चकत्वं नृशंसत्वं चञ्चलत्वं कुशीलता।
इति नैसर्गिका दोषा यासां तासु रमेत कः ॥८४॥

वञ्चकत्वं मायाशीलता, नृशंसत्वं क्रूरकर्मकारिता, चञ्चलत्वं क्वाप्यवस्थितचित्तत्वाभावः, कुशीलता दुःस्वभावता, उपस्थसंयमाभावो वा, इत्येते नैसर्गिकाः स्वाभाविका दोषा नत्वौपाधिकाः, तासु को रमेत ॥ ८४ ॥

न चैयन्त एव दोषा किन्त्वपरिसंख्याता इत्याह—

प्राप्तुं पारमपारस्य पारावारस्य पार्यते।
स्त्रीणां प्रकृतिवक्राणां दुश्चरित्रस्य नो पुनः ॥८५॥

पारावारस्य समुद्रस्य, अपारस्यादृष्टपारस्य, पारं परतीरं, प्राप्तुं पार्यते शक्यते, न पुनः स्त्रीणां प्रकृतिवक्राणां स्वभावकुटिलचरित्राणां, दुश्चरित्रस्य दुष्टचेष्टितस्य, पारं पर्यन्तः; प्राप्तुं पार्यत इति ॥ ८५ ॥

दुश्चरित्रमेवाह—

नितम्बिन्यः पतिं पुत्रं पितरं भ्रातरं क्षणात्।
आरोपयन्त्यकार्येऽपि दुर्वृत्ताः प्राणसंशये ॥ ८६ ॥

नितम्बिन्य इति यौवनोन्मादप्रदर्शनार्थम्। अतएव स्त्रीति नोक्तम्। दुर्वृत्ता दुष्टशीलाः, अकार्येऽपि प्रयोजनमन्तरेणापि, अथवाऽकार्येऽल्पे प्रयोजने नञोऽल्पार्थत्वात्, प्राणसंशये प्राणसन्देहे; उपलक्षणं चैतत्। प्राणनाशेऽपि आरोपयन्ति आरोहयन्ति। कमित्याह। पतिं भर्तारम्। सूर्यकान्तेव प्रदेशिराजम्।

यदाह —

[1]भज्जा वि इन्दियविगारदोसनडिया करेइ पइपावम् ।

जह सो पएसिराया सूरियकंताइ तह वहिओ ॥ १ ॥

पुत्रं तनयम् । चुलनीव ब्रह्मदत्तम् ।

यदाह —

[2]माया नियगमइविगप्पियम्मि अत्थे अपूरमाणम्मि ।

पुत्तस्स कुणइ वसणं चुलणी जह बंभदत्तस्स ॥ २ ॥

पितरं जनकं, भ्रातरं सोदरम् । जीवयशा इव जरासन्धं, कालादींश्च भ्रातॄन् ॥ ८६ ॥

अतएव—

भवस्य बीजं नरकद्वारमार्गस्य दीपिका ।

शुचां कन्दः कलेर्मूलं दुःखानां खानिरङ्गना ॥८७॥

भवस्य संसारस्याङ्कुरस्येव बीजं तत्कारणत्वात्संसारस्य, नरकद्वारं नरकप्रवेशः, तत्र यो मार्गः पन्थास्तत्र दीपिकेव दीपिका तत्प्रकाशकत्वात्, शुचां शोकानां वल्लीनामिव कन्दस्तत्प्ररोहहेतुत्वात्, कलेः कलहस्य तरोरिव मूलं पादो वृद्धिहेतुत्वात्, दुःखानां शारीरमानसानां लवणादीनामिव खानिराकरस्तत्समुत्थत्वात् दुःखानां,

---

(१) भार्याऽपि इन्द्रियविकारदोषनटिता करोति पतिपापम् ।
यथा प्रदेशिराजः सूर्यकान्तया तथा वधितः ॥ १ ॥

(२) माता निजकमतिविकल्पिते अर्थे अपूर्यमाणे ।
पुत्रस्य करोति व्यसनं चुलनी यथा ब्रह्मदत्तस्य ॥ २ ॥

काऽसावङ्गना । एवं तावद्यतिधर्मानुरक्तं गृहस्थं प्रति सामान्येन मैथुनदोषाः स्त्रीदोषाश्चोक्ताः ॥ ८७ ॥

सम्प्रति स्वदारसन्तुष्टान् गृहस्थानधिकृत्य साधारणस्त्रीदोषाः श्लोकपञ्चकेनोच्यन्ते —

मनस्यन्यद्वचस्यन्यत्क्रियायामन्यदेव हि ।

यासां साधारणस्त्रीणां ताः कथं सुखहेतवः ॥८८॥

मनसि चित्तेऽन्यत् वचःक्रिययोर्विलक्षणं, वचसि वचनेऽन्यत् मनःक्रिययोर्विलक्षणं, क्रियायां चेष्टितेऽन्यत् वाङ्मनसोर्विसंवादि, यासां साधारणस्त्रीणां वेश्यानां, ता विसंवादिप्रमाणः कथं सुखस्य विश्वासैकनिबन्धनस्य हेतवः ।

यदाह —

अन्यस्मै दत्तसङ्केता याचतेऽन्यं स्तुते परम् ।

अन्यश्चित्ते परः पार्श्वे गणिकानामहो नरः ॥ १ ॥ ८८ ॥

तथा —

मांसमिश्रं सुरामिश्रमनेकविटचुम्बितम् ।

को वेश्यावदनं चुम्बेदुच्छिष्टमिव भोजनम् ॥८९॥

मांसेन जलस्थल[1]खचारिजीवजाङ्गलेन, मिश्रमामगन्धि, मांसादित्वाद्वेश्यानां, सुरया काष्ठपिष्टादिमय्या मदिरया, मिश्रं व्याप्तं, सुरापाणप्रमत्तत्वात् । अनेकविटैर्बहुभिर्विटैरित्यर्थः, चुम्बितमास्वादितम्, प्रायो विटासक्तत्वात्; एवंविधं वेश्यानां वदनं

(१) ख ग खचरादि-।

कश्चिच्च कश्चि[1]च्चेतनश्चेदित्यर्थः। उच्छिष्टमिव भोजनमित्युपमानमनेकविटचुम्बितवेश्यावदनस्योपमेयस्य। अथवा मांसमिश्रत्वं सुरामिश्रत्वं चोच्छिष्टभोजनेऽपि योज्यम् ॥ ८९ ॥

तथा—

अपि प्रदत्तसर्वस्वात् कामुकात् क्षीणसम्पदः।
वासोऽप्याच्छेत्तुमिच्छन्ति गच्छतः पण्ययोषितः ॥९०॥

प्रदत्तसर्वस्वादपि महाधनावस्थायां, पुण्यक्षयात्क्षीणसम्पदः, कामुकात्तत एव गच्छतः स्वगृहं प्रति, वासोऽपि परिधानवस्त्रमपि, आच्छेत्तुं बलाद् ग्रहीतुमिच्छन्ति ; पण्यं मूल्यं, तत्प्रधाना योषितो वेश्याः ; अनेन कृतघ्नत्वं तासामाह।

यदाह—

उपचरिताऽप्यतिमात्रं प्रकटवधूः क्षीणसम्पदः पुंसः।
पातयति दृशं व्रजतः स्पृहया परिधानमात्रेऽपि ॥ १ ॥९०॥

तथा—

न देवान्न गुरून्नापि सुहृदो न च बान्धवान्।
असत्सङ्गरतिर्नित्यं वेश्यावश्यो हि मन्यते ॥९१॥

वेश्यावश्यः पुमान्न देवादीन्मन्यते, कुतः असत्सङ्गरतिर्नित्यं असद्भिर्विटादिभिः सङ्गो असत्सङ्गस्तत्र रतिर्यस्य। वेश्यावश्यस्य हि सुलभा एवासत्सङ्गाः ॥ ९१ ॥

---

(१) ख सचेतनः। क सञ्चेतनः।

तथा—

कुष्ठिनोऽपि स्मरसमान् पश्यन्तीं धनकाङ्क्षया ।
तन्वन्तीं कृत्रिमस्नेहं निःस्नेहां गणिकां त्यजेत् ॥८२॥

कुष्ठिनः कुष्ठरोगिणोऽप्यत्यन्तमनुपादेयान्, स्मरसमान् कन्दर्पतुल्यान्, धनकाङ्क्षया हेतुभूतया पश्यन्तीं, महत्या प्रतिपत्त्या प्रतिपादयन्तीं, न च स्नेहमन्तरेण कुष्ठिनोऽपि सकाशाद्धमावाप्तिरिति। तन्वन्तीं विस्तारयन्तीं, कृत्रिममुपचरितं, स्नेहं प्रेम; परमार्थतस्तु निःस्नेहां गणिकां वेश्यां, त्यजेत् । एवं तावत्स्वदारसन्तुष्टस्य पण्याङ्गनागमने दोषाः प्रतिपादिताः ॥ ८२ ॥

इदानीं परदारगमनदोषानाह—

नासक्त्या सेवनीया हि स्वदारा अप्युपासकैः ॥
आकरः सर्वपापानां किं पुनः परयोषितः ॥८३॥

सर्वविरतिलालसः खलु देशविरतिपरिणाम इति गार्हस्थ्येऽपि वैराग्यातिशयादुपासकैरप्रतिषिद्धाः स्वदारा अप्यासक्त्या गर्द्धेन न सेवनीयाः किं पुनः परयोषितस्ता अत्यन्तमसेवनीया इत्यर्थः ; यत आकरः खानिः सर्वपापानां मायामृषावादादीनाम्, हि शब्दो यस्मादर्थे, यस्मात् स्वदारानपि नासक्त्या सेवन्ते उपासकाः ततः कथं परदारेषु प्रसजेयुरित्यर्थः ॥ ८३ ॥

परस्त्रीणां पापकारित्वमेव दर्शयति—

स्वपतिं या परित्यज्य निस्त्रपोपपतिं भजेत् ।
तस्यां क्षणिकचित्तायां विश्रम्भः कोऽन्ययोषिति ॥ ९४ ॥

तस्यां क्षणिकचित्तायां चलितचित्तायामन्ययोषिति, को विश्रम्भः को विश्वासः, न कश्चिदित्यर्थः । विश्रम्भाधीनं च सुखं तदपि नास्तीत्यर्थः । या किं, या स्वपतिं देवतारूपं 'भर्तृदेवता हि स्त्रियः' इति श्रुतेः ; परित्यज्य पाणिगृहीत्यपि त्यक्त्वा, निस्त्रपा लज्जारहिता ; त्रपा हि भूषणं स्त्रीणाम् ; उपपतिं पत्यन्तरं, भजेत् ॥ ९४ ॥

इदानीं परस्त्रीप्रसक्तोऽनुशिष्यते—

भीरोराकुलचित्तस्य दुःस्थितस्य परस्त्रियाम् ।
रतिर्न युज्यते कर्तुमुपशूनं पशोरिव ॥ ९५ ॥

परस्त्रियां रतिः प्रीतिः, कर्तुं न युज्यते, भीरोः पतिराजादिभीतस्य, अतएवाकुलचित्तस्य अनेन दृष्टोऽनेन ज्ञातोऽहमिति उपसर्पतीति व्याकुलचित्तस्य, दुःस्थितस्य खण्डदेवकुलादौ शय्यासनादिरहितस्य, कस्येव, पशोरिव वध्यस्य, उपशूनं शूनासमीपे ॥ ९५ ॥

तस्मात्—

प्राणसन्देहजननं परमं वैरकारणम् ।
लोकद्वयविरुद्धं च परस्त्रीगमनं त्यजेत् ॥ ९६ ॥

परस्त्रियां गमनं सम्भोगस्तत्त्यजेत्, प्राणानां जीवितव्यस्य,

सन्देहो नाशशङ्का, तं जनयतीति प्राणसन्देहजननं ; [1]परस्त्रीषु प्रमत्तस्य हि प्रायेण परैः प्राणा प्रणाश्यन्ते कदाचिन्नेति प्राण सन्देहः, परमं प्रकृष्टं, वैरस्य विरोधस्य, कारणम् ।

यदाह —

बहुमूलस्य मूलं हि महद्वैरतरोः स्त्रिय इति ।

लोकद्वयमिहलोकपरलोकलक्षणं, तस्य विरुद्धं प्राणसन्देहजननत्वाद्वैरकारणत्वाल्लोकद्वयविरुद्धत्वादिति परस्त्रीगमनत्यागे हेतुत्रयं विशेषणद्वारेण ॥ ९६ ॥

लोकद्वयविरुद्धं चेति विशेषणमस्फुटं स्फुटयति—

सर्वस्वहरणं बन्धं शरीरावयवच्छिदाम् ।

मृतश्च नरकं घोरं लभते पारदारिकः ॥ ९७ ॥

सर्वधनापहारं, रज्ज्वादिना बन्धं, शरीरावयवः पुंध्वजादिस्तस्य च्छिदां छेदं लभत इतीहलोकविरोधः । मृतश्च नरकं घोरं लभते इति परलोकविरोधः । परदारान् गच्छतीति पारदारिकः ॥ ९७ ॥

उपपत्तिपूर्वं परस्त्रीगमनप्रतिषेधमाह —

स्वदाररक्षणे यत्नं विदधानो निरन्तरम् ।

जानन्नपि जनो दुःखं परदारान् कथं व्रजेत् ॥ ९८ ॥

जानन्नपि अनुभवन्नपि, दुःखं मनःपीडां, परदारप्रसङ्गे तस्य ; परदाराः परेषां दाराः परदाराः अतः स्वदारप्रसक्तेषु परेषु

(१) क ग परस्त्रीप्रसक्तस्य ।

दुःखमनुभवत्येव। अत्र हेतुमाह। स्वदाररक्षणे स्वकलत्ररक्षणे, यत्नमादरं, भित्तिवरण्डकप्राकारप्राहरिकादिभिर्विदधानः कुर्वन्, निरन्तरं दिवानिशं, स्वदाररक्षणपरिक्लेशशाली जनो जानात्येव स्वस्मिन् दुःखं इत्यात्मानुभवेन परेष्वपि दुःखं पश्यन् कथं परदारान् व्रजेत्॥ ९८॥

आस्तां परस्त्रीषु रमणं रमणेच्छाऽपि महतेऽनर्थायेति आह—

विक्रमाक्रान्तविश्वोऽपि परस्त्रीषु रिरंसया।
कृत्वा कुलक्षयं प्राप नरकं दशकन्धरः॥ ९९॥

परस्त्रीविषये रमणाभावेऽपि रिरंसामात्रेण हेतुना, दशकन्धरो रावणो, नरकं प्राप इति पारलौकिकं फलम्। ऐहिकमाह। कृत्वा कुलक्षयं, यद्यपि कुलक्षयस्तस्य रामादिभिः कृतो न तेन, तथापि तदीयपरदाररिरंसापूर्वकत्वादिभिस्तत्त्वतस्तत्कृत उच्यते। ननु पारलौकिकं फलं नरकगमनरूपमास्तां, ऐहलौकिकं तु बलवतां कुतस्त्यं भवेदित्याह। विक्रमाक्रान्तविश्वोऽपि; न हि दशकन्धरादन्यो बलवान्, यो विक्रमेण विश्वमप्याक्रान्तवान् सोऽपि यद्यनर्थमश्नुते तदपरस्य का मार्गेति॥ ९९॥

अयं चार्थः सम्प्रदायगम्यः, सचायम्।—

अस्ति त्रिकूटशिखरे शिरोमणिरिव क्षितेः।
रक्षोद्वीपे हिरण्याङ्का लङ्केति प्रथिता पुरी॥ १॥
विद्याधरनृपस्तस्यां पुलस्त्यकुलकौस्तुभः।
अजायत महावीर्यो रावणो विश्वरावणः॥ २॥

अभूतां भ्रातरौ तस्य निःसीमस्थामशोभिनौ ।
अपराविव दोःस्तम्भौ कुम्भकर्णबिभीषणौ ॥ ३ ॥
देवतामिव कुलस्य स्वपूर्वपुरुषार्जिताम् ।
गृहे नवमहारत्नस्रजं सोऽपश्यदन्यदा ॥ ४ ॥
श्रूयन्ते द्वादशादित्या नवादित्या इमे पुनः ।
दृश्यन्ते कथमित्येतद्द्वान् पप्रच्छ तत्र सः ॥ ५ ॥
अथाचचक्षिरे तस्मै त्वत्पूर्वपुरुषैः पुरा ।
वरलब्धा महाभाराऽनर्घ्येयं रत्नमालिका ॥ ६ ॥
इमां क्षिपेत यः कण्ठे स्यात्सोऽर्द्धभरतेश्वरः ।
इत्याम्नायात्तवाम्नाये पूज्यते पूर्वजैरसौ ॥ ७ ॥
ततस्तां सोऽक्षिपत्कण्ठे तद्रत्नेषु नवस्वपि ।
सङ्क्रान्तास्यतया चासौ दशास्य इति पप्रथे ॥ ८ ॥
ततो जनैर्जयजयेत्यारावैरभिनन्दितः ।
सोऽभात्मूर्त्त इवोत्साहो जगद्विजयहेतवे ॥ ९ ॥
तस्यानवद्या विद्यास्ताः प्रज्ञप्तीप्रमुखाः सदा ।
असाध्यसाधनप्रौढाः पार्श्वे सेना इवावसन् ॥ १० ॥
ततो भरतवर्षार्द्धं स एकग्रामलीलया ।
दुःसाधं साधयामास दोःकण्डूनैत्यपूर्यत ॥ ११ ॥
आसीदितश्च वैताढ्यगिरौ विद्याधरेश्वरः ।
इन्द्रनामा पूर्वजन्मानुभूतेन्द्रपदस्थितिः ॥ १२ ॥

---

(१) खच शालिनी ।

विश्वैश्वर्यबलोद्रेकादिन्द्रत्वाभ्यासतोऽपि च ।
इन्द्रमात्मानमेवायममंस्तेन्द्रं तु नापरम् ॥ १३ ॥
शचीति स स्वमहिषीं स्वमस्त्रं वज्रमित्यपि ।
पट्टेभमैरावण इत्यश्वमुच्चैःश्रवा इति ॥ १४ ॥
सारथिं मातलिरिति चतुरोऽन्यांश्च हाभटान् ।
सोमो यमः पाशधरः कुबेर इति चाभ्यधात् ॥ १५ ॥
मन्यमानस्तृणायान्यानिन्द्रंमन्यः स दोर्मदी ।
आजोगणद्रावणमप्यत्यन्तरणदारुणम् ॥ १६ ॥
तस्मै ततः प्रकुपितः कृतान्त इव दारुणः ।
रावणोऽप्यावणाभोदगर्जद्गजबलोऽचलत् ॥ १७ ॥
विद्याबलात्ससैन्योऽपि लङ्घयामास सोऽर्णवम् ।
विद्याधरास्तुल्ययाना भुव्यभूसि नभस्यपि ॥ १८ ॥
स दिशश्छादयन् सैन्यवात्योद्भूतै रजश्चयैः ।
वैताढ्यं प्राप कल्पान्तमहावात इव द्रुतम् ॥ १९ ॥
श्रुत्वा रावणमायान्तमिन्द्रोऽपि द्रुतमभ्यगात् ।
पुंसां मैत्र्यां च वैरे च संमुखोत्थानमादिमम् ॥ २० ॥
दूरादपि दशास्येन प्रहितो महितौजसा ।
अथ दूतोऽभ्युपेत्येन्द्रमित्युवाच ससौष्ठवम् ॥ २१ ॥
ये केचिदिह राजानो विद्यादोर्वीर्यदर्पिणः ।
तैरुपेत्योपायनाद्यैः पूजितो दशकन्धरः ॥ २२ ॥
दशकण्ठस्य विस्मृत्या भवतस्त्वार्जवादयम् ।
इयान् कालो ययौ तस्मिन् भक्तिकालस्तवाधुना ॥ २३ ॥

भक्तिं दर्शय तत्तस्मिन् शक्तिं वा दर्शयाधुना ।
भक्तिशक्तिविहीनश्चेदेवमेव विनङ्क्ष्यसि ॥ २४ ॥

इन्द्रोऽपि निजगादैवं वराकैः पूजितो नृपैः ।
रावणस्तदयं मत्तः पूजां मत्तोऽपि वाञ्छति ॥ २५ ॥

यथा तथा गतः कालो रावणस्य सुखाय सः ।
कालरूपस्त्वयं कालस्तस्येदानीमुपस्थितः ॥ २६ ॥

गत्वा स्वस्वामिनो भक्तिं शक्तिं वा मयि दर्शय ।
स भक्तिशक्तिहीनश्चेदेवमेव विनङ्क्ष्यति ॥ २७ ॥

दूतेनागत्य विज्ञप्ते रावणः क्रोधदारुणः ।
चचालानन्तसैन्योर्मिः पर्योद्भ्रान्त इवार्णवः ॥ २८ ॥

तयोर्बलानामन्योऽन्यं संफेटः शस्त्रवर्षिणाम् ।
संवर्त्तपुष्करावर्त्तवारिदानामिवाभवत् ॥ २९ ॥

रावणं रावणिर्नत्वा युद्धायेन्द्रमथाह्वत ।
रणक्रीडासु वीरा हि नाग्रं ददति कस्यचित् ॥ ३० ॥

ततश्चैकाङ्गविजयाकाङ्क्षिणाविन्द्ररावणौ ।
सैन्यान्यपास्यायुध्येतां द्वन्द्वयुद्धेन दुर्धरौ ॥ ३१ ॥

मिथः प्रतिहतास्त्रौ तौ रणपारयियासया ।
युयुधाते नियुद्धेन मदान्धौ सिन्धुराविव ॥ ३२ ॥

रावणिः किमधोऽयमिन्द्र ऊर्द्धमिन्द्रोऽथ रावणिः ।
नालक्ष्यत तयोर्व्यक्तिर्वेगाद्विपरिवर्त्तिनोः ॥ ३३ ॥

---

(१) ग घ -पास्य युध्येतां ।

विजयश्रीः क्षणेनेन्द्रे मेघनादे क्षणेन च ।
यस्तायातं व्यधाद्गीतिर्वोभयोरपि भीमयोः ॥ ३४ ॥
असौ मशक इत्यस्थाद्यावद्गर्वेण वज्रभित् ।
तावत्सर्वौजसा मेघनादस्तं समुपाद्रवत् ॥ ३५ ॥
पातयित्वा झगित्ये'व तं बबन्ध दशास्यसूः ।
जिगीषूणां जये हेतुः प्रथमो ह्याशुकारिता ॥ ३६ ॥
मेघनादः सिंहनादैर्नादयन् रोदसी अपि ।
पितुः समर्पयामास मूर्त्तं जयमिवाथ[1] तम् ॥ ३७ ॥
प्रवन्नारक्षगुप्तायां तं गुप्तौ रावणोऽक्षिपत् ।
इयं विधत्ते हि बली निहन्त्यपि वहत्यपि ॥ ३८ ॥
सोमो दण्डधरः पाशी कुबेरश्च समेत्य तं ।
दशास्यमिन्द्रयक्षणात्क्रुद्धा रुरुधिरे ततः ॥ ३९ ॥
जितकाशी दशास्योऽपि भूत्वोत्साहाच्चतुर्गुणः ।
योधयामास संग्रामचतुरश्चतुरोऽपि तान् ॥ ४० ॥
सोऽभाङ्क्षीद्दण्डिनो दण्डं चुक्षोद गदिनो गदाम् ।
पाशिनोऽत्रोटयत्पाशान् धनुः सोमस्य चाच्छिदत् ॥ ४१ ॥
अपातयत्प्रहारैस्तान्महेभः कलभानिव ।
अथर्क्षीद्रावणो बद्धा वैरिविद्रावणः क्षणात् ॥ ४२ ॥
सप्ताङ्गराज्यसहितमुपादाय पुरन्दरम् ।
पातालल‍ङ्कां लङ्केशो विजेतुमगमत्ततः ॥ ४३ ॥

---

(१) क -र्थं ।

(२) ख -धतः ।

हत्वा चन्द्रोदरं तत्र [1]तद्राज्यं स्वां च सोदरीम् ।
सोऽदात्खराय त्रिशिरोदूषणज्यायसे ततः ॥ ४४ ॥
चन्द्रोदरस्य निःशेषं खरः खरबलोऽग्रहीत् ।
एका तु गुर्विणी राज्ञी प्रणश्य क्वचिदप्यगात् ॥ ४५ ॥
ततः पातालनङ्कातो लङ्कां लङ्कापतिर्ययौ ।
तत्र निष्कण्टकं राज्यं चक्रे विष्टपकण्टकः ॥ ४६ ॥
सोऽन्येद्युः पुष्पकारूढक्रीडयैतस्ततो भ्रमन् ।
मरुत्तभूपप्रारब्धमीक्षाञ्चक्रे महामखम् ॥ ४७ ॥
ततो विमानादुत्तीर्णो दशास्यस्तद्दिदृक्षया ।
आनर्चे भूभुजा तेन पाद्यसिंहासनादिना ॥ ४८ ॥
ततो मरुत्तभूपालं जगादैवं दशाननः ।
अरे किमेष क्रियते नरकाभिमुखैर्मखः ॥ ४९ ॥
धर्मः प्रोक्तो ह्यहिंसातः सर्वज्ञैस्त्रिजगद्धितैः ।
पशुहिंसात्मकाद्यज्ञात्स कथं नाम जायते ॥ ५० ॥
लोकद्वयारिं तद्यज्ञं मा कार्षीश्चेत्करिष्यसि ।
मद्भुमाविह ते वासः परत्र नरके पुनः ॥ ५१ ॥
विससर्ज मखं सद्यो मरुत्तनृपतिस्ततः ।
अलङ्घ्या रावणाज्ञा हि विश्वस्यापि भयङ्करा ॥ ५२ ॥
प्रभञ्जन इवौजस्वी मरुत्तमखभञ्जनः ।
ततोऽगाच्चैत्ययात्रार्थं सुमेर्वष्टापदादिषु ॥ ५३ ॥

---

(१) ख च राज्यं स्वां च सहोदरीम् ।

विधाय यात्रां चैत्येषु कृत्रिमाकृत्रिमेषु सः ।
आजगाम निजं धाम पुनरेव दशाननः ॥ ५४ ॥
इतश्चासीदयोध्यायां पुर्यामैक्ष्वाकवंशजः ।
राजा दशरथो नाम धाम निःसीमसम्पदाम् ॥ ५५ ॥
पत्न्यः कौशल्याकैकेयीसुमित्रासुप्रभाभिधाः ।
प्रियाश्चतस्रस्तस्यासन्मूर्त्ता इव दिशां श्रियः ॥ ५६ ॥
कौशल्या सुषुवे रामं कैकेयी भरतं सुतम् ।
सुमित्रा लक्ष्मणं नाम शत्रुघ्नं सुप्रभाऽभिधा ॥ ५७ ॥
रामलक्ष्मणभरतशत्रुघ्नास्तस्य रेजिरे ।
चत्वारः सूनवो दन्ता इव त्रिदशदन्तिनः ॥ ५८ ॥
जनकस्य सुतां सीतां भामण्डल[1]सहोदरीम् ।
कार्मुकारोपणपणां रामभद्र उपायत ॥ ५९ ॥
जिनेन्द्रबिम्बस्नपनजलं मङ्गलहेतवे ।
चतसृणां च राज्ञीनां नृपः प्रैषयदन्यदा ॥ ६० ॥
तत्तोयमागतं पश्चादिति रोषमुपेयुषीम् ।
अनुनेतुं स्वयं राज्ञीं सुमित्रामगमन्नृपः ॥ ६१ ॥
घण्टाझल्लरिकालोलदशनं चलिताननम् ।
श्वेतसर्वाङ्गरोमाणं भ्रूरोमच्छन्नलोचनम् ॥ ६२ ॥
पदे पदे प्रस्खलन्तं याचमानं च पश्यताम् ।
गतस्तत्र ददर्शैकं जरत्कञ्चुकिनं नृपः ॥ ६३ ॥

---

(१) क ख ङ -सहोदराम् ।

तं दृष्ट्वाऽचिन्तयद्राजा यथो यावन्नेदृग्या वयम् ।
चतुर्थपुरुषार्थाय तावद्धि प्रयतामहे ॥ ६४ ॥
व्रतं जिघृक्षुः स ततो राज्ये स्थापयितुं निजे ।
अङ्गायाह्वाययामास तनयौ रामलक्ष्मणौ ॥ ६५ ॥
भरतस्य जनन्याऽथ कैकेय्या मन्थरागिरा ।
वरौ प्राक्प्रतिपन्नौ स याचितः सत्यसङ्गरः ॥ ६६ ॥
वरेणार्थित एकेन स तदा रघुपुङ्गवः ।
प्रतिपन्नस्थिरो राज्यं भरताय समार्पयत् ॥ ६७ ॥
चतुर्दशसमा यावद्वनवासाय चादिशत् ।
ससीतालक्ष्मणं रामं वरेणान्येन चार्थितः ॥ ६८ ॥
ससीतालक्ष्मणो रामः सद्योऽगा[1]द्दण्डकावनम् ।
पञ्चवट्याश्रमे चावतस्थेऽसौ सत्यसङ्गरः ॥ ६९ ॥
तत्रायातौ चारणर्षी राघवाभ्यां नमस्कृतौ ।
सीताऽऽनर्चातिथीभूतौ मासान्ते शुद्धभिक्षया ॥ ७० ॥
ततो गन्धोदकैर्वृष्टिरमरैर्विदधे तदा ।
तद्गन्धादाययौ तत्र जटायुर्नाम गृध्रराट् ॥ ७१ ॥
तौ मुनी देशनां तत्र चक्रतुः स [2]व्यबोधि च ।
संजातजातिस्मरणोऽवतस्थे चानुजानकि ॥ ७२ ॥
तस्थुषस्तत्र रामस्य फलाद्यर्थं बहिर्गतः ।
ददर्श लक्ष्मणः खड्गमपश्यच्च कुतूहलात् ॥ ७३ ॥

---

(१) ख ग ड -दण्डका- ।
(२) ख ग व्यबुध्यत ।

तत्तीक्ष्णत्वपरीक्षार्थं तत्खड्गं तेन लक्ष्मणः ।
अभ्यर्णस्थां वंशजालीं नललावं लुलाव च ॥ ७४ ॥
वंशजालान्तरस्थस्य छिन्नं कस्यापि देहिनः ।
अथैकं मौलिकमलं सोऽपश्यत्पतितं पुरः ॥ ७५ ॥
अयुध्यमानोऽशस्त्रश्च पुमान् कोऽपि हतो मया ।
अमुना कर्मणा धिग्मामित्यात्मानं निनिन्द सः ॥ ७६ ॥
गत्वा च रामभद्राय तदशेषमचीकथत् ।
असिं च दर्शयामास रामोऽप्येवमभाषत ॥ ७७ ॥
असावसिः सूर्यहासः साधकोऽस्य त्वया हतः ।
अस्य सम्भाव्यते नूनं कश्चिदुत्तरसाधकः ॥ ७८ ॥
अत्रान्तरे दशग्रीवस्वसा चन्द्रणखाऽभिधा ।
खरभार्या ययौ तत्र ददर्श च हतं सुतम् ॥ ७९ ॥
क्वासि हा वत्स शम्बूक शम्बूकेति रुदत्यसौ ।
अपश्यल्लक्ष्मणस्यांघ्रिन्यासपङ्क्तिं मनोहराम् ॥ ८० ॥
मम सूनुर्हतोऽनेन यस्येयं पदपद्धतिः ।
पदपङ्क्तिपथेनैव ततश्चन्द्रणखाऽऽययौ ॥ ८१ ॥
यावत्किञ्चिदगात्तावत्सीतालक्ष्मणं पुरः ।
नेत्राभिरामं रामं साऽपश्यत्तरुतले स्थितम् ॥ ८२ ॥
निरीक्ष्य रामं सा सद्यो रिरंसाविवशाऽभवत् ।
कामाविष्टः कामिनीनां शोकोद्रेकेऽपि कोऽप्यहो ॥ ८३ ॥
स्वं रूपं चारु कृत्वाऽथ रन्तुं रामस्तयाऽर्थितः ।
इत्यूचे सभार्योऽहमभार्यं भज लक्ष्मणम् ॥ ८४ ॥

तयाऽर्थितस्तथैवैत्य लक्ष्मणोऽप्येवमब्रवीत् ।
आर्यं गता त्वमार्येव तदलं वार्तयाऽनया ॥ ८५ ॥
सा याञ्चाखण्डनात्पुत्रवधाच्च कुपिताऽधिकम् ।
आख्यद्गत्वा खरादीनां तत्कृतं तनयक्षयम् ॥ ८६ ॥
विद्याधरसहस्रैस्ते चतुर्दशभिरावृताः ।
ततोऽभ्येयुरुपद्रोतुं रामं शैलमिव द्विपाः ॥ ८७ ॥
किमार्यः सत्यपि मयि यात्यत्र स्वयमीदृशेः ।
इति राममयाचिष्ट तेषां युद्धाय लक्ष्मणः ॥ ८८ ॥
गच्छ वत्स ! जयाय त्वं यदि ते सङ्कटं भवेत् ।
सिंहनादं ममाहूत्यै कुर्या इत्यन्वशात् स तम् ॥ ८९ ॥
रामाज्ञां प्रतिपद्याचैल्लक्ष्मणोऽथ धनुःसखा ।
गत्वा प्रववृते हन्तुं स तांस्तार्क्ष्य इवोरगान् ॥ ९० ॥
प्रवर्द्धमाने तद्युद्धे स्वभर्तुः पार्ष्णिग्रहये ।
गत्वा त्वरितमित्यूचे रावणं रावणस्वसा ॥ ९१ ॥
आयातौ दण्डकारण्ये मनुष्यौ रामलक्ष्मणौ ।
अनात्मज्ञौ निन्यतुस्ते यामेयं यमगोचरम् ॥ ९२ ॥
श्रुत्वा स्वसृपतिस्ते तु मानुजः सबलो ययौ ।
तत्र सौमित्रिणा सार्द्धं युद्ध्यमानोऽस्ति संप्रति ॥ ९३ ॥
कनिष्ठभ्रातृवीर्येण स्ववीर्येण च गर्वितः ।
परतोऽस्ति स्थितो रामो विलसन् सीतया सह ॥ ९४ ॥
सीता च रूपलावण्यश्रिया सीमेव योषिताम् ।
न देवी नोरगी नापि मानुष्यन्यैव काऽपि सा ॥ ९५ ॥

तस्या दासीकृताशेषसुरासुरवधूजनम् ।
त्रैलोक्येऽप्यप्रतिच्छन्दं रूपं वाचामगोचरम् ॥ ९६ ॥
आसमुद्रमसुद्राक्ष ! यानि कान्यपि भूतले ।
तवैवार्हन्ति रत्नानि तानि सर्वाणि बान्धव ! ॥ ९७ ॥
द्वयामनिमिषीकारकारणं रूपसम्पदा ।
स्त्रीरत्नमेतद्गृह्णीया नचेत्तन्नासि रावणः ॥ ९८ ॥
आरुह्य पुष्पकमथादिदेश दशकन्धरः ।
विमानराज ! त्वरितं याहि यत्रास्ति जानकी ॥ ९९ ॥
ययौ चात्यन्तवेगेन विमानमनुजानकि ।
स्पर्द्धयेव दशग्रीवमनसस्तत्र गच्छतः ॥ १०० ॥
दृष्ट्वाऽपि रामादत्युग्रतेजसो दशकन्धरः ।
बिभाय दूरे तस्थौ च व्याघ्रो हुतवहादिव ॥ १ ॥
इति चाचिन्तयदितः कष्टं रामो दुरासदः ।
इतश्च सीताहरणमितो व्याघ्र इतस्तटी ॥ २ ॥
विमृश्य च ततो विद्यामस्मार्षीदवलोकनीम् ।
उपतस्थे च सा सद्यः किङ्करीव कृताञ्जलिः ॥ ३ ॥
ततश्चाज्ञापयामास तत्कालं तां दशाननः ।
कुरु साहाय्यमङ्गाय मम सीतां हरिष्यतः ॥ ४ ॥
साऽवोचद्वासुकेर्मौलिरत्नमादीयते सुखम् ।
न तु रामसमीपस्था सीता देवासुरैरपि ॥ ५ ॥
उपायः किन्त्वसावस्ति यायाद् येनैष लक्ष्मणम् ।
तस्येव सिंहनादेन सङ्केतो ह्यनयोरयम् ॥ ६ ॥

एवं कुर्विति तेनोक्ता प्रजित्वा परतस्ततः।
सा साक्षादिव सौमित्रिः सिंहनादं विनिर्ममे ॥ ७ ॥
तं श्रुत्वा मैथिलीं तत्र मुक्त्वा रामो ययौ द्रुतम्।
महतामपि मोहाय भवेन्माया हि मायिनाम् ॥ ८ ॥
अथोत्तीर्य दशग्रीवः सीतामारोप्य पुष्पके।
त्वां हरन् रावणोऽस्मीति कथयन्नभसा ययौ ॥ ९ ॥
हा नाथ विद्विषन्नाथ राम हा वत्स लक्ष्मण।
हा तातपाद हा भ्रातर्भामण्डल महाभुज ॥ १० ॥
सीता वो ह्रियतेऽनेन काकेनेव बलि[1]श्छलात्।
एवं सीता रुरोदोच्चै रोदयन्तीव रोदसीम् ॥ ११ ॥
मा भैषीः पुत्रि मा भैषीः क्व रे यासि निशाचर।
रोषादिति वदन् दूराज्जटायुस्तमधावत ॥ १२ ॥
भामण्डलानुगस्त्वेकः कोऽपि विद्याधराग्रणीः।
ढुढौके दशकण्ठं रे तिष्ठ तिष्ठेति तर्जयन् ॥ १३ ॥
जटायुर्विकटाटोप[2]करजत्रोटिकोटिभिः।
[3]प्रणिहन्तुं दशग्रीवोरसि प्रववृते ततः ॥ १४ ॥
रे जीवितस्य तृप्तोऽसि जरद्गृध्रेति विब्रुवन्।
दशास्यश्चन्द्रहासासिमाकृष्य निजघान तम् ॥ १५ ॥

---

(१) क ख ग घ -च्छ-।
(२) घ ङ -नखर-।
(३) ख घ प्रतिहन्तुं।

तस्य विद्याधरस्यापि विद्यां दशमुखोऽहरत् ।
निकृत्तपक्षः पक्षीव सोऽपविद्योऽपतद्भुवि ॥ १६ ॥
रावणोऽगात्ततो लङ्कां सीतां चोपवनेऽमुचत् ।
तां प्रलोभयितुं तत्र त्रिजटामादिदेश च ॥ १७ ॥
रामस्यापि हतामित्रः सौमित्रिः संमुखोऽभवत् ।
आर्यामार्य ! विमुच्यैकां किमागा इति चाब्रवीत् ॥ १८ ॥
आहूतः सिंहनादेन तव वैधुर्यलक्ष्मणा ।
लक्ष्मणाऽहमिहायातो व्याजहारेति राघवः ॥ १९ ॥
लक्ष्मणोऽप्यवदच्चक्रे सिंहनादो मया नहि ।
श्रुतश्चार्येण तन्नूनं वयं केनापि वञ्चिताः ॥ २० ॥
अपनेतुं सत्यमार्यामपनीतोऽस्म्युपायतः ।
सिंहनादस्य करणे शङ्के स्तोकं न कारणम् ॥ २१ ॥
ब्रुवन् साध्विति रामोऽपि स्वस्थानेऽगात्सलक्ष्मणः ।
सीतामपश्यन् क्वासीति विलपन्मूर्च्छितोऽपतत् ॥ २२ ॥
तं लब्धसंज्ञं सौमित्रिरित्यूचे रुदितैरलम् ।
पौरुषं पुरुषाणां हि व्यसनेषु प्रतिक्रिया ॥ २३ ॥
अत्रान्तरे पुमानेकः कश्चिदेत्य ननाम तौ ।
ताभ्यां पृष्टः स्ववृत्तान्तमेवं व्यज्ञपयच्च सः ॥ २४ ॥
हत्वा पातालल‌ङ्केशं तातं चन्द्रोदरं मम ।
अभ्यस्यैव पदे तस्य खरं खररथोऽकरोत् ॥ २५ ॥
गुर्वी च नष्टा मन्माता विराधं नाम मां सुतम् ।
अन्यत्रासूत तस्याश्च कश्चिदाख्यदिदं मुनिः ॥ २६ ॥

यदा दाशरथिर्हत्वा खरादींस्त्वत्सुतं तदा ।
पाताललङ्काधिपतिं करिष्यति न संशयः ॥ २७ ॥
तदद्य समयं लब्ध्वा युष्मानस्मि समाश्रितः ।
पितृवैरिवधक्रीतं पत्तिं जानीथ मां निजम् ॥ २८ ॥
रामस्ततोऽदात्पाताललङ्कां तस्मै महाभुजः ।
फलन्ति समयज्ञानां स्वामिनः स्वयमेव हि ॥ २९ ॥
तं च स्थापयितुं तत्र गच्छन् रामः सलक्ष्मणः ।
हतविद्यं पुरोऽपश्यद्रुदन्तं भामण्डलानुगम् ॥ ३० ॥
अथ दाशरथी नत्वा स्ववृत्तान्तं व्यजिज्ञपत् ।
आत्मनश्च जटायोश्च सीताया रावणस्य च ॥ ३१ ॥
अथ पाताललङ्कायां ययौ रामः सलक्ष्मणः ।
सत्यसन्धो विराधं च पित्र्ये राज्ये न्यवेशयत् ॥ ३२ ॥
इतश्च साहसगतिर्नाम विद्याधराग्रणीः ।
खे भ्रमन्नधिकिष्किन्धाधित्यकं समुपाययौ ॥ ३३ ॥
ययौ तदा च किष्किन्धाधिपतिः क्रीडितुं बहिः ।
सुग्रीवः सपरीवारो राज्ञां हि स्थितिरीदृशी ॥ ३४ ॥
ददर्श साहसगतिस्तदा चान्तःपुरस्थिताम् ।
सुग्रीवस्य प्रियां नाम्ना तारां तारविलोचनाम् ॥ ३५ ॥
तस्यां लावण्यकूलिन्यां स चिक्रीडिषुकश्चकैः ।
इयेष नान्यतो गन्तुं घर्मार्त्त इव कुञ्जरः ॥ ३६ ॥
सोऽस्थात्तथैव तत्रैव निषिद्धगमनः क्षणात् ।
तां मूर्त्तामिव कामाज्ञामुल्लङ्घयितुमक्षमः ॥ ३७ ॥

रमणी रमणीयेयं रमणीया मया कथम् ।
इतीच्छाव्याकुलः [1]सोऽप्युपायं क्षणमचिन्तयत् ॥ ३८ ॥
सहसा साहसगतिस्ततः सुग्रीवरूपताम् ।
स कुशीलत्वकुशलः कुशीलव इवाददे ॥ ३९ ॥
अथासौ विटसुग्रीवः सुग्रीव इति मानिभिः ।
अङ्गरक्षैरस्खलितः सुग्रीवभवनेऽविशत् ॥ ४० ॥
अन्तःपुरप्रतिहारं स ययौ यावदुत्सुकः ।
तावदृराधुस्य सुग्रीवः स्ववेश्मद्वारमाययौ ॥ ४१ ॥
सुग्रीवस्य प्रवेष्टुं न द्वारं प्राहरिका ददुः ।
अग्रे प्रविष्टो राजाऽस्ति त्वमन्योऽसीति वादिनः ॥ ४२ ॥
ततश्च सत्यसुग्रीवे रुध्यमाने स्ववेत्रिभिः ।
अतुलस्तुमुलो जज्ञे मथ्यमान इवार्णवे ॥ ४३ ॥
सुग्रीवद्वितयं दृष्ट्वा सन्देहाद्वालिनन्दनः ।
मुद्धान्तविप्लवं त्रातुं तद्द्वारं त्वरितो ययौ ॥ ४४ ॥
मुद्धान्ते विटसुग्रीवः प्रविशन् वालिसूनुना ।
मार्गाद्रिणा सरित्पूर इव प्रस्खलितस्ततः ॥ ४५ ॥
अथामिलन् सैनिकानामक्षौहिण्यश्चतुर्दश ।
चतुर्दशजगत्सारसर्वस्वानीव सर्वतः ॥ ४६ ॥
द्वयोरपि तयोर्भेदमजानन्तोऽथ सैनिकाः ।
सत्यसुग्रीवतोऽर्धेऽर्धे विटसुग्रीवतोऽभवन् ॥ ४७ ॥
ततः प्रववृते युद्धं सैन्ययोरुभयोरपि ।

---

(१) क ख ग घ ङ कार्श सोऽप्युपायमचिन्तयत् ।

कुन्तपातैर्दिवं कुर्वदुल्कापातमयीमिव ॥ ४८ ॥
युयुधे सादिना सादी निषादी च निषादिना।
पदातिना पदातिश्च रथिको रथिकेन च ॥ ४९ ॥
चतुरङ्गचमूचक्रविमर्दादथ मेदिनी।
अवाप कम्पं मुग्धेव प्रौढप्रियसमागमात् ॥ ५० ॥
एह्येहि रे परस्त्रीप्रवेशप्रक्षिपिति ब्रुवन्।
विटसुग्रीवमुद्ग्रीवः सुग्रीवो योद्धुमाह्वत ॥ ५१ ॥
ततश्च विटसुग्रीवो मत्तेभ इव तर्जितः।
ऊर्जितं गर्जितं कुर्वन् संमुखीनो युधेऽभवत् ॥ ५२ ॥
युयुधाते महायोधौ तौ क्रोधारुणलोचनौ।
विदधानौ जगत्त्रासं कीनाशस्येव सोदरौ ॥ ५३ ॥
तौ निशातैर्निशातानि शस्त्रैः शस्त्राण्यथो मिथः।
चिच्छेदातं तृणच्छेदं रणच्छेकावुभावपि ॥ ५४ ॥
शस्त्रखण्डैश्च्छलद्भिर्दुद्रुवे खेचरीगणः।
महायुद्धे तयोर्वृक्षखण्डो महिषयोरिव ॥ ५५ ॥
तौ छिन्नास्त्रावथान्योन्यममर्षणशिरोमणी।
मल्लयुद्धेनास्फालतां पर्वताविव जङ्गमौ ॥ ५६ ॥
उत्पतन्तौ क्षणाद्व्योम्नि निपतन्तौ क्षणाद्भुवि।
ताम्रचूडाविवाभातां वीरचूडामणी उभौ ॥ ५७ ॥
तौ द्वावपि महाप्राणौ मिथो जेतुमनीश्वरौ।
अपसृत्य च दूरेण वृषभाविव तस्थतुः ॥ ५८ ॥
पुनर्युद्धेन सुग्रीवः खिन्नः खिन्नतनुस्ततः।

बहिर्निर्गत्य किष्किन्धापुरादावासमग्रहीत् ॥ ५९ ॥
तत्रैव विटसुग्रीवस्तस्थावस्वस्थमानसः ।
अन्तःपुरप्रवेशं तु न लेभे वालिनन्दनात् ॥ ६० ॥
सुग्रीवो न्यञ्चितग्रीवमथैवं पर्य्यचिन्तयत् ।
अहो स्त्रीलम्पटः कूटपटुः कोऽप्येष नो द्विषन् ॥ ६१ ॥
आत्मीया अप्यनात्मीया द्विषन्मायावशीकृताः ।
अहो बभूवुस्तद्भावव्यक्तन्दो निजैर्हयैः ॥ ६२ ॥
मायापराक्रमोत्कृष्टः कथं वध्यो द्विषन् मया ।
धिग्मां पराक्रमभ्रष्ट वालिनाम्नस्त्रपाकरम् ॥ ६३ ॥
धन्यो महाबलो वाली योऽखण्डपुरुषव्रतः ।
राज्यं तृणमिव त्यक्त्वा यश्च भेजे परं पदम् ॥ ६४ ॥
चन्द्ररश्मिः कुमारो मे बलीयान् जगतोऽप्यसौ ।
किं तु द्वयोरभेदज्ञः कं रक्षतु निहन्तु कम् ॥ ६५ ॥
इदं तु विदधे साधु साध्वहा चन्द्ररश्मिना ।
तस्य पापीयसो रुद्ध शुद्धान्ते यत्प्रवेशनम् ॥ ६६ ॥
वधाय बलिनोऽमुष्य बलीयांसं श्रयामि कम् ।
यद् घात्या एव रिपवः स्वतोऽपि परतोऽपि वा ॥ ६७ ॥
भूर्भुवःस्वस्त्रयीवीरं मरुत्तमखभञ्जनम् ।
भजामि विहितप्रघातहेतवे किं दशाननम् ॥ ६८ ॥
असौ किं तु प्रकृत्या स्त्रीलोलस्त्रैलोक्यकण्टकः ।
तं च मां च निहत्याशु तारामादास्यति स्वयम् ॥ ६९ ॥
ईदृशे व्यसने प्राप्ते साहाय्यं कर्तुमीश्वरः ।

आसीत् खरः खरतरो राघवेण हतः स तु ॥ ७० ॥
तावेव रामसौमित्री गत्वा मित्रीकरोमि तत् ।
तत्कालोपनतस्यापि यौ विराधस्य राज्यदौ ॥ ७१ ॥
तौ तु पाताललङ्कायामलंकर्मीणदोर्बलौ ।
विराधस्योपरोधेन तथैवाद्यापि तिष्ठतः ॥ ७२ ॥
एवं विमृश्य सुग्रीवोऽनुशिष्य रहसि स्वयम ।
विराधपुर्यां विश्वासभृतं दूतं न्ययोजयत् ॥ ७३ ॥
गत्वा पाताललङ्कायां विराधाय प्रणम्य स ।
स्वामिव्यसनवृत्तान्तं कथयित्वाऽब्रवीदिदम् ॥ ७४ ॥
महति व्यसने स्वामी पतितो नस्तदीदृशे ।
राघवौ शरणीकर्त्तुं तव द्वारेण वाञ्छति ॥ ७५ ॥
द्रुतमायातु सुग्रीवः सतां सङ्गो हि पुण्यतः ।
तेनेत्युक्तो दूत एत्य सुग्रीवाय शशंस तत् ॥ ७६ ॥
प्रचचालाथ सुग्रीवोऽश्वानां ग्रैवेयकस्वनैः ।
दिशो मुखरयन् सर्वा वेगाद्दूरमदूरयन् ॥ ७७ ॥
पातालङ्कां स प्राप क्षणेनाप्युपवेश्मवत् ।
विराधं चोपतस्थेऽसावभ्युत्तस्थौ स चापि तम् ॥ ७८ ॥
विराधोऽपि पुरोभूय रामभद्राय तायिने ।
तं नमस्कारयामास तद्दुःखं च व्यजिज्ञपत् ॥ ७९ ॥
सुग्रीवोऽप्येवमूचेऽस्मिन् दुःखे त्वमसि मे गतिः ।
स्तुते हि सर्वथा सूर्दे शरणं तरणिः खलु ॥ ८० ॥
स्वयं दुःख्यपि तद्दुःखच्छेदं रामोऽभ्युपागमत् ।

स्वकार्यादधिको यत्नः परकार्ये महीयसाम् ॥ ८१ ॥
सीताहरणवृत्तान्तं विराधेनावबोधितः ।
रामं विज्ञपयामास सुग्रीवोऽथ कृताञ्जलिः ॥ ८२ ॥
वायमाणस्य तं विश्वं तथा द्योतयतो रवेः ।
न कापि कारणापेक्षा देव वच्मि तथाप्यदः ॥ ८३ ॥
त्वत्प्रसादात् सताविः सन् ममैन्योऽपि तवानुगः ।
आनेष्यामि प्रवृत्तिं च सीताया न चिरादहम् ॥ ८४ ॥
ससुग्रीवः प्रतस्थे च किष्किन्धां प्रति राघवः ।
विराधमनुगच्छन्तं संबोध्य विससर्ज च ॥ ८५ ॥
रामभद्रेऽथ किष्किन्धास्कन्धावारमधिष्ठिते ।
सुग्रीवो विटसुग्रीवमाह्वास्त रणकर्मणि ॥ ८६ ॥
निनदन् विटसुग्रीवोऽप्यागादाह्वानमात्रतः ।
रणाय नालसाः शूरा भोजनाय द्विजा इव ॥ ८७ ॥
दुर्धरैश्चरणन्यासैः कम्पयन्तौ वसुन्धराम् ।
तावुभावप्ययुध्येतां मत्ताविव वनद्विपौ ॥ ८८ ॥
रामः सरूपौ तौ दृष्ट्वा कोऽस्मदीयः परश्च कः ।
इति संशयतस्तस्थावुदासीन इव क्षणम् ॥ ८९ ॥
भवत्वेवं तावदिति विमृशन् रघुपुङ्गवः ।
वज्रावर्त्ताभिधधनुष्टङ्कारमकरोत्ततः ॥ ९० ॥
धनुष्टङ्कारतस्तस्यात्मा साहसगतिः क्षणात् ।
रूपान्तरकरी विद्या हरिणीव [1]पलायत ॥ ९१ ॥

---

(१) ख च पलायिता ।

विमोह्य मायया सर्वं परदारैर्विरंससे ।
पापारोपय रे चापमिति रामस्ततर्ज तम् ॥ ८२ ॥
एकेनापीषुणा प्राणांस्तस्याहार्षीद्रघूद्वहः ।
न द्वितीया चपेटा हि हरेर्हरिणमारणे ॥ ८३ ॥
विराधमिव सुग्रीवं रामो राज्ये न्यवेशयत् ।
सुग्रीवोऽपि स्वलोकेन प्राग्वद्देवानमस्यत ॥ ८४ ॥
इनश्च रामकार्यायागाद्विराधः समं बलैः ।
स्वामिकृत्यमकृत्वा हि कृतज्ञा नासते सुखम् ॥ ८५ ॥
भामण्डलोऽपि तत्रागाद् विद्याधरचमूवृतः ।
प्रभुकार्यं कुलीनानामुत्सवो ह्युत्सवादपि ॥ ८६ ॥
जाम्बवद्धनुमन्नीलनलादीन् विदितौजसः ।
सुग्रीवश्च स्वसामन्तान् समन्तादप्यजूहवत् ॥ ८७ ॥
विद्याधरचमूचक्रेष्वायातेष्वथ सर्वतः ।
उपेत्य रामं सुग्रीवः प्रणम्यैवं व्यजिज्ञपत् ॥ ८८ ॥
'हनूमानाञ्जनेयोऽयं विजयी पावनञ्जयिः ।
सीताप्रवृत्त्यै लङ्कायां त्वदादेशाद् व्रजिष्यति ॥ ८९ ॥
रामेणाज्ञापितो दत्त्वा स्वमभिज्ञानमूर्मिकाम् ।
नभस्वानिव नभसा नभस्वत्तनयो ययौ ॥ २०० ॥
सोऽगात्क्षणेन लङ्कायामुद्याने शिंशपातले ।
सीतामपश्यद्ध्यायन्तीं नाम रामस्य मन्त्रवत् ॥ १ ॥

---

(१) क ग घ हनुमानिति सर्वत्र पाठः ।

तच्छाखातिरोभूत: सीतोत्सङ्गेऽङ्गुलीयकम् ।
हनूमान् पातयामास तद्दृष्ट्वा मुमुदे च सा ॥ २ ॥
तदैव गत्वा त्रिजटा दशकण्ठं व्यजिज्ञपत् ।
इयत्कालं विषण्णाऽऽसीत् सानन्दा त्वद्य जानकी ॥ ३ ॥
मन्ये विस्मृतरामेयं रिरंसुर्मयि संप्रति ।
तद्गत्वा 'बोध्यता'मित्यादिशत् मन्दोदरीं स तु ॥ ४ ॥
ततश्च पत्युर्दूत्येन तत्र मन्दोदरी ययौ ।
प्रलोभनकृते सीतां विनीता सेत्यवोचत ॥ ५ ॥
अद्वैतैश्वर्यसौन्दर्य्यवर्यस्तावद्दशाननः ।
त्वमप्यप्रतिरूपैव रूपलावण्यसम्पदा ॥ ६ ॥
यद्यप्ययोग्येन दैवेन युवयोरुभयोरपि ।
न व्यधाद्युचितो योगस्तथापि स्तात् संप्रति ॥ ७ ॥
उपेत्य भजनीयं तं भजन्तं भज रावणम् ।
अहमन्याश्च तद्दारास्त्वदाज्ञां सुभ्रु ! बिभ्रतु ॥ ८ ॥
सीताऽप्यवोचद्दा: पापे पतिदूत्यविधायिनि ।
त्वद्भर्तुरिव वीक्षेत मुखं दुर्मुखि कस्तव ॥ ९ ॥
रामस्य पार्श्वे मां विद्धि सौमित्रिमिह चागतम् ।
खरादीनिव हन्तुं द्राक् भर्त्तं तव सबान्धवम् ॥ १० ॥
उत्तिष्ठोत्तिष्ठ पापिष्ठे वच्मि नात: परं त्वया ।
सीतया तर्जितैवं सा सकोपा प्रययौ तत: ॥ ११ ॥

---

(१) ख ग ङ -मेवमूचे ।

अथावतीर्य हनुमान् सीतां नत्वा कृताञ्जलिः ।
इत्यूचे देवि जयति दिष्ट्या रामः सलक्ष्मणः ॥ १२ ॥
त्वत्प्रवृत्तिकृते रामेणादिष्टोऽहमिहागमम् ।
मयि तत्र गते राम इहैष्यति रिपुच्छिदे ॥ १३ ॥
पतिदूतं हनूमन्तमभिज्ञानसमर्पकम् ।
प्रीता सीताऽप्यथाशीर्भिरमोघाभिरनन्दयत् ॥ १४ ॥
हनूमदुपरोधेन रामोदन्तमुदा च सा ।
एकोनविंशत्युपवासान्ते व्यधित भोजनम् ॥ १५ ॥
प्राभञ्जनिः प्रभञ्जन इवोद्यानस्य भञ्जने ।
प्रवृत्तो दशकण्ठस्य बलालोकनकौतुकात् ॥ १६ ॥
भज्यमानं तदुद्यानं तेन मानमिवोच्चकैः ।
उपेत्य दशकण्ठस्याशंसन्नुद्यानपालकाः ॥ १७ ॥
आरक्षा रावणादिष्टास्तं निहन्तुं समागताः ।
हता हनूमतैकेन विचित्रा हि रणे गतिः ॥ १८ ॥
आदिष्टो दशकण्ठेन साटोपः शक्रजित्ततः ।
तद्वन्धायामुचत्पाशान् पाशैः स्वं सोऽप्यबन्धयत् ॥ १९ ॥
सीतत्राणे दशास्यस्य दलयन् मुकुटं पदा ।
उत्पपातापास्तपाशस्तडिद्दण्ड इवानिलिः ॥ २० ॥
हन्यतां बध्यतां चैष इति जल्पति रावणे ।
अनाथामिव सोऽभाङ्क्षीत्तत्पुरीं पाददर्दरैः ॥ २१ ॥
क्रीडां कृत्वैवमुत्पत्य सुपर्ण इव पावनिः ।
एत्य रामं नमस्कृत्य तं वृत्तान्तं व्यजिज्ञपत् ॥ २२ ॥

रामस्तं गाढमापीड्योरसा सुतमिवौरसम् ।
लङ्काविजययात्रायै सुग्रीवादीनथादिशत् ॥ २३ ॥
समुद्रं रावणारक्षं बद्ध्वा सेतुं च राघवः ।
लङ्कापुरीं विमानस्थः सुग्रीवाद्यैः समं ययौ ॥ २४ ॥
निवेश्य कटकं रामो हंसद्वीपान्तरे ततः ।
[1]अववेष्टद्दलैर्लङ्कामेकपाटकलीलया ॥ २५ ॥
अत्रान्तरे दशग्रीवं प्रणम्योचे बिभीषणः ।
कनिष्ठस्यापि मे स्वामिन्नथ्यैकं वचनं कुरु ॥ २६ ॥
आयातो रामभद्रोऽत्र निजां जायां च याचते ।
अर्प्यतां तदसौ सीता धर्मोऽप्येवं न बाध्यते ॥ २७ ॥
अथोचे रावणो रोषाद्रे बिभेषि बिभीषण ।
तदेवमुपदेशं मे दत्से कापुरुषोचितम् ॥ २८ ॥
बिभीषणो बभाषेऽथ[2] दूरे रामः सलक्ष्मणः ।
तत्पत्तिरेको हनुमान् दृष्टो देवेन किं नहि ॥ २९ ॥
अस्मद्वेषी विपक्षानुरागी जातोऽसि याहि रे ।
इति निर्वासितस्तेन ययौ राम बिभीषणः ॥ ३० ॥
लङ्काधिपत्यमेतस्मै रामोऽपि प्रत्यपद्यत ।
नह्यौचित्ये विमुह्यन्ति महात्मान. कदाचन ॥ ३१ ॥
बहिर्निर्गत्य लङ्केशसेना राघवसेनया ।
कांस्यतालं कांस्यतालैरिवास्फालदथोल्बणम् ॥ ३२ ॥

---

(१) च आविवेष्टत् ।

(२) ख च च ।

प्राणसर्वस्वदेविन्योर्मिथश्चम्वोर्गतागतम्।
जयश्रीः श्रीरिवाकार्षीदुत्तमर्णाधमर्णयोः॥ ३३॥
रामभ्रूसंज्ञयाऽऽश्रमा हनूमत्प्रमुखास्ततः।
जगाहिरे द्विषत्सैन्यं सुरा इव महोदधिम्॥ ३४॥
हताः केऽपि धृताः केऽपि नाशिताः केऽपि राक्षसाः।
प्रसरद्भी रामवीरैर्दुर्वारैर्वारणैरिव॥ ३५॥
कुम्भकर्णस्तदाकर्ण्य क्रुद्धो वह्निरिव ज्वलन्।
मेघनादश्च सावेशः प्रविवेश रणाङ्गणम्॥ ३६॥
तावापतन्तौ कल्पान्तपवनज्वलनाविव।
न हि सोढुमशक्येतां रामसैन्यैर्मनागपि॥ ३७॥
सुग्रीवोऽथ समुत्पाट्य शिलामिव शिलोच्चयम्।
अक्षिपत्कुम्भकर्णाय सोऽपि तं गदयाऽपिषत्॥ ३८॥
पुनर्गदाप्रहारेण पातयित्वा कपीश्वरम्।
कक्षायां न्यस्य पौलस्त्यो लङ्कां प्रत्यचलत्ततः॥ ३९॥
मेघवन्निनदन्मेघनादोऽपि मुदितस्ततः।
प्लवङ्गान् प्लावयामास निशातशरवृष्टिभिः॥ ४०॥
डुढौके तिष्ठ तिष्ठेति भाषमाणोऽक्षणक्षणः।
रामोऽथ कुम्भकर्णाय मेघनादाय लक्ष्मणः॥ ४१॥
सुग्रीवोऽप्युत्पपाताथ छलौजो रावणानुजात्।
मुष्टौ धृतः कियत्कालं ननु तिष्ठति पारदः॥ ४२॥
वलितः कुम्भकर्णोऽपि रामेण युयुधे ततः।
सौमित्रिणा मेघनादोऽप्रमादः क्षोभयन् जगत्॥ ४३॥

मिलितौ रामपौलस्त्यावब्धी पूर्वापराविव ।
अभातामुत्तरापाथाविव लक्ष्मणरावणौ ॥ ४४ ॥
रावणावरजं रामो रावणिं लक्ष्मणः पुनः ।
पातयित्वाऽग्रहीत्तत्यं रक्षसामपि राक्षसः ॥ ४५ ॥
रावणरावणौ रोषादशेषकपिकुञ्जरान् ।
पिंषन्नथाययौ युद्धभुवं भुवनभीषणः ॥ ४६ ॥
अलमार्य ! स्वयं युद्धेनेति रामं निवारयन् ।
सौमित्रिरभ्यमित्रीणो बभूवास्फालयन् धनुः ॥ ४७ ॥
चिरं युद्धाऽखिलैरस्त्रैरस्त्रविद्रावणस्ततः ।
जघानामोघया शक्त्या मङ्क्षु वक्षसि लक्ष्मणम् ॥ ४८ ॥
शक्त्या भिन्नोऽपतत्क्षोण्यां लक्ष्मणस्तत्क्षणादपि ।
तथैव सद्यो रामोऽपि बलवच्छोकशङ्कुना ॥ ४९ ॥
कृत्वा वप्रान् भटैरष्टौ प्राणैरपि हितैषिणः ।
सुग्रीवाद्यास्ततो रामं सलक्ष्मणमवेष्टयन् ॥ ५० ॥
मरिष्यत्यद्य सौमित्रिस्तदभावे तदग्रजः ।
किं मुधा मे रणेनेति रावणोऽगात्पुरीं ततः ॥ ५१ ॥
राघवं परितो जाते वप्रद्वारचतुष्टये ।
सुग्रीवप्रमुखास्तस्थुरारक्षीभूय ते निशि ॥ ५२ ॥
भामण्डलमथोपेत्य दक्षिणद्वाररक्षणम् ।
पूर्वसंस्तुत इत्यूचे कोऽपि विद्याधराग्रणीः ॥ ५३ ॥
अयोध्याया योजनेषु द्वादशस्वस्ति पत्तनम् ।
कौतुकमङ्गलमिति तत्र द्रोणघनो नृपः ॥ ५४ ॥

कैकेयीभ्रातुरस्यास्ति विशल्या नाम कन्यका ।
तस्याः स्नानाम्भसः स्पर्शे शल्यं निर्याति तत्क्षणात् ॥ ५५ ॥
आप्रत्यूषाच्चक्षणश्चेत्तत्स्नानपयसोक्ष्यते ।
गतशल्यस्तदा जीवेदन्यथा तु न जीवति ॥ ५६ ॥
ततो मत्प्रत्ययाद्रामभद्रं विज्ञपय द्रुतम् ।
कस्यापि दापयादेशं तदानयनहेतवे ॥ ५७ ॥
त्वर्यतां स्वामिकार्याय प्रत्यूषे किं करिष्यथ ।
उदस्ते शकटे हन्त किं कुर्वीत गणाधिपः ॥ ५८ ॥
भामण्डलस्ततो गत्वा तद्रामाय व्यजिज्ञपत् ।
आदिशत्तत्कृते रामस्तमेव हनुमद्युतम् ॥ ५९ ॥
ईयतुस्तौ विमानेनायोध्यां पवनरंहसा ।
प्रासादाङ्के ददृशतुः शयानं भरतं ततः ॥ ६० ॥
भरतस्य प्रबोधाय तौ गीतं चक्रतुः कलम् ।
राजकार्येऽपि राजान उत्थाप्यन्ते ह्युपायतः ॥ ६१ ॥
विबुध्य भरतेनापि दृष्टः पृष्टः पुरो नमन् ।
ऊचे भामण्डलः कार्यं नागस्यास्ते [1]प्ररोचना ॥ ६२ ॥
सेत्स्यत्येतन्मया तत्रैयुषेति भरतस्ततः ।
तद्विमानाधिरूढोऽगात्पुरं कौतुकमङ्गलम् ॥ ६३ ॥
भरतेन द्रोणघनो विशल्यामथ याचितः ।
सहोढाश्च स्त्रीसहस्रसहितां तामदत्त च ॥ ६४ ॥

---

(१) क ख घ -षु ।

भामण्डलोऽप्ययोध्यायां मुक्त्वा भरतमुत्सुकः ।
आययौ सपरीवारविशल्यासंयुतस्ततः ॥ ६५ ॥
ज्वलद्दीपविमानस्थो भीतैः सूर्योदयभ्रमात् ।
क्षण दृष्टो निजैः सोऽथाद्विशल्यामुपलक्ष्मणम् ॥ ६६ ॥
तया च पाणिना स्पृष्टाल्लक्ष्मणाल्लक्ष्मणादपि ।
निःसृत्य काप्यगाच्छक्तिर्यष्टिनेव महोरगी ॥ ६७ ॥
तस्याः स्नानाम्भसाऽन्येऽपि रामादेशाद्यथोचिताः ।
निःशल्या जज्ञिरे सैन्याः पुनर्जाता इव क्षणात् ॥ ६८ ॥
अस्याः स्नानाम्भसा सेक्तुं कुम्भकर्णादयोऽपि ते ।
आनीयतामिहेत्युच्चैरादिदेश रघूद्वहः ॥ ६९ ॥
तदानीमेव तैर्दैव प्रव्रज्या जगृहे स्वयम् ।
इति विज्ञपयामासुरारक्षा लक्ष्मणाग्रजम् ॥ ७० ॥
वन्द्यास्तेऽद्य महात्मानो मोच्या मुक्तिपथस्थिताः ।
इति रामगिराऽऽरक्षैर्नत्वाऽमुच्यन्त ते क्षणात् ॥ ७१ ॥
विशल्यां कन्यकास्ताश्च तदोपायंस्त लक्ष्मणः ।
रावणोऽपि रणायागादमर्षणशिरोमणिः ॥ ७२ ॥
प्रणम्य रामं सौमित्रिरुत्तस्थेऽधिज्यकार्मुकः ।
विवाहाद्युत्सवेभ्योऽपि वीराणामुत्सवो रणः ॥ ७३ ॥
यद्यदस्त्रं दशग्रीवो विससर्जातिदारुणम् ।
तत्तच्चिच्छेद सौमित्रिरस्त्रैः कदलिकाण्डवत् ॥ ७४ ॥
अस्त्रच्छेदादथ क्रुद्धश्चक्रं चिक्षेप रावणः ।
तल्लक्ष्मणोरस्यपतच्चपेटावच्च धारया ॥ ७५ ॥

तदेवादाय सौमित्री रावणस्याच्छिदच्छिरः ।
निजास्त्रैरप्यवस्कन्दः पतेत् स्वस्य कदापि हि ॥ ७६ ॥
सीता स्वर्णशलाकेव निर्मला शीलशालिनी ।
रामेण जगृहे लङ्काराज्ये न्यस्तो बिभीषणः ॥ ७७ ॥

शत्रुं निहत्य ससहोदरदारमित्रो
रामो ययावथ निजां नगरीमयोध्याम् ।
उत्पन्नया परकलत्रविरिंसयाऽपि¹
ज्ञात्वा कुलक्षयमगान्नरकं दशास्यः ॥ २७८ ॥

॥ इति सीतारावणकथानकम् ॥ ८८ ॥

तस्मात् ।

लावण्यपुण्यावयवां पदं सौन्दर्यसम्पदः ।
कलाकलापकुशलामपि जह्यात्परस्त्रियम् ॥१००॥

दुस्त्यजामपि परस्त्रियं जह्यात्परिहरेत् । दुस्त्यजत्वे हेतूनाह । लावण्यपुण्यावयवां लावण्यं स्पृहणीयता रूपादिभ्योऽतिरिक्तं तेन पुण्याः पवित्रा अवयवा यस्यास्तां, पदं स्थानं सौन्दर्यसंपदो रूपसम्पदः, कला शास्त्रतिर्लेखाद्याः स्त्रीजनोचिताः तासां कलापः समूहस्तत्र कुशलां प्रवीणाम् । लावण्यं, रूपं, वैदग्ध्यं च परदाराणां दुस्त्यजत्वे हेतुः । अपि शब्दस्त्रिष्वपि हेतुषु सम्बन्धनीयः ॥ १०० ॥

---

(१) क च हि ।

परस्त्रीगमने दोषानभिधाय परस्त्रीविरतान् प्रशंसति—

अकलङ्कमनोवृत्तेः परस्त्रीसन्निधावपि ।
सुदर्शनस्य किं ब्रूमः सुदर्शनसमुन्नतेः ॥ १०१ ॥

परस्त्रीसन्निधानेऽपि निष्कलङ्कचेतोवृत्तेः सुदर्शनाभिधानस्य महाश्रावकस्य किं ब्रूमः कां स्तुतिं कुर्महे । वचनगोचरातीता स्तुतिरित्यर्थः । सुदर्शनस्य विशेषणं सुदर्शनसमुन्नतेः शोभना दर्शनसमुन्नतिर्यस्मात्तस्य, सुदर्शनप्रभावकस्येत्यर्थः ।

सुदर्शनश्च संप्रदायगम्यः । स चायम्—

अस्त्यङ्गदेशेऽस्त्यलकापुरी चम्पेति तत्र च ।
दधिवाहन इत्यासीद्राजाऽतिनरवाहनः ॥ १ ॥
अभूत्तस्याभया नाम कलाकौशलशालिनी ।
महादेवी स्वलावण्यावहातत्रिदशाङ्गना ॥ २ ॥
इतो नगर्यां तस्यां च समग्रवणिगग्रणीः ।
श्रेष्ठी वृषभदासाऽभूदासीनः श्रेष्ठकर्मणि ॥ ३ ॥
यथार्थनामिका जैनधर्मोपासनकर्मणा ।
अर्हद्दासीति तस्यासीद् वल्लभा शीलशालिनी ॥ ४ ॥
श्रेष्ठिनस्तस्य महिषीरक्षोऽभूत्सुभगाभिधः ।
अनैषीन्महिषीर्नित्यं स तु चारयितुं वने ॥ ५ ॥
वनान्निवृत्तः सोऽन्येद्युर्माघमासे दिनात्यये ।
अपश्यदप्रावरणं कायोत्सर्गस्थितं मुनिम् ॥ ६ ॥

यस्यां हिमनिशि स्थाणुरिव यः स्थास्यति स्थिरम् ।
असौ धन्यो महात्मेति चिन्तयन् स गृहं ययौ ॥ ७ ॥
महामुनिमवज्ञातहिमानीपातवेदनम् ।
तमेव चिन्तयन्नार्द्रमना रात्रिं निनाय सः ॥ ८ ॥
अविभातविभावर्यां गृहीत्वा महिषीस्ततः ।
स ययौ तत्र यत्रासीत् स मुनिः प्रतिमास्थितः ॥ ९ ॥
कल्याणाभिमुखानस्योपासामास्थक्र स तं तदा ।
अहो नैसर्गिकः कोऽपि विवेकस्तादृशामपि ॥ १० ॥
अत्रान्तरे चण्डरोचिरारोहदुदयाचलम् ।
अहया तमिव द्रष्टुं कायोत्सर्गस्थितं मुनिम् ॥ ११ ॥
स नमो अरिहन्ताणमिति वाचमुदीरयन् ।
द्वितीय इव चण्डांशुरुत्पपात नभस्तले ॥ १२ ॥
आकाशगामिनी नूनमियं विद्येति बुद्धितः ।
नमस्कारपदं तं तु सुभगो निदधे हृदि ॥ १३ ॥
जाग्रत्स्वपन्नटंस्तिष्ठन्दिवा निशि गृहे बहिः ।
तदपाठीत् स उच्छिष्टोऽप्येकश्रद्धा हि तादृशाः ॥ १४ ॥
ततः पप्रच्छ तं श्रेष्ठी विश्वोत्कृष्टप्रभावभृत् ।
प्राप्तं पञ्चपरमेष्ठिनमस्कारपदं कुतः ॥ १५ ॥
अशेषं महिषीपालः कथयामास तत्ततः ।
साधु भोः साधु भद्रेति शंसन् श्रेष्ठी जगाद तम् ॥ १६ ॥
आकाशगमने हेतुरसौ विद्या न केवलम् ।
किन्तु हेतुरसावेव गतौ स्वर्गापवर्गयोः ॥ १७ ॥

यत्किञ्चित्सुन्दरं वस्तु दुष्प्रापं भुवनत्रये ।
लीलया प्राप्यते सर्वं तदमुष्य प्रभावतः ॥ १८ ॥
अस्य पञ्चपरमेष्ठिनमस्कारस्य वैभवम् ।
परिमातुं न शक्तोऽस्मि वारि वारिनिधेरिव ॥ १९ ॥
साधु प्राप्तमिदं भद्र त्वया पुण्ययोगतः ।
किन्त्विच्छद्भिर्ग्रहीतव्यं गुरुनाम न जातुचित् ॥ २० ॥
व्यसनी व्यसनमिव न त्यक्तुं क्षणमप्यदः ।
अलमस्मीति तेनोक्तः श्रेष्ठी हृष्टोऽब्रवीदिदम् ॥ २१ ॥
तदधीष्वाखिलां पञ्चपरमेष्ठिनमस्क्रियाम् ।
कल्याणानि यथा ते स्युः परलोकेहलोकयोः ॥ २२ ॥
ततोऽधीत्य नमस्कारं लब्धार्थमिव [1]तद्धनः ।
परावर्त्तयताजस्रं सुभगः सुभगाशयः ॥ २३ ॥
महिषीपालकस्यास्य क्षुत्तृष्णावेदनाहरः ।
परमेष्ठिनमस्कारः प्रकामं समजायत ॥ २४ ॥
एवं तस्य नमस्कारपाठव्यसनिनः सतः ।
कियत्यपि गते काले वर्षाकालः समाययौ ॥ २५ ॥
धारानाराचधोरण्या प्रसर्पिण्या निरन्तरम् ।
अकीलयदिव द्यावापृथिव्यौ नव्यवारिदः ॥ २६ ॥
गृहाद्गृहीत्वा महिषीः सुभगोऽपि बहिर्गतः ।
विनिवृत्तोऽन्तराऽपश्यद्घोरपूरां महानदीम् ॥ २७ ॥

---

(1) क तद्धनम् ।

तां दृष्ट्वा स मनाग् भीतस्तस्थौ किञ्चिद्विचिन्तयन् ।
नदीं नीर्त्वा परस्मिन्ने मङ्ष्यः प्राविशंस्ततः ॥ २८ ॥
नमस्कारं पठन् व्योमयानविद्याधिया ततः ।
उत्पपात कृतोत्फालो मध्येनदि पपात च ॥ २९ ॥
तत्रान्तःकर्दमं मग्नः खरः खदिरकीलकः ।
कृतान्तदन्तसोदर्यो हृदयस्य प्रविवेश च ॥ ३० ॥
तथैवावर्त्तयन् पञ्चपरमेष्ठिनमस्क्रियाम् ।
तदा मर्माविधा तेन कालधर्ममियाय सः ॥ ३१ ॥
श्रेष्ठिपत्न्यास्ततः सोऽर्हद्दास्याः कुक्षाववातरत् ।
नमस्काररतानां हि सङ्गतिर्न विसंवदेत् ॥ ३२ ॥
तस्मिन् गर्भस्थिते मासि तार्त्तीयीके व्यतीयुषि ।
श्रेष्ठिनी श्रेष्ठिने स्वस्य दोहदानित्यचीकथत् ॥ ३३ ॥
गन्धोदकैः स्नपयितुं विलेप्तुं च विलेपनैः ।
अर्चितुं कुसुमैरिच्छाम्यर्हतां प्रतियातनाः ॥ ३४ ॥
प्रतिलम्भयितुं साधूनिच्छाम्याच्छादनादिभिः ।
संघं पूजयितुं दातुं दीनेभ्यश्च मतिर्मम ॥ ३५ ॥
इत्यादिदोहदांस्तस्याः श्रुत्वा मुदितमानसः ।
चिन्तामणिरिव श्रेष्ठिशिरोमणिरपूरयत् ॥ ३६ ॥
ततो नवसु मासेषु दिनेष्वर्द्धाष्टमेषु च ।
गतेषु श्रेष्ठिनी पुत्रमसूत शुभलक्षणम् ॥ ३७ ॥
सद्यो महोत्सवं कृत्वा श्रेष्ठी हृष्टः शुभे दिने ।
सूनोः सुदर्शन इति यथार्थं नाम निर्ममे ॥ ३८ ॥

वर्द्धमानः क्रमात्पित्रोर्मनोरथ इवोच्चकैः ।
सुदर्शनो यथौचित्यं जग्राह सकलाः कलाः ॥ ३९ ॥
कन्यां मनोरमां नाम मनोरमकुलाकृतिम् ।
साक्षादिव रमां श्रेष्ठी [1]तेन तां पर्यणाययत् ॥ ४० ॥
सौम्यमूर्त्तिः स हर्षाय पित्रोरेव न केवलम् ।
जज्ञे राज्ञोऽपि लोकस्य सर्वस्य[2] च शशाङ्कवत् ॥ ४१ ॥
इतो नगर्यां तत्राभूद्भूपतेर्हृदयङ्गमः ।
पुरोधाः कपिलः प्राप्तरोधा विद्यामहोदधेः ॥ ४२ ॥
समं सुदर्शनेनास्य मन्मथेन मधोरिव ।
अजायत परा प्रीतिः सर्वदाऽप्यविनश्वरी ॥ ४३ ॥ (युग्मम्)
प्रायः सुदर्शनस्यैव स पुरोधा महात्मनः ।
रौहिणेय इवोष्णांशोः परिपार्श्वमवर्त्तत ॥ ४४ ॥
कपिलं कपिला नाम भार्याऽपृच्छदन्यदा ।
विस्मरन्नित्यकर्माणि कियत्कालं नु तिष्ठसि[3] ॥ ४५ ॥
पार्श्वे सुदर्शनस्याहं तिष्ठामीति तदोदिते ।
कोऽसौ सुदर्शन इति तयोक्तः प्रत्युवाच सः ॥ ४६ ॥
मम मित्रं सतां धुर्यं विश्वैकप्रियदर्शनम् ।
सुदर्शनं न चेद्वेत्सि तत्त्वं वेत्सि न किञ्चन ॥ ४७ ॥

---

(१) ख ग ङ तेनाथो- ।
(२) ख ग -स्यैव ।
(३) क ङ. [illegible] ।

तं ज्ञापयाधुनापीति तयोक्तः कपिलोऽवदत् ।
अस्त्यृषभदासस्य श्रेष्ठिनस्तनयः सुधीः ॥ ४८ ॥
एष रूपेण पञ्चेषुः कान्त्येन्दुस्तेजसा रविः ।
गाम्भीर्य्येण महाम्भोधिः क्षमया मुनिसत्तमः ॥ ४९ ॥
दानैकचिन्तामाणिक्यं गुणमाणिक्यरोहणः ।
प्रियालापसुधाकुण्डं वसुधामुखमण्डनम् ॥ ५० ॥
स्वल्पज्ञा खलु यद्वाऽस्य निखिलानपरान् गुणान् ।
गुणचूडामणिः शीलं यस्य न स्खलति क्वचित् ॥ ५१ ॥
कपिला कपिलाच्छ्रुत्वा तद्गुणान् कामविह्वला ।
चक्रेऽनुरागं, चपलाः प्रायेण द्विजयोषितः ॥ ५२ ॥
सुदर्शनाभिसरणोपायं प्रतिदिनं ततः ।
कपिला चिन्तयामास परं ब्रह्मेव योगिनी ॥ ५३ ॥
अपरेद्युर्नृपादेशाद्ग्रामान्तरमुपेयुषि ।
कपिले, कपिलेयाय सुदर्शननिकेतनम् ॥ ५४ ॥
सा मायाविन्यवोचत्तमद्य त्वत्सुहृदो महत् ।
शरीरापाटवं तेन हेतुना नाययाविश ॥ ५५ ॥
अपाटवं त्वद्विरहाद्वपुषो द्विगुणं यतः ।
अतस्त्वामहमाह्वातुं प्रेषिता सुहृदा तव ॥ ५६ ॥
नैतज्ज्ञातं मयेत्युक्त्वा तदैवागात्स तद्गृहम् ।
नान्यमायां हि शङ्कन्ते सन्तः स्वयममायिनः ॥ ५७ ॥
स तत्र प्रविशन्नूचे क्व नाम सुहृदस्ति मे ।
सोवाच गम्यतामग्रे शयानः सुहृदस्ति ते ॥ ५८ ॥

किञ्चिच्च परिहस्याथ पुन: प्रोचे सुदर्शन: ।
अत्रापि कपिलो नास्ति किमन्यत्र क्वचिद्ययौ ॥ ५९ ॥
साऽचे स्थितो निवातेऽस्ति शरीरापाटवादसौ ।
मूलापवरकं गच्छ वयस्यं तत्र पश्य च ॥ ६० ॥
तत्रापि प्रविवेशायमपश्यन् सुहृदं तत: ।
कपिले ! कपिल: क्वास्तीत्युवाच सरलाशय: ॥ ६१ ॥
अवरुद्ध्य ततो द्वारं मदनोद्दीपनानि सा ।
किञ्चित्प्रकाश्य स्वाङ्गानि च्छादयन्त्यच्छवाससा॥६२॥(युग्मम्)
दृढबन्धामपि नीवीं श्लथयित्वाऽभिबध्नती ।
विलोललोचनाऽवोचद्रोमाञ्चोदञ्चिकञ्चुका ॥ ६३ ॥
नास्तीह कपिलस्तस्मात्कपिलां प्रतिजागृहि ।
विभेदो भवत: को वा द्वयो: कपिलयोर्ननु ॥ ६४ ॥
प्रतिजागरितव्यं किं कपिलाया इति ब्रुवन् ।
सुदर्शनो निजगदे पुन: कपिलभार्यया ॥ ६५ ॥
त्वद्वयस्य: प्रशंस त्वां यदाऽद्भुतगुणं मम ।
तत: प्रभृति मामेष दुनोति मदनज्वर: ॥ ६६ ॥
दिष्ट्या मे विरहार्त्ताया कल्पनाऽपि त्वदागम: ।
भुवो ग्रीष्माभितप्ताया इव मेघसमागम: ॥ ६७ ॥
अद्य नाथामि तन्नाथ ! मन्मथोन्माथविह्वलाम् ।
निजाश्लेषसुधावर्षैराश्वासय चिराय माम् ॥ ६८ ॥
प्रपञ्च: कोऽप्यसावस्या दुर्विचिन्त्यो विधेरपि ।
धिक् स्त्रीरिति विचिन्त्योचे स प्रत्युत्पन्नधीरिदम् ॥ ६९ ॥

यूनां युक्तमिदं किन्तु [1]पण्डकोऽहमपण्डिते !।
मुधा पुरुषवेषेण मदीयेनासि वञ्चिता ॥ ७० ॥

ततो विरक्ता सद्यः सा याहि याहीति भाषिणी।
द्वारमुद्घाटयामास निर्ययौ च सुदर्शनः ॥ ७१ ॥

स्तोकेन मुक्तो नरकद्वारादस्मीति चिन्तयन्।
श्रेष्ठिसूनुर्द्रुतपदं प्रपेदे निजमन्दिरम् ॥ ७२ ॥

अतिरागमयः कूटादतिशाकिनयश्छलात्।
अतिविद्युतश्चापलाद्दारुणाः किमपि स्त्रियः ॥ ७३ ॥

एताभ्यो भीरुरस्मीति प्रत्यश्रौषीद्दिजस्य सः।
नातः परं परगृहे यास्यामि क्वचिदेककः ॥ ७४ ॥

निर्मिमाणः स धर्म्याणि कर्माणि शुभकर्मठः।
सतां मूर्त इवाचारो नावद्यं किञ्चिदाचरत् ॥ ७५ ॥

एकदा तु यथाकालं पुरे तस्मिन्नवर्त्तत।
समग्रजगदानन्दपदमिन्द्रमहोत्सवः ॥ ७६ ॥

सुदर्शनपुरोधाभ्यां सहोद्यानं ययौ नृपः।
साक्षादिव शरत्कालचन्द्रागस्तिविराजितः ॥ ७७ ॥

इतः कपिलया युक्ताऽभया भूपतिमन्वगात्।
समारूढा याप्ययानं विमान इव नाकिनी ॥ ७८ ॥

सुदर्शनस्य भार्याऽपि षड्भिः पुत्रैर्मनोरमा।
तत्रागाद्यानमारुह्य सतीधर्म इवाङ्गवान् ॥ ७९ ॥

---

[1] क पण्डको-।

तां दृष्ट्वा कपिलाऽपृच्छत्केयं स्वामिनि ! वर्णिनी ।
रूपलावण्यसर्वस्वभाण्डागार इवागत: ॥ ८० ॥
ततस्तामभयाऽवादीन्न ज्ञातेयमपि त्वया ।
सुदर्शनस्य गृहिणी गृहलक्ष्मीरिव स्वयम् ॥ ८१ ॥
तच्छ्रुत्वा विस्मिता स्माह कपिला देवि ! यद्यसौ ।
सुदर्शनस्य गृहिणी तदस्या: कौशलं महत् ॥ ८२ ॥
किमस्या: कौशलमिति राज्ञ्योक्ता साऽब्रवीत्पुन: ।
इयन्ति पुत्रभाण्डानि यदसौ समजीजनत् ॥ ८३ ॥
स्वाधीनपतिका पुत्रानङ्गना जनयेद्यदि ।
तत्किं कौशलमित्युक्ताऽभयया कपिलाऽवदत् ॥ ८४ ॥
एवं देवि ! भवत्येव पतिर्यदि पुमान् भवेत् ।
सुदर्शन: पुनरयं [1]षण्ढ: पुरुषवेषभृत् ॥ ८५ ॥
कथमेतत्त्वया ज्ञातं राज्ञ्येति गदिता तत: ।
सा सुदर्शनवृत्तान्तं स्वानुभूतमचीकथत् ॥ ८६ ॥
अभयाऽप्यब्रवीदेवं यद्येवं वञ्चिताऽसि तत् ।
मूढे ! [2]षण्ढ: परस्त्रीषु न त्वयं निजयोषिति ॥ ८७ ॥
ततो विलक्षा कपिला प्रत्तलापेत्यसूयिता ।
वञ्चिता यद्यहं मूढा प्राज्ञाया: किं तवाधिकम् ॥ ८८ ॥
अनयोचि मया मुग्धे ! रागत: पाणिना धृत: ।
दृषदोद्रावाऽपि नि:संज्ञ: ससंज्ञ: किं पुन: पुमान् ॥ ८९ ॥

(१) क षण्ड. ।
(२) क षण्ढ: । ख च षण्ड. ।

सासूयमूचे कपिलाऽप्येवं मा गर्वमुद्वह ।
गर्वं यद्वहसि चेद्देवि ! रम्यतां तत्सुदर्शनः ॥ ८० ॥
व्याजहाराभया देवी साहङ्कारमिदं ततः ।
हला ! रमितमेवेनं मया विद्धि सुदर्शनम् ॥ ८१ ॥
रमणीभिर्विदग्धाभिः कठोरा वनवासिनः ।
तपस्विनोऽपि रमिताः कोऽसौ मृदुमना गृही ॥ ८२ ॥
रमयामि न यद्येनं प्रविशामि तदाऽनलम् ।
इत्यालपन्त्यावुद्यानं प्रपेदाते क्षणेन ते ॥ ८३ ॥
[1]तत्रारमयतां स्वैरं नन्दनेऽप्सरसाविव ।
अभयाकपिले श्रान्ते स्वं स्वं धाम गते ततः ॥ ८४ ॥
अथ तत्राभया राज्ञी स्वप्रतिज्ञामजिज्ञपत् ।
धात्रिकां पण्डितां नाम सर्वविज्ञानपण्डिताम् ॥ ८५ ॥
पण्डिताऽवोचदाः ! पुत्रि ! न युक्तं मन्त्रितं त्वया ।
पक्षेऽद्यापि न जानासि धैर्यशक्तिं महात्मनाम् ॥ ८६ ॥
जिनेन्द्रमुनिशुश्रूषानिष्कम्पीकृतमानसः ।
सुदर्शनः खल्वसौ तत्प्रतिज्ञां धिगिमां तव ॥ ८७ ॥
अन्योऽपि श्रावको नित्यं परनारीसहोदरः ।
किमुच्यते पुनरसौ महासत्त्वशिरोमणिः ॥ ८८ ॥
ब्रह्मचर्यधना नित्यं गुरवो यस्य साधवः ।
कथं कार्येत सोऽब्रह्म गुरुशीलाद्युपासकः ॥ ८९ ॥

---

(१) ग तत्राधारमतां- ।

सदा गुरुकुलासीनो ध्यानमौनान्वितः सदा ।
आनेतुमभिसर्तुं वा स कथं नाम शक्यते ॥ १०० ॥
वरं फणिफणारत्नग्रहणाय प्रतिश्रवः ।
कदापि न पुनस्तस्य शीलोल्लङ्घनकर्मणि ॥ १ ॥
अथाभयोचे कथमप्येकवारं तमानय ।
तत ऊर्ध्वमहं सर्वं करिष्यामि न ते च्छलम् ॥ २ ॥
विचिन्त्य चेतसा किञ्चिदित्यवोचत पण्डिता ।
यद्ययं निश्चयस्ते तदस्त्युपायोऽयमेककः ॥ ३ ॥
पर्वाह्ने शून्यगेहादौ कायोत्सर्गं करोति सः ।
तथास्थितो यदि परमानेतव्योऽन्यथा तु न ॥ ४ ॥
उपायः साधुरेषोऽस्मिन् यतितव्यं त्वयाऽन्वहम् ।
इत्युक्तवत्यां तात्पर्याद्व्यामोमित्युवाच सा ॥ ५ ॥
ततः परं व्यतीतेषु दिवसेषु कियत्स्वपि ।
विश्वानन्दकृत्कौमुदीमहोत्सव उपाययौ ॥ ६ ॥
अथ राज्ञोत्सवोत्सेकविधित्सोत्सुकचेतसा ।
आरक्षकाः समादिष्टाः पटहेनेत्यघोषयन् ॥ ७ ॥
सर्वद्धर्या सर्वलोकेन कौमुद्युत्सवमीक्षितुम् ।
अद्योद्यानेऽभिगन्तव्यमिति वो राजशासनम् ॥ ८ ॥
प्रातरेष्यच्चतुर्मासधर्मकर्मक्रियोन्मनाः ।
श्रुत्वा सुदर्शनस्तत्तु विषादादित्यचिन्तयत् ॥ ९ ॥
मनःप्रह्वमिदं प्रातश्चैत्यवन्दनकर्मणि ।
उद्यानगतये चैतत्प्रचण्डं राजशासनम् ॥ १० ॥

क उपायो भवत्वेवं तावदित्यभिचिन्त्य सः ।
समर्थोपायनं भूमिपतिमेवं व्यजिज्ञपत् ॥ ११ ॥
प्रातः पर्वदिनं युष्मत्प्रसादाद्विदधाम्यहम् ।
देवार्चादीनि तेनोक्तोऽनुमेने तन्महीपतिः ॥ १२ ॥
द्वितीयेऽह्नि जिनेन्द्राणां भक्त्या स्नात्रं विलेपनम् ।
अर्चां च स्वयंचैत्यपरिपाट्यां चचार सः ॥ १३ ॥
ततः सुदर्शनो रात्रौ गृहीत्वा पौषधव्रतम् ।
कायोत्सर्गेण कस्मिंश्चित्तस्थौ नगरचत्वरे ॥ १४ ॥
पण्डिताऽप्यभयामूचे कदाचित्ते मनोरथाः ।
पूर्यन्ते परमुद्यानमद्य त्वमपि मा गमः ॥ १५ ॥
शिरो मे बाधत इति कल्वोत्तरमिलापतेः ।
तस्थौ राज्ञी प्रपञ्चे हि सिद्धसारस्वताः स्त्रियः ॥ १६ ॥
ततो लेप्यमयीं काममूर्त्तिमाच्छाद्य वाससा ।
याने कृत्वा पण्डिताऽगात्प्रवेष्टुं राजवेश्मनि ॥ १७ ॥
किमेतदिति पृच्छद्भिर्वेत्रिभिः स्खलिता तु सा ।
इत्यूचे पण्डिता भाण्डागारिकी कूटसम्पदाम् ॥ १८ ॥
शरीरकारणाद्देवी नायोद्यानं ययौ ततः ।
पूजां स्मरादिदेवानां वेश्मन्येव करिष्यति ॥ १९ ॥
इयं प्रवेक्ष्यते तस्मात्प्रतिमा पुष्पधन्वनः ।
अप्यन्यासां देवतानां प्रवेश्या ह्यद्य मूर्त्तयः ॥ २० ॥
तदिमां दर्शयित्वैव यास्यामीति द्वाःस्थभाषिता ।
सा काममूर्त्तिमुद्घाट्यादर्शयच्च जगाम च ॥ २१ ॥

सा प्रतीहारमोहाय गृहीताऽपरमूर्त्तिका ।
[1]हित्त्विव प्रविवेशाहो नारीणां छद्मकौशलम् ॥ २२ ॥
याने सुदर्शनं न्यस्योत्तरीयेण पिधाय च ।
द्वाःस्थैरस्खलिताऽनीयाऽभयाया: पण्डिताऽर्पयत् ॥ २३ ॥
आविर्विकारा साऽनेकप्रकारं मदनातुरा ।
अभया संक्षोभयितुमित्यभाषत तं ततः ॥ २४ ॥
कन्दर्पो मां दुनोत्येष निःशङ्कं निशितैः शरैः ।
कन्दर्पप्रतिरूप[2]स्त्वच्छ्रितोऽसि शरणं मया ॥ २५ ॥
शरण्यः शरणायातामार्त्तां त्रायस्व नाथ ! माम् ।
परकार्ये महीयांसो ह्यकार्यमपि कुर्वते ॥ २६ ॥
आनीतश्छद्मनाऽसीति कार्यः कोपस्त्वया न हि ।
कार्ये त्वाणि यदार्त्तानां गृह्यते न खलु च्छलम् ॥ २७ ॥
ततः सुदर्शनोऽप्युच्चैः परमार्थविचक्षणः ।
देवताप्रतिमेवास्थात्कायोत्सर्गेण निश्चलः ॥ २८ ॥
पुनरप्यभयाऽवादी[3]द्धावहावमनोहरम् ।
नाथ ! सम्भाषमाणां मां तूष्णीकः किमुपेक्षसे ॥ २९ ॥
व्रतकष्टमिदं मुञ्च मा कृथास्त्वमतः परम् ।
मत्संप्राप्त्या व्रतफलं विद्धि संसिद्धमात्मनः ॥ ३० ॥

---

(१) ख हित्त्विवन्तर्विवेशाहो ।
(२) क ख ग -पस्त्वं न्श्रितोऽसि ।
(३) ख ग -त् हावभाव- ।

तारुण्यं याचमानां मां नम्रां मानय मानद ! ।
दैवात्पतितमुत्सङ्गे रत्नं गृह्णासि किं नहि ॥ ३१ ॥
[1]कियद्द्यापि सौभाग्यगर्वमुद्घाटयिष्यसि ।
इत्यालपन्त्या जगृहे तया पाणौ स पाणिना ॥ ३२ ॥
निबिडं मण्डलीभूतपीनोत्तुङ्गस्तनं तया ।
भुजाभ्यां पद्मिनीनालमृदुलाभ्यां स सस्वजे ॥ ३३ ॥
एवं तदुपसर्गेषु निसर्गेण स धीरधीः ।
धर्मध्याने निश्चलोऽभूत् किं चलत्यचलः क्वचित् ॥ ३४ ॥
स दध्यौ चेति चेन्मुच्ये कथञ्चिदहमेतया ।
पारयामि तदोत्सर्गमन्यथाऽनशनं मम ॥ ३५ ॥
अमानिताऽथ घटितभ्रुकुटिः कुटिलाशया ।
अभया तं भापयितुमित्यभाषत निर्भया ॥ ३६ ॥
मुमूर्षो ! मूर्ख ! माकार्षीर्मान्याया मेऽव[2]माननाम् ।
न वेत्सि मानिनी नृणां निग्रहानुग्रहक्षमा ॥ ३७ ॥
मनोभववशाया मे वशमाविश रे जड ! ।
नो चेदामवशं यास्यस्यत्र नास्त्येव संशयः ॥ ३८ ॥
इति संरम्भकाष्ठायां साऽऽकरोत्क यथा यथा ।
धर्मध्याने महात्माऽसा[3]वारुरोह तथा तथा ॥ ३९ ॥

---

(१) क किं यद्यद्यापि ।
(२) क -माननम् । ख ग घ -मेव मान्यताम् ।
(३) ग ख वारुरोह ।

एवं कदर्थितो रात्रिं तया ध्यानान्न सोऽचलत् ।
किं क्षुभ्यते महाम्भोधिः क्वापि नौदण्डताडनैः ॥ ४० ॥
ततः प्रेक्ष्य प्रभातं सा स्वं लिलेख नखैर्वपुः ।
कोऽप्यसौ मे बलात्कारकारीत्युच्चै ररास च ॥ ४१ ॥
ततः प्राहरिकास्तत्र संभ्रान्ता यावदागमन् ।
कायोत्सर्गस्थितं तावद्दृदृशुस्ते सुदर्शनम् ॥ ४२ ॥
असिन्नसम्भवत्येतदिति द्रुतमुपेत्य तैः ।
विज्ञप्तो भूपतिस्तत्रायर्यां पप्रच्छ चाभयाम् ॥ ४३ ॥
साचे संपृच्छ्य देव ! त्वामहं यावदिह स्थिता ।
एषोऽकस्मादिहायातो दृष्टस्तावत्त्विशाचवत् ॥ ४४ ॥
एष मेष इवोन्मत्तो मन्मथव्यसनी ततः ।
रिरंसुर्मामयाचिष्ट पापिष्ठश्चाटुकोटिभिः ॥ ४५ ॥
अचे मयैष रे मर्षोरसतोवत्सतोरपि ।
शक्यन्ते हि चणकवन्मरिचानि न चर्वितुम् ॥ ४६ ॥
ततः परं बलात्कारादेष एवं चकार मे ।
मया च पूत्कृतमन्यदबलानां बलं नहि ॥ ४७ ॥
अस्मिन्निदमसम्भाव्यमिति मत्वा महीपतिः ।
किमेतदिति पप्रच्छ बहुधैव सुदर्शनम् ॥ ४८ ॥
पृष्टोऽपि राज्ञा कृपया किञ्चिन्नोचे सुदर्शनः ।
परतापोपशान्त्यै हि निघृष्टमपि चन्दनम् ॥ ४९ ॥
ततः सम्भावयामास दोषं तस्यापि भूपतिः ।
पारदारिकदस्यूनां तूष्णीकत्वं हि लक्षणम् ॥ ५० ॥

इत्यादिदेश स क्रोधात्सकलेऽप्यथ पत्तने ।
दोषप्रख्यापनां कृत्वा पाप एष निगृह्यताम् ॥ ५१ ॥
आरक्षपुरुषैर्दोर्भ्यां स धृत्वोत्पाटितस्ततः ।
वचसा सिद्धयो राज्ञां मनसेव दिवौकसाम् ॥ ५२ ॥
स मण्डितो मुखे मष्या शरीरे रक्तचन्दनैः ।
करवीरस्रजा मुण्डे कण्ठे [1]कोशकमालया ॥ ५३ ॥
खरमारोप्य विधृतसूर्पच्छत्रः स तैस्ततः ।
वाद्यमाननानकैनारेभे भ्रमयितुं पुरे ॥ ५४ ॥
कृतापराधः शुद्धान्ते वध्यतेऽसौ सुदर्शनः ।
नात्रदोषो नृपस्येति चक्रुराघोषणां च ते ॥ ५५ ॥
न युक्तं सर्वथाऽप्येतन्नेह सम्भवतीदृशम् ।
इति लोकप्रघोषोऽभूद् हाहारवयुतस्ततः ॥ ५६ ॥
एवं च भ्राम्यमाणोऽगाद् द्वारदेशे स्ववेश्मनः ।
अदृश्यत महासत्या स मनोरमयाऽपि च ॥ ५७ ॥
चिन्तयामास सा चैवं सदाचारः पतिर्मम ।
भूपतिश्च प्रियाचारो दुराचारो विधिर्ध्रुवम् ॥ ५८ ॥
इदमप्यसदथवा ध्रुवमस्य महात्मनः ।
उपस्थितं फलमिदं प्राक्तनाशुभकर्मणः ॥ ५९ ॥

---

(१) क कौशिकमालया ।

(२) ङ विधृतसूर्पच्छत्रधतैस्ततः । ख विधृतः सूर्पच्छत्रधतैस्ततः । च विधृतः सूर्पच्छत्रधतैस्ततः ।

कोऽपि नास्य प्रतीकारस्तथाप्येष भविष्यति ।
निश्चित्येति प्रविश्यान्तर्जिनार्चां साऽर्चयत्ततः ॥ ६० ॥
कायोत्सर्गेण च स्थित्वा सोचे शासनदेवताः ।
भगवत्यो मम पत्युर्दोषसम्भावनाऽपि न ॥ ६१ ॥
परमश्रावकस्यास्य सान्निध्यं चेत्करिष्यथ ।
तदाऽहं पारयिष्यामि कायोत्सर्गमिमं खलु ॥ ६२ ॥
अन्यथैवंस्थिताया मे भवत्वनशनं ध्रुवम् ।
धर्मध्वंसे पतिध्वंसे किं जीवन्ति कुलस्त्रियः ? ॥ ६३ ॥
इतश्च न्यधुरारक्षाः शूलिकायां सुदर्शनम् ।
अलङ्घनीया भृत्यानां राजाज्ञा हि भयङ्करा ॥ ६४ ॥
स्वर्णाब्जासनतां भेजे शूलाऽप्यस्य महात्मनः ।
देवतानां प्रभावेन यमदंष्ट्राऽपि कुण्ठति ॥ ६५ ॥
वधाय तस्य चारक्षैर्दृढं व्यापारितः शितः ।
करवालोऽपतत्कण्ठे पुष्पमाला च सोऽभवत् ॥ ६६ ॥
तद्दृष्ट्वा चकितैरेत्य विज्ञप्तस्तैर्महीपतिः ।
आरुह्य हस्तिनीं वेगाद्ययावधिसुदर्शनम् ॥ ६७ ॥
तमालिङ्ग्य महीपालोऽमृतापादित्यवोचत ।
श्रेष्ठिन्नहि विनष्टोऽसि दिष्ट्याऽऽत्मीयप्रभावतः ॥ ६८ ॥
मया हि तावत्पापेन किं राज्ञाऽसि विनाशितः ।
नाथः सतामनाथानां धर्मो जागर्त्ति सर्वथा ॥ ६९ ॥
स्त्रीणां मायाप्रधानानां प्रत्ययात्त्वां निहन्ति यः ।
अविमृश्यकरः पापो नापरो दधिवाहनात् ॥ ७० ॥

किं च किञ्चिदिदं पापं भवताऽप्यस्मि कारितः ।
असत्यमयया साधो ! तदा पृष्टोऽपि नावदः ॥ ७१ ॥
एवमालपता राज्ञा करिण्यामधिरोप्य सः ।
नीत्वा स्वहर्म्ये स्नपितश्चन्दनैश्च विलेपितः ॥ ७२ ॥
वस्त्रालङ्कारजातञ्च परिधाप्य सुदर्शनः ।
राज्ञा पृष्टो रात्रिवृत्तं यथातथमचीकथत् ॥ ७३ ॥
अथ राज्ञीं प्रति क्रुद्धो भूपतिर्निग्रहोद्यतः ।
सुदर्शनेन न्यषेधि शिरः प्रक्षिप्य पादयोः ॥ ७४ ॥
[1]ततः श्रेष्ठी नृपेणेभमारोप्य पुरमध्यतः ।
महाविभूत्या तद्वेश्म नायितो न्यायतायिना ॥ ७५ ॥
अभयाऽप्येतदाकर्ण्योद्बध्यात्मानं व्यपद्यत ।
परद्रोहकराः पापाः स्वयमेव पतन्ति हि ॥ ७६ ॥
पण्डिताऽपि प्रणश्यागात्पाटलीपुत्रपत्तनम् ।
अवस्थद्देवदत्ताया गणिकायाश्च सन्निधौ ॥ ७७ ॥
तत्रापि पण्डिता नित्यं तथाऽऽशंसत्सुदर्शनम् ।
दर्शनेऽस्य यथा देवदत्ताऽभूद्भृशमुत्सुका ॥ ७८ ॥
सुदर्शनोऽपि संसारविरक्तो व्रतमग्रहीत् ।
उपसृत्य गुरोः पार्श्वे रत्नमम्भोनिधेरिव ॥ ७९ ॥
तपःक्षामाङ्ग एकाङ्गविहारप्रतिमास्थितः ।
स क्रमाद्विहरन् प्राप पाटलीपुत्रपत्तनम् ॥ ८० ॥

---

(१) ख च तथ ।

भिक्षार्थं पर्यटंस्तत्र दृष्टः पण्डितया च सः ।
कथितो देवदत्तायाः सा तया तमजूहवत् ॥ ८१ ॥
भिक्षाव्याजात्तयाऽऽहूतस्तत्रापि स मुनिर्ययौ ।
विमर्शमविधायैव सापायनिरपाययोः ॥ ८२ ॥
देवदत्ता ततो द्वारं पिधाय तमनेकधा ।
दिनं कदर्थयामास चुक्षोभ स मुनिर्न तु ॥ ८३ ॥
अथ [1]मुक्तोऽनया सायमुद्यानं गतवानसौ ।
तत्रापि दृष्टोऽभयया व्यन्तरीभूतया तया ॥ ८४ ॥
कदर्थयितुमारेभे प्राक्कर्मस्मरणादसौ ।
ऋणं वैरं च जन्तूनां नश्येज्जन्मान्तरेऽपि न ॥ ८५ ॥
क्लिश्यमानो बहु तया महासत्त्वः सुदर्शनः ।
आरोहत् क्षपकश्रेणिमपूर्वकरणक्रमात् ॥ ८६ ॥
ततः स भगवान् प्राप केवलज्ञानमुज्ज्वलम् ।
तस्य केवलमहिमा मध्यचक्रे सुरासुरैः ॥ ८७ ॥
उद्दिधीर्षुर्भवाज्जन्तून् स चक्रे धर्मदेशनाम् ।
लोकोदयायाभ्युदयस्तादृशानां हि जायते ॥ ८८ ॥
तस्य देशनया तत्राबुद्धान्तान्ये न केवलम् ।
देवदत्ता पण्डिता च व्यन्तरी च व्यबुद्धत ॥ ८९ ॥

स्त्रीसन्निधावपि तदेवमदूषितात्मा
जन्तून् प्रबोध्य शुभदेशनया क्रमेण ।

(१) ख ड मुक्तस्तया साय- । च मुक्तस्तया सोऽथ- ।

स्थानं सुदर्शनमुनिः परमं प्रपेदे
जैनेन्द्रशासनजुषां न हि तद्दुरापम् ॥ १८० ॥

॥ इति सुदर्शनऋषिकथानकम् ॥ १०१ ॥

धर्म्ये कर्मणि न पुरुषा एवाधिक्रियन्ते किन्तु स्त्रीणामप्यधिकारश्चतुर्वर्णे सङ्घे तासामप्यङ्गभूतत्वात् ततः पुरुषस्य परदारप्रतिषेधवत् स्त्रीणां परपुरुषगमनं प्रतिषेधयति —

ऐश्वर्यराजराजोऽपि रूपमीनध्वजोऽपि च ।
सीतया रावण इव त्याज्यो नार्या नरः परः ॥ १०२ ॥

ऐश्वर्येण विभवेन, राजराजो धनदः स इव राजराजः, आस्तामितरः । रूपेण सौन्दर्येण, मीनध्वजोऽपि स्मरोऽपि, आस्तामन्यः । त्याज्यः परिहरणीयः, नार्या स्त्रिया, परः स्वपतेरन्यो, नरः पुरुषः, क इव कया, सीतया रावण इव । सीताचरितमुक्तमेव ॥ १०२ ॥

स्त्रीपुंसयोर्द्वयोरपि परकान्तासक्तत्वस्य फलमाह —

नपुंसकत्वं तिर्यक्त्वं दौर्भाग्यं च भवे भवे ।
भवेन्नराणां स्त्रीणां चान्यकान्तासक्तचेतसाम् ॥ १०३ ॥

नपुंसकत्वं षण्ढत्वं, तिर्यक्त्वं तिर्यग्भावः, दौर्भाग्यमनादेयता, भवे भवे जन्मनि जन्मनि, भवेत् जायेत, नराणां स्त्रीणां च । अन्यकान्तासक्तचेतसामिति । श्लिष्टं द्वयोर्विशेषणम् । यदा

पुरुषाणां तदा अन्यस्य कान्ता भार्या अन्यकान्ता तदासक्तचेतसाम्। यदा तु स्त्रीणां तदा अन्यः पत्युरपरः स चासौ कान्तश्च कामयिता तत्रासक्तचेतसाम् ॥ १०३ ॥

अब्रह्मनिन्दां कृत्वा ब्रह्मचर्यस्यैहिकं गुणमाह—

प्राणभूतं चरित्रस्य परब्रह्मैककारणम्।
समाचरन् ब्रह्मचर्यं पूजितैरपि पूज्यते ॥ १०४ ॥

प्राणभूत जीवितभूतं, चरित्रस्य देशचारित्रस्य सर्वचारित्रस्य च, परब्रह्मणो मोक्षस्य, एकमद्वितीयं, कारणं समाचरन् पालयन्, ब्रह्मचर्यं जितेन्द्रियस्योपस्थनिरोधलक्षणं पूजितैरपि सुरासुरमनुजेन्द्रैः न केवलमन्यैः पूज्यते, मनोवाक्कायोपचारपूजाभिः ॥ १०४ ॥

ब्रह्मचर्यस्य पारलौकिकं गुणमाह -

चिरायुषः सुसंस्थाना दृढसंहनना नराः।
तेजस्विनो महावीर्या भवेयुर्ब्रह्मचर्यतः ॥ १०५ ॥

चिरायुषो दीर्घायुषोऽनुत्तरसुरादिषूत्पादात्, शोभनं संस्थानं समचतुरस्रलक्षणं येषां ते सुसंस्थानाः अनुत्तरसुरादिषूत्पादादेव, दृढं बलवत् संहननमस्थिसञ्चयरूपं वज्रऋषभनाराचाख्यं येषां ते दृढसंहननाः, एतच्च मनुजभवेषूत्पद्यमानानां देवेषु संहननाभावात्, तेजः शरीरकान्तिः प्रभावो वा विद्यते येषां ते तेजस्विनः, महावीर्या बलवत्तमाः तीर्थंकरचक्रवर्त्यादित्वेनोत्पादात्, भवेयुर्जायेरन्, ब्रह्मचर्यता ब्रह्मचर्यानुभावात् ॥

अन्यान्तरश्लोकाः—

पश्यन्ति कृष्णकुटिलां कबरीमिव योषिताम् ।
तदभिव्यक्तजन्मानं न दुष्कर्मपरम्पराम् ॥ १ ॥
सीमन्तिनीनां सीमन्तः पूर्णः सिन्दूररेणुना ।
पन्थाः सीमन्तकाख्यस्य नरकस्येति लक्ष्यताम् ॥ २ ॥
भ्रूवल्लरीं वर्णिनीनां वर्णयन्ति न जानते ।
मोक्षाध्वनि प्रस्थितानां पुरोगामुरगीमिमाम् ॥ ३ ॥
भङ्गुरायतनापाङ्गानङ्गनानां निरीक्षते ।
हतबुद्धिर्न तु निजं भङ्गुरं हन्त जीवितम् ॥ ४ ॥
नासावंशं प्रशंसन्ति स्त्रीणां सरलमुन्नतम् ।
निजवंशं न पश्यन्ति भ्रश्यन्तमनुरागिणः ॥ ५ ॥
स्त्रीणां कपोले संक्रान्तमात्मानं वीक्ष्य हृष्यति ।
संसारसरसीपङ्के मज्जन्तं वेत्ति नो जडः ॥ ६ ॥
पिबन्ति रतिसर्वस्वबुद्ध्या बिम्बाधरं स्त्रियाः ।
न बुध्यन्ते यत्कृतान्तः पिबत्यायुर्दिवानिशम् ॥ ७ ॥
योषितां दशनान् कुन्दसोदरान् बहु मन्यते ।
स्वदन्तभङ्गं नेक्षन्ते तरसा जरसा कृतम् ॥ ८ ॥
स्मरदोलाधिया कर्णपाशान् पश्यति योषिताम् ।
कण्ठोपकण्ठलुठितान् कालपाशांस्तु नात्मनः ॥ ९ ॥
योषितां प्रोषितमतिर्मुखं पश्यत्यनुक्षणम् ।
क्षणोऽपि हन्त नास्त्यस्य कृतान्तमुखवीक्षणे ॥ १० ॥

नरः स्मरपराधीनः स्त्रीकण्ठमवलम्बते ।
नात्मनो वेत्ति सूनत्वं स्त्री वा कण्ठावलम्बिनः ॥ ११ ॥
स्त्रीणां भुजलताबन्धं बन्धुरं बुध्यते कुधीः ।
न कर्मबन्धनैर्बद्धमात्मानमनुशोचति ॥ १२ ॥
धत्ते स्त्रीपाणिभिः स्पृष्टो [1]हृष्टो रोमाञ्चकण्टकान् ।
स्मारयन्ति न किं तेऽस्य कूटशाल्मलिकण्टकान् ॥ १३ ॥
कुचकुम्भौ समालिङ्ग्य स्त्रियाः शेते सुखं जडः ।
विस्मृता नूनमेतस्य कुम्भीपाकोद्भवा व्यथा ॥ १४ ॥
मध्यमध्यास्ते मुग्धा मुग्धास्त्रीणां क्षणे क्षणे ।
एतन्मध्यं भवाम्भोधेरिति नैतं[2] विविच्यते ॥ १५ ॥
धिगङ्गनानां त्रिवलीतरङ्गैः ह्रियते [3]जनः ।
त्रिवलीच्छद्मना ह्येतदनु वैतरणीत्रयम् ॥ १६ ॥
स्मरार्त्तं मज्जति मनः पुंसां स्त्रीनाभिवापिषु ।
प्रमादेनापि किं नेदं साम्याम्भसि मुदास्पदे ॥ १७ ॥
स्मरारोहणनिःश्रेणीं स्त्रीणां रोमलतां विदुः ।
नराः संसारकारायां न पुनर्लोहशृङ्खलाम् ॥ १८ ॥
अचक्षुषा जघनं स्त्रीणां भजन्ति विपुलं मुदा ।
संसारसिन्धोः पुलिनमिति नूनं न जानते ॥ १९ ॥
भजते करभोरूणामूरूनल्पमतिर्नरः ।
अनूरूक्रियमाणं तैः सक्तौ स्वं न बुध्यते ॥ २० ॥

---

(१) ख नरो- । (२) ख मनः ।
(३) ख ग, नैवं ।

क्षीबो पादैर्हन्यमानमात्मानं बहु मन्यते ।
हताशो न तु जानाति सेव्यमाणमधोगती ॥ २१ ॥

दर्शनात् स्पर्शनाच्छ्लेषाद् या हन्ति शमजीवितम् ।
हेयोग्रविषनागीव वनिता सा विवेकिभि: ॥ २२ ॥

चन्द्रलेखेव कुटिला सन्ध्येव क्षणरागिणी ।
निम्नगेव निम्नगतिर्वर्जनीया नितम्बिनी[1] ॥ २३ ॥

न प्रतिष्ठां न सौजन्यं न दानं नच गौरवम् ।
नच स्वान्यहितं [2]वामा: पश्यन्ति मदनान्धला: ॥ २४ ॥

निरङ्कुशा नरे नारी तत्करोत्यसमञ्जसम् ।
यत्क्रुद्धा: सिंहशार्दूलव्याला अपि न कुर्वते ॥ २५ ॥

दूरतस्ता: परित्याज्या: प्रादुर्भावितदुर्मदा: ।
विश्वोपतापकारिण्य: कारिण्य इव योषित: ॥ २६ ॥

स कोऽपि स्मर्यतां मन्त्र: स देव: कोऽप्युपास्यताम् ।
न येन स्त्रीपिशाचीयं ग्रसते शीलजीवितम् ॥ २७ ॥

शास्त्रेषु श्रूयते यच्च यच्च लोकेषु गीयते ।
संवादयन्ति दु:शीलं तत्सर्वं: कामविह्वला: ॥ २८ ॥

संपिष्टोग्रवाह्निदंष्ट्राग्नियमजिह्वाविषाङ्कुरान् ।
अगण्यिवांसुना नार्य: कृता: क्रूरेण वेधसा ॥ २९ ॥

यदि स्थिरा भवेद्विद्युत्तिष्ठन्ति यदि वायव: ।
दैवात्तथापि नारीणां न स्त्रैणं स्थीयते मन: ॥ ३० ॥

---

(१) ख निरन्तरम् ।

(२) क ख रामा: ।

यद्विना मन्त्रतन्त्राद्यैर्वञ्चयन्ते चतुरा अपि ।
इन्द्रजालमिदं हन्त नारीभिः शिक्षितं कुतः ॥ ३१ ॥
अपूर्वा वामनेत्राणां मृषावादेषु वैदुषी ।
प्रत्यक्षाण्यप्यकृत्यानि यदपह्नुवते क्षणात् ॥ ३२ ॥
पीतोन्मत्तो यथा लोष्टं सुवर्णं मन्यते जनः ।
तथा स्त्रीसङ्गजं दुःखं सुखं मोहान्धमानसः ॥ ३३ ॥
जटी मुण्डी शिखी मौनी नग्नो वल्की तपस्व्यथ ।
ब्रह्माऽप्यब्रह्मशीलश्चेत्तदा मह्यं न रोचते ॥ ३४ ॥
कण्डूयन् कच्छुरः कच्छूं यथा दुःखं सुखीयति ।
दुर्वारमन्मथावेशविवशो मैथुनं तथा ॥ ३५ ॥
नार्यो यैरुपमीयन्ते काञ्चनप्रतिमादिभिः ।
आलिङ्ग्यालिङ्ग्य तान्येव किमु कामी न तृप्यति ॥ ३६ ॥
यदेवाङ्गं कुत्सनीयं गोपनीयं च योषिताम् ।
तत्रैव हि जनो रज्येत् केनान्येन विरज्यताम् ॥ ३७ ॥
मोहादहह नारीणामङ्गैर्मांसास्थिनिर्मितैः ।
चन्द्रेन्दीवरकुन्दादि सदृशीकृत्य दूषितम् ॥ ३८ ॥
नारीं नितम्बजघनस्तनभूरिभारा-
मारोपयन्त्युरसि मूढधियो रताय ।
संसारवारिनिधिमध्यनिमज्जनाय
जानन्ति तां नहि शिलां निजकण्ठबद्धाम् ॥ ३९ ॥
भवोदन्वद्वेलां मदनमृगयुव्याधहरिणीं
मदावस्थाशालां विषयमृगतृष्णामरुभुवम् ।

महामोहध्वान्तोच्चयबहुलपक्षान्तरजनीम्

विपत्खानिं नारीं परिहरत हे आत्मसुधियः ! ॥४०॥१०५॥

संप्रति मूर्च्छाफलमुपदर्शयंस्तन्नियन्त्रणारूपं पञ्चममणुव्रतमाह—

असन्तोषमविश्वासमारम्भं दुःखकारणम् ।

मत्वा मूर्च्छाफलं कुर्यात्परिग्रहनियन्त्रणम् ॥ १०६ ॥

दुःखकारणमित्यसन्तोषादिभिस्त्रिभिः प्रत्येकमभिसंबध्यते । असन्तोषादीनि दुःखकारणानि मूर्च्छाया गर्द्धस्य फलत्वेन विज्ञाय मूर्च्छितोः परिग्रहस्य नियन्त्रणं नैयत्यमुपासकः कुर्यादिति योगः । तत्रासन्तोषस्तृप्त्यभावः, स दुःखकारणम् । मूर्च्छावान् हि बहुभिरपि धनैर्न संतुष्यति, उत्तरोत्तराशाकदर्थितो दुःखमेवानुभवति । परसंपदुत्कर्षश्च हीनसंपदमसन्तुष्टं दुःखाकरोति ।

यदाह—

असन्तोषवतां पुंसामपमानः पदे पदे ।

सन्तोषैश्वर्यसुखिनां दूरे दुर्जनभूमयः ॥ १ ॥

अविश्वासः खल्वपि दुःखकारणम्, अविश्वस्तो ह्यशङ्कनीयेभ्योऽपि शङ्कमानः स्वधनस्य रक्षां कुर्वन्न क्वचिद्विश्वसिति ।

यदाह—

[1]उक्खणइ खणइ निहणइ रत्तिं न सुअइ दिआवि अ ससंको ।

लिंपइ ठवेइ सययं लंछियपडिलंछियं कुणइ ॥ १ ॥

---

(१) उत्खनति खनति निहन्ति रात्रिं न स्वपिति दिवाऽपि च सशङ्कः ।
लिम्पति स्थापयति सततं लाञ्छितप्रतिलाञ्छितं करोति ॥ १ ॥

मूर्च्छापरिगतश्चारभ्भं प्राणातिपातादिकं प्रतिपद्यते ।

तथाहि—

तनयः पितरं पिता च तनयं भ्राता च भ्रातरं हिनस्ति, गृहीतलञ्चश्च कूटसाक्षित्वदायी बह्वनृतं भाषते, बलप्रकर्षात्पथिक-जनं मुष्णाति, खनति खात्रं, गृह्णाति विन्दं, धनलोभात् परदारा-नभिगच्छति, तथा सेवाकृषिपाशुपाल्यवाणिज्यादि च करोति । मत्स्यबन्धिनिव नद्यादिषु प्रविश्य काष्ठान्याकर्षति । ननु दुःखकारणं मूर्च्छाफलं ज्ञात्वा परिग्रहनियन्त्रणं कुर्यादिति कीयं वाचो युक्तिः । उक्तमत्र । मूर्च्छाकारणत्वात् परिग्रहोऽपि मूर्च्छैव ; अथवा "मूर्च्छा परिग्रहः" इति सूत्रकारवचनात् मूर्च्छैव परिग्रह इति निश्चयनयमतेनोच्यते, मूर्च्छामन्तरेण धनधान्यादेरपरि-ग्रहत्वात् ।

यदाह—

अपरिग्रह एव भवेद्वस्त्राभरणाद्यलङ्कृतोऽपि पुमान् ।
ममकारविरहितः [१]सति ममकारे [२]सङ्गवानग्नः ॥ १ ॥

तथा—

ग्रामं गेहं च विशन् कर्म च नोकर्म चाददानोऽपि ।
अपरिग्रहोऽममत्वोऽपरिग्रहो नान्यथा क्वचित् ॥ १ ॥

---

(१) च च सन् ।
(२) च सङ्गवान ? च. ।

तथा—

'जं पि वत्थं व पायं वा कंबलं पायपुंछणं ।
तं पि संजमलज्जट्ठा धारंति परिहरंति य ॥ १ ॥
²न सो परिग्गहो वुत्तो नायपुत्तेण ताइणा ।
मुच्छा परिग्गहो वुत्तो इइ वुत्तं महेसिणा ॥ २ ॥

इति सर्वमवदातम् ॥ १०६ ॥

प्रकारान्तरेण परिग्रहनियन्त्रणमाह—

परिग्रहमहत्त्वाद्धि मज्जत्येव भवाम्बुधौ ।
महापोत इव प्राणी त्यजेत्तस्मात् परिग्रहम् ॥१०७॥

परिगृह्यत इति परिग्रहो धनधान्यादिस्तस्य महत्त्वं निरवधित्वं तस्माद्धेतोः मज्जत्येव, अवश्यमेव मज्जति, प्राणी शरीरी, भवे संसारे, क इव क्व, अम्बुधौ समुद्रे महापोत इव महायानपात्रमिव, यथा निरवधिधनधान्यादिभाराक्रान्तः पोतः समुद्रे मज्जति, तथैवापरिमितपरिग्रहः प्राणी नरकादौ निमज्जति ।

यदाहुः—

---

(१) यदपि वस्त्रं वा पात्रं वा कम्बलं वा पादप्रोञ्छनम् ।
तदपि संयमलज्जार्थं धारयन्ति परिभुञ्जते च ॥ १ ॥

(२) न स परिग्रह उक्तः ज्ञातपुत्रेण तायिना ।
मूर्च्छा परिग्रह उक्तः इत्युक्तं महर्षिणा ॥ २ ॥

[1]'महारंभयाए महापरिग्गहयाए कुणिमाहारेणं पंचिंदियवहेणं जीवा नरयाउयं बज्झंति।

तथा बह्वारम्भपरिग्रहत्वं च नारकस्यायुष इति यस्मादेवं तस्मात्त्यजेत्त्रियन्त्रयेत् परिग्रहं धनधान्यादिरूपं मूर्च्छारूपं वा ॥ १०७ ॥

सामान्येन परिग्रहदोषानाह—

त्रसरेणुसमोऽप्यत्र न गुणः कोऽपि विद्यते।
दोषास्तु पर्वतस्थूलाः प्रादुष्षन्ति परिग्रहे ॥१०८॥

त्रसरेणवो गृहजालान्तःप्रविष्टसूर्यकिरणोपलक्ष्याः सूक्ष्मा द्रव्यविशेषास्तत्समोऽपि तत्प्रमाणोऽपि अत्र परिग्रहे न कश्चन गुणोऽस्ति, नहि परिग्रहबलादामुष्मिकः पुरुषार्थः सिद्ध्यति। यस्तु भोगोपभोगादिः स न गुणः प्रत्युत गर्द्धहेतुत्वाद्दोष एव। योऽपि जिनभवनविधानादिलक्षणः परिग्रहस्य गुणः शास्त्रे वर्ण्यते न स गुणः, किं तु परिग्रहस्य सदुपयोगव्यावर्णनं न तु तदर्थमेव परिग्रहधारणं श्रेयः।

यदाहुः—

धर्मार्थं यस्य वित्तेहा तस्यानीहा गरीयसी।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ १ ॥

---

(१) महारम्भतया महापरिग्रहतया कुणिमाहारेण पञ्चेन्द्रियवधेन जीवा नरकायुष्कमर्जन्ति।

तथा—

'कंचणमणिसोवाणं थंभसहस्सोसियं सुवण्णतलं ।

जो कारिज्ज जिणहरं तओवि तवसंजमो ²अहिओ* ॥ १ ॥

व्यतिरेकमाह—

दोषास्तु, दोषाः पुनः पर्वतस्थूला अतिमहान्तो वक्ष्यमाणाः परिग्रहे सति प्रादुष्षन्ति प्रादुर्भवन्ति ॥ १०८ ॥

दोषास्तु पर्वतस्थूला इति यदुक्तं तत् प्रपञ्चयति—

सङ्गाद्भवन्त्यसन्तोऽपि रागद्वेषादयो द्विषः ।
मुनेरपि चलेच्चेतो यत्तेनान्दोलितात्मनः ॥१०९॥

सङ्गात्परिग्रहाद्धेतोर्भवन्ति प्रादुर्भवन्ति असन्तोऽपि उदयावस्थामप्राप्ता अपि रागद्वेषप्रभृतयः शत्रवः । सङ्गवतो हि तन्निबन्धनो रागः प्रादुर्भवति । सङ्गप्रतिपन्थिषु च द्वेषः, एवं मोहभयादयो वधबन्धादयो नरकपातादयश्च द्रष्टव्याः । तदिदं पर्वतस्थूलत्वं दोषाणाम् । कथमसन्तोऽपि रागादयो भवन्तीति, उच्यते,

---

(१) काञ्चनमणिसोपानं स्तम्भसहस्रोच्छ्रितं सुवर्णतलम् ।
यः कारयेज्जिनगृहं ततोऽपि तपःसंयमोऽधिकः ॥ १ ॥

(२) क ख ग ढ अणंतगुणो ।

* संबोधसत्तरिग्रन्थे तु—
कंचणमणिसोवाणे थंभसहस्सूसिए सुवण्णतले ।
जो कारवेज्ज जिणहरे तओवि तवसंजमो अणंतगुणो त्ति ॥
एवं पाठो दृश्यते ।

यत् यस्मान्मुनेरपि आस्तामन्यस्य चलेत् प्रशमादवस्थायाश्च्यवेत् चेतो मनः तेन सङ्गेन आन्दोलितात्मन अस्थिरीकृतात्मनः। मुनिरपि हि सङ्गानङ्गीकुर्वन्मुनित्वाद् भ्रश्यत्येव।

यदाह—

'छेओ भेओ वसणं आयासकिलेसभयविवागो अ।
मरणं धम्मब्भंसो अरई अत्थाओ सव्वाइं॥ १॥
'दोससयमूलजालं पुव्वरिसिविवज्जियं जई वंतं।
अत्थं वहसि अणत्थं कीस निरत्थं तवं चरसि॥ २॥
'वहबंधणमारणसेहणाओ काओ परिग्गहे णत्थि।
तं जइ परिग्गहो च्चिय जइधम्मो तो णणु पवंचो॥३॥ १०९॥

सामान्येन परिग्रहस्य दोषानभिधाय प्रकृतेन श्रावकधर्मेणाभिसंबध्नाति—

संसारमूलमारम्भास्तेषां हेतुः परिग्रहः।
तस्मादुपासकः कुर्यादल्पमल्पं परिग्रहम्॥११०॥

आरम्भाः प्राण्युपमर्दादयस्ते संसारस्य मूलम्; एतदविवाद-

---

(१) छेदो भेदो व्यसनं आयासक्लेशभयविपाकाश्च।
मरणं धर्मभ्रंशः अरतिरर्थात् सर्वाणि॥ १॥
(२) दोषशतमूलजालं पूर्वर्षिविवर्जितं यदि वान्तम्।
अर्थं वहसि अनर्थं कस्मान्निरर्थं तपश्चरसि॥ २॥
(३) वधबन्धनमारणसेधनाः काः परिग्रहे न सन्ति।
तद् यदि परिग्रह एव यतिधर्मस्ततो ननु प्रपञ्चः॥ ३॥

सिद्धं, ततः किं तेषामारम्भाणां हेतुः कारणं, परिग्रहः, यत एवं तस्मादुपासकः साधूपासकः परिग्रहं धनधान्यादिकमल्पमल्पं नियतपरिमाणं कुर्यात् ॥ ११० ॥

पुनरपि सिंहावलोकितेन परिग्रहदोषानाह—

मुष्णन्ति विषयास्तेना दहति स्मरपावकः।
रुन्धन्ति वनिताव्याधाः सङ्गैरङ्गीकृतं नरम्॥१११॥

सङ्गैर्धनधान्यहिरण्यादिपरिग्रहैरङ्गीकृतं वशीकृतं यथा बहुपरिग्रहं कान्तारगतं पुरुषं चौरा मुष्णन्ति तथा संसारकान्तारगतं विषयाः शब्दादयः संयमसर्वस्वापहारेण मुष्णन्ति निर्धनीकुर्वन्ति। यथा वा बहुपरिग्रहं नंष्टुमशक्नुवन्तं दीप्तो दवाग्निर्दहति तथा संसारकान्तारगतं मन्मथाग्निश्चिन्तादिना दशप्रकारेण विकारेण दहत्युपतापयति। यथा वा बहुपरिग्रहं कान्तारगतं व्याधा लुब्धका धनशरीरलोभेन रुन्धन्ति पलायितुमपि न ददति, तथा भवकान्तारगतं वनिताः कामिन्यो धनार्थिन्यः शरीरभोगार्थिन्यश्च स्वातन्त्र्यवृत्तिनिषेधेन रुन्धन्ति। अपि च। बहुनापि परिग्रहेण काङ्क्षावतां न तृप्तिः सम्भवति अपि त्वसन्तोष एव वर्द्धते।

यदाह—

'सुवण्णरुप्पस्स य पव्वया भवे
सिआ हु केलाससमा असङ्खया।

---

(१) सुवर्णरूप्यस्य च पर्वता भवेयुः खलु कैलाससमा असङ्ख्यकाः।

[1]नरस्स लुद्धस्स न तेहिं किंचि
इच्छा हु आगाससमा अणंतिआ ॥ १ ॥
[2]पुढवी साली जवा चेव
हिरणं पसुभिस्सह ।
पडिपुण्णं नालमेगस्स
इइ विज्जा तवं चरे ॥ २ ॥

कवयोऽप्याहुः—

तृष्णा खनिरगाधेयं दुष्पूरा केन पूर्यते ।
या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते ॥ १ ॥

तथा—

[3]तण्हा अखंडिअ च्चिय विहवे अच्चुअए वि लहिऊण ।
सेलंपि समारुहिऊण किं व गयणस्स आरूढं ॥ १ ॥ १११ ॥

एतदेवाह—

तृप्तो न पुत्रैः सगरः, कुचिकर्णो न गोधनैः ।
न धान्यैस्तिलकश्रेष्ठी, न नन्दः कनकोत्करैः ॥११२॥

सगरो द्वितीयश्चक्रवर्त्ती, न षष्टिसहस्रसंख्यैः पुत्रैः सन्तुष्टस्तृप्तोऽभवत् । कुचिकर्णो नाम कश्चित् स बहुभिरपि गोधनैर्न तृप्तः ।

---

(१) नरस्य लुब्धस्य न तै किञ्चित् इच्छा खलु आकाशसमा अनन्तिका ॥१॥
(२) पृथ्वी शालयो यवा एव हिरण्यं पशुभिः सह ।
प्रतिपूर्णं नालमेकस्य इति विदित्वा तपश्चरेत् ॥ २ ॥
(३) तृष्णा अखण्डिता एव विभवान् अत्युन्नतान् अपि लब्ध्वा ।
शैलमपि समारुह्य किंवा गगनस्य आरूढम् ॥ १ ॥

तिलको नाम श्रेष्ठी न धान्यैस्तृप्तः। न वा नन्दनृपतिः कनकराशिभिस्तृप्तः। ततोऽसन्तोषहेतुरेव परिग्रहः।

सम्प्रदायगम्याश्च सगरादयः।

स चायम्—

आसीत्पुर्यामयोध्यायां जितशत्रुर्महीपतिः।
युवराजः सुमित्रोऽभूदुभाववनिमावतुः॥ १॥
जितशत्रोरभूत्सुनुरजितस्वामितीर्थकृत्।
सगरश्चक्रवर्त्ती च सुमित्रस्य महाभुजः॥ २॥
जितशत्रुसुमित्रौ च व्रतं जगृहतुस्ततः।
राजाऽभूदजितस्वामी सगरो युवराट् पुनः॥ ३॥
प्रवव्राजाजितस्वामी गते काले कियत्यपि।
राजाऽभूत्सगरश्चक्रवर्त्ती ऋषभसूनुवत्॥ ४॥
अथ षष्टिसहस्राणि जज्ञिरे तस्य सूनवः।
खेदच्छिदः संश्रितानां शाखा इव महातरोः॥ ५॥
ज्येष्ठो जह्नुः कुमारोऽभूत्तेषां सगरजन्मनाम्।
तेनैकदा तोषितोऽदाद्देवतेव पिता वरम्॥ ६॥
त्वत्प्रसादेन दण्डादिरत्नैः सह सबान्धवः।
महीं विचरितुं वाञ्छामीति जह्नुरयाचत॥ ७॥
तद्दत्त्वा सगरेणापि विसृष्टः प्राचलत्ततः।
जह्नुर्धृतसहस्रांशुः सहस्रैश्छत्रमण्डलैः॥ ८॥
स्फारया महत्या भक्त्या चार्हच्चैत्यानि पदे पदे।
सोऽर्चयन् विचरन्नुर्वीं ययावष्टापदं क्रमात्॥ ९॥

तमष्टयोजनोच्छ्रायं चतुर्योजनविस्तृतम् ।
पारीहस्तसहस्रोदर्यैर्जह्नुर्मितपरिच्छदः ॥ १० ॥
तत्रैकयोजनायाममर्द्धयोजनविस्तृतम् ।
त्रिगव्यूत्युन्नतं चैत्यं चतुर्द्वारं विवेश सः ॥ ११ ॥
बिम्बानि स्वस्वसंस्थानमानवर्णानि तत्र सः ।
अर्हतामृषभादीनां यथावत्पर्यपूजयत् ॥ १२ ॥
ववन्दे भरतभ्रातृश्रमस्तूपांश्च पावनान् ।
किञ्चिद्विचिन्त्य श्रद्धालुरश्चैरेवमुवाच च ॥ १३ ॥
अष्टापदसमं स्थानं मन्ये क्वापि न विद्यते ।
कारयामो वयं यत्र चैत्यमेतदिवापरम् ॥ १४ ॥
मुक्तोऽपि भरतं भुङ्क्ते भरतश्चक्रवर्त्यहो ।
शैले भरतमारेऽस्मिंश्चैत्यव्याजादवस्थितः ॥ १५ ॥
एतदेव कृतं चैत्यमस्माभिश्चेद्विधीयते ।
भविष्यत्पार्थिवैरस्य लुप्यमानस्य रक्षणम् ॥ १६ ॥
ततः सुरसहस्राधिष्ठितमादाय पाणिना ।
स दण्डं भ्रामयामास परितोऽष्टापदाचलम् ॥ १७ ॥
शैले योजनसहस्रं दीर्णां कुम्भाण्डवम्भसो ।
भ्राम्यता तेन भिन्नानि नागानां भुवनानि च ॥ १८ ॥
तैर्भीतैः शरणं भेजे स्वस्वामी ज्वलनप्रभः ।
स ज्ञात्वाऽवधिनोपेत्य जह्नुमित्यब्रवीत् क्रुधा ॥ १९ ॥
अनन्तजन्तुनिर्घातकारणं किमकारणम् ।
भवद्भिर्विदधे मत्तैर्दारुणं भूमिदारणम् ॥ २० ॥

अजितस्वामिभ्रातृव्यैः पुत्रैः सगरचक्रिणः ।
किमेतत्क्रियते पापमरे रे ! कुलपांसनाः ! ॥ २१ ॥
अष्टापदे मयाऽत्येत्य चैत्यं त्रातुमदः कृतम् ।
युष्मद्भवनभङ्गोऽभूद्यदज्ञानात्स सह्यताम् ॥ २२ ॥
अज्ञानकृतमागोऽदः सोढं तं मा कृथाः पुनः ।
इत्युदीर्य निजं धाम जगाम ज्वलनप्रभः ॥ २३ ॥
साग्रजोऽचिन्तयज्जह्नुः कर्तव्यं परिखा परम् ।
परिपूरिष्यते पांशुपूरैः कालेन गच्छता ॥ २४ ॥
ततः स कृष्ट्वा दण्डेन गङ्गां तत्राक्षिपद्द्रुतम् ।
उपद्रुतानि तत्तोयैः पुनर्वेश्मानि भोगिनाम् ॥ २५ ॥
क्रुद्धोऽथैत्य समं नागकुमारैर्ज्वलनप्रभः ।
तान् दृष्ट्वा भस्मसाच्चक्रे दवानल इव द्रुमान् ॥ २६ ॥
धिग्धिग्नः स्वामिनः भ्रष्टाः क्लीबानामिव पश्यताम् ।
क्रियेत्ययोध्यासविधे तस्थुरागत्य सैनिकाः ॥ २७ ॥
स्वं मुखं दर्शयिष्यामो वक्ष्यामोऽदः कथं प्रभोः ।
इति मन्त्रयतां तेषां कोऽप्येत्येत्यवदद् द्विजः ॥ २८ ॥
कथयिष्याम्यदो राज्ञो न च शोको भविष्यति ।
उत्तरिष्यत्यवश्यं वो मा भूत व्याकुला ननु ॥ २९ ॥
इत्युक्त्वा मृतकं कञ्चिदादायानाथमभ्यगात् ।
राजद्वारे मृतापत्य इव स व्यलपत्ततः ॥ ३० ॥
राज्ञाऽपृच्छि ततोऽवादीदयमेकः सुतो मम ।
दष्टः सर्पेण निश्चेष्टस्तद्देवो जीवयत्वमुम् ॥ ३१ ॥

अथादिष्टैर्नरेन्द्रेण नरेन्द्रैर्मन्त्रकौशलम् ।
निजं प्रयुक्तं तत्राभूत्तद्भस्मनिहुतोपमम् ॥ ३२ ॥
मृतो जीवयितुं शक्यो नायं तावद्द्विजोऽप्ययम् ।
कथं तु च्छान्दसो बोध्य इत्यालोच्योचिरेऽथ ते ॥ ३३ ॥
यस्मिन् वेश्मनि नो कोऽपि मृतः पूर्वं ततोऽधुना ।
भूतिमानीयतां रक्षा जीवयामस्तया त्वमुम् ॥ ३४ ॥
ततो द्वास्थैर्नृपादेशात्पुर्यां ग्रामेषु चेक्षितम् ।
गृहं न दृष्टं तत्किञ्चिन्मृतो यत्र न कश्चन ॥ ३५ ॥
राजाऽप्यूचे मदीयेऽपि कुले कुलकरा मृताः ।
भगवानृषभस्वामी भरतश्चक्रवर्त्यपि ॥ ३६ ॥
राजा बाहुबलिः सूर्ययशाः सोमयशा अपि ।
अन्येऽप्यनेकशः केऽपि शिवं केऽपि दिवं ययुः ॥ ३७ ॥
जितशत्रुः शिवं प्राप सुमित्रस्त्रिदिवं ततः ।
सर्वसाधारणं मृत्युं स्वसूनोः सहसे न किम् ॥ ३८ ॥
विप्रोऽप्यूचे सत्यमेतत्तथाऽप्येको हि मे सुतः ।
रक्षणीयस्त्वया दीनानाथत्राणं सतां व्रतम् ॥ ३९ ॥
अथोचे चक्रवर्त्येवं हंहो ब्राह्मण ! मा शुचः ।
शरणं मरणार्त्तौ हि भववैराग्यभावना ॥ ४० ॥
व्याजहार द्विजोऽप्येवं यद्येवं साधु बुद्ध्यसे ।
महीश ! मा शुचः षष्टिसहस्रसुतमृत्युना ॥ ४१ ॥
ततः स यावद्भूपो हा किमेतदित्यचिन्तयत् ।
तावत्संकेतिताः सैन्याः सर्वमाख्यन्नुपेत्य ते ॥ ४२ ॥

उदन्तेन ततस्तेन दारुणेनाथ मूर्च्छितः ।
पपात भूपतिर्भूमौ पर्वतः पविनेव सः ॥ ४३ ॥
लब्धसंज्ञस्ततो राजा रुदित्वा जनवल्लणम् ।
भेजे संसारवैराग्यं चिन्तयामास चेत्यसौ ॥ ४४ ॥
अन्वयं मण्डयिष्यन्ति प्रीणयिष्यन्ति मां सुताः ।
इत्याशा धिग्ममासारं संसारं जानतोऽप्यभूत् ॥ ४५ ॥
द्विनैस्त्रिचतुरैः पञ्चषैर्वाऽन्यैर्वा भवेत्कथम् ।
पुत्रैस्तृप्तिरियन्मात्रैरपि यन्मे बभूव न ॥ ४६ ॥
तृप्तिं कथममी कुर्युस्तावन्तोऽपि ममात्मजाः ।
ईदृग्गतिमकाण्डेऽयुरतृप्ताः प्राणितस्य ते ॥ ४७ ॥

इत्थं विचिन्त्याथ सुतैरतृप्तिकः
स तत्क्षये जह्नुसुतं भगीरथम् ।
राज्ये निवेश्याजितनाथसन्निधौ
प्रव्रज्य वव्राज तदक्षयं पदम् ॥ ४८ ॥

॥ इति सगरचक्रिकथानकम् ॥

ग्रामः सुघोषो नामाऽभून्मध्ये मगधनीवृतः ।
कुचिकर्णाभिधानश्च ग्रामणीस्तत्र विश्रुतः ॥ १ ॥
गवां शतसहस्राणि तस्य संजज्ञिरे क्रमात् ।
बिन्दुना बिन्दुना कस्त भ्रियते हि सरोवरम् ॥ २ ॥
गोपालानां पालनाय सोऽर्पयामास गास्ततः ।
भव्या मम न ते भव्या इत्ययुध्यन्त ते बहिः ॥ ३ ॥

कुचिकर्णो विभज्यैता आर्पयत् कस्यचित् सिताः ।
कृष्णाः कस्यापि कस्यापि रक्ताः पीताश्च कस्यचित् ॥ ४ ॥
पृथक् पृथगरण्येषु गोकुलानि न्यवेशयत् ।
भुञ्जानो दधिपयसी सोऽवसत्तेषु च क्रमात् ॥ ५ ॥
अन्वहं वर्द्धयामास गोष्ठे गोष्ठे स गोधनम् ।
भक्षणो दधिपयसोः सुराया इव दुर्मदः ॥ ६ ॥
तस्याभवदथाजीर्णमध ऊर्द्ध्वं सरद्रसम् ।
प्रदीपनात्तःपतितस्येव दाहो महानभूत् ॥ ७ ॥

हा धेनवो हा नवतर्णकाश्च
हा शाक्वरा वः क्व कदा च लप्स्ये ।
स गोधनैरेवमलग्न एव
मृत्वाऽथ तिर्यग्गतिमाससाद ॥ ८ ॥

॥ इति कुचिकर्णकथानकम् ॥

श्रेष्ठ्यासीत्तिलको नाम पुरेऽचलपुरे पुरा ।
असौ पुरेषु ग्रामेषु चाकरोद्धान्यसंग्रहम् ॥ १ ॥
माषमुद्गतिलव्रीहिगोधूमचणकादिकम् ।
ददौ सार्द्धिकया धान्यं काले मार्द्धं च सोऽग्रहीत् ॥ २ ॥
धान्यैर्धान्यं धनैर्धान्यं धान्यं जीवधनैरपि ।
उपायैश्चाग्रहीद्धान्यं ध्यायन् धान्यं स तत्त्ववत् ॥ ३ ॥
दुर्भिक्षकाले धान्येभ्यः प्रत्युपात्तैर्महाधनैः ।
बभार परितो धान्यैरिवासौ धान्यकोष्ठकान् ॥ ४ ॥

पुनः सुभिक्षे धान्यं स क्रीत्वा क्रीत्वा समग्रहीत्।
लब्धास्वादः पुमान् यत्र तत्रासक्तिं न मुञ्चति ॥ ५ ॥
कीटकोटिवधं नैषोऽजीगणत् कणसंग्रहे।
पीडां पञ्चेन्द्रियाणामप्यतिभाराधिरोपणात् ॥ ६ ॥
नैमित्तः कोऽपि तस्याख्यद्भाविदुर्भिक्षमेषमः।
सर्वस्वेनाथ सोऽक्रीणात्कणान् पुनरहस्तिकः ॥ ७ ॥
ऋद्धाऽपि द्रव्यमाकृष्याग्रहीद्धान्यमनेकधा।
स्थानाभावे गृहंऽक्षैप्सीत् किं न कुर्वीत लोभवान् ॥ ८ ॥
असौ जगदमित्रस्य मित्रस्येवोन्मनास्ततः।
दुर्भिक्षस्येष्यतो मार्गमीक्षाञ्चक्रे दिने दिने ॥ ९ ॥
अथ वर्षाप्रवेशेऽपि ववर्षोपेत्य सर्वतः।
धारासारैर्घनस्तस्य हृदयं दारयन्निव ॥ १० ॥

गोधूममुद्गकलमाखणकामकुष्टा
माषास्तिलास्तदपरेऽपि कणा विनश्य।
यास्यन्ति संप्रति हहेति स तैरलमो
हृत्स्फोटजातमरणो[1] नरकं प्रपेदे ॥ ११ ॥

॥ इति तिलकश्रेष्ठिकथानकम् ॥

प्राच्यां महेन्द्रनगरीप्रतिबिम्बमिवोच्चकैः।
आख्यया पाटलीपुत्रमित्यस्ति प्रवरं पुरम् ॥ १ ॥
आसीत्तत्रातिसुत्रामा शत्रुवर्गविसूत्रणे।
त्रिखण्डवसुधाधीशो नन्दो नाम नरेश्वरः ॥ २ ॥

---

(१) क ग ङ -मरणो।

सोऽकराणां करं चक्रे सकराणां महाकरम् ।
महाकराणामपि च किञ्चिच्चक्रे करान्तरम् ॥ ३ ॥
यं कञ्चिद्दोषमुत्पाद्य धनिभ्यो धनमग्रहीत् ।
छलं वहति भूपानां छलं नीति नयं वदन् ॥ ४ ॥
सर्वोपायैर्धनं लोकान्निष्कृपः स उपाददे ।
अपामब्धिर्नृपोऽर्थानां पात्रं मान्य इति ब्रुवन् ॥ ५ ॥
तथाऽर्थं सोऽग्रहील्लोकाल्लोकोऽभून्निर्धनो यथा ।
भूमावूर्णायुचीर्णायां न खलु प्राप्यते तृणम् ॥ ६ ॥
हिरण्यनाणकाऽऽख्याऽपि तेन लोकेषु नाश्रिता ।
प्रवृत्तो व्यवहारोऽपि चर्मणो नाणकैस्तदा ॥ ७ ॥
पाखण्डिनोऽपि वेश्या अप्यसावर्थमदण्डयत् ।
हुताशनः सर्वभक्षी नहि किञ्चिद्विमुञ्चति ॥ ८ ॥
श्रीवीरमोक्षादेकोनविंशत्यब्दशतेषु यः ।
साग्रेषु भावी किं सोऽयं कल्कीति जनवागभूत् ॥ ९ ॥
आक्रोशान् पश्यतोऽप्यस्य भूमिभाजनभोजनः ।
जनो ददौ गतभयो, भयं भवति भाजने ॥ १० ॥
स स्वर्णैः पर्वतांश्चक्रे पूरयामास चावटान् ।
भाण्डागाराणि चापूरि पूर्णकामस्तु नाभवत् ॥ ११ ॥
आकर्ण्य तत्तथाऽयोध्यानाथेनाथ हितैषिणा ।
तं प्रबोधयितुं वाग्मी दूतः प्रेषित आगमत् ॥ १२ ॥
सर्वतोऽप्याहृतश्रीकं निःश्रीकं तं तथापि हि ।
दूतो भूपमथापश्यन्नत्वा चोपाविशत्पुरः ॥ १३ ॥

सोऽनुशास्तो नृपेणोचे श्रुत्वा मत्स्वामिवाचिकम् ।
कोपितव्यं न देवेन न हिताशाटुभाषिणः ॥ १४ ॥
भवर्णवादो देवस्य यः परम्परया श्रुतः ।
स प्रत्यक्षीकृतो ह्यद्य न निर्मूला जनश्रुतिः ॥ १५ ॥
अन्यायतोऽर्थलेशोऽपि राज्ञः सर्वयशश्छिदे ।
अप्येकं तुम्बिकाबीजं गुडभारान् विनाशयेत् ॥ १६ ॥
आत्मभूताः प्रजा राज्ञो राजा न च्छेत्तुमर्हति ।
क्रव्यादा अपि न क्रव्यं निजमश्नन्ति जातुचित् ॥ १७ ॥
प्रजाः पुष्णाण पुष्णन्ति पोषिता एव ता नृपम् ।
वशाऽपि न ह्यनड्वाही दत्ते दुग्धमपोषिता ॥ १८ ॥
सर्वदोषप्रसूर्लोभो लोभः सर्वगुणापहः ।
लोभस्त्यज्यतामेतत्त्वद्धितो वक्ति मत्प्रभुः ॥ १९ ॥
नन्दोऽपि तद्गिरा दावदग्धभूरिव वारिणा ।
अत्युष्णबाष्पमसुचद् दग्धुकाम इवाशु तम् ॥ २० ॥
राजदौवारिको जातु न वध्य इति नन्दराट् ।
उत्थाय गर्भवेश्मान्तः सशिरोऽर्त्तिरिवाविशत् ॥ २१ ॥
नासौ सदुपदेशानां जवासक इवाम्भसाम् ।
योग्य इत्यामृशन् दूतोऽप्यगात् स्वस्वामिनोऽन्तिकम् ॥२२॥
नन्दोऽप्यन्यायपापोत्थैर्वेदनादानदारुणैः ।
रोगैरिहापि संप्राप्तः परमाधार्मिकैरिव ॥ २३ ॥
वेदनाभिर्दारुणाभिः पीड्यमानो यथा यथा ।
नन्दश्चक्रन्द, लोकोऽभूज्जातानन्दस्तथा तथा ॥ २४ ॥

पच्यमानो भृज्यमानो दह्यमान इव व्यथाम् ।
अवाप नन्दः, स्तोकं हि सर्वं तादृक्षपाप्मनः ॥ २५ ॥
ये भूतले विनिहिता गिरिवच्च कूटी-
भूताश्च येऽद्य मम काञ्चनराशयस्ते ।
कस्य स्युरित्यभिदृढव्यथविह्वल एव
मृत्वा निरन्तभवदुःखमवाप नन्दः ॥ २६ ॥

॥ इति नन्दकथानकम् ॥ ११२ ॥

अपि च योगिनामपि परिग्रहमुपदधतां लाभमिच्छतां
मूलक्षतिरायातेत्याह -

तपःश्रुतपरीवारां शमसाम्राज्यसंपदम् ।
परिग्रहग्रहग्रस्तास्त्यजेयुर्योगिनोऽपि हि ॥ ११३ ॥

योगो रत्नत्रयप्राप्तिस्तद्वन्तो योगिनस्तेऽपि, आसतां पृथग्जनाः ; परिग्रह एव ग्रहस्तद्ग्रस्ताः पिशाचकिन इव शमसाम्राज्यसंपदं स्वाधीनामपि त्यजेयुः, शमस्य विहष्णतायाः, साम्राज्यं परमैश्वर्यं, तद्रूपा सम्पत् ताम् । साम्राज्यं च नैकाकिनो भवतीत्याह— तपःश्रुतपरीवारां तपश्चारित्रं, श्रुतं सम्यग्ज्ञानं, ते एव परीवारः परिच्छदो यस्यास्तां तथाविधाम् । शमसाम्राज्यसंपदं स्वाधीनां परित्यज्य सुखार्थिनः परिग्रहलवलुब्धा मूलमुच्छेद्य लाभमिच्छन्ती-त्यर्थः ॥ ११३ ॥

इदानीमसन्तोषफलोपदर्शनपूर्वकं सन्तोषफलमाह—

असन्तोषवतः सौख्यं न शक्रस्य न चक्रिणः ।
जन्तोः सन्तोषभाजो यदभयस्येव जायते ॥ ११४ ॥

सन्तोषरहितस्य तत्फलभूतं सौख्यं न शक्रस्य देवराजस्य, नापि चक्रिणो मनुजराजस्य; यत्सौख्यं सन्तोषवतो जन्मिनो जायते । कस्येवेत्याह—अभयस्य अभयकुमारस्य श्रेणिकराजपुत्रस्य । स हि पित्रोपनीतमपि राज्यं परिहृत्य शमसाम्राज्यसम्पदं परिगृहीतवानिति ।

कथानकं च सम्प्रदायगम्यम् । स चायम्—

अस्तीह भरतक्षेत्रे केदारमिव सुन्दरम् ।
विशालशालिकमलं नाम्ना राजगृहं पुरम् ॥ १ ॥
तत्र प्रसेनजिन्नाम [1]नमिताशेषभूपतिः ।
पतिर्वारामिवालब्धमध्योऽभूत्पृथिवीपतिः ॥ २ ॥
श्रीमत्पार्श्वजिनाधीशशासनाम्भोजषट्पदः ।
सम्यग्दर्शनपुण्यात्मा सोऽणुव्रतधरोऽभवत् ॥ ३ ॥
ओजसा तेजसा कान्त्या जितामरकुमारकाः ।
कुमारास्तस्य बहवो बभूवुः श्रेणिकादयः ॥ ४ ॥
को राज्ययोग्य इत्येषां परीक्षार्थं महीपतिः ।
एकत्र पायसस्थालान्यशनायैकदाऽऽर्पयत् ॥ ५ ॥

---

(१) ख च नामिता- ।

ततो भोक्तुं प्रवृत्तानां कुमाराणाममोचयत् ।
व्याघ्रानिव व्यात्तवक्त्रान् सारमेयान् स सारथीः ॥ ६ ॥
कुमारा द्रुतमुत्तस्थुरापतत्सु ततः श्वसु ।
एकस्तु श्रेणिकस्तस्थौ धियां धाम तथैव हि ॥ ७ ॥
सोऽन्यस्थालात्पायसाग्रं स्तोकं स्तोकं शुनां ददौ ।
यावल्लिलिहिरे श्वानस्तावच्च बुभुजे स्वयम् ॥ ८ ॥
येन केनाप्युपायेन निषेधिष्यत्यरीनयम् ।
भोक्ष्यते च स्वयं पृथ्वीं राजा तेनेति रञ्जितः ॥ ९ ॥
राजा पुनः परीक्षार्थं सुतानामन्यदा ददौ ।
मोदकानां करण्डांश्च पयस्कुम्भांश्च मुद्रितान् ॥ १० ॥
इमां मुद्रामभञ्जन्तो भुञ्जीध्वं मोदकानमून् ।
पयः पिबत मा कर्तु छिद्रमित्यादिशन्नृपः ॥ ११ ॥
विना श्रेणिकमेतेषां कोऽपि नाभुङ्क्त नापिबत् ।
बुद्धिसाध्येषु कार्येषु कुर्युरूर्जस्विनोऽपि किम् ? ॥ १२ ॥
चलयित्वा चलयित्वा श्रेणिकोऽथ करण्डकम् ।
बुभुजे मोदकक्षोदं शलाकाविवरच्युतम् ॥ १३ ॥
रौप्यशुक्त्या घटस्याधो गलद्वारिबिन्दुपूर्णया ।
स पयोऽपि पपौ किं हि दुःसाधं सुधियां धियः ॥ १४ ॥
तन्निरीक्ष्य नृपतिः प्रीतो जातेऽन्येद्युः प्रदीपने ।
यो यद्गृह्णाति मद्वेश्मतस्तस्येत्यादिशत्सुतान् ॥ १५ ॥
सर्वे गृहीत्वा रत्नानि कुमारा निर्ययुस्ततः ।
आदाय भम्भां त्वरितः श्रेणिकस्तु विनिर्ययौ ॥ १६ ॥

किमेतदुत्कृष्टमित्युक्तो नृपेण श्रेणिकोऽवदत् ।
जयस्य चिह्नं भम्भेयं प्रथमं पृथिवीभुजाम् ॥ १७ ॥
अस्याः शब्देन भूपानां दिग्यात्रामङ्गलं भवेत् ।
रक्षणीया क्षमापालैः स्वामिंस्तदियमात्मवत् ॥ १८ ॥
ततः परीक्षानिर्वाहप्रज्ञातबुद्धिर्महीपतिः ।
तस्य प्रीतो ददौ भम्भासार इत्यपराभिधाम् ॥ १९ ॥
राज्यार्हमानिनो मैनं राज्यार्हं सूनवोऽपरे ।
ज्ञासिषुरित्यवाज्ञासीच्छ्रेणिकं पृथिवीपतिः ॥ २० ॥
पृथक् पृथक् कुमाराणां ददौ देशान्नरेश्वरः ।
न किञ्चिच्छ्रेणिकस्यास्तु राज्यमस्यायतावितिः ॥ २१ ॥
ततोऽभिमानी स्वपुरात्कलभः काननादिव ।
निःसृत्य श्रेणिकोऽगच्छत्तूर्णं वेणातटं पुरम् ॥ २२ ॥
तत्र च प्रविशन् भद्राभिधस्य श्रेष्ठिनोऽथ सः ।
कर्म लाभोदयं मूर्त्तमिवोपाविशदापणे ॥ २३ ॥
तदा च नगरे तस्मिन् विपुलः कश्चिदुत्सवः ।
मव्यदिव्यदुकूलाङ्गरागपौराऽऽकुलोऽभवत् ॥ २४ ॥
प्रभूतक्रायकैरासीत् स श्रेष्ठी व्याकुलस्तदा ।
कुमारोऽप्यार्पयद्दृष्ट्वाऽस्मै पुटाऽपुटिकादिकम् ॥ २५ ॥
द्रव्यं कुमारमाहात्म्याच्छ्रेष्ठी भूयिष्ठमार्जयत् ।
पुण्यपुंसां विदेशेऽपि सहचर्य्यो ननु श्रियः ॥ २६ ॥
अद्यावितथपुण्यस्य कस्यातिथिरसीत्यथ ।
श्रेणिकः श्रेष्ठिना पृष्टो भवतामित्यभाषत ॥ २७ ॥

नन्दायोग्यो वरो दृष्टः स्वप्नेऽद्य निशि यो मया ।
असौ साक्षात् स एवेति श्रेष्ठी चेतस्यचिन्तयत् ॥ २८ ॥
सोऽभाषिष्ट च धन्योऽस्मि यद्भवस्यतिथिर्मम ।
अभावलसमध्येन ननु गङ्गा समागता ॥ २९ ।
मंहृत्याट्टं ततः श्रेष्ठी तं नीत्वा निजवेश्मनि ।
स्नपयित्वा परिधाप्य सगौरवमभोजयत् ॥ ३० ॥
एवं च तिष्ठंस्तद्गेहे श्रेणिकः श्रेष्ठिनाऽन्यदा ।
कन्यां परिणयेमां मे नन्दां नाम्नेत्ययाच्यत ॥ ३१ ॥
ममाज्ञातकुलस्यापि कथं दत्से सुतामिति ।
श्रेणिकेनोक्त ऊचे स ज्ञातं तव गुणैः कुलम् ॥ ३२ ॥
ततस्तस्योपरोधेनोदधेरिव सुतां हरिः ।
श्रेणिकः पर्यणैषीत्तां भवद्धवलमङ्गलम् ॥ ३३ ॥
भुञ्जानो विविधान् भोगान् सह वल्लभया तया ।
अतिष्ठच्छ्रेणिकस्तत्र निकुञ्ज इव कुञ्जरः ॥ ३४ ॥
श्रेणिकस्य स्वरूपं तद्विवेदाशु प्रसेनजित् ।
सहस्राक्षा हि राजानो भवन्ति चरलोचनैः ॥ ३५ ॥
उग्रं प्रसेनजिद्रोगं प्रापाथान्तं विदन्निजम् ।
सुतं श्रेणिकमानेतुं शीघ्रानादिशदौष्ट्रिकान् ॥ ३६ ॥
औष्ट्रिकेभ्यो [1]ज्ञातयाऽऽर्त्तः पितुरत्यर्त्तिवार्त्तया ।
नन्दां संबोध्य सस्नेहं प्रतस्थे श्रेणिकस्ततः ॥ ३७ ॥

---

(१) ग ज्ञातवार्तः ।

[1]अयं पाण्डुरकुड्या गोपाला राजगृहे पुरे ।
आह्वानमन्त्रप्रतिमान्यक्षराणीति चार्पयत् ॥ ३८ ॥
माऽन्या तातस्य रोगार्त्तेर्मदर्त्तिर्भूदिति द्रुतम् ।
उष्ट्रीं श्रेणिक आरुह्य ययौ राजगृहं पुरम् ॥ ३९ ॥
तं दृष्ट्वा मुदितो राजा हर्षनेत्राम्बुभिः समम् ।
राज्येऽभ्यषिञ्चद्विमलैः सुवर्णकलशाम्बुभिः ॥ ४० ॥
राजाऽपि संस्मरन् पार्श्वं जिनं पञ्चनमस्क्रियाम् ।
चतुःशरणमापन्नो विपद्य त्रिदिवं ययौ ॥ ४१ ॥
विश्वं विश्वम्भराभारं बभार श्रेणिकस्ततः ।
तेन सा गुर्विणी मुक्ता गर्भं नन्दाऽपि दुर्वहम् ॥ ४२ ॥
तस्या दोहद इत्यासीद्गजारूढा शरीरिणाम् ।
महाभूत्योपकुर्वाणा भवाम्यभयदा यदि ॥ ४३ ॥
विज्ञपय्याथ राजानं तत्पित्राऽपूरि दोहदः ।
पूर्णे काले च साऽसूत प्राची रविमिवार्भकम् ॥ ४४ ॥
दोहदार्थानुसारेण तस्याथ दिवसे शुभे ।
चकाराभयकुमार इति मातामहोऽभिधाम् ॥ ४५ ॥
स क्रमाद्वृधे विद्या निरवद्याः पपाठ च ।
अष्टवर्षोऽभवद्दक्षो द्वासप्तत्यां कलासु च ॥ ४६ ॥

---

(१) श्रीचन्द्रतिलकोपाध्यायकृते, अभयकुमारचरिते:
"यतोऽयमर्थः पाण्डुरकुड्याः धवलभित्तय'।
गोपालाः पृथिवीपाला गोशब्दोऽवनिवाचकः ॥ ४ ॥ इति ।

सवयाः कलहे कोऽपि तं कोपादित्यतर्जयत् ।
किं त्वं जल्पसि यस्याद्यो पिता विज्ञायते नहि ॥ ४७ ॥
ऊचेऽभयकुमारस्तं ननु भद्रः पिता मम ।
पिता भद्रो भवन्मातुः प्रत्युवाचेति सोऽभयम् ॥ ४८ ॥
नन्दां प्रत्यभयोऽप्यूचे मातः ! को मे पितेत्यथ ।
अयं तव पिता भद्रः श्रेष्ठी नन्देत्यचीकथत् ॥ ४९ ॥
भद्रस्तव पिता अंम मदीयं पितरं ननु ।
पुत्रेणेत्युदिता नन्दा निरानन्देदमब्रवीत् ॥ ५० ॥
देशान्तरादागतेन परिणीताऽस्मि केनचित् ।
मम च त्वयि गर्भस्थे तमीयुः केचिदौष्ट्रिकाः ॥ ५१ ॥
रहः स किञ्चिदुक्त्वा तैः सहैव क्वचिदप्यगात् ।
अद्यापि तं न जानामि कुतस्त्यः कश्चिदित्यहम् ॥ ५२ ॥
स यान् किञ्चिज्जजल्प त्वामिति पृष्टाऽभयेन सा ।
अक्षराण्यर्पितान्येतानीति पत्रमदर्शयत् ॥ ५३ ॥
तद्विभाव्याभयः प्रीतोऽब्रवीन्मम पिता नृपः ।
पुरे राजगृहे तत्र गच्छामो ननु संप्रति ॥ ५४ ॥
आपृच्छ्य श्रेष्ठिनं भद्रं सामग्रीसंयुतस्ततः ।
नान्देयो नन्दया सार्द्धं ययौ राजगृहं पुरम् ॥ ५५ ॥
मातरं बहिरुद्याने विमुच्य सपरिच्छदाम् ।
तत्र स्वल्पपरीवारः प्रविवेशाभयः पुरे ॥ ५६ ॥
इतश्च मेलितान्यासंस्तदा श्रेणिकभूभुजा ।
शतानि पञ्चैकोनानि मन्त्रिणां मन्त्रसत्रिणाम् ॥ ५७ ॥

मन्त्रिपञ्चशतीं पूर्णां कर्त्तुं नरपतिस्ततः ।
लोके गवेषयामास कञ्चिदुत्कृष्टपूरुषम् ॥ ५८ ॥
ततश्च तत्परीक्षार्थं शुष्ककूपे निजोर्मिकाम् ।
प्रचिक्षेप क्षितिपतिर्लोकानित्यादिदेश च ॥ ५९ ॥
आदास्यति करेणैतामूर्मिकां यस्तटस्थितः ।
तस्य धीकौशलक्रीता[1] मदीया मन्त्रिधुर्यता ॥ ६० ॥
तेऽप्यूचुर्यदशक्यानुष्ठानमस्माद्दृशामिदम् ।
ताराः करेण यः कर्षेत् स इमामूर्मिकामपि ॥ ६१ ॥
ततोऽभयकुमारोऽपि संप्राप्तस्तत्र सस्मितम् ।
ऊचे किं गृह्यते नैषा, किमेतदपि दुष्करम् ॥ ६२ ॥
तं दृष्ट्वा [2]च जना दध्युः कोऽप्यसावतिशायिधीः ।
समये मुखरागो हि नृणामाख्याति पौरुषम् ॥ ६३ ॥
ऊचुश्च ते महाभाग । त्वं गृहाणेत्थमूर्मिकाम् ।
ऊर्मिकाकर्षणपणां धुर्यतां चैषु मन्त्रिषु ॥ ६४ ॥
ततोऽभयकुमारस्तामूर्मिकां कूपमध्यगाम् ।
आर्द्रगोमयपिण्डेन निजघानोपरि स्थितः ॥ ६५ ॥
प्रक्षिप्योपरि तत्कालं ज्वलन्तं तृणपूलकम् ।
सद्यः संशोषयामास गोमयं तन्महामतिः ॥ ६६ ॥
नन्दाया नन्दनः सद्यः कारयित्वाऽथ सारणिम् ।
वारिणाऽपूरयत् कूपं विस्मयेन च तं जनम् ॥ ६७ ॥

---

(१) क ख ग ड -क्रीती ।　　　　(२) ख च ते ।

तन्नोमयं श्रेणिकसूः करेण तरसाऽऽददे ।
धीमद्भिः सुप्रयुक्तस्य किमुपायस्य दुष्करम् ? ॥ ६८ ॥
तस्मिन् स्वरूपे चारश्चैर्विज्ञप्ते जातविस्मयः ।
नृपोऽभयकुमारं द्रागाजुहावात्मसन्निधौ ॥ ६९ ॥
अभयं श्रेणिकः पुत्रप्रतिपत्त्याऽथ सस्वजे ।
बन्धुरज्ञायमानोऽपि दृष्टो मोदयते मनः ॥ ७० ॥
कुतस्त्वमागतोऽसीति पृष्टः श्रेणिकभूभुजा ।
वेणातटादागतोऽहमिति चाभिदधेऽभयः ॥ ७१ ॥
राजाऽपृच्छद्भद्रमुख ! किं भद्र इति विश्रुतः ।
श्रेष्ठी तत्रास्ति तस्यापि नन्दानाम्नी च नन्दना ॥ ७२ ॥
अस्त्येवं सम्यगित्युक्ते तेन भूयोऽपि भूपतिः ।
ऊचे नन्दोदरिण्यासीत्किमपत्यमजायत ? ॥ ७३ ॥
अथाख्यत्कान्तदन्तांशुश्रेणिः श्रेणिकसूरिदम् ।
देवाभयकुमाराख्यं सा नन्दनमजीजनत् ॥ ७४ ॥
किंरूपः किंगुणः सोऽस्तीत्युदिते सति भूभुजा ।
ऊचेऽभयः स एवाहं स्वामिन्नस्मीति चिन्त्यताम् ॥ ७५ ॥
परिष्वज्याङ्कमारोप्य समाघ्राय च मूर्द्धनि ।
स्नेहात् स्नपयितुमिव सिषेच नयनाम्बुभिः ॥ ७६ ॥
कुशलं वत्स ! ते मातुरिति पृष्टे महीभुजा ।
इति विज्ञपयामास बद्धाञ्जलिपुटोऽभयः ॥ ७७ ॥
अनुस्मरन्ती भृङ्गीव त्वत्पादाम्भोजसङ्गमम् ।
स्वामिन्नायुष्मती मेऽम्बा बाह्योद्यानेऽस्ति संप्रति ॥ ७८ ॥

ततो नन्दां समानेतुममन्दानन्दकन्दलः ।
न्ययुङ्क्त सर्वसामग्रीमग्रेकृत्य नृपोऽभयम् ॥ ७९ ॥
ततः स्वयमपि प्राज्योत्कण्ठोल्लिखितमानसः ।
नन्दामभिययौ राजा राजहंस इवाब्जिनीम् ॥ ८० ॥
शिथिलीभूतवलयां कपोललुलितालकाम् ।
अनञ्जनाक्षीं कबरीधारिणीं मलिनांशुकाम् ॥ ८१ ॥
तनोस्तनिम्ना दधतीं द्वितीयेन्दुकलातुलाम् ।
ददर्श राजा सानन्दो नन्दामुद्यानवासिनीम् ॥८२॥(युग्मम्)
नन्दामानन्द्य नृपतिर्नीत्वा च स्वं निकेतनम् ।
पट्टराज्ञीपदेऽकार्षीत् सीतामिव रघूद्वहः ॥ ८३ ॥
भक्तितः पितरि स्वस्य पदातिपरमाणुताम् ।
मन्वानः साधयामास दुःसाधान् भूभुजोऽभयः ॥ ८४ ॥
अन्यदोज्जयिनीपुर्य्याश्चण्डप्रद्योतभूपतिः ।
चलितः सर्वसामग्र्या रोद्धुं राजगृहं पुरम् ॥ ८५ ॥
प्रद्योतो बद्धमुकुटाश्चतुर्दश परे नृपाः ।
तत्रायान्तो जनैर्दृष्टाः परमाधार्मिका इव ॥ ८६ ॥
पाटूपटप्लुतैरश्वैः पाटयन्निव मेदिनीम् ।
आगच्छन् प्रणिधिभ्योऽथ शुश्रुवे श्रेणिकेन सः ॥ ८७ ॥
किञ्चिच्च चिन्तयामास प्रद्योतोऽद्य समापतन् ।
क्रूरग्रह इव क्रुद्धः कार्यो हतबलः कथम् ? ॥ ८८ ॥
ततोऽभयकुमारस्यौत्पत्तिक्यादिधियां निधेः ।
नृपतिर्मुखमैक्षिष्ट सुधामधुरया दृशा ॥ ८९ ॥

यथार्थनामा राजानमभयोऽथ व्यजिज्ञपत् ।
का चिन्तोज्जयिनीशोऽद्य भूयाद्युद्धातिथिर्मम ॥ ८० ॥
यदि वा [1]बुद्धिसाध्येऽर्थे शस्त्राशस्त्रिकथा वृथा ।
बुद्धिमेव प्रयोक्ष्ये तद्बुद्धिर्हि जयकामधुक् ॥ ८१ ॥
अथ बाह्येऽरिसैन्यानामावासस्थानभूमिषु ।
लोहसंपुटमध्यस्थान् दीनारान् स न्यचीखनत् ॥ ८२ ॥
प्रद्योतनृपतेः सैन्यैस्ततो राजगृहं पुरम् ।
पर्यवेष्ट्यत भूगोलः पयोधिसलिलैरिव ॥ ८३ ॥
अथेत्थं प्रेषयामास लेखं प्रद्योतभूपतेः ।
अभयो गुप्तपुरुषैः परुषेतरभाषिभिः ॥ ८४ ॥
शिवादेवीचेल्लणयोर्भेदं नेच्छे मनागपि ।
तस्मान्योऽसि शिवादेवीसम्बन्धेनापि सर्वदा ॥ ८५ ॥
तदवन्तीश ! वच्मि त्वामेकान्तहित[2]काङ्क्षया ।
सर्वे श्रेणिकराजेन भेदितास्तव भूभुजः ॥ ८६ ॥
दीनाराः प्रेषिताः सन्ति तेभ्यस्तान् कर्तुमात्मसात् ।
ते तानादाय बद्ध्वा त्वामर्पयिष्यन्ति मत्पितुः ॥ ८७ ॥
तदावासेषु दीनारा निखाताः सन्ति तत्कृते ।
खानयित्वा पश्य को वा दीपे सत्यग्निमीक्षते ॥ ८८ ॥
विदित्वैवं स भूपस्यैकस्यावासमचीखनत् ।
लब्धास्तत्र च दीनारास्तान् दृष्ट्वाऽऽशु पलायत ॥ ८९ ॥

---

(१) क ग छ बुद्ध्य- ।
(२) क ग छ -वाञ्छया ।

नष्टे तत्र तु तत्सैन्यं विलोड्याब्धिमिवाखिलम् ।
हस्त्यश्वाद्याददे सारं मगधेन्द्रः समन्ततः ॥ १०० ॥
नासारूढेन जीवेन वायुवाजेन वाजिना ।
ततः प्रद्योतनृपतिः कथञ्चित् स्वां पुरीं ययौ ॥ १ ॥
ये चतुर्दश भूपाला ये चान्येऽपि महारथाः ।
तेऽपि नेशुः काकनाशं हतं सैन्यं ह्यनायकम् ॥ २ ॥
असंयतलुलत्केशैश्छत्रशून्यैश्च मौलिभिः ।
राजानमनुयान्तस्तेऽप्यापुरुज्जयिनीं पुरीम् ॥ ३ ॥
अभयस्यैव मायेयं वयं नेदृशकारिणः ।
प्रत्यायितः सशपथं तैरथोज्जयिनीपतिः ॥ ४ ॥
कदाचिदूचेऽवन्तीशो मध्येसभममर्षणः ।
योऽर्पयत्यभयं बद्धा मम सम्पत्स्यते स किम् ॥ ५ ॥
पताकां हस्तमुत्क्षिप्य काऽप्येका गणिका ततः ।
व्यजिज्ञपदवन्तीशमलमस्मीह कर्मणि ॥ ६ ॥
तामादिदेशावन्तीशो यद्येवमनुतिष्ठ तत् ।
करोम्यर्थादिसाहाय्यं ब्रूहि किं तव संप्रति ? ॥ ७ ॥
सा च दध्यौ यदभयो नोपायैर्गृह्यतेऽपरैः ।
धर्मच्छद्म तदादाय साधयामि समीहितम् ॥ ८ ॥
अयाचत ततश्च द्वे द्वितीयवयसौ स्त्रियौ ।
ते तदैवार्पयद्राजा ददौ द्रव्यं च पुष्कलम् ॥ ९ ॥
कृतादराः प्रतिदिनमुपास्योपास्य संयताः ।
बभूवुरुत्कटप्रज्ञास्तास्तिस्रोऽपि बहुश्रुताः ॥ १० ॥

तान्निरस्तोऽपि ततो जग्मुः श्रेणिकालङ्कृतं पुरम् ।
जगत्त्रयीं वञ्चयितुं मायाया इव मूर्त्तयः ॥ ११ ॥

बाह्योद्याने कृतावासा सा पणस्त्रीमतल्लिका ।
पत्तनाभ्यर्ययौ चैत्यपरिपाटीचिकीर्षया ॥ १२ ॥

सा विभूत्याऽतिशायिन्या चैत्ये नृपतिकारिते ।
प्रविवेश समं ताभ्यां कृत्वा नैषेधिकीत्रयम् ॥ १३ ॥

मालवकैशिकीमुख्यभाषामधुरया गिरा ।
देवं वन्दितुमारेभे सपर्यां विरचय्य सा ॥ १४ ॥

तत्राभयकुमारोऽपि ययौ देवं विवन्दिषुः ।
श्राद्धतीयां तामग्रे वन्दमानां ददर्श च ॥ १५ ॥

देवदर्शनविघ्नोऽस्या मा भूत्प्रविशता मया ।
द्वार्येवेत्यभयस्तस्थौ मण्डपान्तर्विवेश न ॥ १६ ॥

प्रणिधानस्तुतिं कृत्वा सा मुक्ताशुक्तिमुद्रया ।
यावदुत्तस्थुषी तावदभयोऽभ्याजगाम ताम् ॥ १७ ॥

तादृशीं भावनां तस्यास्तं वेषं प्रशमं च तम् ।
अभयो वर्णयामास सानन्दं च जगाद ताम् ॥ १८ ॥

दिष्ट्या भद्रेऽधुना त्वादृक्साधर्मिकसमागमः ।
साधर्मिकात्परो बन्धुर्न संसारे विवेकिनाम् ॥ १९ ॥

का त्वं किमागमः का वा वासभूमिरिमे च के ।
यकाभ्यां स्वातिराधाभ्यामिन्दुलेखेव शोभसे ॥ २० ॥

व्याजहाराथ सा व्याजश्राविकाऽवन्तिवासिनः ।
महेभ्यवणिजः पाणिगृहीती विधवा त्वहम् ॥ २१ ॥

इमे च मम पुत्रस्य कलत्रे कालधर्मतः ।
निच्छाय्यभूतां विधवे भग्नवृक्षे लते इव ॥ २२ ॥
व्रतार्थमापपृच्छाते उभे अपि तदैव माम् ।
विपन्नपतिकानां हि सतीनां शरणं व्रतम् ॥ २३ ॥
मयाऽप्युक्तं ग्रहीष्यामि निर्वीराऽहमपि व्रतम् ।
गार्हस्थ्यस्य फलं किन्तु गृह्यतां तीर्थयात्रया ॥ २४ ॥
व्रते हि भावतः पूजा युज्यते द्रव्यतो न तु ।
इत्यहं तीर्थयात्रार्थमेताभ्यां सह निर्ययौ ॥ २५ ॥
अथेत्यमभयोऽवोचदतिथीभवताद्य नः ।
आतिथेयं सतीर्थ्यानां तीर्थादप्यतिपावनम् ॥ २६ ॥
प्रत्युवाचाभयं साऽपि युक्तमाह भवान् परम् ।
कृततीर्थोपवासाऽहं भवाम्यद्यातिथिः कथम् ? ॥ २७ ॥
अथ तन्निष्ठया हृष्टोऽभयस्तामवदत्पुनः ।
अवश्यं मम तत्प्रातरागन्तव्यं निकेतने ॥ २८ ॥
साऽप्यूचे यत्क्षणेनापि जन्मिनो जन्म पूर्यते ।
अहं प्रातरिदं कर्त्ताऽस्मीति जल्पेत्तद्यं सुधीः ? ॥ २९ ॥
अस्त्विदानीमियं भूयः श्वो निमन्त्र्येति चिन्तयन् ।
तां विसृज्याभयश्चैत्यं वन्दित्वा स्वगृहं ययौ ॥ ३० ॥
तां निमन्त्र्याभयः प्रातर्गृहचैत्यान्यवन्दयत् ।
भोजयामास च प्राज्यवस्त्रदानादि च व्यधात् ॥ ३१ ॥
निमन्त्रितस्तयाऽन्येद्युर्मितीभूयाभयोऽप्यगात् ।
साधर्मिकोपरोधेन किं न कुर्वन्ति तादृशाः ? ॥ ३२ ॥

तया च विविधैर्भोज्यैरभयोऽकारि भोजनम् ।
चन्द्रहाससुरामिश्रपानकानि च पायितः ॥ ३३ ॥
भुक्तोत्थितश्च तत्कालं सुष्वाप श्रेणिकात्मजः ।
आदिमा मद्यपानस्य निद्रा सहचरी खलु ॥ ३४ ॥
तं रथेन स्थाने स्थाने स्थापितैस्तापरै रथैः ।
अवन्तीं प्रापयामास दुर्लक्ष्यच्छद्मसद्म सा ॥ ३५ ॥
ततोऽभयान्वेषणाय श्रेणिकेन नियोजिताः ।
स्थाने स्थानेऽन्वेषयन्तस्तत्रापीयुर्गवेषकाः ॥ ३६ ॥
किमिहाभय आयात इत्युक्ता तकवाच सा ।
इहाभयः समायातः परं यातस्तदैव हि ॥ ३७ ॥
वचनप्रत्ययात्तस्या अन्यतेयुर्गवेषकाः ।
स्थाने स्थाने स्थापिताश्वैः साऽप्यवन्तीं समाययौ ॥ ३८ ॥
सा प्रचण्डाऽभयं चण्डप्रद्योतस्यार्पयत्ततः ।
अभयाऽऽनयनोपायस्वरूपं च व्यजिज्ञपत् ॥ ३९ ॥
तां प्रद्योतोऽप्युवाचैवं न साधु विहितं त्वया ।
यदमुं धर्मविश्वस्तं त्वं धर्मच्छद्मनाऽऽनयः ॥ ४० ॥
कथासप्ततिसंशंसी मार्जार्येव शुकोऽनया ।
नीतिज्ञोऽपि गृहीतोऽसि जगादेत्यभयं च सः ॥ ४१ ॥
अभयोऽप्यब्रवीदेवं त्वमेव मतिमानसि ।
यस्यैवं विधया बुद्धया राजधर्मः प्रवर्त्तते ॥ ४२ ॥
लज्जितः कुपितश्चाथ चण्डप्रद्योतभूपतिः ।
राजहंसमिवाक्षैप्सीदभयं काष्ठपञ्जरे ॥ ४३ ॥

अग्निभीरुरथो देवी शिवा नलगिरिः करी ।
लोहजङ्घो लेखवाहो राज्ये रत्नानि तस्य तु ॥ ४४ ॥
लोहजङ्घं नृपः प्रैषीद्भृगुकच्छे मुहुर्मुहुः ।
तद्गतागतसंक्लिष्टास्तत्रत्या इत्य[1]मन्त्रयन् ॥ ४५ ॥
आयात्ययं दिनेनापि पञ्चविंशतियोजनीम् ।
असकृद्वयाहरत्यस्मान् हन्मः संप्रत्यमुं ततः ॥ ४६ ॥
ते विमृश्येत्यदुस्तस्य शम्बले विषमोदकान् ।
तद्भस्त्राशम्बलं चान्यत्सममन्तादप्यपाहरन् ॥ ४७ ॥
कश्चित्स्थानमुल्लङ्घ्य नदीरोधसि शम्बलम् ।
तद्भोक्तुमवतस्थेऽसौऽभूवन्नशकुनान्यथ ॥ ४८ ॥
शकुनज्ञस्तु सोऽभुक्त्वोत्थाय दूरं ययौ ततः ।
क्षुधितो भोक्तुकामस्तद्वारितः शकुनैः पुनः ॥ ४९ ॥
दूरं गत्वा भोक्तुकामः शकुनैर्वारितः पुनः ।
ततो गत्वा स तत्सर्वं प्रद्योतस्य न्यवेदयत् ॥ ५० ॥
ततो राज्ञा समाहूय तत्पृष्टः श्रेणिकात्मजः ।
पाथेयभस्त्रामाघ्राय जगाद मतिमानिदम् ॥ ५१ ॥
अस्ति दृष्टिविषोऽत्राहिर्द्रव्यसंयोगसम्भवः ।
असौ दग्धो भवेन्नूनं भस्त्रामुद्घाटयेद्यदि ॥ ५२ ॥
ततः पराङ्मुखोऽरण्ये मोच्य इत्यभयोदिते ।
तथैव मुमुचे सद्यो दग्धा द्रुमा मृतश्च सः ॥ ५३ ॥

---

[1] क ख -त्यमन्त्रयन् ।

विना बन्धनमोचत्वं वरं याचख मामिति ।
नृपेणोक्तेऽभयोऽवादीन्न्यासीभूतोऽस्तु मे वरः ॥ ५४ ॥
अन्यदाऽऽलानमुन्मूल्य पातयित्वा निषादिनौ ।
खैरं नलगिरिर्भ्राम्यन् क्षोभयामास नागरान् ॥ ५५ ॥
असाववशगो हस्ती वशं नेयः कथं त्विति ।
राज्ञा पृष्टोऽभयोऽशंसद्गायत्वुदयनो नृपः ॥ ५६ ॥
पुत्रगा वासवदत्ताया गान्धर्वाधीतये[1] धृतः ।
जगावुदयनस्तत्र समं वासवदत्तया ॥ ५७ ॥
तद्गीताकर्णनाक्षिप्तो वशो नलगिरिः करी ।
पुनर्ददौ वरं राजा न्यासीचक्रेऽभयस्तथा ॥ ५८ ॥
अभूदवन्त्यामन्येद्युर्निर्विच्छेदं प्रदीपनम् ।
पृष्टश्च तत्प्रतीकारं प्रद्योतेनाभयोऽवदत् ॥ ५९ ॥
विषस्येव विषं वह्नेर्वह्निरेव यदौषधम् ।
तदन्यः क्रियतां वह्निर्यथा शाम्येत् प्रदीपनम् ॥ ६० ॥
तत्तथा विदधे राज्ञाऽशाम्यत्तच्च प्रदीपनम् ।
तृतीयं च वरं सोऽदात्न्यासीचक्रेऽभयश्च तम् ॥ ६१ ॥
अशिवं महदन्येद्युरुज्जयिन्यां समुत्थितम् ।
तत्प्रशान्त्यै नरेन्द्रेण पृष्ट इत्यभयोऽब्रवीत् ॥ ६२ ॥
आगच्छन्त्वन्तरास्थानं देव्यः सर्वा विभूषिताः ।
युष्मान् जयति या दृष्ट्या कथनीया तु सा मम ॥ ६३ ॥

(१) ध्यै च -अयने ।

तथैव विदधे राज्ञा राज्ञोऽन्या विजिता द्रुग्रा ।
देव्या तु शिवया राजा, कथितं चाभयाय तत् ॥ ६४ ॥
अभाषताभयोऽप्येवं महाराज्ञी शिवा स्वयम् ।
करोतु कूरबलिना भूतानामर्चनं निशि ॥ ६५ ॥
यद्यद्भूतं शिवारूपेणोत्तिष्ठत्यथवासते ।
तस्य तस्य मुखे देव्या देयः कूरबलिः स्वयम् ॥ ६६ ॥
विदधे शिवया तच्चाशिवशान्तिर्बभूव च ।
तुर्यं चादाद्वरं राजा ययाचे चाभयोऽप्यदः ॥ ६७ ॥
स्थितो नलगिरौ मेण्ठीभूते त्वयि शिवाङ्कगः ।
अहं विशाम्यग्निभीरुरथदारुकृतां चिताम् ॥ ६८ ॥
ततो विषण्णः प्रद्योतो वरान् दातुमशक्नुवन् ।
विससर्जाञ्जलिं कृत्वा कुमारं मगधेशितुः ॥ ६९ ॥
आशुश्रावाभयोऽप्येवं त्वयाऽऽनीतश्छलादहम् ।
दिवा रटन्तं पूर्मध्ये त्वां तु नेष्याम्यसावहम् ॥ ७० ॥
ततोऽभयकुमारोऽगात् क्रमाद्राजगृहे पुरे ।
कथमप्यवतस्थे च कञ्चित्कालं महामतिः ॥ ७१ ॥
गृहीत्वा गणिकापुत्र्यौ रूपवत्यावथाभयः ।
वणिग्वेषोऽगादवन्त्यां राजमार्गेऽग्रहीद्गृहम् ॥ ७२ ॥
प्रद्योतेनेक्षिते ते च दारिके पथि गच्छता ।
ताभ्यां च सविलासाभ्यां प्रद्योतोऽपि निरीक्षितः ॥ ७३ ॥
प्रद्योतेन गृहे गत्वा रागिणा प्रेषिता ततः ।
दूतिकाऽनुनयन्त्याभ्यां क्रुद्धाभ्यामपहस्तिता ॥ ७४ ॥

द्वितीयस्मिन्नपि दिनेऽर्थ्यमाना नृपाय च ।
ताभ्यां शनैः सरोषाभ्यामवामन्यत दूतिका ॥ ७५ ॥
तृतीयेऽप्यह्नि निर्वंदादेत्य ते याचितेऽनया[१] ।
अचतुश्च सदाचारो भ्राता [२]नावेव रक्षति ॥ ७६ ॥
ततो बहिर्गतेऽमुष्मिन् सप्तमेऽह्नि समागते ।
इहायातु नृपश्छन्नस्ततः सङ्गो भविष्यति ॥ ७७ ॥
ततोऽभयेन प्रद्योतसदृगेकः पुमान्निजः ।
उन्मत्तो विदधे तस्य प्रद्योत इति नाम च ॥ ७८ ॥
ईदृशोऽयं मम भ्राता भ्राम्यतीतस्ततस्ततः ।
रक्षितव्यो मया हा किं करोमीत्यवदज्जने ॥ ७९ ॥
तं वैद्यसद्मनयनच्छद्मना प्रत्यहं बहिः ।
रटन्तं मञ्चकारूढं निनायार्त इवाभयः ॥ ८० ॥
नीयमानश्च तेनोच्चैः स उन्मत्तश्चतुष्पथे ।
प्रद्योतोऽहं ह्रियेऽनेनेत्युदश्रुवदनोऽरटत् ॥ ८१ ॥
सप्तमेऽह्नि नृपोऽप्येकस्तत्र प्रच्छन्न आययौ ।
कामान्धः सिन्धुर इव बद्धश्चाभयपूरुषैः ॥ ८२ ॥
नीयतेऽसौ वैद्यवेश्मेत्यभयेनाभिभाषिणा ।
पर्यङ्केन समं जह्रे पुरान्तः स रटन् दिवा ॥ ८३ ॥
क्रोशे क्रोशे पुरा मुक्तै रथैरथ सुवाजिभिः ।
पुरे राजगृहेऽनैषीत्प्रद्योतमभयोऽभयः ॥ ८४ ॥

---

(१) क ख छ तया ।

(२) क ख छ नावेष ।

ततो निनाय प्रद्योतं श्रेणिकस्य पुरोऽभयः ।
दधावे खड्गमाकृष्य तं प्रति श्रेणिको नृपः ॥ ८५ ॥
ततोऽभयकुमारेण बोधितो मगधेश्वरः ।
संमान्य वस्त्राभरणैः प्रद्योतं व्यसृजन्मुदा ॥ ८६ ॥
अन्यदा गणभृद्देवसुधर्मस्वामिनोऽन्तिके ।
प्रव्रज्यामग्रहीत्कोऽपि विरक्तः काष्ठभारिकः ॥ ८७ ॥
विहरन् स पुरे पौरैः पूर्वावस्थाऽनुवादिभिः ।
अभर्त्स्यतोपाहस्यतागर्ह्यतापि पदे पदे ॥ ८८ ॥
नावज्ञां सोढुमीशोऽत्र विहरामि तदन्यतः ।
इति व्यज्ञपयत् स श्रीसुधर्मस्वामिनं ततः ॥ ८९ ॥
सुधर्मस्वामिनाऽन्यत्र विहारक्रमहेतवे ।
आपृच्छ्यताभयः पृच्छन् ज्ञापितस्तच्च कारणम् ॥ ९० ॥
दिनमेकं प्रतीक्षध्वमूर्ध्वं यत्प्रतिभाति वः ।
तद्विधत्तेत्ययाचिष्ट प्रणम्य श्रेणिकात्मजः ॥ ९१ ॥
सोऽथ राजकुलात्कृष्ट्वा रत्नकोटित्रयीं बहिः ।
दास्याम्येतामित लोकाः ! पटहेनेत्यघोषयत् ॥ ९२ ॥
ततश्चेयुर्जनाः सर्वेऽप्यवोचदभयोऽप्यदः ।
जलाग्निस्त्रीवर्जको यस्तस्य रत्नोच्चयोऽस्त्वयम् ॥ ९३ ॥
लोकोऽवरमिदं लोकः स्वामिन् ! किं कर्त्तुमीश्वरः ? ।
इति तेष्वाभाषमाणेष्वभयोऽपीत्यभाषत ॥ ९४ ॥
यदि वो नेदृशः कश्चिद्रत्नकोटीत्रयं ततः ।
जलाग्निस्त्रीमुचः काष्ठभारिणोऽस्तु महामुनेः ॥ ९५ ॥

सम्यग्दृष्टिगयं साधुः पात्रं दानस्य युज्यते ।
मुधाऽसौ जहसेऽस्माभिरिति तैर्जगदेऽभयः ॥ ८६ ॥
अस्य भक्तोपहासादि न कर्त्तव्यमतः परम् ।
आदिष्टमभयेनैवं प्रतिपद्य ययुर्जनाः ॥ ८७ ॥
एवं बुद्धिमहाम्भोधिः पितृभक्तिपरोऽभयः ।
निरीहो धर्मसंसक्तो राज्यमन्वशिषत्पितुः ॥ ८८ ॥
वर्त्तमानः स्वयं धर्मे स प्रजा अप्यवर्त्तयन् ।
प्रजानां च पशूनां च गोपायत्ताः प्रवृत्तयः ॥ ८९ ॥
राजा चक्रे जजागार यथा द्वादशधा स्थिते ।
तथा श्रावकधर्मेऽसावप्रमद्वरमानसः ॥ २०० ॥
बहिरङ्गान् यथाऽजैषीद्दुर्जयानपि विद्विषः ।
अन्तरङ्गानपि तथा स लोकद्वयसाधकः ॥ १ ॥
तमूचे श्रेणिकोऽन्येद्युर्वत्स ! राज्यं त्वमाश्रय ।
अहं श्रयिष्ये श्रीवीरशुश्रूषासुखमन्वहम् ॥ २ ॥
पित्राज्ञाभङ्गसंसारभीरुरित्यभयोऽब्रवीत् ।
यदादिशत तत्साधु प्रतीक्षध्वं क्षणं परम् ॥ ३ ॥
इतश्च भगवान् वीरः प्रव्राज्योदायनं नृपम् ।
मरुमण्डलतस्तत्राभ्यागत्य समवासरत् ॥ ४ ॥
ततो गत्वाऽभयो नत्वा पप्रच्छ चरमं जिनम् ।
राजर्षिः कोऽन्तिमोऽथाख्यत्तत्रैवोदायनं प्रभुः ॥ ५ ॥
गत्वोचे श्रेणिकं सोऽस्मि राजा चेत्स ऋषिस्तदा ।
श्रीवीरोऽन्तिमराजर्षिं शशंसोदायनं यतः ॥ ६ ॥

श्रीवीरं स्वामिनं प्राप्य प्राप्य त्वत्पुत्रतामपि ।
नो छेत्स्ये भवदुःखं चेत्मत्तः कोऽन्योऽधमस्ततः ॥ ७ ॥
मान्नाऽहमभयस्तात । सभयोऽस्मि भवाद्गम ।
भुवनाभयदं वीरं तच्छ्रयामि समादिश ॥ ८ ॥
तदलं मम राज्येनाभिमानसुखहेतुना ।
यतः सन्तोषसाराणि सौख्यान्याहुर्महर्षयः ॥ ९ ॥
निर्बन्धाद्याच्यमानोऽपि न यदा राज्यमग्रहीत् ।
तदाऽभयो व्रतायानुजज्ञे राज्ञा प्रमोदतः ॥ १० ॥
राज्यं तृणमिव त्यक्त्वा सन्तोषसुखभागसौ ।
दीक्षां चरमतीर्थेशवीरपादान्तिकेऽग्रहीत् ॥ ११ ॥

सन्तोषमेवमभयः सुखदं दधानः
सर्वार्थसिद्धिसुरधाम जगाम मृत्वा ।
सन्तोषमेवमपरोऽप्यवलम्बमान-
स्तान्युत्तरोत्तरसुखानि नरो लभेत ॥ २१२ ॥

॥ इति श्रीअभयराजर्षिकथानकम् ॥ ११४ ॥

प्रकृतं सन्तोषमेव स्तौति—

सन्निधौ निधयस्तस्य कामगव्यनुगामिनी ।
अमराः किङ्करायन्ते सन्तोषो यस्य भूषणम् ॥ ११५ ॥

निधयो महापद्मादयः, सन्निधौ सन्निहिताः, कामगवी काम-

धेनुः, सा अनुगच्छतीत्येवंशीला अनुगामिनी, अमराः सुराः, किङ्करा इवाचरन्ति किङ्करायन्ते। तस्येति योगः। यस्य किम्; यस्य पुंसः सन्तोषो भूषणमलङ्करणम्।

तथाहि—

सन्तुष्टा मुनयः शमप्रभावात्तृणाग्रादपि रत्नसमूहान् पातयन्ति, कामितफलदायिनश्च सुरेन्द्रैरप्यहमहमिकयोपचर्यन्त इत्यत्र कः सन्देहः।

अत्रान्तरश्लोकाः—

[1]धनं धान्यं स्वर्णरूप्यकुप्यानि क्षेत्रवास्तुनी।
द्विपाच्चतुष्पाच्चेति स्युर्नव बाह्याः परिग्रहाः॥ १॥
रागद्वेषौ कषायाः शुग्हासौ रत्यरती भयम्।
जुगुप्सा वेदमिथ्यात्वे आन्तराः स्युश्चतुर्दश॥ २॥
बाह्यात् परिग्रहात्प्रायः प्रकुप्यन्त्यान्तरा अपि।
प्रावृषो मूषिकालर्कविषजोपद्रवा इव॥ ३॥
प्राप्तप्रतिष्ठानपि च वैराग्यादिमहाद्रुमान्।
उन्मूलयति निर्मूलं परिग्रहमहाबलः॥ ४॥
परिग्रहनिषण्णोऽपि योऽपवर्गं विमार्गति।
लोहोडुपनिविष्टोऽसौ पारावारं तितीर्षति॥ ५॥
बाह्याः परिग्रहाः पुंसां धर्मस्य ध्वंसहेतवः।
तज्जन्मानोऽपि जायन्ते समिधामिव वह्नयः॥ ६॥

---

(१) क ख च धनधान्यस्वर्ण-। ड धान्यं धनं स्व-।

बाह्यानपि हि यः सङ्गान् नियन्त्रयितुं क्षमः ।
जयेत् क्लीबः कथं सोऽन्तःपरिग्रहचमूममूम् ॥ ७ ॥
क्रीडोद्यानमविद्यानां वारिधिर्व्यसनार्णसाम् ।
कन्दस्तृष्णामहावल्लेरेक एव परिग्रहः ॥ ८ ॥
अहो आश्चर्यमुन्मुक्तसर्वसङ्गान्मुनीनपि ।
धनार्थित्वेन शङ्कन्ते धनरक्षापरायणाः ॥ ९ ॥
राजतस्करदायादवह्नितोयादिभीरुभिः ।
धनैकतानैर्धनिभिर्निशास्वपि न सुप्यते ॥ १० ॥
दुर्भिक्षे वा सुभिक्षे वा वने जनपदेऽपि वा ।
शङ्काऽऽतङ्काकुलतया धनी सर्वत्र दुःखितः ॥ ११ ॥
निर्दोषा वा सदोषा वा सुखं जीवन्ति निर्धनाः ।
बाध्यन्ते धनिनो लोके दोषैरुत्पादितैरपि ॥ १२ ॥
अर्जने रक्षणे नाशे व्यये सर्वत्र दुःखदम् ।
धत्ते कण्ठगृहीतान्त्यभक्तलीलां धनं नृणाम् ॥ १३ ॥
धिग्धनं धनवन्तो यदेकामिषजिघृक्षुभिः ।
स्वजनैरपि बाध्यन्ते शुनकाः शुनकैरिव ॥ १४ ॥
इत्थमर्थं लभेयाहं रक्षेयं वर्द्धयेय च ।
क्षताम्नदन्तयन्त्रस्थोऽपीत्याशां न त्यजेद्धनी ॥ १५ ॥
पिशाचीव धनाशेयं यावदुच्छृङ्खला भवेत् ।
तावत् प्रदर्शयेन्नृणां नानारूपां विडम्बनाम् ॥ १६ ॥
यदीच्छसि सुखं धर्मं मुक्तिसाम्राज्यमेव च ।
तदा परपरीहारादेकामाशां वशीकुरु ॥ १७ ॥

स्वर्गापवर्गनगरप्रवेशप्रतिरोधिनी ।
अभेद्या वज्रधाराभिराशैव हि महार्गला ॥ १८ ॥
आशैव राक्षसी पुंसामाशैव विषमञ्जरी ।
आशैव जीर्णमदिरा धिगाशा सर्वदोषभूः ॥ १९ ॥
ते धन्याः पुण्यभाजस्ते तैस्तीर्णः क्लेशसागरः ।
जगत्संमोहजननी यैराशाऽऽशीविषी जिता ॥ २० ॥
पापवल्लीं दुःखखानिं सुखाग्निं दोषमातरम् ।
आशां निराशीकुरुते यस्तिष्ठति सुखेन सः ॥ २१ ॥
आशादवाग्निर्महिमा कोऽपि लोकपथातिगः ।
धर्ममेघं समाधिं यो विध्यापयति तत्क्षणात् ॥ २२ ॥
दीनं जल्पन्ति गायन्ति नृत्यन्त्यभिनयन्ति च ।
आशापिशाचीविवशाः पुमांसो धनिनां पुरः ॥ २३ ॥
न यान्ति वायवो यत्र नाप्यर्केन्दुमरीचयः ।
आशामहोर्मयः पुंसां तत्र यान्ति निरर्गलाः ॥ २४ ॥
येनाशायै ददे स्वाम्यं तेनात्तं दास्यमात्मनः ।
आशा दासीकृता येन तस्य स्वाम्यं जगत्त्रये ॥ २५ ॥
नाशा नैसर्गिकी पुंसि या जीर्यति न जीर्यति ।
उत्पात एव कोऽप्येषा तस्यां सत्यां कुतः सुखम् ॥ २६ ॥
वलयो वलयाः पुंसां पलितानि स्रजः कृताः ।
किमन्यन्मण्डनं कृत्वा कृतार्थाऽऽशा भविष्यति ॥ २७ ॥
प्राप्तेभ्योऽप्यतिरिच्यन्ते तेऽर्थास्त्यक्ता य आशया ।
क्रोडीकरोति यानाशा ते तु स्वप्नेऽपि दुर्लभाः ॥ २८ ॥

यानर्थान् बहुभिर्यत्नैरिच्छेत्साधयितुं नरः ।
अयत्नसिद्धा एवैते कृते ह्याशानिमीलने ॥ २९ ॥

पुण्योदयोऽस्ति चेत् पुंसां व्यर्थैवाशापिशाचिका ।
अथ पुण्योदयो नास्ति व्यर्थैवाशापिशाचिका ॥ ३० ॥

अधीती पण्डितः प्राज्ञः पापभीरुस्तपोधनः ।
स एव येन हित्वाऽऽशां नैराश्यमुररीकृतम् ॥ ३१ ॥

सुखं सन्तोषपीयूषजुषां यत् स्ववशात्मनाम् ।
तत्पराधीनवृत्तीनामसन्तोषवतां कुतः ॥ ३२ ॥

सन्तोषवर्मणि व्यर्था आशानाराचपङ्क्तयः ।
ताः कथं प्रतिरोद्धव्या इति मा स्माकुलो भव ॥ ३३ ॥

वाक्येनैकेन तद्वच्मि यद्वाच्यं वाक्यकोटिभिः ।
आशापिशाची शान्ता च प्राप्तं च परमं पदम् ॥ ३४ ॥

तत्सम्यजाऽऽशावैवश्यं मितीकृतपरिग्रहः ।
भजस्व [2]द्रव्यसाधुत्वं यतिधर्मानुरक्तधीः ॥ ३५ ॥

मिथ्यादृग्भ्यो विशिष्यन्ते सम्यग्दर्शनिनो जनाः ।
तेभ्योऽपि देशविरता मितारम्भपरिग्रहाः ॥ ३६ ॥

यामन्यतीर्थिका यान्ति गतिं तीव्रतपोजुषः ।
उपासकाः सोमिलवत्तां विराद्धव्रता अपि ॥ ३७ ॥

मासे मासे हि ये बालाः कुशाग्रेणैव भुञ्जते ।
सन्तुष्टोपासकानां ते कलां नार्हन्ति षोडशीम् ॥ ३८ ॥

(१) ख च -भिः लोभै ।
(२) ड भज ख भाव- । च भाव- ।

अप्यद्भुततपोनिष्ठस्तामलिः पूरणोऽपि वा ।
सुश्रावकोचितगतेरतिहीनां गतिं ययौ ॥ ३९ ॥

आशापिशाचविवशं कुरु मा स्म चेतः
सन्तोषमुद्वह परिग्रहनिग्रहेण ।
श्रद्धां विधेहि यतिधर्मधुरीणताया-
मन्तर्भवाष्टकमुपैषि यथाऽपवर्गम् ॥ ४० ॥ ११५ ॥

इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्य-
श्रीहेमचन्द्रविरचिते अध्यात्मोपनिषन्नाम्नि
सञ्जातपट्टबन्धे श्रीयोगशास्त्रे स्वोपज्ञं
द्वितीयप्रकाशविवरणम् ।

अर्हम्

तृतीयः प्रकाशः ।

अथाणुव्रतव्याख्यानानन्तरं गुणव्रतानामवसरस्तत्रापि प्रथमं गुणव्रतमाह—

दशस्वपि कृता दिक्षु यत्र सीमा न लङ्घ्यते ।
ख्यातं दिग्विरतिरिति प्रथमं तद्गुणव्रतम् ॥ १ ॥

ऐन्द्री, आग्नेयी, याम्या, नैर्ऋती, वारुणी, वायव्या, कौबेरी, ऐशानी, नागी, ब्राह्मीति दश दिशस्तासु; अपिशब्दादेक-द्वित्र्यादिदिक्ष्वपि, सीमा मर्यादा, कृता प्रतिपन्ना, यत्र व्रते सति, न लङ्घ्यते नातिक्रम्यते, तत्प्रथमं गुणव्रतम् । उत्तरगुणरूपं व्रतं गुणव्रतम्, गुणाय चोपकाराय अणुव्रतानां व्रतं गुणव्रतम्; ख्यातं प्रसिद्धं, तस्याभिधानं दिग्विरतिरिति ॥ १ ॥

ननु हिंसादिपापस्थानविरतिरूपाणि युक्तान्यणुव्रतानि, दिग्व्रतं तु कस्य पापस्थानस्य निवृत्तिर्येनास्य व्रतत्वमुच्यते । उच्यते । अत्रापि हिंसादीनामेव पापस्थानानां विरतिरेतदेवाह—

चराचराणां जीवानां विमर्दननिवर्त्तनात् ।
तप्तायोगोलकल्पस्य सद्व्रतं गृहिणोऽप्यदः ॥ २ ॥

चरास्त्रसा द्वीन्द्रियादयः, अचराः स्थावराः एकेन्द्रियाः; तेषां

नियमितसीमाबहिर्वर्त्तिनां जीवानां, यद्विमर्दनं यातायातादिना हिंसा, तस्य निवर्त्तनाद्धेतोरिदमपि हिंसाप्रतिषेधपरमेव गृहस्थ-स्यापि सद्व्रतम्। हिंसाप्रतिषेधपरत्वे च, असत्यादिप्रतिषेधपरताऽपि सुवचैव। यद्येवं, साधूनामपि दिग्विरतिव्रतप्रसङ्ग इत्याह—तप्ता-योगोलककल्पस्येति। गृहस्थो ह्यारम्भपरिग्रहपरत्वाद्यत्र यत्र याति, भुङ्क्ते, शेते, व्यापारान्तरं वा कुरुते, तत्र तप्तायोगोलक इव जीवोपमर्दं करोति। गृहिणोऽपीत्यपिशब्दस्तप्तायोगोलककल्पस्येत्यत्र सम्बध्यते ; तप्तायोगोलककल्पस्यापीत्यर्थः।

यदाह—

'तत्तायगोलकप्पो पमत्तजीवोऽणिवारियप्पसरो।

सव्वत्थ किं न कुज्जा पावं तक्कारणाणुगओ ॥ १ ॥

साधूनां तु समितिगुप्तिप्रधानव्रतशालिनां नायं दोष इति न तेषां दिग्विरतिव्रतम् ॥ २ ॥

लोभलक्षणपापस्थानविरतिपरमपि चैतद् व्रतमित्याह—

जगदाक्रममाणस्य प्रसरल्लोभवारिधेः।

स्खलनं विदधे तेन येन दिग्विरतिः कृता ॥ ३ ॥

लोभ एव दुर्लङ्घत्वाद्वारिधिः समुद्रः प्रसरंश्चासौ नानाविकल्प-कल्लोलाकुलतया लोभवारिधिश्च ; तस्य विशेषणं जगदाक्रममा-णस्य। वारिधिपक्षे जगल्लोकः, लोभपक्षे तु निःशेषमेव भुवनत्रयम्।

---

(१) तप्तायोगोलककल्पः प्रमत्तजीवोऽनिवारितप्रसरः।
सर्वत्र किं न कुर्यात् पापं तत्कारणानुगतः ॥

लोभवशगो हि ऊर्द्धलोकगतां सुरसम्पदं मध्यलोकगतां च चक्र-वर्त्त्यादिसम्पदमधोलोकगतां च पातालप्रभुत्वादिसम्पदमभिलषं-स्त्रिभुवनमपि मनोरथैराक्रामतीति लोभस्य जगदाक्रमणम्, तेन स्खलनं प्रसरनिरोधः, तद्विदधे, येन किं, येन पुरुषेण दिग्विरति-र्विहिता। दिग्विरतो हि प्रतिज्ञातसीमातः परतोऽगच्छंस्तत्र्य-सुवर्णरूप्यधनधान्यादिषु प्रायेण लोभं न कुरुते इतिलोभलक्षण-पापस्थानविरतिपरता अस्य व्रतस्य ।

अत्रान्तरश्लोकाः—

तदेतद्यावज्जीवं वा सदृव्रतं गृहमेधिनाम् ।
चतुर्मासादिनियमादथवा स्वल्पकालिकम् ॥ १ ॥
सदा सामायिकस्थानां यतीनां तु जितात्मनाम् ।
न दिशि क्वचन स्यातो विरत्यविरती इमे ॥ २ ॥
चारणानां हि गमनं यदूर्द्धं मेरुमूर्द्धनि ।
तिर्यग्रुचकशैले च नैषां दिग्विरतिस्ततः ॥ ३ ॥
गन्तुं सर्वासु यो दिक्षु विदध्यादवधिं सुधीः ।
स्वर्गादौ निरवधयो जायन्ते तस्य सम्पदः ॥ ४ ॥ ३ ॥

द्वितीयं गुणव्रतमाह—

भोगोपभोगयोः संख्या शक्त्या यत्र विधीयते ।
भोगोपभोगमानं तद् द्वैतीयीकं गुणव्रतम् ॥ ४ ॥

भोगोपभोगयोर्वक्ष्यमाणलक्षणयोः, संख्या परिमाणं, यत्र व्रते, विधीयते, कया, शक्त्या शरीरमनसोरनाबाधया, तद्भोगोप-

भोगमानं नाम गुणव्रतं, द्वितीयमेव द्वैतीयीकम्; स्वार्थे टीकण् ॥ ४ ॥

भोगोपभोगयोर्लक्षणमाह —

सकृदेव भुज्यते यः स भोगोऽन्नस्रगादिकः ।
पुनःपुनः पुनर्भोग्य उपभोगोऽङ्गनादिकः ॥ ५ ॥

सकृदेव एकवारमेव, भुज्यते सेव्यते इति भोगः; अन्नमोदनादि, स्रग्माल्यं, आदिशब्दात्ताम्बूलविलेपनोद्वर्त्तन-धूपनस्नानपानादिपरिग्रहः। पुनःपुनरनेकवारं, भोग्यः सेव्यः, अङ्गना वनिता, आदिशब्दाद्वस्त्रालङ्कारगृहशयनासनवाहनादि-परिग्रहः ॥ ५ ॥

इदं च भोगोपभोगव्रतं भोक्तुं योग्येषु परिमाणकरणेन भवति, इतरेषु तु वर्जनेनेति श्लोकद्वयेन तद्वर्जनीयानाह —

मद्यं मांसं नवनीतं मधूदुम्बरपञ्चकम् ।
अनन्तकायमज्ञातफलं रात्रौ च भोजनम् ॥ ६ ॥
आमगोरससंपृक्तं द्विदलं पुष्पितौदनम् ।
दध्यहर्द्वितयातीतं कुथितान्नं च वर्जयेत् ॥ ७ ॥

तत्र मद्यं द्विधा-काष्ठनिष्पन्नं, पिष्टनिष्पन्नं च, मांसं त्रिधा-जलस्थलखचरमांसभेदेन। मांसग्रहणेन चर्मरुधिरमेदोमज्जानः परिगृह्यन्ते। नवनीतं गोमहिष्यजाऽविसम्बन्धेन चतुर्धा। मधु

त्रेधा-माक्षिकं, भ्रामरं, पौत्तिकं च। उदुम्बरपञ्चकादयो यथास्थानं व्याख्यास्यन्ते ॥ ६ ॥ ७ ॥

तत्र मद्यस्य वर्जनीयत्वहेतून् दोषान् श्लोकदशकेनाह—

मदिरापानमात्रेण बुद्धिर्नश्यति दूरतः।
वैदग्धीबन्धुरस्यापि दौर्भाग्येणेव कामिनी ॥ ८ ॥

वैदग्धीबन्धुरस्यापि छेकस्यापि पुंसो, मदिरापानमात्रेण बुद्धिर्नश्यति क्षयं याति, दूरतो दूरं यावत्। सर्वथा विनश्यतीत्यर्थः। अत्रोपमानं दौर्भाग्येणेव कामिनीति। वैदग्धीबन्धुरस्यापि दूरत इति चात्रापि सम्बध्यते। तेन यथा विदग्धस्यापि दौर्भाग्यदोषेण कामिनी नश्यति पलायते, दूरतो दूरादपि ॥ ८ ॥

तथा—

पापाः कादम्बरीपानविवशीकृतचेतसः।
जननीं हा प्रियीयन्ति जननीयन्ति च प्रियाम् ॥ ९ ॥

कादम्बरी मदिरा, जननीं मातरं, हा इति खेदे, प्रियीयन्ति प्रियामिव जायामिवाचरन्ति, प्रियां च जननीयन्ति जननीमिवाचरन्ति। मदिरामदविह्वलत्वाज्जननीजाययोराचारव्यत्ययेन व्यवहरन्तीत्यर्थः ॥ ९ ॥

तथा—

न जानाति परं स्वं वा मद्यात्स्खलितचेतनः।
स्वामीयति वराकः स्वं स्वामिनं किङ्करीयति ॥ १० ॥

मद्यादितो: चलितचेतनो नष्टचैतन्य: सन्, स्वमात्मानं, परं वा आत्मव्यतिरिक्तं, न जानाति। अत्र हेतुमाह—यत आत्मानमजानन् स्वं स्वामिनमिवाचरति, वराकश्चैतन्यहीनत्वादनुकम्पनीय:। परमजानन् स्वामिनं नाथं किङ्करमिवाचरति ॥ १० ॥

तथा—

मद्यपस्य शवस्येव लुठितस्य चतुष्पथे।
मूत्रयन्ति मुखे श्वानो व्यात्ते विवरशङ्कया ॥ ११ ॥

स्पष्ट: ॥ ११ ॥

तथा—

मद्यपानरसे मग्नो नग्न: स्वपिति चत्वरे।
गूढं च स्वमभिप्रायं प्रकाशयति लीलया ॥ १२ ॥

मद्यस्य पानं तत्र रस आसक्तिस्तत्र मग्नो निषण्ण:; मद्यपानव्यसनीत्यर्थ:। अत एव वस्त्रमपि स्रस्तमजानन् नग्न: स्वपिति चत्वरे, नतु गृह एव। दोषान्तरं च, गूढं केनाप्यविदितं, स्वमभिप्रायं राजद्रोहादिकं, प्रकाशयति प्रकटीकरोति, लीलया बन्धनताडनादिव्यतिरेकेणापि ॥ १२ ॥

तथा—

वारुणीपानतो यान्ति कान्तिकीर्त्तिमतिश्रिय:।
विचित्राश्चित्ररचना विलुठत्कज्जलादिव ॥ १३ ॥

वारुणीपानतो मद्यपानात्, यान्त्यपगच्छन्ति, कान्ति: शरीर-

तेजः, कीर्त्तिर्यशः, मतिस्तात्कालिकी प्रतिभा, श्रीः सम्पत्।
विचित्रा इत्याद्युपमानं स्पष्टम् ॥ १३ ॥

तथा—

भूतात्तवन्नरीनर्त्ति रारटीति सशोकवत्।
दाहज्वरार्त्तवद्भूमौ मुग्धो लोलुठीति च ॥ १४ ॥

भूतात्तो व्यन्तरविशेषपरिगृहीतः, त्रीण्यपि क्रियापदानि भृशाभीक्ष्ण्ययोर्यङ्लुबन्तानि ॥ १४ ॥

तथा—

विदधत्यङ्गशैथिल्यं ग्लपयन्तीन्द्रियाणि च।
मूर्च्छामतुच्छां यच्छन्ती हाला हालाहलोपमा ॥१५॥

हाला सुरा, हालाहलोपमा हालाहलो विषविशेषस्तत्सदृशी। साधारणधर्मानाह—विदधती कुर्वाणा अङ्गशैथिल्यं शरीरविश्रंस्थुलत्वम्, ग्लपयन्ती कार्याक्षमाणि कुर्व्वती, इन्द्रियाणि चक्षुरादीनि; मूर्च्छा चैतन्याभावस्तामतुच्छां प्रचुरां यच्छन्ती। अङ्गशैथिल्यादयो हालाहालाहलयोः साधारणा धर्माः ॥ १५ ॥

तथा—

विवेकः संयमो ज्ञानं सत्यं शौचं दया क्षमा।
मद्यात्प्रलीयते सर्वं तृण्या वह्निकणादिव ॥ १६ ॥

विवेको हेयोपादेयज्ञानं, संयम इन्द्रियवशीकारः, ज्ञानं

शास्त्रावबोधः, सत्यं तथ्या भाषा, शौचमाचारशुद्धिः, दया करुणा, क्षमा क्रोधस्यानुत्पाद उत्पन्नस्य वा विफलीकरणम्। मद्यान्मद्य-पानात्, प्रलीयते नाशमुपयाति, सर्वं विवेकादि। यथा वह्निकणात् तृण्या तृणसमूहः। तृणानां समूहस्तृण्या, पाशादित्वाद्यः ॥१६॥

दोषाणां कारणं मद्यं मद्यं कारणमापदाम्।
रोगातुर इवापथ्यं तस्मान्मद्यं विवर्जयेत् ॥ १७ ॥

दोषाणां चौर्यपारदारिकत्वादीनां, कारणं हेतुः, मद्य-पानरता हि किं किमकार्यं न कुर्वते; दोषकारणत्वादेव चापदां वधबन्धादीनां, कारणं तस्मान्मद्यं विवर्जयेदित्युपसंहारः। रोगातुर इवापथ्यमित्युपमानम्।

अत्रान्तरश्लोकाः –

रसोद्भवाश्च भूयांसो भवन्ति किल जन्तवः।
तस्मान्मद्यं न पातव्यं हिंसापातकभीरुणा ॥ १ ॥
दत्तं न दत्तमात्तं च नात्तं कृतं च नो कृतम्।
मृषोद्यराज्यादिव हा स्वैरं वदति मद्यपः ॥ २ ॥
गृहे बहिर्वा मार्गे वा परद्रव्याणि मूढधीः।
वधबन्धादिनिर्भीको गृह्णात्याच्छिद्य मद्यपः ॥ ३ ॥
बालिकां युवतीं वृद्धां ब्राह्मणीं श्वपचीमपि।
भुङ्क्ते परस्त्रियं सद्यो मद्योन्मादकदर्थितः ॥ ४ ॥
रटन् गायन् लुठन् धावन् कुप्यंस्तुष्यन् रुदन् हसन्।
स्तभ्नन्नमन् भ्रमंस्तिष्ठन् सुरापः पापराट् नटः ॥ ५ ॥

श्रूयते किल शाम्बेन मद्यादन्धभविष्णुना।
हतं वृष्णिकुलं सर्वं प्लोषिता च [1]पुरी पितुः ॥ ६ ॥

पिबन्नपि मुहुर्मद्यं मद्यपो नैव तृप्यति।
जन्तुजातं कवलयन् कृतान्त इव सर्वदा ॥ ७ ॥

लौकिका अपि मद्यस्य बहुदोषत्व[2]माश्रिताः।
यत्तस्य परिहार्यत्वमेवं पौराणिका जगुः ॥ ८ ॥

कश्चिदृषिस्तपस्तेपे भीत इन्द्रः सुरस्त्रियः।
क्षोभाय प्रेषयामास तस्यागत्य च तास्तकम् ॥ ९ ॥

विनयेन समाराध्य वरदाभिमुखं स्थितम्।
जगुर्मद्यं तथा मांसं सेवस्वाब्रह्म चेच्छया ॥ १० ॥

स एवं गदितस्ताभिर्द्वयोर्नरकहेतुताम्।
आलोच्य मद्यरूपं च शुद्धकारणपूर्वकम् ॥ ११ ॥

मद्यं प्रपद्य तद्भोगान् नष्टधर्मस्थितिर्मदात्।
विदंशार्थमजं हत्वा सर्वमेव चकार सः ॥ १२ ॥

अवद्यमूलं नरकस्य पद्धतिं
सर्वापदां स्थानमकीर्त्तिकारणम्।
अभव्यसेव्यं गुणिभिर्विगर्हितं
विवर्जयेन्मद्यमुपासकः सदा ॥ १३ ॥ १७ ॥

---

(१) ख घ पितुः पुरी।

(२) ख घ ञ -माश्रिताः।

अथ मांसदोषानाह—

चिखादिषति यो मांसं प्राणिप्राणापहारतः ।
उन्मूलयत्यसौ मूलं दयाऽऽख्यं धर्मशाखिनः ॥ १८ ॥

चिखादिषति, खादितुमिच्छति, यः कश्चित्, मांसं पिशितं, असौ पुमान्, उन्मूलयति उत्खनति, किं तन्मूलं दयासंज्ञकं, कस्य धर्मशाखिनः पुण्यवृक्षस्य, मांसखादने कथं धर्मतरोर्दयाख्यं मूलमुन्मूल्यते इत्याह—प्राणिप्राणापहारतः प्राणिप्राणापहाराद्धेतोः, न हि प्राणिप्राणापहारमन्तरेण मांसं संभवतीति ॥ १८ ॥

अथ मांसं चिखादिषन्नपि प्राणिदयां करिष्यतीत्याह—

अशनीयन् सदा मांसं दयां यो हि चिकीर्षति ।
ज्वलति ज्वलने वल्लीं स रोपयितुमिच्छति ॥ १९ ॥

सदा सर्वदा, मांसमशनीयन् मांसमशनमिवाचरन्, पुत्रीयति च्छात्रमितिवत् "आधाराच्चोपमानादाचारे" ॥ ३ । ४ । २४ ॥ इति क्यनि रूपम्. दयां कृपां, यः कश्चित्, हि स्फुटं, चिकीर्षति कर्तुमिच्छति । ज्वलतीत्यादिना निदर्शनम्, यथा ज्वलत्यग्नौ वल्लीरोपणमशक्यम्, तथा मांसमश्नीयता दयाऽपि कर्तुमशक्येत्यर्थः ॥ १९ ॥

नन्वन्यः प्राणिनां घातकोऽन्यश्च मांसभक्षक इति कथं मांसभक्षकस्य प्राणिप्राणापहरणमिति । उच्यते । भक्षकोऽपि घातक एवेत्याह—

हन्ता पलस्य विक्रेता संस्कर्त्ता भक्षकस्तथा ।
क्रेताऽनुमन्ता दाता च घातका एव यन्मनुः ॥२०॥

हन्ता शस्त्रादिना प्राणिनां प्राणापहारकः, पलस्य विक्रेता यो मांसं विक्रीणीते । पलस्येत्युत्तरेष्वपि पदेषु सम्बन्धनीयम् । संस्कर्त्ता यो मांसं संस्करोति, भक्षकः खादकः, क्रेता यो मांसं क्रीणाति, अनुमन्ता यः प्राणिहिंसया मांसमुत्पाद्यमानमनुमोदते, दाता यो मांसमतिथ्यादिभ्यो ददाति ; एते साक्षात्पारम्पर्य्येण वा घातका एव प्राणिप्राणापहारका एव, यन्मनुरिति संवादार्थम् ॥ २० ॥

मानवमेवोक्तं दर्शयति –

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ॥ २१ ॥

अनुमन्ता अनुमोदकः, विशसिता हतस्याङ्गविभागकरः, निहन्ता व्यापादकः, क्रयविक्रयी क्रयविक्रयौ विद्येते यस्य स तथा, क्रेता विक्रेता चेत्यर्थः ; संस्कर्त्ता मांसपाचकः, उपहर्त्ता परिवेष्टा, खादको भक्षकः ; एते सर्वे घातकाः ॥ २१ ॥

द्वितीयमपि मानवं श्लोकमाह––

नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥ २२ ॥

यावत्प्राणिनो न हतास्तावन्मांसं नोत्पद्यते, हिंसा चातिशयेन दुःखावहा, तस्मान्मांसं विवर्जयेत्, उत्पद्यत इति मांसस्य हिंसा-

निमित्तत्वात् कर्तृव्यपदेश इति समानकर्तृकत्वमविरुद्धम्। न च स्वर्ग्य इति न स्वर्गानुत्पत्तिमात्रमभिप्रेतमपि तु नरकादिदुःख-हेतुता ॥ २२ ॥

इदानीमन्यपरिहारेण भक्षकस्यैव वधकत्वमाह—

ये भक्षयन्त्यन्यपलं स्वकीयपलपुष्टये ।
त एव घातका यन्न वधको भक्षकं विना ॥ २३ ॥

अन्यपलमन्यमांसं स्वमांसपुष्टये ये भक्षयन्ति त एव परमार्थतो घातका न तु हन्तृविक्रेतृप्रभृतयः। अत्र युक्तिमाह—यद्यस्मात् भक्षकं विना वधको भवति; ततो हन्तृप्रभृतिभ्यो भक्षकः पापीयान्, स्वकीयपलपुष्टय इति हिंसाभिप्रायं स्वपलपोषण-मात्रप्रयोजनः कतिपयदिनजीवितः परजीवितप्रहाणं कुर्यात्। यदाह—

'हंतूणं परपाणे अप्पाणं जे कुणंति सप्पाणं।
अप्पाणं दिवसाणं कएण नासेंति अप्पाणं ॥ १ ॥

तथा—

'एकस्स कए निअजीवियस्स बहुआउ जीवकोडीओ।
दुक्खे ठवंति जे केवि ताण किं *सासयं जीयं ? ॥ १ ॥ २३ ॥

(१) हत्वा परप्राणान् आत्मानं ये कुर्वन्ति सप्राणम्।
अल्पानां दिवसानां कृतेन नाशयन्ति आत्मानम् ॥

(२) एकस्य कृते निजजीवितस्य बहुका जीवकोटीः।
दुःखे स्थापयन्ति ये केऽपि तेषां किं शाश्वतो जीवः ? ॥

* ह सासओ अप्पा।

एतदेव सजुगुप्समाह—

मिष्टान्नान्यपि विष्टासादमृतान्यपि मूत्रसात् ।

स्युर्यस्मिन्नङ्गकस्यास्य कृते कः पापमाचरेत् ? ॥२४॥

मिष्टान्नानि शालिमुद्गमाषगोधूमादीनि तान्यपि विष्टासाद्विष्टात्वेन स्युः संपद्येरन् । अमृतानि पयःप्रभृतीनि तान्यपि मूत्रसाम्मूत्रत्वेन स्युः संपद्येरन् । यस्मिन् अस्य प्रत्यक्षस्य, अङ्गकस्य कुत्सितस्य शरीरस्य, कृते निमित्तं, कः सचेतनः पापं प्राणिघातलक्षणमाचरेत् विदधीत ॥ २४ ॥

इदानीं मांसभक्षणं न दोषायेति वदतो निन्दति—

मांसाशने न दोषोऽस्तीत्युच्यते यैर्दुरात्मभिः ।

व्याधगृध्रवृकव्याघ्रशृगालास्तैर्गुरूकृताः ॥ २५ ॥

मांसभक्षणे न दोषोऽस्तीति यैरुच्यते दुरात्मभिर्दुःस्वभावैः, यथा --

"न मांसभक्षणे दोषो न मद्ये न च मैथुने ।

प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला" ॥ १ ॥ इति ।

तैर्व्याधा लुब्धकाः, गृध्रा हिंस्राः पक्षिविशेषाः, वृका अरण्यश्वानः, व्याघ्राः शार्दूलाः, शृगाला जम्बुकाः, गुरूकृताः उपदेशकाः कृताः । न हि व्याधादीन् गुरून् विना कश्चिदेवंविधं शिक्षयति, नचाशिक्षितं महाजनपूज्या एवमुपदिशन्ति । अपि च । निवृत्तिस्तु महाफलेति वदद्भिर्येषां निवृत्तिर्महाफला तेषां प्रवृत्तिर्न दोषवतीति स्वयमेव स्ववचनविरोध आविष्कृत इति किमन्यद् ब्रूमहे ॥ २५ ॥

निरुक्तबलेनापि मांसस्य परिहार्यत्वमाह—

मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वे निरुक्तं मनुरब्रवीत् ॥ २६ ॥

मां स भक्षयितेति अत्र स इति सर्वनामसामान्यापेक्षं योग्येनार्थेन निराकाङ्क्षीकरोति। यस्य मांसमहमद्मि, इहेति इहलोके, अमुत्रेति परलोके, एतन्मांसस्य मांसत्वे मांसरूपतायां, निरुक्तं नामधेयनिर्वचनं मनुरब्रवीत् ॥ २६ ॥

मांसभक्षणे महादोषमाह—

मांसास्वादनलुब्धस्य देहिनं देहिनं प्रति ।
हन्तुं प्रवर्त्तते बुद्धिः शाकिन्या इव दुर्धियः ॥ २७ ॥

मांसभक्षणलम्पटस्य देहिनं देहिनं प्रति यं यं पश्यति जलचरं मत्स्यादिकं, स्थलचरं मृगवराहादि अजाऽविकादि च, खेचरं तित्तिरिलावकादि, अन्ततो मूषिकाद्यपि तं तं प्रति हन्तुं हननाय बुद्धिः प्रवर्त्तते ; दुर्धियो दुर्बुद्धेः, शाकिन्या इव—यथा हि शाकिनी यं यं पुरुषं स्त्रियमन्यं वा प्राणिनं पश्यति, तं तं हन्तुं तस्या बुद्धिः प्रवर्त्तते, तथा मांसास्वादनलुब्धस्यापीति ॥ २७ ॥

अपि च मांसभक्षिणामुत्तमपदार्थपरिहारेण नीचपदार्थोपादानं महद्बुद्धिवैगुण्यं दर्शयतीति दर्शयन्नाह—

ये भक्षयन्ति पिशितं दिव्यभोज्येषु सत्स्वपि ।
सुधारसं परित्यज्य भुञ्जते ते हलाहलम् ॥ २८ ॥

दिव्यभोज्येषु सकलधातुवृंहकेषु सर्वेन्द्रियप्रीतिप्रदेषु क्षीरखैरेयी-किलाटीकूर्चिकारसालादध्यादिषु मोदकमण्डकमण्डिकाखाद्यक-पर्पटिकाघृतपूरादिषु इण्डेरिकापूरणावटकवटिकापर्पटादिषु इक्षु गुडखण्डशर्करादिषु द्राक्षासहकारकदलदाडिमनालिकेरनारङ्ग-खर्जूराचोटराजादनपनसादिषु च सत्स्वपि तान्यनादृत्य ये मूढा विस्रगन्धिजुगुप्साकरं शूकाप्रधानानां वान्तिकरं मांसं भक्षयन्ति ते जीवितवृद्धिहेत्वमृतरसपरिहारेण जीवितान्तकरं हालाहलं विषमेदं भुञ्जते। बालोऽपि हि दृषत्परिहारेण सुवर्णमेवादत्त इति बालादपि मांसभक्षिणो बाला: ॥ २८ ॥

भङ्ग्यन्तरेण मांसभक्षणदोषमाह —

न धर्मो निर्दयस्यास्ति पलादस्य कुतो दया।
पललुब्धो न तद्वेत्ति विद्याद्वोपदिशेन्नहि ॥ २९ ॥

निर्दयस्य कृपारहितस्य, धर्मो नास्ति ; धर्मस्य दया मूलमिति ह्यामनन्ति। ततः प्रस्तुते किमायातमत आह—पलादस्य कुतो दया। पलादस्य मांसोपजीविनः, कुतो दया नैव दयेत्यर्थः ; भक्षकस्य वधकत्वेनोक्तत्वात्। वधकश्च कथं सदयो नाम इति पलादस्य निर्धर्मतालक्षणो दोषः। ननु सचेतनः कथमात्मनि धर्माभावं सहेत। उच्यते। पललुब्धो न तद्वेत्ति मांसलोभेन न तत्पूर्वाधोक्तं जानाति। अथ कथञ्चिद्विद्याज्जानीयात्तर्हि स्वयं मांस-लुब्धो मांसनिवृत्तिं कर्तुमशक्नुवन् सर्वेऽपि मम सदृशा भवन्त्विति परेभ्यो मांसनिषेधं नोपदिशेदाजिणकवत्। श्रूयते हि कश्चिदा-

जिणको मार्गे गच्छन्नेकया सर्पिण्या भक्षितस्तत्सर्वेऽपि भक्ष्यन्तामनयेति बुद्धा परेभ्यो नाख्यातवानिति द्वितीयोऽपि तथैव दष्टो नान्येषां कथितवान्; एवं यावत्सप्त दष्टाः। मांसभक्षकोऽपि मांसभक्षणात्स्वयं नरके पतन् "स्वयं नष्टा दुरात्मानो नाशयन्ति परानपि" इति न परेभ्य उपदिशति ॥ २९ ॥

इदानीं मांसभक्षकाणां मूढतामुपदर्शयति

केचिन्मांसं महामोहादश्नन्ति न परं स्वयम्।
देवपित्रतिथिभ्योऽपि कल्पयन्ति यदूचिरे ॥ ३० ॥

केचित् कुशास्त्रविप्रलब्धा महतो मोहान्न केवलं स्वयं मांसमश्नन्ति किन्तु देवेभ्यः पितृभ्योऽतिथिभ्यश्च कल्पयन्ति, यद्यस्मादूचिरे तद्धर्मशास्त्रकाराः ॥ ३० ॥

उक्तमेवाह—

क्रीत्वा स्वयं वाऽप्युत्पाद्य परोपहृतमेव वा।
देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दुष्यति ॥३१॥

मृगपक्षिमांसविषयमेतच्छास्त्रं, तेन सूनापणमांसं विना व्याधशाकुनिकादिभ्यः क्रीत्वा मूल्येन। सूनापणमांसे तु देवपूजादावनधिकृतेः। तथा स्वयमुत्पाद्य—ब्राह्मणो याञ्चया, क्षत्रियो मृगयाकर्मणा, अथवा परेणोपहृतं ढौकितं तेन मांसेन देवानां, पितॄणां चार्चनं कृत्वा मांसं खादन्न दुष्यति; एतच्च महामोहादिति वदद्भिरस्माभिर्दूषितमेव। स्वयमपि हि प्राणिघातहेतुकं

मांसं भक्षयितुमयुक्तं किं पुनर्देवादिभ्यः कल्पयितुम् । देवा हि सुकृतसम्भारलब्धात्मानोऽधातुकशरीरा श्वकावलिकाहाराः कथं मांसं भक्षयेयुः, अभक्षयङ्गास्तत्कल्पनं मोह एव । पितरश्च स्वसुकृत-दुष्कृतवशेन प्राप्तगतिविशेषाः स्वकर्मफलमनुभवन्तो न पुत्रादिकृते-नापि सुकृतेन तार्यन्ते किं पुनर्मांसढौकनदुष्कृतेन । न च पुत्रादिकृतं सुकृतं तेषामुपतिष्ठते । न ह्याम्रेषु सेकः कोविदारेषु फलं दत्ते । अतिथिभ्यश्च सत्कारार्हेभ्यो नरकपातहेतोर्मांसस्य ढौकनं महते अधर्माय । एवं परेषां महामोहवेष्टितम् । श्रुति-स्मृतिविहितत्वादनाद्यमेतदिति चेन्न । श्रुतिभाषितेष्वप्रामाणिकेषु प्रत्ययस्य कर्तुमशक्यत्वात् । श्रूयन्ते हि श्रुतिवचांसि—यथा पापघ्नो गोस्पर्शः, द्रुमाणां च पूजा ; छागादीनां वधः स्वर्ग्यः । ब्राह्मणभोजनं पितृप्रीणनं, मायाविन्योऽपि देवतानि ; वह्नौ हुतं देवप्रीतिप्रदम् । तदेवंविधेषु श्रुतिभाषितेषु युक्तिकुशलाः कथं श्रद्दधीरन् ? ।

यदाह—

स्पर्शोऽमेध्यभुजां गवामघहरो वन्द्या विसंज्ञा द्रुमाः

स्वर्गश्छागवधाद्धिनोति च पितॄन् विप्रोपभुक्ताशनम् ।

आप्ताश्छद्मपराः सुराः शिखिहुतं प्रीणाति देवान् हविः

स्फीतं फल्गु च वल्गु च श्रुतिगिरां को वेत्ति लीलायितम् ? ॥१॥

तस्मान्महामोह एवायं मांसेन देवपूजाऽऽदिकमित्यलं विस्तरेण ॥ ननु मन्त्रसंस्कृतो वह्निर्न दहति पचति वा, तन्मन्त्र-संस्कृतं मांसं न दोषाय स्यात् ।

यदुक्तं मनुः—

असंस्कृतान् पशून्मन्त्रैर्नाद्याद्विप्रः कथञ्चन ।

मन्त्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थितः ॥ १ ॥

शाश्वतो नित्यो वैदिक इत्यर्थः ॥ ३१ ॥

अत्राह—

मन्त्रसंस्कृतमप्यद्याद्यवाल्पमपि नो पलम् ।

भवेज्जीवितनाशाय हालाहललवोऽपि हि ॥ ३२ ॥

मन्त्रसंस्कृतमपि मन्त्रपूतमपि, पलं नाद्यात्, न हि मन्त्रा अन्ने-दहनशक्तिवन्नरकादिप्रापणशक्तिं मांसस्य प्रतिबध्नन्ति । तथा सति सर्वपापानि कृत्वा पापघ्नमन्त्रानुस्मरणमात्रात् कृतार्थाभवेयुः । एवं च सर्वपापप्रतिषेधोऽपि निरर्थकः स्यात्, सर्वपापानां मन्त्रादेव नाशप्रसक्तेः । अथ यथा स्तोकं मद्यं न मदयति तथा स्वल्पं मांसं न पापाय स्यात् । उच्यते—यवाल्पमपि यवतुल्यप्रमाणमपि नाद्यात् पलमिति संबध्यते, तदपि दोषाय, अत्रोत्तरार्द्धेन निदर्शनम् ॥ ३२ ॥

इदानीमनुत्तरं मांसस्य दोषमुपदर्शयन्नुपसंहरति—

सद्यः संमूर्च्छितानन्तजन्तुसन्तानदूषितम् ।

नरकाध्वनि पाथेयं कोऽश्नीयात्पिशितं सुधीः ? ॥३३॥

सद्यो जन्तुविशसनकाल एव संमूर्च्छिता उत्पन्ना अनन्ता निगोद-रूपा ये जन्तवस्तेषां सन्तानः पुनः पुनर्भवनं तेन दूषितम् ।

यदाहुः—

[1]आमासु अ पक्कासु अ विपच्चमाणासु मंसपेसीसु ।

सययं चिय उववाओ भणिओ उ निगोअजीवाणं ॥ १ ॥

तत एव नरकाध्वनि पाथेयम्, पिशितभक्षणस्य पाथेयत्वे पिशितमपि पाथेयमुक्तं, कोऽश्नीयात्पिशितं सुधीरित्युपसंहारः ।

अत्रान्तरश्लोकाः—

मांसलुब्धैरमर्यादैर्नास्तिकैः स्तोकदर्शिभिः ।

कुशास्त्रकारैर्वैयात्याद्गदितं मांसभक्षणम् ॥ १ ॥

नान्यस्ततो गतघृणो नरकार्चिषदिन्धनम् ।

स्वमांसं परमांसेन [2]यः पोषयितुमिच्छति ॥ २ ॥

स्वाङ्गं पुष्णन्नृगूथेन वरं हि ग्रामशूकरः ।

प्राणिघातोद्भवैर्मांसैर्न पुनर्निर्घृणो नरः ॥ ३ ॥

निःशेषजन्तुमांसानि भक्ष्याणीति य ऊचिरे ।

नृमांसं वर्जितं शङ्के स्ववधाशङ्कयैव तैः ॥ ४ ॥

विशेषं यो न मन्येत नृमांसपशुमांसयोः ।

धार्मिकस्तु ततो नान्यः पापीयानपि नापरः ॥ ५ ॥

शुक्रशोणितसम्भूतं विष्ठारसविवर्द्धितम् ।

लोहितं स्त्यानतामाप्तं कोऽश्नीयादकृमिः पलम् ? ॥ ६ ॥

---

(१) आमासु च पक्कासु च विपच्यमानासु मांसपेशीषु ।
सततमेव उपपातो भणितस्तु निगोदजीवानाम् ॥ १ ॥

(२) ख च अ ख यो मर्द्दयितु- ।

अहो द्विजातयो धर्मं शौचमूलं वदन्ति च ।
सप्तधातुकदेहोत्थं मांसमश्नन्ति चाधमाः ॥ ७ ॥

येषां तु तुल्ये मांसान्ने सदृशाभ्यवहारिणाम् ।
विषामृते समे तेषां मृत्युजीवितदायिनी ॥ ८ ॥

भक्षणीयं सतां मांसं प्राण्यङ्गत्वेन हेतुना ।
ओदनादिवदित्येवं ये चानुमिमते जडाः ॥ ९ ॥

गोसम्भवत्वात्ते मूत्रं पयोवन्न पिबन्ति किम् ? ।
प्राण्यङ्गतानिमित्ता च नौदनादिषु भक्ष्यता ॥ १० ॥

शङ्खादि शुचि नास्थ्यादि प्राण्यङ्गत्वे समे यथा ।
ओदनादि तथा भक्ष्यमभक्ष्यं पिशितादिकम् ॥ ११ ॥

यस्तु प्राण्यङ्गमात्रत्वात् प्राह मांसौदने समे ।
स्त्रीत्वमात्रान्मातृपत्न्योः स किं साम्यं न कल्पयेत् ? ॥१२॥

पञ्चेन्द्रियस्यैकस्यापि वधे तन्मांसभक्षणात् ।
यथा हि नरकप्राप्तिर्न तथा धान्यभोजनात् ॥ १३ ॥

न हि धान्यं भवेन्मांसं रसरक्तविकारजम् ।
अमांसभोजिनस्तस्मान्न पापा धान्यभोजिनः ॥ १४ ॥

धान्यपाके प्राणिवधः परमेकोऽवशिष्यते ।
गृहिणां देशयमिनां स तु नात्यन्तबाधकः ॥ १५ ॥

मांसखादकगतिं विमृशन्तः
सस्यभोजनरता इह सन्तः ।
प्राप्नुवन्ति सुरसम्पदमुच्चै-
र्जैनशासनजुषो गृहिणोऽपि ॥ १६ ॥ ३२ ॥

क्रमप्राप्तं नवनीतभक्षणदोषमाह—

अन्तर्मुहूर्त्तात्परतः सुसूक्ष्मा जन्तुराशयः ।
यत्र मूर्च्छन्ति तन्नाद्यं नवनीतं विवेकिभिः ॥३४॥

अन्तर्मध्यं मुहूर्त्तस्य अन्तर्मुहूर्त्तं, तस्मात् परत ऊर्द्ध्वं, अतिशयेन सूक्ष्माः सुसूक्ष्माः, जन्तुराशयो जन्तुसमूहाः यस्मिन्नवनीते, मूर्च्छन्ति उत्पद्यन्ते, तन्नवनीतं, नाद्यं न भक्षणीयं, विवेकिभिः ॥ ३४ ॥

एतमेवार्थं भावयति—

एकस्यापि हि जीवस्य हिंसने किमघं भवेत् ? ।
जन्तुजातमयं तत् को नवनीतं निषेवते ? ॥ ३५ ॥

एकस्यापि हि जन्तोर्वधे किं निर्देष्टुमशक्यमघं पापं भवेत् तत्तस्माज्जन्तुजातं प्रकृतमस्मिंस्तज्जन्तुजातमयं नवनीतं को निषेवते कः सविवेकोऽश्नाति ? ॥ ३५ ॥

क्रमप्राप्तान्मधुदोषानाह—

अनेकजन्तुसङ्घातनिघातनसमुद्भवम् ।
जुगुप्सनीयं लालावत् कः स्वादयति माक्षिकम् ? ॥३६॥

अनेकस्य जन्तुसङ्घातस्य यन्निघातनं विनाशस्तस्मात् समुद्भवो यस्य तत्तथा। निघातनमिति हन्त्यर्थाश्चेति हन्तेश्चुरादिपाठात् णिजन्तस्य रूपम्। अयं परलोकविरोधी दोषः, जुगुप्सनीयं कुत्सनीयं, लालावल्लालामिव, अयमिहलोकविरोधी दोषः, कः

सचेतनः, स्वादयति भक्षयति, मक्षिकाभिः कृतं माक्षिकं मधु। एतच्च भ्रामरादीनामुपलक्षणम् ॥ ३६ ॥

इदानीं मधुभक्षकाणां पापीयस्तां दर्शयति—

भक्षयन्माक्षिकं क्षुद्रजन्तुलक्षक्षयोद्भवम्।
स्तोकजन्तुनिहन्तृभ्यः शौनिकेभ्योऽतिरिच्यते ॥३७॥

क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः।
शतं वा प्रसृतिर्येषां केचिदा नकुलादपि ॥ १ ॥

तेषां क्षुद्रजन्तूनां लक्षाणि, लक्षग्रहणं बहुत्वोपलक्षणम्। तेषां क्षयो विनाशस्तस्मादुद्भवो यस्य तत्तथा, तद्भक्षयन् स्तोकपश्वादिजन्तुनिहन्तृभ्यः शौनिकेभ्यः खट्टिकेभ्योऽतिरिच्यते अधिकीभवति; भक्षकोऽपि घातक इत्युक्तप्रायम् ॥ ३७ ॥

लौकिकानामप्युच्छिष्टभोजनत्याजिनामुच्छिष्टत्वान्मधु परिहर्त्तव्यमेवेत्याह—

एकैककुसुमक्रोडाद्रसमापीय मक्षिकाः।
यद्वमन्ति मधूच्छिष्टं तदश्नन्ति न धार्मिकाः ॥३८॥

एकैकस्य कुसुमस्य यः क्रोड उत्सङ्गस्तस्माद्रसं मकरन्दमापीय पीत्वा, मक्षिकाः यद्वमन्ति उद्गिरन्ति, तदुच्छिष्टं मधु; धर्मं चरन्ति धार्मिकास्ते नाश्नन्ति। अनुच्छिष्टभोजनं हि धर्मो लौकिकानाम् ॥ ३८ ॥

ननु 'त्रिदोषशमनं मधु' नातःपरमौषधमस्तीति रोगोपशान्तये मधुभक्षणे को दोष इत्याह—

अप्यौषधकृते जग्धं मधु श्वभ्रनिबन्धनम् ।
भक्षितः प्राणनाशाय कालकूटकणोऽपि हि ॥३९॥

आस्तां रसास्वादलाम्पट्येन यावदौषधकृतेऽपि औषधनिमित्तमपि मधु जग्धं यद्यपि रोगापहारकं, तथापि श्वभ्रस्य नरकस्य निबन्धनम् ; हि यस्मात् प्रमादाज्जीवितार्थितया वा कालकूटस्य विषस्य कणोऽपि लवोऽपि भक्षितः सन् प्राणनाशाय भवति ॥३९॥

ननु खर्जूरद्राक्षादिरसवन्मधु मधुरमिति सर्वेन्द्रियाप्यायकत्वात् कथं परिहार्यं स्यादित्याह—

मधुनोऽपि हि माधुर्यमबोधैरहहोच्यते ।
आसाद्यन्ते यदास्वादाच्चिरं नरकवेदनाः ॥ ४० ॥

सत्यमस्ति मधुनो माधुर्यं व्यवहारतः, परमार्थतस्तु नरकवेदनाहेतुत्वादत्यन्तकटुकत्वमेव । अबोधैरिति परमार्थपरिशीलनाविकलैः, नरकवेदनाहेतोरपि मधुनो माधुर्यवर्णनमबोधानामित्यहहेत्यनेन विषादो द्योत्यते । यस्य मधुन आस्वादान्नरकवेदनाश्चिरमासाद्यन्ते प्राप्यन्ते ॥ ४० ॥

पवित्रत्वात् मधु देवस्नानोपयोगीति ये मन्यन्ते तानुपहसति—

मक्षिकामुखनिष्ठ्यूतं जन्तुघातोद्भवं मधु ।
अहो पवित्रं मन्वाना देवस्नाने प्रयुञ्जते ॥ ४१ ॥

मक्षिकाणां मुखानि तैर्निष्ठ्यूतं वान्तं जन्तुघातात्प्राणिघातादुद्भवो यस्य तत्तादृशमपवित्रं मधु, पवित्रं शुचि, मन्वाना अभि-

मन्यमानाः, देवानां शङ्करादीनां, ज्ञाने ज्ञाननिमित्तं, प्रयुञ्जते व्यापारयन्ति, अहो इत्युपहासे।

यथा—

करभाणां विवाहे तु रासभास्तत्र गायनाः।
परस्परं प्रशंसन्ति अहो रूपमहो ध्वनिः॥ १ ॥ ४१ ॥

क्रमप्राप्तान् पञ्चोदुम्बरदोषानाह—

उदुम्बरवटप्लक्षकाकोदुम्बरशाखिनाम्।
पिप्पलस्य च नाश्नीयात्फलं कृमिकुलाकुलम्॥ ४२॥

उदुम्बरवटप्लक्षकाकोदुम्बरिकापिप्पलानां पञ्चोदुम्बरसंज्ञितानां फलं नाश्नीयात्। अनशने कारणमाह—कृमिकुलाकुलं, एकस्मिन्नपि फले तावन्तः कृमयः सम्भवन्ति ये परिसंख्यातुमपि न शक्यन्ते।

यल्लौकिका अपि पेठुः—

कोऽपि क्वापि कुतोऽपि कस्यचिदहो चेतस्यकस्मान्मनः
केनापि प्रविशत्युदुम्बरफलप्राणिक्रमेण क्षणात्।
येनास्मिन्नपि पाटिते विघटिते विकासिते स्फोटिते
निष्पिष्टे परिगालिते विदलिते निर्यात्यसौ वा नवा ॥१॥ इति ॥४२॥

पञ्चोदुम्बरफलविरतानां स्तुतिमाह—

अप्राप्नुवन्नन्यभक्ष्यमपि क्षामो बुभुक्षया।
न भक्षयति पुण्यात्मा पञ्चोदुम्बरजं फलम्॥४३॥

यः पुण्यात्मा पवित्रात्मा पुरुषः, स पञ्चोदुम्बरजं फलं न भक्षयति,

आस्तां सुलभधान्यफलसमृद्धे देशे काले वा, यावद्देशदोषात् काल-दोषाद्वा अप्राप्नुवन्नप्यन्यभक्ष्यं धान्यफलादिभक्ष्यं ; अपि शब्द उत्तर-त्रापि सम्बध्यते ; बुभुक्षया क्षामोऽपि कृशोऽपि ; अबुभुक्षितस्य स्वस्थस्य व्रतपालनं नातिदुष्करम् ; यस्तु अप्राप्तभोज्यः क्षुत्क्षामश्च व्रत पालयति स पुण्यात्मेति प्रशस्यते ॥ ४३ ॥

क्रमप्राप्तमनन्तकायनियमं श्लोकत्रयेण दर्शयति—

आर्द्रः कन्दः समग्रोऽपि सर्वः किशलयोऽपि च ।
स्नुही लवणवृक्षत्वक् कुमारी गिरिकर्णिका ॥ ४४ ॥
शतावरी विरूढानि गुडूची कोमलाम्लिका ।
पल्ल्यङ्कोऽमृतवल्ली च वल्लः शूकरसंज्ञितः ॥ ४५ ॥
अनन्तकायाः सूत्रोक्ता अपरेऽपि कृपापरैः ।
मिथ्यादृशामविज्ञाता वर्जनीयाः प्रयत्नतः ॥ ४६ ॥

आर्द्रोऽशुष्कः, शुष्कस्य तु निर्जीवत्वादनन्तकायत्वं न भवति। कन्दो भूमिमध्यगो वृक्षावयवः समग्रोऽपि, सर्वे कन्दा इत्यर्थः। ते च सूरणआर्द्रकलशुनवज्रकन्दहरिद्राकर्चूरपलाशकन्दगृञ्जनलोढकक-सेरुकमुद्गरमुस्तामूलकआलुकपिण्डालुकहस्तिकन्दमनुष्यकन्दप्रभृ-तयः ; किशलयः पत्रादर्वाग् बीजस्यो(१)च्छूनावस्था सर्वा न तु काचिदेव, स्नुही वज्रतरुः ; लवणनाम्नो वृक्षस्य त्वक्, त्वगेव नत्वन्ये अवयवाः ; कुमारी मांसलप्रणालाकारपत्रा, गिरिकर्णिका

(१) क ख -स्याना- ।

वल्लीविशेषः, शतावरी वल्लीविशेष एव, विरूढानि अङ्कुरितानि द्विदलधान्यानि, गुडूची वल्लीविशेषः, कोमलाऽम्लिका कोमला अबद्धास्थिका अम्लिका चिञ्चिणिका ; पल्लङ्कः शाकभेदः, अमृतवल्ली वल्लीविशेषः, वल्लः शूकरसंज्ञितः शूकरवल्ल इत्यर्थः ; शूकरसंज्ञितग्रहणं धान्यवल्लनिषेधार्थम् । एते आर्यप्रसिद्धाः । म्लेच्छप्रसिद्धास्तु अन्येऽपि सूत्रोक्ताः ; सूत्रं जीवाभिगमः । अपरेऽपि कृपापरैः सुश्रावकैर्वर्जनीयाः । ते च मिथ्यादृष्टीनामविज्ञाताः ; मिथ्यादृशो हि वनस्पतीनपि जीवत्वेन न मन्यन्ते कुतः पुनरनन्तकायान् ॥ ४४ ॥ ४५ ॥ ४६ ॥

अथ क्रमप्राप्तमज्ञातफलं वर्जयितुमाह—

स्वयं परेण वा ज्ञातं फलमद्याद्विशारदः ।
निषिद्धे विषफले वा मा भूदस्य प्रवर्त्तनम् ॥४७॥

अज्ञातमिति संबन्धिविशेषानिर्देशात् स्वयमात्मना, परेण वा अन्येन, ज्ञातं फलमद्याद्भक्षयेद्विशारदो धीमान् ; यत्तु स्वयं परेण वा न ज्ञातं तदज्ञातफलं वर्जयेत् ; अज्ञातफलभक्षणे दोषोऽयम्, निषिद्धे फले विषफले वा अज्ञानादस्य विशारदस्य मा भूत्प्रवृत्तिः । [1]अजानतो हि प्रतिषिद्धे फले प्रवर्त्तमानस्य व्रतभङ्गः, विषफले तु जीवितनाशः ॥ ४७ ॥

---

(१) क च अजानतो ।

अथ क्रमप्राप्तं रात्रिभोजनं निषेद्धुमाह—

अन्नं प्रेतपिशाचाद्यैः सञ्चरद्भिर्निरङ्कुशैः ।
उच्छिष्टं क्रियते यत्र तत्र नाद्यादिनात्यये ॥ ४८ ॥

प्रेता अधमा व्यन्तराः, पिशाचा व्यन्तरा एव ; आद्यग्रहणाद्राक्षसादिपरिग्रहः, निशाचरत्वान्निरङ्कुशैः सर्वत्र सञ्चरद्भिः स्पर्शादिनोच्छिष्टमभोज्यं क्रियते यत्र दिनात्यये रात्रौ, तत्र नाद्यान्न भुञ्जीत ।

यदाहुः—

[1]मालिंति महिअलं जामिणीसु रयणीअरा समंतेण ।
तं विट्टालिंति *फुडं रयणीए भुंजमाणं तु ॥ ४८ ॥

तथा—

घोरान्धकाररुद्धाक्षैः पतन्तो यत्र जन्तवः ।
नैव भोज्ये निरीक्ष्यन्ते तत्र भुञ्जीत को निशि ? ॥४९॥

प्रबलान्धकारनिरुद्धलोचनैः कृमिपिपीलिकामक्षिकादयः पतन्तो घृततैलतक्रादौ भोज्ये न दृश्यन्ते यत्र, तत्र तस्यां निशि सचेतनः को भुञ्जीत ? ॥ ४९ ॥

---

(१) मालयन्ति महीतलं यामिनीषु रजनीचराः समन्तात् ।
तेऽपि च्छलन्ति स्फुटं रजन्यां भुञ्जानं तु ॥ १ ॥

* ते वि छलंति फुडं इति रत्नशेखरसूरिकृतश्रावकप्रतिक्रमणसूत्रटीकायाम् ।

रात्रिभोजने दृष्टान् दोषान् श्लोकत्रयेणाह—

मेधां पिपीलिका हन्ति यूका कुर्याज्जलोदरम् ।
कुरुते मक्षिका वान्तिं कुष्ठरोगं च कोलिकः ॥ ५० ॥
कण्टको दारुखण्डं च वितनोति गलव्यथाम् ।
व्यञ्जनान्तर्निपतितस्तालु विध्यति वृश्चिकः ॥ ५१ ॥
विलग्नश्च गले वालः स्वरभङ्गाय जायते ।
इत्यादयो दृष्टदोषाः सर्वेषां निशि भोजने ॥ ५२ ॥

पिपीलिका कीटिका, अन्नादिमध्ये भुक्ता सती, मेधां बुद्धिविशेषं, हन्ति ; पिपीलिकेति जातावेकवचनम् । तथा यूका जलोदरमुदररोगविशेषं कुर्यात्, तथैव मक्षिका वान्तिं वमनं करोति, तथैव कोलिको मर्कटकः, कुष्ठरोगं करोति, कण्टका बदर्यादिसंबन्धी, दारुखण्डं च काष्ठशकलं, तथैव गलव्यथां वितनोति, व्यञ्जनानि शाकादीनि तेषां मध्ये निपतितो वृश्चिकस्तालु विध्यति । ननु पिपीलिकादयः सूक्ष्मत्वान्न दृश्यन्ते, वृश्चिकस्तु स्थूलत्वाद् दृश्यत एव तत्कथमयं भोज्ये निविशेत । उच्यते । व्यञ्जनमिह वार्त्ताकुशाकरूपमभिप्रेतं तद्वृन्तं च वृश्चिकाकारमेव भवतीति वृश्चिकस्य तन्मध्यपतितस्यालक्ष्यत्वाद्भोज्यता सम्भवतीति । विलग्नश्च गले वाल इत्यादि स्पष्टम् ; एवमादयो रात्रिभोजने दृष्टा दोषाः सर्वेषां मिथ्यादृशामपि ।

यदाहुः—

'मेहं पिपीलियाओ* हणंति वमणं च मच्छिया कुणइ ।
जूया जलोयरत्तं† कोलियओ कोढरोगं च ॥ १ ॥
वालो सरस्स भङ्गं कण्टो लग्गइ गलम्मि दारुं च ।
तालुम्मि विंधइ अली वंजणमज्झम्मि भुंजंतो ॥ २ ॥

अपि च । निशाभोजने क्रियमाणे अवश्यं पाकः संभवो तत्र च षड्जीवनिकायवधोऽवश्यंभावी, भाजनधावनादौ च जलगतजन्तुविनाशः, जलोज्झनेन भूमिगतकुन्थुपिपीलिकादिजन्तुघातश्च भवति, तत्प्राणिरक्षणकाङ्क्षया अपि निशाभोजनं न कर्त्तव्यम् ।

यदाहुः—

'जीवाण कुंथुमाईण घायणं भायणधोयणाईसु ।
एमाइरयणिभोयणदोसे को साहिउं तरइ ? ॥५०॥५१॥५२॥

ननु यत्रास्य न पाको न वा भाजनधावनादिसंभवस्तत्सिद्धं मोदकादि खर्जूरद्राक्षादि च भक्षयतः क इव दोष इत्याह—

(१) मेधां पिपीलिका घ्नन्ति वमनं च मक्षिका करोति ।
यूका जलोदरत्वं कोलिकः कुष्ठरोगं च ॥ १ ॥
बालः स्वरस्य भङ्गं कण्टको लगति गले दारु च ।
तालुनि विध्यति अलिर्व्यञ्जनमध्ये भुञ्जानः ॥ २ ॥

* पिपीलिआओ । † जलोयरं तु- ।

(२) जीवानां कुन्थ्वादीनां घातनं भाजनधावनादिषु ।
एवमादिरजनीभोजनदोषान् कः कथयितुं शक्नोति ? ॥ १ ॥

नाप्रेक्ष्यसूक्ष्मजन्तूनि निश्यद्यात्प्राशुकान्यपि ।

अप्युद्यत्केवलज्ञानैर्नादृतं यन्निशाऽशनम् ॥ ५३ ॥

प्राशुकान्यपि अचेतनान्यपि उपलक्षणत्वात्तदानीमपक्वान्यपि मोदकफलादीनि न निश्यद्यात्, कुतः अप्रेक्ष्यसूक्ष्मजन्तूनि अप्रेक्ष्याः प्रेक्षितुमशक्याः, सूक्ष्माः कुन्थुपनकादयो जन्तवो यत्र तानि विशेषणद्वारेण हेतुवचनं, अप्रेक्ष्यसूक्ष्मजन्तुत्वादित्यर्थः ; यद् यस्मादुत्पन्नकेवलज्ञानैः केवलज्ञानबलेनाधिगतसूक्ष्मेतरजन्तुसंपातै-र्निर्जन्तुकस्याहारस्याभावान्नादृतं निशाभोजनम् ।

यदुक्तं निशीथभाष्ये —

[1]जइवि हु फासुगदव्वं कुंथूपणगावि तहवि दुप्पस्सा ।
पच्चक्खनाणिणोवि हु राईभत्तं परिहरंति ॥ १ ॥
जइवि हु पिवीलगाई दीसंति पईवमाइउज्जोए ।
तहवि खलु अणाइन्नं मूलवयविराहणा जेण ॥ २ ॥ ५३ ॥

लौकिकसंवाददर्शनेनापि रात्रिभोजनं प्रतिषेधति—

धर्मविन्नैव भुञ्जीत कदाचन दिनात्यये ।

बाह्या अपि निशाभोज्यं यदभोज्यं प्रचक्षते ॥५४॥

धर्मवित् श्रुतधर्मवेदी न कदाचिन्निशि भुञ्जीत, बाह्या जिन-

---

(१) यद्यपि खलु प्राशुकद्रव्यं कुन्थुपनका अपि तथापि दुर्दर्शाः ।
प्रत्यक्षज्ञानिनोऽपि खलु रात्रिभक्तं परिहरन्ति ॥ १ ॥
यद्यपि खलु पिपीलिकादयो दृश्यन्ते प्रदीपाद्युद्द्योते ।
तथापि खलु अनाचीर्णं मूलव्रतविराधना येन ॥ २ ॥

शासनबहिर्भूता लौकिकास्तेऽपि यत् यस्मात् निशि भोज्यमभोज्यं प्रचक्षते ॥ ५४ ॥

येन शास्त्रेण बाह्या निशाभोज्यमभोज्यं प्रचक्षते तच्छास्त्रो-पदर्शनार्थं तद्यथेति तच्छास्त्रमेव पठति—

तद् यथा—

त्रयीतेजोमयो भानुरिति वेदविदो विदुः ।
तत्करैः पूतमखिलं शुभं कर्म समाचरेत् ॥ ५५ ॥

त्रयी ऋग्यजुःसामलक्षणा तस्यास्तेजः प्रकृतं प्रस्तुतमस्मिन् त्रयीतेजोमयो भानुरादित्यः, त्रयीतनुरिति ह्यादित्यस्य नाम । इति वेदविदो जानन्ति । तत इति शेषः । तत्करैर्भानुकरैः पूतं पवित्रीकृतमखिलं समस्तं शुभं कर्म समाचरेत्; तदभावे शुभं कर्म न कुर्य्यात् ॥ ५५ ॥

एतदेवाह—

नैवाहुतिर्न च स्नानं न श्राद्धं देवतार्चनम् ।
दानं वा विहितं रात्रौ भोजनं तु विशेषतः ॥५६॥

आहुतिरग्नौ समिदाद्याधानं, स्नानमङ्गप्रक्षालनं, श्राद्धं पितृकर्म, देवतार्चनं देवपूजा, दानं वितरणं; न विहितमिति सर्वत्र नञो योगः; भोजनं तु विशेषतो न विहितमिति । ननु नक्तभोजनं श्रेयसे श्रूयते, न च रात्रिभोजनं विना तद्भवति । उच्यते । नक्तशब्दार्थापरिज्ञानादेवमुच्यते ॥ ५६ ॥

तदेवाह—

दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे।

नक्तं तु तद्विजानीयान्न नक्तं निशि भोजनम् ॥ ५७॥

दिवसस्य दिनस्याष्टमे भागे पाश्चात्येऽर्द्धप्रहरे यद्भोजनं तन्नक्तमिति विजानीयात्। द्विविधा हि शब्दस्य प्रवृत्तिर्मुख्या गौणी च; तत्र क्वचिन्मुख्यया व्यवहारः, क्वचिन्मुख्यार्थबाधायां सत्यां गौण्या; नक्तशब्दस्य रात्रिभोजनलक्षणमुख्यार्थबाधा, रात्रिभोजनस्य तत्र तत्र प्रतिषिद्धत्वादिति गौणार्थ एव नक्तशब्द इत्यसौ दिवसशेषभोजने वर्त्तते। तत्र निमित्तमुक्तं मन्दीभूते दिवाकरे, मुख्यार्थप्रतिषेधाच्च न निशि भोजनं नक्तम् ॥ ५७ ॥

रात्रिभोजनप्रतिषेधमेव परकीयेण श्लोकद्वयेनाह—

देवैस्तु भुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा।

अपराह्णे च पितृभिः सायाह्ने दैत्यदानवैः ॥ ५८॥

सन्ध्यायां यक्षरक्षोभिः सदा भुक्तं कुलोद्वह!।

सर्ववेलां व्यतिक्रम्य रात्रौ भुक्तमभोजनम् ॥ ५९ ॥

पूर्वमह्नः पूर्वाह्णः तस्मिन् देवैर्भुक्तं, मध्यमह्नो मध्याह्नस्तस्मिन्नृषिभिर्भुक्तं, अपरमह्नो अपराह्णस्तस्मिन् पितृभिर्भुक्तम्; सायमह्नः सायाह्नो विकालस्तस्मिन् दैत्यैर्दितिजैर्दानवैर्दनुजैर्भुक्तम्; सन्ध्या रजनीदिनयोः प्रवेशनिष्काशौ तस्यां यक्षैर्गुह्यकैः रक्षोभी राक्षसैर्भुक्तम्। कुलोद्वहेति युधिष्ठिरस्यामन्त्रणम्। सर्वेषां देवादीनां वेला अवसरस्तां व्यतिक्रम्य रात्रौ भुक्तमभोजनम् ॥ ५८ ॥ ५९ ॥

॥ आयुर्वेदेऽप्युक्तम् ॥

एवं पुराणेन रात्रिभोजनप्रतिषेधस्य संवादमभिधायायुर्वेदेन संवादमाह, आयुर्वेदेऽप्युक्तमित्यनेन।

आयुर्वेदस्तु—

हृन्नाभिपद्मसङ्कोचश्चण्डरोचिरपायतः।
अतो नक्तं न भोक्तव्यं सूक्ष्मजीवादनादपि ॥६०॥

इह शरीरे द्वे पद्मे ; हृत्पद्मं च यदधोमुखं, नाभिपद्मं च यदूर्द्ध्वमुखं, द्वयोरपि च पद्मयोः रात्रौ सङ्कोचः ; कुतश्चण्डरोचिषः सूर्यस्यापायादस्तमयात्। अतो हृत्पद्मनाभिपद्मसङ्कोचाद्धेतोर्नक्तं रात्रौ न भोक्तव्यम् ; सूक्ष्मजीवादनादपीति द्वितीयं निशिभोजनप्रतिषेधकारणम्। सूक्ष्मा ये जीवास्तेषामदनं भक्षणं, तस्मादपि रात्रौ न भोक्तव्यम् ॥ ६० ॥

परपक्षसंवादमभिधाय स्वपक्षं समर्थयते—

संसजज्जीवसङ्घातं भुञ्जाना निशि भोजनम्।
राक्षसेभ्यो विशिष्यन्ते मूढात्मानः कथं नु ते? ॥६१॥

संबध्यमानजीवसमूहं, भोजनं भोज्यं, भुञ्जाना निशि रात्रौ, राक्षसेभ्यः क्रव्यादेभ्यः कथं नु कथं नाम, विशिष्यन्ते भिद्यन्ते, राक्षसा एव ते इत्यर्थः। मूढात्मानो जडाः ; अपि च, लब्धे मानुषत्वे जिनधर्मपरिष्कृते विरतिरेव कर्तुमुचिता, विरतिहीनस्तु शृङ्गपुच्छहीनः पशुरेव ॥ ६१ ॥

६२

एतदेवाह—

वासरे च रजन्यां च यः खादन्नेव तिष्ठति ।

शृङ्गपुच्छपरिभ्रष्टः स्पष्टं स पशुरेव हि ॥ ६२ ॥

स्पष्टम् ॥ ६२ ॥

रात्रिभोजननिवृत्तेभ्योऽपि सविशेषपुण्यवतो दर्शयति—

अह्नो मुखेऽवसाने च यो द्वे द्वे घटिके त्यजन् ।

निशाभोजनदोषज्ञोऽश्नात्यसौ पुण्यभाजनम् ॥ ६३ ॥

अह्नो मुखे आरम्भे, अवसाने पश्चिमे भागे, द्वे द्वे घटिके, मुहूर्त्तं मुहूर्त्तं रात्रेः, प्रत्यासन्नं त्यजन् परिहरन्, योऽश्नाति स पुण्यभाजनम्, निशाभोजनदोषज्ञ इति । निशाभोजने सम्पातिमजन्तुसम्पातलक्षणा ये दोषास्तान् जानन् रात्रिप्रत्यासन्नमपि मुहूर्त्तं मुहूर्त्तं सदोषत्वेन जानाति ; अत एवागमे सर्वजघन्यं प्रत्याख्यानं मुहूर्त्तप्रमाणनमस्कारसहितमुच्यते । पाश्चात्यमुहूर्त्तादप्यर्वाक् श्रावको भोजनं करोति, तदनन्तरं रात्रिभोजनं प्रत्याख्याति ॥६३॥

ननु यो दिवैव भुङ्क्ते तस्य रात्रिभोजनप्रत्याख्याने फलं नास्ति, फलविशेषो वा कश्चिदुच्यतामित्याह—

अकृत्वा नियमं दोषाभोजनाद्दिनभोज्यपि ।

फलं भजेन्न निर्व्याजं न वृद्धिर्भाषितं विना ॥ ६४ ॥

नियमं निवृत्तिं, रात्रिभोजनादकृत्वा दिने भोक्तुं शीलमस्यासौ दिनभोजी सोऽपि निशाभोजनविरतेः फलं निर्व्याजं निश्छद्म, न

भजेत् न लभेत। कुत इत्याह—न हविर्भाषितं विना, हविः कलान्तरं, भाषितं जल्पितं विना न स्यात्। लौकिकमेतद्, यथा भाषितमेव कलान्तरं भवेदिति ॥ ६४ ॥

पूर्वोक्तस्य विपर्ययमाह—

ये वासरं परित्यज्य रजन्यामेव भुञ्जते ।
ते परित्यज्य माणिक्यं काचमाददते जडाः ॥६५॥

दिवसं परित्यज्य तच्छीलतया रात्रावेव ये भुञ्जते; दृष्टान्तः स्पष्टः ॥ ६५ ॥

ननु नियमः सर्वत्र फलवान्, ततो यस्य 'रात्रावेव मया भोक्तव्यं न दिवसे' इति नियमस्तस्य का गतिरित्याह—

वासरे सति ये श्रेयस्काम्यया निशि भुञ्जते ।
ते वपन्त्यूषरक्षेत्रे शालीन् सत्यपि पल्वले ॥ ६६ ॥

श्रेयोहेतौ वासरभोजने सत्यपि कुशास्त्रसंस्कारान्मोहाद्वा श्रेयस्काम्यया ये रात्रावेव भुञ्जते ते शालिवपनयोग्ये पल्वले सत्यपि ऊषरे क्षेत्रे शालीन् वपन्ति। यथा ऊषरे क्षेत्रे शालिवपनं निरर्थकं, तथा रात्रावेव मया भोक्तव्यमिति निष्फलो नियमः। अधर्मनिवृत्तिरूपो हि नियमः फलवानयं तु धर्मनिवृत्तिरूप इत्यफलो विपरीतफलो वा ॥ ६६ ॥

रात्रिभोजनस्य फलमाह—

उलूककाकमार्जारगृध्रशम्बरशूकराः ।
अहिवृश्चिकगोधाश्च जायन्ते रात्रिभोजनात् ॥६७॥

रात्रिभोजनादुलूकादिषु जन्म भवति। उलूकादय उपलक्षणं; तेनान्येष्वप्यधमतिर्यक्षु रात्रिभोजिनो जायन्ते ॥ ६७ ॥

वनमालोदाहरणेन रात्रिभोजनदोषस्य महत्तां दर्शयति—

श्रूयते ह्यन्यशपथाननादृत्यैव लक्ष्मणः।
निशाभोजनशपथं कारितो वनमालया ॥ ६८ ॥

श्रूयते रामायणे दशरथनन्दनो लक्ष्मणः पितृनिदेशात् सह रामेण सीतया च दक्षिणापथं प्रस्थितोऽन्तरा कूबरनगरे महीधरराजतनयां वनमालामुपयेमे; ततश्च रामेण सह परतो देशान्तरं यियासन् स्वभार्यां वनमालां प्रतिमोचयति स्म; सा तु तद्विरहकातरा पुनरागमनमसम्भावयन्ती लक्ष्मणं शपथानकारयत्। यथा प्रिये! रामं मनीषिते देशे परिस्थाप्य यद्यहं भवतीं स्वदर्शनेन न प्रीणयामि, तदा प्राणातिपातादिपातकिनां गतिं यामीति; सा तु तैः शपथैरतुष्यन्ती यदि रात्रिभोजनकारिणां शपथं करोषि, तदा त्वां प्रतिमुञ्चामि, नान्यथेति तमुवाच; स तथेत्यभ्युपगत्य देशान्तरं प्रस्थितवान्। एवमन्यशपथाननादृत्य लक्ष्मणो वनमालया रात्रिभोजनशपथं कारितः। विशेषचरितं तु ग्रन्थगौरवभयान्नेह लिख्यते ॥ ६८ ॥

शास्त्रं निदर्शनं च विना सकलजनानुभवसिद्धं रात्रिभोजनविरतेः फलमाह—

करोति विरतिं धन्यो यः सदा निशि भोजनात्।
सोऽर्द्धं पुरुषायुषस्य स्यादवश्यमुपोषितः ॥ ६९ ॥

यः कश्चिद्धर्मधनो हि रात्रिभोजनस्य विरतिं करोति, सोऽर्धं पुरुषायुषस्योपोषितः स्यात्। उपवासस्य चैकस्यापि निर्जरा-कारणत्वान्महाफलत्वं पञ्चाशद्वर्षसम्मितानां तूपवासानां कियत्फलं सम्भाव्यते ; इदं च शतवर्षायुषः पुरुषानधिकृत्योक्तम्। पूर्वकोटी-जीविनस्तु प्रति तदर्धमुपवासानां न्यायसिद्धमेव ॥ ६९ ॥

तदेवं रात्रिभोजनस्य भूयांसो दोषास्तत्परिवर्जने तु ये गुणास्तान् वक्तुमस्माकमशक्तिरित्याह—

रजनीभोजनत्यागे ये गुणाः परितोऽपि तान्।
न सर्वज्ञादृते कश्चिदपरो वक्तुमीश्वरः ॥ ७० ॥

स्पष्टम् ॥ ७० ॥

अथ क्रमप्राप्तमामगोरससंपृक्तद्विदलादिभोजनप्रतिषेधमाह—

आमगोरससंपृक्तद्विदलादिषु जन्तवः।
दृष्टाः केवलिभिः सूक्ष्मास्तस्मात्तानि विवर्जयेत् ॥७१॥

इह हीयं स्थितिः - केचिद्भावा हेतुगम्याः, केचित्त्वागमगम्यास्तत्र ये यथा हेत्वादिगम्यास्ते तथैव प्रवचनधरैः प्रतिपादनीयाः। आगमगम्येषु हेतून्, हेतुगम्येषु त्वागममात्रं प्रतिपादयन्नाज्ञा-विराधकः स्यात्।

यदाह—

'[1]जो हेउवायपक्खम्मि हेउओ आगमे य आगमिओ।

---

(१) यो हेतुवादपक्षे हेतुक आगमे आगमिकः।

¹सो समयपवत्रो सिद्धंतविराहओ अन्नो ॥ १ ॥

इत्यामगोरससंपृक्तद्विदलादौ न हेतुगम्यो जीवसद्भावः, किन्त्वागमगम्य एव। तथाहि। आमगोरससंपृक्ते द्विदले आदिशब्दात्पुष्पितौदने, अहर्द्वितयातीते दध्नि, कुथितान्ने च, ये जन्तवस्ते केवलज्ञानिभिर्दृष्टा इति जन्तुमिश्रामगोरसमिश्रद्विदलादिभोजनं वर्जयेत्। तद्भोजनाद्धि प्राणातिपातलक्षणो दोषः। न च केवलिनां निर्दोषत्वेनाप्तानां वचनानि विपर्ययन्ति ॥ ७१ ॥

अपि च। न मद्यादीनि कुथितान्नपर्यवसानान्येवाभोज्यानि, किन्त्वन्यान्यपि जीवसंसक्तिबहुलान्यागमादुपलभ्य वर्जनीयानीत्याह—

जन्तुमिश्रं फलं पुष्पं पत्रं चान्यदपि त्यजेत्।
सन्धानमपि संसक्तं जिनधर्मपरायणः ॥ ७२ ॥

जन्तुभिर्मिश्रं फलं मधूकबिल्वादेः, पुष्पमरणिशिग्रुमधूकादेः, पत्रं प्रावृषि तण्डुलीयकादेः, अन्यदपि मूलादि त्यजेत्। सन्धानमाम्रफलादीनां यदि संसक्तं भवेत्, तदा जिनधर्मपरायणः कृपालुत्वात्त्यजेदिति संबन्धः। इदं च भोजनतो भोगोपभोगयोर्व्रतमुक्तम्; भोगोपभोगकारणं धनोपार्जनमपि भोगोपभोग उच्यते। उपचारात्। तत्परिमाणमपि भोगोपभोगव्रतम्। यथा श्रावकस्य खरकर्मपरिहारेण कर्मान्तरेण जीविका। एतच्च

---

(१) स समयप्रत्यापकः सिद्धान्तविराधकोऽन्यः ॥ १ ॥

सङ्क्षेपार्थमतिचारप्रकरण एव वक्ष्यते। अवसितं भोगोपभोग-व्रतम् ॥ ७२ ॥

अथानर्थदण्डस्य तृतीयगुणव्रतस्यावसरः तच्चतुर्द्धेति श्लोक-द्वयेनाह—

आर्त्तं रौद्रमपध्यानं पापकर्मोपदेशिता।
हिंसोपकारिदानं च प्रमादाचरणं तथा॥ ७३ ॥
शरीराद्यर्थदण्डस्य प्रतिपक्षतया स्थितः।
योऽनर्थदण्डस्तत्त्यागस्तृतीयं तु गुणव्रतम्॥ ७४ ॥

अपकृष्टं ध्यानमपध्यानं, तदनर्थदण्डस्य प्रथमो भेदः। तच्च द्वेधा—आर्त्तं रौद्रं च; तत्र ऋतं दुःखं तत्र भवमार्त्तं; यदि वा अर्त्तिः पीडा यातनं च, तत्र भवमार्त्तम्। तच्चतुर्द्धा—अमनोज्ञानां शब्दादीनां संप्रयोगे तद्विप्रयोगचिन्तनमसंप्रयोग-प्रार्थना च प्रथमम्। शूलादिरोगसम्भवे च तद्वियोगप्रणिधानं तद-संप्रयोगचिन्ता च द्वितीयम्। इष्टानां च शब्दादीनां विषयाणां सातवेदनायाश्चावियोगाध्यवसानं, संप्रयोगाभिलाषश्च तृतीयम्। देवेन्द्रचक्रवर्त्यादिविभवप्रार्थनारूपं निदानं चतुर्थम्।

यदाहुः—

'अमणुण्णाणं सद्दाइविसयवत्थूण दोसमइलस्स।
धणिअं विओअचिंतणमसंपओगाणुसरणं च॥ १॥

(१) अमनोज्ञानां शब्दादिविषयवस्तूनां द्वेषमलिनस्य।
धनियं वियोगचिन्तनमसंप्रयोगानुस्मरणं च॥ १॥

[1]तह सूलसीसरोगाइवेयणाए विओअपणिहाणं ।

तदसंपओगचिंता तप्पडियाराउलमणस्स ॥ २ ॥

[2]इट्ठाणं विसयाईण वेयणाए अ रागरत्तस्स ।

अविओगज्झवसाणं तह संजोगाभिलासो अ ॥ ३ ॥

[3]देविंदचक्कवट्टित्तणाइगुणरिद्धिपत्थणामइयं ।

अहम नियाणचिंतणमन्नाणाणुगयमच्चंतं ॥ ४ ॥

[4]एयं चउव्विहं रागदोसमोहंकियस्स जीवस्स ।

अट्टज्झाणं संसारवद्धणं तिरियगइमूलं ॥ ५ ॥

रोदयत्यपरानिति रुद्रो दुःखहेतुस्तेन कृतं तस्य वा कर्म रौद्रम्। तच्चतुर्धा—हिंसानुबन्धि मृषानुबन्धि स्तेयानुबन्धि धन-संरक्षणानुबन्धि च ।

यदाहुः—

[5]सत्तवहवेहबंधणडहणंकणमारणाइपणिहाणं ।

अइकोहग्गहघत्थं निग्घिणमणसोऽहमविवागं ॥ १ ॥

---

(१) तथा शूलशिरोरोगादिवेदनायाः वियोगप्रणिधानम् ।
तदसंप्रयोगचिन्ता तत्प्रतीकाराकुलमनसः ॥ २ ॥

(२) इष्टानां विषयादीनां वेदनायाश्च रागरक्तस्य ।
अवियोगाध्यवसानं तथा संयोगाभिलाषश्च ॥ ३ ॥

(३) देवेन्द्रचक्रवर्तित्वादिगुणर्द्धिप्रार्थनामयम् ।
अधमं निदानचिन्तनमज्ञानानुगतमत्यन्तम् ॥ ४ ॥

(४) एतत् चतुर्विधं रागद्वेषमोहाङ्कितस्य जीवस्य ।
आर्तध्यानं संसारवर्द्धनं तिर्यग्गतिमूलम् ॥ ५ ॥

(५) सत्त्ववधवेधबन्धनदहनाङ्कनमारणादिप्रणिधानम् ।
अतिक्रोधग्रहग्रस्तं निर्घृणमनसोऽधर्मविपाकम् ॥ १ ॥

[1]पिसुणासब्भासब्भूयभूयघायाइवयणपणिहाणं ।
मायाविणो अइसंधणपरस्स पच्छन्नपावस्स ॥ २ ॥
[2]तह तिव्वकोहलोहाउलस्स भूओवघायणमणज्जं ।
परदव्वहरणचित्तं परलोगावायनिरवेक्खं ॥ ३ ॥
[3]सद्दाइविसयसाहणधणसंरक्खणपरायणमणिट्ठं ।
सव्वाभिसंकणपरोवघायकलुसाउलं चित्तं ॥ ४ ॥
[4]एयं चउव्विहं रागदोसमोहंकियस्स जीवस्स ।
रोद्दज्झाणं संसारवद्धणं निरयगइमूलं ॥ ५ ॥

एवमार्त्तरौद्रध्यानात्मकमपध्यानमनर्थदण्डस्य प्रथमो भेदः । पापकर्मोपदेशिता वक्ष्यमाणा द्वितीयः । हिंसोपकारिणां शस्त्रादीनां दानमिति तृतीयः । प्रमादानां गीतनृत्तादीनामाचरणं चतुर्थः । शरीरादिनिमित्तं यः प्राणिनां दण्डः सोऽर्थाय प्रयोजनाय दण्डोऽर्थदण्डस्तस्य शरीराद्यर्थदण्डस्य यः प्रतिपक्षरूपोऽनर्थदण्डो निष्प्रयोजनो दण्ड इति यावत्; तस्य त्यागोऽनर्थदण्डविरतिस्तृतीयं गुणव्रतम् ।

---

(१) पिशुनासभ्यासद्भूतभूतघातादिवचनप्रणिधानम् ।
मायाविनोऽतिसन्धानपरस्य प्रच्छन्नपापस्य ॥ २ ॥
(२) तथा तीव्रक्रोधलोभाकुलस्य भूतोपघातनमनार्यम् ।
परद्रव्यहरणचित्तं परलोकापायनिरपेक्षम् ॥ ३ ॥
(३) शब्दादिविषयसाधनधनसंरक्षणपरायणमनिष्टम् ।
सर्वाभिशङ्कनपरोपघातकलुषाकुलं चित्तम् ॥ ४ ॥
(४) एवं चतुर्विधं रागद्वेषमोहाङ्कितस्य जीवस्य ।
रौद्रध्यानं संसारवर्द्धनं नरकगतिमूलम् ॥ ५ ॥

यदाह—

'जं इंदियसयणाई पडुच्च पावं करेज्ज सो होइ।

अत्थे दंडो एत्तो अन्नो उ अणत्थदंडो उ॥१॥७३॥७४॥

अपध्यानस्य स्वरूपं परिमाणं चाह -

वैरिघातो नरेन्द्रत्वं पुरघाताग्निदीपने।

खचरत्वाद्यपध्यानं मुहूर्त्तात्परतस्त्यजेत्॥७५॥

वैरिघातपुरघाताग्निदीपनादिविषयं रौद्रध्यानमपध्यानं, नरेन्द्रत्वं खचरत्वमादिशब्दादप्सरोविद्याधरीपरिभोगादि, तत्त्वार्त्तध्यानरूपमपध्यानं, तस्य तत्परिमाणरूपं व्रतं मुहूर्त्तात्परतस्त्यजेदिति॥७५॥

अथ पापोपदेशस्वरूपं तद्विरतिं चाह—

वृषभान् दमय क्षेत्रं कृष षण्ढय वाजिनः।

दाक्षिण्याविषये पापोपदेशोऽयं न कल्पते॥७६॥

वृषभान् वत्सतरान् प्रसङ्गादिना दमय दान्तान् कुरु; प्रत्यासीदति खलु वर्षाकालः, तथा क्षेत्रं बीजावापभुवं कृष; दृष्टः खलु मेघो, यास्यति वापकालो, भूता वा केदारा गाह्यन्तां, सार्द्धदिनत्रयमध्ये उप्यन्तां च व्रीहयः; तथा नदीयोऽश्वः प्रयोजनं राज्ञामिति षण्ढय वर्द्धितकान् कुरु, वाजिनोऽश्वान्, उपलक्षणं चैतदन्येषां ग्रीष्मे दवाग्निदानादीनाम्; अयं पापरूप उपदेशः, श्रावकाणां न कल्पते न युज्यते। सर्व्वत्र पापोपदेशनियमं कर्तुमशक्ते-

---

(१) यदिन्द्रियस्वजनादीन् प्रतीत्य पापं कार्यात् स भवति।

अर्थे दण्डः इतः अन्यस्तु अनर्थदण्डस्तु॥१॥

न्धोऽपवादोऽयमुच्यते । दाक्षिण्याविषय इति । बन्धुपुत्रादिविषय-दाक्षिण्यवतः पापोपदेशोऽशक्यपरिहारः । दाक्षिण्याभावे तु यथा तथा मौखर्येण पापोपदेशो न कल्पते ॥ ७६ ॥

अथ हिंसोपकारीणि तद्दानपरिहारं चाह –

यन्त्रलाङ्गलशस्त्राग्निमुशलोदूखलादिकम् ।
दाक्षिण्याविषये हिंस्रं नार्पयेत्करुणापरः ॥ ७७ ॥

यन्त्रं शकटादि, लाङ्गलं हलं, शस्त्रं खड्गादि, अग्निर्वह्निः, मुशलमयोऽग्रं, उदूखलमुलूखलं, आदिशब्दाद्धनुर्भस्त्रादिपरिग्रहः । हिंस्रं वस्तु, करुणापरः श्रावको नार्पयेत् ; दाक्षिण्याविषय इति पूर्ववत् ॥ ७७ ॥

अथ प्रमादाचरणमनर्थदण्डस्य चतुर्थभेदं तत्परिहारं च श्लोकत्रयेणाह—

कुतूहलाद्गीतनृत्तनाटकादिनिरीक्षणम् ।
कामशास्त्रप्रसक्तिश्च द्यूतमद्यादिसेवनम् ॥ ७८ ॥
जलक्रीडाऽऽन्दोलनादिविनोदो जन्तुयोधनम् ।
रिपोः सुतादिना वैरं भक्तस्त्रीदेशराट्कथाः ॥ ७९ ॥
रोगमार्गश्रमौ मुक्त्वा स्वापश्च सकलां निशाम् ।
एवमादि परिहरेत्प्रमादाचरणं सुधीः ॥ ८० ॥

कुतूहलात्कौतुकाद्गीतस्य नृत्तस्य नाटकस्य आदिशब्दात्प्रकरणादेर्निरीक्षणं, तेन तेनेन्द्रियेण यथोचितं विषयीकरणम् ।

कुतूहलग्रहणाज्जिनयात्रादौ, प्रासङ्गिकनिरीक्षणे च न प्रमादाचरणम्। तथा कामशास्त्रे वात्स्यायनादिकृते, प्रसक्तिः पुनः पुनः परिशीलनम्; तथा द्यूतमद्यकादिभिः क्रीडनम्; मद्यं सुरा; आदिशब्दान्मृगयादि; तेषां सेवनं परिशीलन; तथा जलक्रीडा तडागजलयन्त्रादिषु मज्जनोन्मज्जनशृङ्गिकाच्छोटनादिरूपा; तथा आन्दोलनं वृक्षशाखादौ दोलाखेलनं; आदिशब्दात्पुष्पावचयादि; तथा जन्तूनां कुक्कुटादीनां योधनं परस्परेणाभ्याहननम्; तथा रिपोः शत्रोः सम्बन्धिना पुत्रपौत्रादिना वैरम्; अयमर्थो येन तावत्कथञ्चिदायातं वैरं तद्यः परिहर्तुं न शक्नोति तस्यापि पुत्रपौत्रादिना यद्वैरं तत्प्रमादाचरणम्; तथा भक्तकथा, यथा इदं चेदं च मांसाकमाषमोदकादि साधु भोज्यं, साध्वनेन भुज्यते, अहमपि वा इदं भोक्ष्ये इत्यादिरूपा; तथा स्त्रीकथा, स्त्रीणां नेपथ्याङ्गहारहावभावादिवर्णनरूपा "कर्णाटी सुरतोपचारचतुरा लाटी विदग्धप्रिया" इत्यादिरूपा वा; तथा देशकथा, यथा दक्षिणापथः प्रचुरान्नपानः स्त्रीसम्भोगप्रधानः, पूर्वदेशो विचित्रवस्त्रगुडखण्डशालिमद्यादिप्रधानः, उत्तरापथे शूराः पुरुषा जविनो वाजिनो गोधूमप्रधानानि धान्यानि सुलभं कुङ्कुमं मधुराणि द्राक्षादाडिमकपित्थादीनि; पश्चिमदेशे सुखस्पर्शानि च वस्त्राणि सुलभा इक्षवः शीतं वारीत्येवमादि; राट्कथा राजकथा, यथा शूरोऽस्मदीयो राजा, सधनश्चोडः, गजपतिर्गौडः, अश्वपतिस्तुरुष्क इत्यादि। एवं प्रतिकूला अपि भक्तादिकथा वाच्या; तथा रोगो ज्वरादिः, मार्गश्रमो

मार्गखेदः, तौ मुक्त्वा सकलां निशां स्वापो निद्रा । रोगमार्ग-श्रमयोस्तु न प्रमादाचरणम् । एवमादिपूर्वोक्तस्वरूपं प्रमादाचरणं परिहरेत् । सुधीः श्रमणोपासकः । प्रमादाचरितं च—

'मज्जं विसयकसाया निद्दा विगहा य पञ्चमी भणिया ।
एए पञ्च पमाया जीवं पाडेन्ति संसारे ॥ १ ॥

इति पञ्चविधस्य प्रमादस्य प्रपञ्चः ॥ ७८ ॥ ७९ ॥ ८० ॥

देशविशेषे प्रमादपरिहारमाह—

विलासहासनिष्ठ्यूतनिद्राकलहदुष्कथाः ।
जिनेन्द्रभवनस्यान्तराहारं च चतुर्विधम् ॥ ८१ ॥

जिनेन्द्रभवनस्यान्तरित्यादित आरभ्य संबध्यते ; तेन जिनेन्द्र-भवनस्य मध्ये विलासं कामचेष्टां, हासं कहकहध्वानं हसनं, निष्ठ्यूतं निष्ठीवनं, निद्रां स्वापं, कलहं राटीं, दुष्कथां चौर-पारदारिकादिकथां, चतुर्विधं चाहारम्—अशनपानखाद्यस्वाद्य-स्वरूपं परिहरेत् । परिहरेदिति पूर्वतः सम्बन्धनीयम् । तत्राशनं शाल्यादि मुद्गादि सक्त्वादि पेयादि मोदकादि क्षीरादि सूरणादि मण्डकादि च ।

यदाह—

---

(१) मद्यं विषयकषाया निद्रा विकथा च पञ्चमी भणिता ।
एते पञ्च प्रमादा जीवं पातयन्ति संसारे ॥ १ ॥

[1]असणं ओअणसत्तुगमुग्गजगाराइ खज्जगविही य ।
खीराइ सूरणाई मंडगपभिई अ विन्नेयं ॥ १ ॥

पानं सौवीरं यवादिधावनं सुरादि सर्वश्चाप्कायः कर्कटकजलादिकं च ।

यदाह—

[2]पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव ।
आउक्काओ सव्वो कक्कडगजलाइयं च तहा ॥ १ ॥

खाद्यं भृष्टधान्यं गुलपर्पटिकाखर्जूरनालिकेरद्राक्षाकर्कट्याम्रपनसादि ।

यदाह—

[3]भत्तोसं दंताई खज्जूरं नालिएरदक्खाई ।
कक्कडिअंबगफणसाइ बहुविहं खाइमं नेयं ॥ १ ॥

स्वाद्यं दन्तकाष्ठं ताम्बूलतुलसिकाकुहेडकाजकमधुपिप्पलीसुण्ठीमरिचजीरकहरीतकीबिभीतकामलकादि ।

---

(१) अशनमोदनसक्तुमुद्गजगार्यादि खाद्यकविधिश्च ।
क्षीरादि सूरणादि मण्डकप्रभृति च विज्ञेयम् ॥ १ ॥

(२) पानं सौवीरयवोदकादि चित्रं सुरादिकं चैव ।
अप्कायः सर्वः कर्कटकजलादिकं च तथा ॥ १ ॥

(३) भक्तौषं दन्त्यादि खर्जूरं नालिकेरद्राक्षादि ।
कर्कटिकाम्रपनसादि बहुविधं खादिमं ज्ञेयम् ॥ १ ॥

यदाह—

'दंतवणं तंबोलं चित्तं तुलसीकुहेडगाईयं ।

महुपिप्पलिसुंठाई अणेगहा साइमं होइ ॥ १ ॥ ८१ ॥

उक्तानि त्रीणि गुणव्रतानि ।

अथ चत्वारि शिक्षाव्रतान्युच्यन्ते, तत्रापि सामायिकदेशाव-काशिकपौषधोपवासातिथिसंविभागलक्षणेषु चतुर्षु शिक्षाव्रतेषु प्रथमं सामायिकाख्यं शिक्षाव्रतमाह—

त्यक्तार्त्तरौद्रध्यानस्य त्यक्तसावद्यकर्मणः ।

मुहूर्त्तं समता या तां विदुः सामायिकव्रतम् ॥८२॥

मुहूर्त्तं मुहूर्त्तकालं, या समता रागद्वेषहेतुषु मध्यस्थता, तां सामायिकव्रतं विदुः ; समस्य रागद्वेषविनिर्मुक्तस्य सतः, आयो ज्ञानादीनां लाभः प्रशमसुखरूपः, समायः ; समाय एव सामा-यिकम् ; विनयादित्वादिकण् । समायः प्रयोजनमस्येति वा सामायिकम् । तच्च सामायिकं मनोवाक्कायचेष्टापरिहारं विना न भवतीति त्यक्तार्त्तरौद्रध्यानस्येत्युक्तं, त्यक्तसावद्यकर्मण इति च ; त्यक्तं सावद्यं वाचिकं कायिकं च कर्म येन तस्य । सामायिकस्थश्च श्रावकः गृहस्थोऽपि यतिरिव भवति ।

---

(1) दन्तपावनं ताम्बूलं चित्रं तुलसीकुहेडकादिकम् ।
मधुपिप्पलिसुण्ठ्यादि अनेकधा स्वादिमं भवति ॥ १ ॥

यदाह—

'सामाइयंमि उ कए समणो इव सावओ हवइ जम्हा।

एएण कारणेणं बहुसो सामाइयं कुज्जा ॥ १ ॥

अतएव तस्य देवस्नात्रपूजादौ नाधिकारः। नन्वगर्हितं कर्म कुर्वाणस्य देवस्नात्रादौ को दोषः ; सामायिकं हि सावद्यव्यापार-निषेधात्मकं, निरवद्यव्यापारविधानात्मकं च ; तत्स्वाध्यायपठन-परिवर्त्तनादिवत् देवपूजादौ को दोषः ?। नैवम्। यतेरिव देवस्नात्रपूजनादौ नाधिकारः। भावस्तवार्थं च द्रव्यस्तवोपादानम् ; सामायिके च सति संप्राप्तो भावस्तव इति किं द्रव्यस्तव-करणेन ?।

यदाह—

'दव्वत्थओ य भावत्थओ य दव्वत्थओ बहुगुणोत्ति बुद्धि सिया।

अनिउणजणवयणमिणं छज्जीवहियं जिणा बिंति ॥ १ ॥

इह श्रावकः सामायिककर्त्ता द्विविधो भवति। ऋद्धिमानऋद्धि-कश्च ; योऽसावऋद्धिकः स चतुर्षु स्थानेषु सामायिकं करोति ; जिनगृहे, साधुसमीपे, पौषधशालायां, स्वगृहे वा ; यत्र वा विश्राम्यति, निर्व्यापारो वा आस्ते तत्र च। तत्र यदा साधुसमीपे

---

(१) सामायिके एव कृते श्रमण इव श्रावको भवति यस्मात्।
एतेन कारणेन बहुशः सामायिकं कुर्यात् ॥ १ ॥

(२) द्रव्यस्तवश्च भावस्तवश्च द्रव्यस्तवो बहुगुण इति बुद्धिः स्यात्।
अनिपुणजनवचनमिदं षड्जीवहितं जिना ब्रुवते ॥ १ ॥

करोति तदायं विधिः ; यदि कस्माच्चिदपि भयं नास्ति, केनचिद्विवादो नास्ति, ऋणं वा न धारयति ; मा भूत्तत्कृताकर्षणापकर्षणनिमित्तश्चित्तसंक्लेशः ; तदा स्वगृहेऽपि सामायिकं कृत्वा ईर्यां शोधयन्, सावद्यां भाषां परिहरन्, काष्ठलेष्टादिना यदि कार्यं तदा तत्स्वामिनमनुज्ञाप्य प्रतिलिख्य प्रमार्ज्य च गृह्णन्, खेलसिङ्घाणकादींश्चाविवेचयन् विवेचयंश्च स्थण्डिलं प्रत्यवेक्ष्य प्रमृज्य च ; एवं पञ्चसमितिसमितस्त्रिगुप्तिगुप्तः साध्वाश्रयं गत्वा साधून्नमस्कृत्य सामायिकं करोति यथा—

करेमि भंते सामाइयं सावज्जं जोगं पच्चक्खामि जाव साहू पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ॥

सामायिकसूत्रस्यायमर्थः—करेमि अभ्युपगच्छामि ; भंते इति गुरोरामन्त्रणम्, हे भदन्त ! भन्दते सुखवान् कल्याणवांश्च भवति ; भदुङ् सुखकल्याणयोः, अस्य औणादिकान्तप्रत्ययान्तस्य निपातनात् रूपम् । आमन्त्रणं च प्रत्यक्षस्य गुरोस्तदभावे परोक्षस्यापि बुद्ध्या प्रत्यक्षीकृतस्य भवति ; यथा जिनानामभावे जिनप्रतिमाया आरोपितजिनत्वायाः स्तुतिपूजासम्बोधनादिकं भवति, गुरोश्चाभिमुखीकरणं तदायत्तः सर्वो धर्म इति प्रदर्शनार्थम् ।

यदाह -

[1]णाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य ।

धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥ १ ॥

अथवा भवान्तहेतुत्वाद्भवान्तः, भन्ते इत्यार्षत्वात् मध्यव्यञ्जनलोपे रूपं भन्त इति "अत एत्सौ पुंसि मागध्याम्" ॥ ८ । ४ । २८७ ॥ इत्येकारोऽर्द्धमागधत्वादार्षस्य सामायिकमुक्तनिर्वचनम् । अवद्यं पापं, सहावद्येन सावद्यः, युज्यत इति योगो व्यापारस्तं प्रत्याख्यामि ; प्रतीति प्रतिषेधे आङाऽऽभिमुख्ये, ख्यांक् प्रकथने, ततश्च प्रतीपमभिमुखं ख्यापकं सावद्ययोगस्य करोमीत्यर्थः । अथवा पच्चक्खामीति प्रत्याचक्षे, चक्षिक् व्यक्तायां वाचीत्यस्य प्रत्याङ्पूर्वस्य रूपम् ; प्रतिषेधस्यादरेणाभिधानं करोमीत्यर्थः । जाव साहू पज्जुवासामि ; यावच्छब्दः परिमाणमर्यादाऽवधारण-वचनस्तत्र परिमाणे यावत्साधुपर्युपासनं मम तावत्प्रत्याख्यामीति ; मर्यादायां साधुपर्युपासनादर्वाक्, अवधारणे यावत्साधुपर्युपासनं तावदेव न तस्मात्परत इत्यर्थः । दुविहं तिविहेणं ; द्वे विधे यस्य स द्विविधः सावद्यो योगः स च प्रत्याख्येयत्वेन कर्म सम्पद्यते ; अतस्तं द्विविधं योगं करणकारणलक्षणमनुमतिप्रतिषेधस्य गृहस्थैः कर्तुमशक्यत्वात् पुत्रभृत्यादिकृतस्य व्यापारस्य स्वयमकरणेऽप्यनु-मोदनात् त्रिविधेनेति करणे तृतीया । मणेणं वायाए काएणं इति, त्रिविधस्यैव सूत्रोपात्तं विवरणं, मनसा वाचा कायेन

---

(१) ज्ञानस्य भवति भागी स्थिरतरको दर्शने चरित्रे च ।
धन्या यावत्कथायां गुरुकुलवासं न मुञ्चन्ति ॥ १ ॥

चेति, त्रिविधेन करणेन न करोमि न कारयामीति सूत्रोपात्तमेवं द्विविधमित्यस्य विवरणम्। किं पुनः कारणमुद्देशक्रममतिलङ्घ्य व्यत्यासेन निर्देशः कृतः। उच्यते। योगस्य करणाधीनतोपदर्शनार्थम्। करणाधीनता हि योगानाम्, करणभावे भावात्तदभावे चाभावाद्योगस्य। तस्येति, तस्य अत्राधिकृतो योगः संबध्यते; अवयवावयविभावलक्षणसम्बन्धे षष्ठी; योऽयं योगस्त्रिकालविषयस्तस्यातीतमवयवं प्रतिक्रामामि निवर्त्ते प्रतीपं क्रामामीत्यर्थः; निन्दामि जुगुप्से गर्हामि स एवार्थः, केवलमात्मसाक्षिकी निन्दा, गुरुसाक्षिकी गर्हा। भन्ते इति पुनर्गुरोरामन्त्रणं भक्त्यतिशयख्यापनार्थं न पुनरुक्तम्; अथवा सामायिकक्रियाप्रत्यर्पणाय पुनर्गुरोः सम्बोधनम्। अनेन चैतत् ज्ञापितं भवति, सर्वक्रियाऽवसाने गुरोः प्रत्यर्पणं कार्यमिति।

उक्तं च भाष्यकारेण —

[1]सामाइयपच्चप्पणवयणीयायं भयंतसद्दोत्ति।
सव्वकिरियावसाणे भणियं पच्चप्पणमणेण॥ १॥

अप्पाणमिति; आत्मानमतीतकालसावद्ययोगकारिणम्; वोसिरामीति, व्युत्सृजामि; विशब्दो विविधार्थो विशेषार्थो वा; उच्छब्दो भृशार्थः। विविधं विशेषेण वा भृशं सृजामि त्यजामीत्यर्थः। अत्र च करेमि भंते सामाइयमिति वर्त्तमानस्य

---

(१) सामायिकप्रत्यर्पणवचनीयार्थो भदन्तशब्द इति।
सर्वक्रियाऽवसाने भणितं प्रत्यर्पणमनेन॥ १॥

सावद्ययोगस्य प्रत्याख्यानम्। सावज्जं जोगं पच्चक्खामीत्यनागतस्य; तस्स भंते पडिक्कमामीत्यतीतस्येति त्रैकालिकं प्रत्याख्यानमुक्तमिति त्रयाणां वाक्यानां न पौनरुक्त्यम्।

उक्तञ्च—

अइयं निंदामि पडुपन्नं संवरेमि अणागयं पच्चक्खामीति।

एवं कृतसामायिक ईर्यापथिकायाः प्रतिक्रामति पश्चादागमनमालोच्य यथाज्येष्ठमाचार्यादीन् वन्दते, पुनरपि गुरुं वन्दित्वा प्रत्युपेक्ष्य निविष्टः; शृणोति, पठति, पृच्छति वा। एवं चैत्यभवनेऽपि द्रष्टव्यम्। यदा तु स्वगृहे, पौषधशालायां वा सामायिकं गृहीत्वा तत्रैवास्ते तदागमनं नास्ति, यस्तु राजादिर्महर्द्धिकः सगन्धसिन्धुरस्कन्धाधिरूढश्छत्रचामरादिराजालङ्करणालङ्कृतो हास्तिकाश्वीयपादातिरथकट्यापरिकरितो भेरीभाङ्कारभरिताम्बरतलो बन्दिवृन्दकोलाहलाकुलीकृतनभस्तलोऽनेकसामन्तमण्डलेश्वराहमहमिकासंप्रेक्ष्यमाणपादकमलः पौरजनैः सश्रद्धमङ्गुल्योपदर्श्यमानो मनोरथैरुपस्पृश्यमानस्तेषामेवाञ्जलिबन्धान् लाजाञ्जलिपातान् शिरःप्रणामाननुमोदमानः अहो धन्यो धर्मो य एवंविधैरप्युपसेव्य इति प्राकृतजनैरपि श्लाघ्यमानोऽकृतसामायिक एव जिनालयं साधुवसतिं वा गच्छति, तत्र गतो राजककुदानि छत्रचामरोपानन्मुकुटखड्गरूपाणि परिहरति; जिनार्चनं साधुवन्दनं वा करोति, यदि त्वसौ कृतसामायिक एव गच्छेत् तदा गजाश्वादिभिरधिकरणं स्यात्; तच्च न युज्यते कर्तुम्। तथा कृतसामायिकेन पादाभ्यामेव गन्तव्यम्, तच्चानुचितं भूपतीनामिति।

आगतस्य च यद्यसौ श्रावको भवति तदा न कोऽप्यभ्युत्थानादि करोति । अथ यथा भद्रकस्तदा पूजा कृता भवत्विति पूर्वमेवासनं रच्यते । आचार्याश्च पूर्वमेवोत्थिता आसते मा उत्थानानुत्थानकृता दोषा भूवन्निति, आगतश्चासौ सामायिकं करोतीत्यादि पूर्ववत् ॥ ८२ ॥

सामायिकस्थस्य महानिर्जरो भवतीति दृष्टान्तद्वारेणाह—

सामायिकव्रतस्थस्य गृहिणोऽपि स्थिरात्मनः ।
चन्द्रावतंसकस्येव क्षीयते कर्म सञ्चितम् ॥ ८३ ॥

गृहस्थस्यापि कृतसामायिकस्य कर्मनिर्जरा भवतीति चन्द्रावतंसक उदाहरणम् ।

तच्च सम्प्रदायगम्यम् । स चायम्—

अस्ति साकेतनगरं श्रीमद्भूतनिकेतनम् ।
हसितेन्द्रपुरश्रीकं सितार्हच्चैत्यकेतनैः ॥ १ ॥
तत्र लोकदृगानन्दो द्वितीय इव चन्द्रमाः ।
चन्द्रावतंसो राजाऽऽसीदवतंस इवावनेः ॥ २ ॥
स यथा धारयामास शस्त्राणि आशङ्कितवे ।
तीक्ष्णानि छिन्नावशतो व्रतान्यपि तथा सुधीः ॥ ३ ॥
माघमासे विभावर्यां सोऽन्यदा वासवेश्मनि ।
आदीपज्वलनं स्थास्यामीति सामायिके स्थितः ॥ ४ ॥
तच्छय्यापालिका ध्वान्तं स्वामिनो मा स्म भूदिति ।
याते यामे स्वामिनीयामि प्रदीपे तैलमक्षिपत् ॥ ५ ॥

गते यामे द्वितीयस्मिन्नपि सा भक्तमानिनी ।
आयती दीपके क्षीणतैले तैलं न्यधात्पुनः ॥ ६ ॥
त्रियामायास्तृतीयस्मिन्नपि यामे व्यतीयुषि ।
मल्लिकायां प्रदीपस्य तैलं चिक्षेप सा पुनः ॥ ७ ॥
विभातायां विभावर्यामवसानमथासदत् ।
श्रमोत्पन्नव्यथाक्रान्तो राजा स इव दीपकः ॥ ८ ॥

सामायिकं समधिगम्य निहत्य कर्म
चन्द्रावतंसनृपतिस्त्रिदिवं ततोऽगात् ।
सामायिकव्रतजुषो गृहिणोऽपि सद्यः
क्षीयेत कर्म निचितं सुगतिर्भवेच्च ॥ ९ ॥

॥ इति चन्द्रावतंसराजर्षिकथानकम् ॥ ८३ ॥

द्वितीयं शिक्षाव्रतमाह—

दिग्व्रते परिमाणं यत्तस्य संक्षेपणं पुनः ।
दिने रात्रौ च देशावकाशिकव्रतमुच्यते ॥ ८४ ॥

दिग्व्रते प्रथमगुणव्रते यद्दशस्वपि दिक्षु गमनपरिमाणं तस्य दिवा रात्रौ चोपलक्षणत्वात्प्रहरादौ च यत् सङ्क्षेपणं तद्देशावकाशिकव्रतम् । देशे दिग्व्रतगृहीतपरिमाणस्य विभागे अवकाशो-ऽवस्थानं देशावकाशः सोऽत्रास्तीति देशावकाशिकं "अतोऽनेक-स्वरात्" ॥ ७ । २ । ६ ॥ इतीकः । दिग्व्रतसंक्षेपकरणमणुव्रतादि-संक्षेपकरणस्याप्युपलक्षणं द्रष्टव्यम् । एषामपि संक्षेपस्यावश्यं

कर्त्तव्यत्वात् । प्रतिव्रतं च संक्षेपकरणस्य विभिन्नव्रतत्वे द्वादश व्रतानीति संख्याविरोधः स्यात् ॥ ८४ ॥

अथ तृतीयं शिक्षाव्रतमाह—

चतुष्पर्व्यां चतुर्थादिकुव्यापारनिषेधनम् ।
ब्रह्मचर्यक्रियास्नानादित्यागः पोषधव्रतम् ॥८५॥

चतुष्पर्वी अष्टमी चतुर्दशी-पूर्णिमा-अमावास्यालक्षणा, चतुर्णां पर्वाणां समाहारश्चतुष्पर्वी । पर्वशब्दोऽकारान्तोऽप्यस्ति ; तस्यां चतुर्थादिकं तपः, कुव्यापारस्य सावद्यव्यापारस्य निषेधः, ब्रह्मचर्य-क्रिया ब्रह्मचर्यस्य करणं, स्नानादेः शरीरसत्कारस्य त्यागः । आदि-शब्दादुद्वर्त्तनवर्णकविलेपनपुष्पगन्धविशिष्टवस्त्राभरणादिपरिग्रहः । पोषं पुष्टिं प्रक्रमाद्धर्मस्य धत्ते पोषधः स एव व्रतं पोषधव्रतम् । सर्वतः पोषध इत्यर्थः । द्विविधं हि पोषधव्रतं देशतः सर्वतश्च । तत्राहारपोषधो देशतो विवक्षितविकृतेरविकृतेराचामाम्लस्य वा सकृदेव द्विरेव वा भोजनमिति । सर्वतस्तु चतुर्विधस्याप्याहार-स्याहोरात्रं यावत्प्रत्याख्यानम् ; कुव्यापारनिषेधपोषधस्तु देशत एकतरस्य कस्यापि कुव्यापारस्याकरणं, सर्वतस्तु सर्वेषामपि कृषिसेवावाणिज्यपाशुपाल्यगृहकर्मादीनामकरणं, ब्रह्मचर्यपोषधो-ऽपि देशतो दिवैव रात्रावेव वा, सकृदेव द्विरेव वा स्त्रीसेवां मुक्त्वा ब्रह्मचर्यकरणम् ; सर्वतस्तु अहोरात्रं यावत् ब्रह्मचर्य-पालनम् । देशतः स्नानादेः शरीरसत्कारस्यैकतरस्याकरणं सर्वतस्तु सर्वस्यापि तस्याकरणम् ; इह च देशतः कुव्यापारनिषेधपोषधं

यदा करोति तदा सामायिकं करोति वा नवा ; यदा तु सर्वतः करोति तदा सामायिकं नियमात्करोति, अकरणे तु तत्फलेन वञ्च्यते । सर्वतः पोषधव्रतं च चैत्यगृहे वा, साधुमूले वा, गृहे वा, पोषधशालायां वा त्यक्तमणिसुवर्णाद्यलङ्कारो व्यपगतमालाविलेपनवर्णकः परित्यक्तप्रहरणः प्रतिपद्यते । तत्र च क्वते पठति च पुस्तकं वाचयति धर्मध्यानं ध्यायति, यथैतान् साधुगुणानहं मन्दभाग्यो न समर्थो धारयितुमिति । इह च यद्याहारशरीरसत्कार-ब्रह्मचर्यपोषधवत् कुव्यापारपोषधव्रतमप्यन्यत्रानाभोगेनेत्याद्या-कारोच्चारणपूर्वकं प्रतिपद्यते तदा सामायिकमपि सार्थकं स्यात् । स्थूलत्वात्पोषधप्रत्याख्यानस्य सूक्ष्मत्वाच्च सामायिकस्येति । तथा पोषधवताऽपि सावद्यव्यापारा न कार्या एव ततः सामायिकमकुर्वं-स्तल्लाभाद्भ्रश्यतीति । यदि पुनः सामाचारीविशेषात् सामायिक-मिव द्विविधं त्रिविधेनेत्येवं पोषधं प्रतिपद्यते तदा सामायि-कार्थस्य पोषधेनैव गतत्वान्न सामायिकमत्यन्तं फलवत् । यदि परं पोषधसामायिकलक्षणं व्रतद्वयं प्रतिपन्नं मयेत्यभिप्रायात् फलवदिति ॥ ८५ ॥

इदानीं पोषधव्रतकर्तॄन् प्रशंसति—

गृहिणोऽपि हि धन्यास्ते पुण्यं ये पोषधव्रतम् ।
दुष्पालं पालयन्त्येव यथा स चुलनीपिता ॥ ८६ ॥

यतयस्तावद् धन्या एव गृहिणोऽपि गृहस्था अपि ते धन्याः धर्मधनं

व्याख्याः ये निःसत्त्वजनदुष्पालं पुण्यं पवित्रं पोषधव्रतं पालयन्ति, यथा स चुलनीपितेति दृष्टान्तः; स च सम्प्रदायगम्यः ।

स चायम्—

अस्ति वाराणसी नामानुगङ्गं नगरी वरा ।
विचित्ररचनारम्या तिलकश्रीरिवावनेः ॥ १ ॥
सुत्रामेवामरावत्यामविस्तृतविक्रमः ।
जितशत्रुरभूत्तत्र धरित्रीधवपुङ्गवः ॥ २ ॥
आसीद्गृहपतिस्तस्यां महेभ्यश्चुलनीपिता ।
प्राप्तो मनुष्यधर्मेव मनुष्यत्वं कुतोऽपि हि ॥ ३ ॥
जगदानन्दिनस्तस्यानुरूपा रूपशालिनी ।
श्यामा नामाभवद्भार्या श्यामेव तुहिनद्युतेः ॥ ४ ॥
अष्टौ निधानेऽष्टौ वृद्धावष्टौ च व्यवहारगाः ।
इति तस्याभवन् हेम्नश्चतुर्विंशतिकोटयः ॥ ५ ॥
एकैकशो गोसहस्रैर्दशभिः प्रमितानि तु ।
तस्यासन् गोकुलान्यष्टौ कुलवेश्मानि सम्पदाम् ॥ ६ ॥
तस्यां पुर्यामथान्येद्युरुद्याने कोष्ठकाभिधे ।
भगवान् समवसृतो विहरंश्चरमो जिनः ॥ ७ ॥
ततो भगवतः पादवन्दनाय सुरासुराः ।
सेन्द्राः समाययुस्तत्र जितशत्रुश्च भूपतिः ॥ ८ ॥
पद्भ्यां चचाल चुलनीपिताऽप्युचितभूषणः ।
वन्दितुं नन्दितमनाः श्रीवीरं त्रिजगत्पतिम् ॥ ९ ॥

भगवन्तं ततो नत्वोपविश्य चुलनीपिता ।
शुश्राव परया भक्त्या प्राञ्जलिर्धर्मदेशनाम् ॥ १० ॥
अथोत्थितायां सदसि प्रणम्य चरणौ प्रभोः ।
इति विज्ञपयामास विनीतश्चुलनीपिता ॥ ११ ॥
स्वामिन्नस्मादृशां बोधहेतोर्विहरसे महीम् ।
जगद्बोधं विना नान्यो ह्यर्थस्तङ्क्रमणे रवेः ॥ १२ ॥
सर्वोऽपि याच्यते गत्वा स दत्ते यदि वा नवा ।
आगत्य याचितो धर्मं दत्से हेतुः कृपाऽत्र ते ॥ १३ ॥
जानामि यतिधर्मं चेत् गृह्णामि स्वामिनोऽन्तिके ।
योग्यता परमियती मन्दभाग्यस्य नास्ति मे ॥ १४ ॥
याचे श्रावकधर्मं तु स्वामिन् ! देहि प्रसीद मे ।
आदत्तेऽश्मावप्युदन्वो भरणं निजमेव हि ॥ १५ ॥
यथासुखं गृहाणेति स्वामिनाऽनुमतस्ततः ।
स प्रत्याख्यत्स्थूलहिंसां मृषावादं च चौरिकाम् ॥ १६ ॥
प्रत्याख्यच्च स्वभार्यायाः श्यामाया अपरस्त्रियम् ।
अष्टाष्टकोट्यभ्यधिकं स्वर्णं निध्यादिषु त्रिषु ॥ १७ ॥
व्रजेभ्योऽन्याननथाष्टभ्यः प्रत्याचख्यौ व्रजानपि ।
हलपञ्चशतीतोऽन्यां कृषियोग्यां महीमपि ॥ १८ ॥
अनःशतेभ्यः पञ्चभ्यो दिग्यायिभ्योऽपरं त्वनः ।
संवहनाय पञ्चभ्यः प्रत्याचख्यौ महामतिः ॥ १९ ॥
दिग्यात्रिकाणि चत्वारि चत्वारि प्रवहन्ति च ।
वाहनानि विना सोऽथ प्रत्याख्यदितराणि तु ॥ २० ॥

अन्यत्र मञ्चकाष्ठायाः प्रत्याख्यद्दन्तधावनम् ।
आर्द्राया मधुकयष्टेरितरद्दन्तधावनम् ॥ २१ ॥
अन्यतः क्षीरामलकात्प्रत्याचख्यौ फलान्यपि ।
सहस्रशतपाकाभ्यां तैलाभ्यां म्रक्षणान्तरम् ॥ २२ ॥
गन्धाढ्यादन्यतः प्रत्याचख्यावुद्वर्त्तनान्यपि ।
अष्टाभ्य औष्ट्रिकेभ्योऽम्भःकुम्भेभ्योऽधिकमज्जनम् ॥ २३ ॥
वस्त्रं प्रत्याख्यदन्यच्च कार्पासाद्वस्त्रयुग्मकात् ।
विलेपनानि चान्यत्र कुङ्कुमागुरुचन्दनात् ॥ २४ ॥
पुष्पं प्रत्याख्यदन्यच्च पद्माज्जातिस्रजोऽपि च ।
कर्णिकानाममुद्राभ्यामन्यानि भूषणानि च ॥ २५ ॥
सुमोच धूपमगरुतुरुष्काभ्यामथापरम् ।
अन्याश्च काष्ठपेयायाः पेया अपि समन्ततः ॥ २६ ॥
खण्डखाद्याद् घृतपूराच्चेतरत् खाद्यमत्यजत् ।
ओदनान्यपि निःशेषाण्यन्यतः कलमौदनात् ॥ २७ ॥
कलायमुद्गमाषेभ्य इतरं सूपमत्यजत् ।
शरत्कालभवात्सर्वं गोघृतादपरं घृतम् ॥ २८ ॥
शाकं पल्यङ्कमण्डूकीशाकाभ्यामन्यमत्यजत् ।
विना स्नेहाम्लदाल्यम्ले तीमनान्यपि सर्वतः ॥ २९ ॥
अन्तरिक्षोदकादन्यदुदकं पर्यवर्जयत् ।
मुखवासं च ताम्बूलात्पञ्चसौगन्धिकाद्वृते ॥ ३० ॥
अपध्यानं हिंस्रदानं प्रमादाचरितं तथा ।
पापकर्मोपदेशं चानर्थदण्डानवर्जयत् ॥ ३१ ॥

एवं श्रावकधर्मं स सम्यक् सम्यक्त्वपूर्वकम् ।
सर्वातिचाररहितं प्रपेदे पुरतः प्रभोः ॥ ३२ ॥
भगवन्तं ततो नत्वा गत्वा च निजवेश्मनि ।
प्रतिपन्नं तथा धर्मं स्वभार्यायै न्यवेदयत् ॥ ३३ ॥
तेनाथ साऽप्यनुज्ञाता रथमारुह्य तत्क्षणम् ।
उपेत्य भगवत्पार्श्वे गृहिधर्ममशिश्रियत् ॥ ३४ ॥
तदा च गौतमो नत्वा पप्रच्छेति जगत्पतिम् ।
महाव्रतधरः किं स्यान्न वाऽयं चुलनीपिता ? ॥ ३५ ॥
अथोचे स्वामिना नैष यतिधर्मं प्रपत्स्यते ।
गृहिधर्मरतः किं तु कृत्वा सौधर्मं एष्यति ॥ ३६ ॥
अरुणाभे विमाने च चतुष्पल्योपमस्थितिः ।
ततश्च्युत्वा विदेहेषूत्पद्य निर्वाणमेष्यति ॥ ३७ ॥ (युग्मम्)
गृहभारं ज्येष्ठपुत्रे न्यस्याथ चुलनीपिता ।
तस्थौ पौषधशालायां पालयन् पौषधव्रतम् ॥ ३८ ॥
तस्याथ पौषधस्थस्य मायामिथ्यात्ववान् सुरः ।
निशीथे कश्चिदागच्छत्पार्श्वे व्रतजिघांसया ॥ ३९ ॥
घोराकारः पुरोभूय खड्गमाकृष्य भीषणम् ।
स वत्यचे तमत्युच्चैश्चुलनीपितरं सुरः ॥ ४० ॥
अप्रार्थितप्रार्थक रे ! श्रमणोपासकव्रतम् ।
त्वया किमिदमारब्धं मदादेशेन मुच्यताम् ॥ ४१ ॥
मुञ्चसीदं न चेत्तेऽग्रे ज्येष्ठपुत्रमहं तव ।
कुष्माण्डमिव खड्गेन खण्डयिष्यामि खण्डशः ॥ ४२ ॥

भवतः प्रेक्षमाणस्य पुरस्त्विषिशितान्यहम् ।
छित्वा कटाहे पक्ष्यामि शूलैर्भेत्स्यामि तत्क्षणात् ॥ ४३ ॥
आचमिष्यामि तन्मांसशोणितानि तथाऽधुना ।
प्रेक्षमाणो यथा हि त्वं स्वयमेव विपत्स्यसे ॥ ४४ ॥
देवब्रुवे विब्रुवति तत्रैवं चुलनीपिता ।
न चकम्पे केसरीव गर्जत्यूर्जितमम्बुदे ॥ ४५ ॥
अक्षोभं प्रेक्षमाणस्तु चुलनीपितरं सुरः ।
विभीषयितुकामस्तं तथैवोचे पुनः पुनः ॥ ४६ ॥
एवं विभाषमाणस्य सुरस्य चुलनीपिता ।
न सम्मुखमपि प्रेक्षाञ्चक्रे श्वन इव द्विपः ॥ ४७ ॥
स विकृत्य पुरो ज्येष्ठतनयं चुलनीपितुः ।
निस्त्रिंशेन नृशंसात्मा पशुवद् व्यशसत्ततः ॥ ४८ ॥
छित्वा छित्वा कटाहान्तस्तन्मांसानि पपाच च ।
बभञ्ज च शितैः शूलैराचचाम च सोऽमरः ॥ ४९ ॥
अधिसेहे च तत्सर्वं तत्त्वज्ञः चुलनीपिता ।
अन्यत्वभावनाभाजां स्वाङ्गच्छेदोऽपि नार्त्तये ॥ ५० ॥
अथोचे स सुरो रे रे ! व्रतमद्यापि नोज्झसि ।
तद् ज्येष्ठमिव ते पुत्रं हन्मि मध्यममप्यहम् ॥ ५१ ॥
ततोऽहन्मध्यमं पुत्रं तथैवोचे पुनः पुनः ।
निरीक्ष्याक्षुभितं तं च कनिष्ठं चावधीत्सुतम् ॥ ५२ ॥
तत्राप्यालोक्य निष्कम्पं तं क्रुद्धः स सुरोऽब्रवीत् ।
नाद्याप्युज्झसि पाखण्डं मातरं ते विहन्मि तत् ॥ ५३ ॥

भद्रां नामाथ चुलनीपितुर्मातरमातुराम् ।
विकरोति स्म रुदतीं करुणं कुररीमिव ॥ ५४ ॥
स सुरः पुनरप्यूचे मुच्यतां प्रकृतं त्वया ।
स्वकुटुम्बप्रणाशाय कृत्यातुल्यमिदं व्रतम् ॥ ५५ ॥
अन्यथा कुलमेष्ठिं ते मातरं हरिणीमिव ।
हत्वा भ्रक्ष्यामि पक्ष्यामि भक्षयिष्यामि च क्षणात् ॥ ५६ ॥
ततोऽप्यभीतं चुलनीपितरं वीक्ष्य सोऽमरः ।
भद्रामाराटयत्तारं सूनाध्यस्तामजामिव ॥ ५७ ॥
यया भार इवोढस्त्वमुदरेणोदरंभरिः ।
मातरं हन्यमानां तां पश्येत्यूचे पुनः सुरः ॥ ५८ ॥
अथैवं चिन्तयामास चेतसा चुलनीपिता ।
अहो दुरात्मा कोऽप्येष परमाधार्मिकोपमः ॥ ५९ ॥
पुत्रत्रयं मे पुरतो जघान च चखाद च ।
क्रव्यादिव ममाम्बामप्यधुना हन्तुमुद्यतः ॥ ६० ॥
यावन्न हन्त्यमूं तावद्ग्रक्ष्यामीति चचाल सः ।
कुर्वाणेन महाशब्दमुत्पेते च सुरेण खे ॥ ६१ ॥
तं च कोलाहलं श्रुत्वा भद्रा द्रुतमुपेत्य तम् ।
किमेतदिति चापृच्छत्सोऽशंसत्तदशेषतः ॥ ६२ ॥
ततोऽभाषिष्ट भद्रैवं मिथ्यादृष्टोऽप्ययं सुरः ।
पोषधव्रतविघ्नं ते चक्रे कृत्रिमभीषणैः ॥ ६३ ॥
पोषधव्रतभङ्गस्य कुरुष्वालोचनं ततः ।
पापाय व्रतभङ्गस्य स्यादनालोचनं यतः ॥ ६४ ॥

तथैव प्रतिपेदेऽथ तद्वाचं चुलनीपिता ।
चकारालोचनां तस्य व्रतभङ्गस्य शुद्धधीः ॥ ६५ ॥
अथैकादश भेजेऽसौ श्रावकप्रतिमाः क्रमात् ।
सोपानानीव स स्वर्गसौधारोहणकर्मणे ॥ ६६ ॥
निस्त्रिंशधारानिशितं स एवं श्रावकव्रतम् ।
सुचिरं पालयामास भगवद्वचनोचितम् ॥ ६७ ॥
ततः संलेखनापूर्वं प्रपद्यानशनं सुधीः ।
मृत्वा सौधर्म उत्पेदे विमाने सोऽरुणप्रभे ॥ ६८ ॥

दुष्पालमेवं चुलनीपिता यथा
तत्पालयामास स पौषधव्रतम् ।
ये पालयन्त्येव तथा परेऽप्यदो
दृढव्रतास्ते खलु मुक्तिगामिनः ॥ ६९ ॥

॥ इति चुलनीपितुः कथानकम् ॥ ८६ ॥

इदानीं चतुर्थं शिक्षाव्रतमाह –

दानं चतुर्विधाहारपात्राच्छादनसद्मनाम् ।
अतिथिभ्योऽतिथिसंविभागव्रतमुदीरितम् ॥ ८७ ॥

अतिथिभ्यस्तिथिपर्वाद्युत्सवरहितेभ्यो भिक्षार्थं भोजनकाले उपस्थितेभ्यः साधुभ्यो, दानं विश्राणनं, चतुर्विधस्याशनपानखाद्यस्वाद्यरूपस्याहारस्य, पात्रस्यालाब्वादेः, आच्छादनस्य वस्त्रस्य कम्बलस्य वा, सद्मनो वसतेरुपलक्षणात्पीठफलकशय्यासंस्तारकादीनामपि ।

अनेन हिरण्यादिदाननिषेधस्तेषां यतेरनधिकारात्। तदेतदतिथिसंविभागव्रतमुच्यते। अतिथेः सङ्गतो निर्दोषो विभागः पश्चात्कर्मादिदोषपरिहारायांशदानरूपोऽतिथिसंविभागस्तद्रूपं व्रतमतिथिसंविभागव्रतम्। आहारादीनां च न्यायार्जितानां प्रासुकैषणीयानां कल्पनीयानां च देशकालश्रद्धासत्कारपूर्वकमात्मानुग्रहबुद्धा यतिभ्यो दानमतिथिसंविभागः।

यदूचुः --

'नायागयाणं कप्पणिज्जाणं अन्नपाणाईणं दव्वाणं देसकालसद्धासक्कारक्कमजुत्तं पराए भत्तीए आयाणुग्गहबुद्धीए संजयाणं दाणं अतिहिसंविभागो।

अनूदितं चैतत्—

प्रायः शुद्धैस्त्रिविधविधिना प्रासुकैरेषणीयैः
कल्प्यप्रायैः स्वयमुपहृतैर्वस्तुभिः पानकाद्यैः।
काले प्राप्तान् सदनमसमश्रद्धया साधुवर्गान्
धन्याः केचित्परमवहिता हन्त! संमानयन्ति॥ १॥

अशनमखिलं खाद्यं स्वाद्यं भवेदथ पानकं
यतिजनहितं वस्त्रं पात्रं सकम्बलप्रोञ्छनम्।
वसतिफलकप्रख्यं मुख्यं चरित्रविवर्द्धनं
निजकमनसः प्रीत्याधायि प्रदेयमुपासकैः॥ २॥

---

(१) न्यायागतानां कल्पनीयानां अन्नपानादीनां द्रव्याणां देशकालश्रद्धासत्कारक्रमयुतं परया भक्त्या आत्मानुग्रहबुद्ध्या संयतानां दानं अतिथिसंविभागः।

तथा—

[1]साहूण कप्पणिज्जं जं नवि दिन्नं कहिंचि किंचि तहिं ।

धीरा जहुत्तकारी सुसावगा तं न भुंजंति ॥ १ ॥

[2]वसहीसयणासणभत्तपाणभेसज्जवत्थपत्ताई ।

जइवि न पज्जत्तधणो थोवाओ वि थोवयं देइ ॥ २ ॥

वाचकमुख्यस्त्वाह –

किञ्चिच्छुद्धं कल्प्यमकल्प्यं स्यात् स्यादकल्प्यमपि कल्प्यम् ।

पिण्डः शय्या वस्त्रं पात्रं वा भेषजाद्यं वा ॥ १ ॥

देशं कालं पुरुषमवस्थामुपयोगशुद्धिपरिणामान् ।

प्रसमीक्ष्य भवति कल्प्यं नैकान्तात्कल्पते कल्प्यम् ॥ २ ॥

ननु यथा शास्त्रे आहारदातारः श्रूयन्ते न तथा वस्त्रादिदातारः, न च वस्त्रादिदानस्य फलं श्रूयते तत्र वस्त्रादिदानं युक्तम् । नैवम् ! भगवत्यादौ वस्त्रादिदानस्य साक्षादुक्तत्वात् ।

यथा—

[3]समणे निग्गंथे फासुएणं एसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकंबलपायपुंछणेणं पीढफलगसेज्जासंथारएणं पडिलाभेमाणे विहरइ ।

---

(१) साधूनां कल्पनीयं यद् नापि दत्तं कथंचित् किञ्चित् तत्रिम् ।
धीरा यथोक्तकारिणः सुश्रावकास्तन्न भुञ्जते ॥ १ ॥

(२) वसतिशयनासनभक्तपानभैषज्यवस्त्रपात्रादि ।
यद्यपि न पर्याप्तधनः स्तोकादपि स्तोकं दद्यात् ॥ २ ॥

(३) श्रमणान् निर्ग्रन्थान् प्रासुकेन एषणीयेन अशनपानखादिमस्वादिमेन

इत्याहारवस्त्रसंयमाधारशरीरोपकारकत्वादस्यादयोऽपि साधुभ्यो देयाः। संयमोपकारित्वं च वस्त्रस्य तावत् तृणग्रहणानलसेवा-निवारणार्थत्वेन, धर्मशुक्लध्यानसाधनार्थत्वेन, ग्लानपीडापरि-हारार्थत्वेन, मृतकपरिष्ठापनार्थत्वेन च।

यदाहुः—

'तणगहणानलसेवानिवारणा धम्मसुक्कझाणट्ठा।

दिट्ठं कप्पग्गहणं गिलाणमरणट्ठया चेव ॥ १ ॥

वाचकोऽप्याह—

शीतवातातपैर्दंशैर्मशकैश्चापि खेदितः।

मा सम्यक्त्वादिषु ध्यानं न सम्यक् संविधास्यति ॥१॥ इत्यादि पात्रस्याप्युपयोगः, अशुद्धस्याहारादेर्ग्रहणेन तत्परिष्ठापनं, संसक्ताव-स्थाविराधनात्। प्रमादात्पुनरकसङ्कितस्य तन्दुलोदकादेर्ग्रहणे सति तत्परिष्ठापनासुखं च। एवमादयोऽन्येऽपि पात्रग्रहणे गुणाः।

यदाहुः—

'छक्कायरक्खणट्ठा पायगहणं जिणेहिं पन्नत्तं।

जे अ गुणा संभोए हवंति ते पायगहणे वि ॥ १ ॥

वस्त्रपतद्ग्रहकम्बलपादप्रोञ्छनेन पीठफलकशय्यासंस्तारकेण प्रतिलाभ्यमानान् विहारयति।

(१) तृणग्रहणाऽनलसेवानिवारणाय धर्मशुक्लध्यानार्थम्।
दिष्टं कल्पग्रहणं ग्लानमरणार्थं चैव ॥ १ ॥

(२) षट्कायरक्षणार्थं पात्रग्रहणं जिनैः प्रज्ञप्तम्।
ये च गुणाः संभोगे भवन्ति ते पात्रग्रहणेऽपि ॥ १ ॥

[1]अतरंतबालवुड्ढा सेहा एसा गुरूअसहुवग्गे ।
साहारणोग्गहालद्धिकारणा पायग्गहणं तु ॥ २ ॥

ननु तीर्थंकराणां वस्त्रपात्रपरिभोगो न श्रूयते, तीर्थंकर-चरितानुकारश्च तच्छिष्याणां युक्तः । वदन्ति हि—

[2]जारिसयं गुरुलिङ्गं सीसेण वि तारिसेण हविअव्वम् ।

इति मैवं वोचः—

अच्छिद्रपाणयस्तीर्थंकराः, अपि चन्द्रादित्यौ यावच्छिखा गच्छति ; न तु पानीयबिन्दुरप्यधः पतति ; चतुर्विधज्ञानबलाच्च ते संसक्तासंसक्तमसं सत्रसमत्रसं च जलादि ज्ञात्वा निर्दोषमेवोपाददते, इति नैषां पात्रधारणे गुणः । वस्त्रं तु दीक्षाकाले तीर्थंकरा अपि गृह्णन्ति ।

यदाहुः—

[3]सव्वे वि एगदूसेण निग्गया जिणवरा चउव्वीसं ।
न य नाम अन्नलिंगे न य गिहिलिंगे कुलिंगे वा ॥ १ ॥

परमार्षं च—

---

(१) अशक्नुवद्बालवृद्धात् शिक्षकात् प्राघूर्णिकाद् गुरोरसहिष्णुवर्गात् ।
साधारणावग्रहालब्धिकारणात् पात्रग्रहणं तु ॥ २ ॥

(२) यादृशं गुरुलिङ्गं शिष्येणापि तादृशेन भवितव्यम् ।

(३) सर्वेऽपि एकदूष्येण निर्गता जिनवराश्चतुर्विंशतिः ।
न च नामान्यलिङ्गे न च गृहिलिङ्गे कुलिङ्गे वा ॥ १ ॥

[1]सेवेमि जे अईया जे अणागया जे य वट्टमाणा ते सव्वे सोवहिधम्मो देसियव्वो त्ति कट्टु एगं देवदूसमादाय निक्खमिंसु निक्खामंति निक्खमिस्संति वा ।

प्रव्रज्योत्तरकालं च सर्वबाधासहत्वान्न वस्त्रेण प्रयोजनमिति यथाकथञ्चित्तदपैतु नाम । गुरुलिङ्गानुवर्त्तनं च तच्छिष्याणां यदुक्तं, तद्वैरावणानुकरणमिव सामान्यकरिणाम । किं च । तीर्थकरानुकारमिच्छद्भिर्मठे निवसनमाधाकर्मिकादिपरिभोगस्तैला-भ्यङ्गोऽङ्गारशकटीसेवनं तृणपटीपरिधानं कमण्डलुधारणं बहुसाधु मध्ये निवासश्छद्मस्थानां धर्मदेशनायाः करणं शिष्यशिष्यादीक्षादिकं सर्वमविधेयं स्यात्, तच्च कुर्वन्ति ।

कम्बलस्य च वर्षासु बहिर्निर्गतानां तात्कालिकवृष्टावप्काय-रक्षणमुपयोगः, बालवृद्धग्लाननिमित्तं वर्षत्यपि जलधरे भिक्षार्थं निःसरतां कम्बलावृतदेहानां न तथाविधाप्कायविराधना, उच्चार-प्रस्रवणादिपीडितानां कम्बलावृतदेहानां गच्छतामपि न तथाविधा विराधना । छत्राद्याच्छादितानां कम्बलमन्तरेणापि गच्छतां को दोष इति चेत् । न । 'छत्तस्स य धारणट्टाए' इत्यागमेन छत्रस्य प्रतिषिद्धत्वात् ॥ रजोहरणं पुनः साक्षाज्जीवरक्षार्थं प्रतिलेखनाकारित्वादुपयोगीति कस्तत्र विवादं कुर्यात् ? । मुखवस्त्रमपि सम्पातिमजीवरक्षणादुष्णमुखवातविराध्यमानबाह्यवायु-

(१) सर्वे येऽतीता येऽनागता ये च वर्तमानास्ते सर्वे सोपधिधर्मो देष्टव्य इति कृत्वा एकं देवदूष्यमादाय निरक्रमिषुः निष्क्रामन्ति निष्क्रमिष्यन्ति वा ।

कायजीवरक्षणामुखे धूलिप्रवेशरक्षणाञ्चोपयोगि । पीठफलकयो र्वर्षासु पनककुन्थ्वादिसंसक्तायां भुवि भूशयनस्य प्रतिषिद्धत्वाच्छय-नासनादावुपयोगः । शय्यासंस्तारकयोश्च शीतोष्णकालयोः शयनादावुपयोगः । वसतिश्च निवासार्थं यतीनामत्यन्तोपकारिणी ।

यदाह —

[1]जो देइ उवस्सयं मुणिवराण गेणगुणजोगधारीण ।
तेण दिन्ना वत्थन्नपाणसयणासणविकप्पा ॥ १ ॥
[2]जं तत्थ ठियाण भवे सव्वेसिं तेण तेसिमुवओगो ।
रक्खपरिपालणा वि, अतो दिन्ना एव ते सव्वे ॥ २ ॥
[3]सीयायवचोराणं दंसाणं तह य वालसमगाणं ।
रक्खंतो मुणिवसभे सुरलोयसुहं समज्जिणइ ॥ ३ ॥

एवं यदन्यदप्यौधिकमौपग्रहिकं वा धर्मोपकरणं तत्साधूनां धारयतां न दोषः ; तद्दातृणां तु सुतरां गुण एव ॥

[1]उपकरणमानं तु—

---

(१) यो ददात्युपाश्रयं मुनिवराणामनेकगुणयोगधारिणाम् ।
तेन दत्ता वस्त्रान्नपानशयनासनविकल्पाः ॥ १ ॥

(२) यत्तत्र स्थितानां भवेत् सर्वेषां तेन तेषामुपयोग ।
रक्षापरिपालना अपि, अतो दत्ता एव ते सर्वे ॥ २ ॥

(३) शीतातपचौरेभ्यो दंशेभ्यस्तथा च व्यालमशकेभ्यः ।
रक्षन् मुनिवृषभान् सुरलोकसुखं समर्जति ॥ ३ ॥

'जिणा बारसरूवाश्रो थेरा चोद्दसरूविणो।
अज्जाणं पणवीसं तु अश्रो उड्ढं उवग्गहो ॥ १ ॥

इत्याद्यागमादवगन्तव्यं, इह तु ग्रन्थगौरवभयान्न प्रतन्यते। इह वृद्धोक्ता सामाचारी। श्रावकेण पोषधं पारयता नियमात्साधुभ्यो दत्त्वा भोक्तव्यम्। कथम्?। यदा भोजनकालो भवति तदा आत्मनो विभूषां कृत्वा प्रतिश्रयं गत्वा साधून् निमन्त्रयते; भिक्षां गृह्णीतेति॥ साधूनां च तं प्रति का प्रतिपत्तिः। उच्यते। तदैकः पटलकमन्यो मुखानन्तकमपरो भाजनं प्रत्यवेक्षते; माऽन्तरायदोषाः स्थापनादोषा वा भूवन्निति। स च यदि प्रथमायां पौरुष्यां निमन्त्रयते; अस्ति च नमस्कारसहितप्रत्याख्यानी, ततस्तद्गृह्यते। अथ नास्त्यसौ तदा न गृह्यते, यतस्तद्वोढव्यं भवति। यदि पुनर्घनं लगेत्, तदा गृह्यते संस्थाप्यते च; यो वा उद्घाटपौरुष्यां पारयति ²पारणकवानन्यो वा तस्मै तद्दीयते; पश्चात्तेन श्रावकेण समं सङ्घाटको व्रजति, एको न वर्त्तते प्रेषयितुं; साधुपुरतः श्रावकस्तु मार्गं गच्छति, ततोऽसौ गृहं नीत्वा तावासनेनोपनिमन्त्रयते; यदि निविशेते, तदा भव्यम्, अथ न निविशेते, तथापि विनयप्रयुक्तो भवति, ततोऽसौ भक्तं पानं च स्वयमेव ददाति, भाजनं वा धारयति, स्थित एवास्ते यावद्दीयते। साधू अपि पश्चात्कर्मपरिहरणार्थं सावशेषं गृह्णीतः, ततो वन्दित्वा विसर्ज्जयति, अनु-

---

(१) जिना द्वादशरूपाः स्थविराश्चतुर्दशरूपिणः।
आर्याणां पञ्चविंशतिस्तु अत ऊर्द्धमुपग्रहः॥ १॥

(२) स च पारणके दातव्यो वा तस्मै।

गच्छति कतिचित्पदानि; ततः स्वयं भुङ्क्ते ॥ यदि पुनस्तत्र ग्रामादौ साधवो न भवन्ति तदा भोजनवेलायां द्वारावलोकनं करोति, विशुद्धभावेन च चिन्तयति यदि साधवोऽभविष्यन् तदा निस्तारितोऽहमभविष्यमिति। एष पोषधपारणके विधिः। अन्यदा तु दत्त्वा भुङ्क्ते, भुक्त्वा वा ददातीति।

अत्रान्तरश्लोकाः—

अन्नादीनामिदं दानमुक्तं धर्मोपकारिणाम्।
धर्मोपकारबाह्यानां स्वर्णादीनां न तन्मतम्॥ १॥

दत्तेन येन दीप्यन्ते क्रोधलोभस्मरादयः।
न तत्स्वर्णं यतिभ्यो दद्याच्चारित्रनाशनम्॥ २॥

यस्यां विदार्यमाणायां म्रियन्ते जन्तुराशयः।
क्षितेस्तस्याः प्रशंसन्ति न दानं करुणापराः॥ ३॥

यद्यच्छस्त्रं महाहिंस्रं तत्तद्येन विधीयते।
तदहिंस्रमना लोहं कथं दद्याद्विचक्षणः?॥ ४॥

संमूर्च्छन्ति सदा यत्र भूयांसस्त्रसजन्तवः।
तेषां तिलानां को दानं मनागप्यनुमन्यते?॥ ५॥

दद्यादर्धप्रसूतां गां यो हि पुण्याय पर्वणि।
म्रियमाणामिव हहा! वर्ण्यते सोऽपि धार्मिकः॥ ६॥

यस्या अपाने तीर्थानि मुखेनाश्नाति याऽशुचिम्।
तां मन्वानाः पवित्रां गां धर्माय ददते जडाः॥ ७॥

प्रत्यहं दुह्यमानायां यस्यां वत्सः प्रपीड्यते।
खुरादिभिर्जन्तुघ्नीं तां दद्याद्गां श्रेयसे कथम्?॥ ८॥

स्वर्णमयी रूप्यमयी तिलमय्याज्यमय्यपि ।
विभज्य भुज्यते धेनुस्तद्दातुः किं फलं भवेत् ? ॥ ९ ॥
कामगर्दभकरी बन्धुस्नेहद्रुमदवानलः ।
कलेः कलितरुर्दुर्गंदुर्गतिद्वारकुञ्चिका ॥ १० ॥
मोक्षद्वारार्गला धर्मधनचौरी विपत्करी ।
या कन्या दीयते साऽपि श्रेयसे, कोऽयमागमः ? ॥ ११ ॥
विवाहसमये मूढैर्धर्मबुद्ध्या विधीयते ।
यत्तु यौतुकदानं तद्भस्मनि हुतोपमम् ॥ १२ ॥
यत् संक्रान्तौ व्यतीपाते वैधृते पर्वणोरपि ।
दानं प्रवर्तितं लुब्धैर्मुग्धसंमोहनं हि तत् ॥ १३ ॥
मृतस्य तृप्त्यै ये दानं तन्वन्ति तनुबुद्धयः ।
ते हि सिञ्चन्ति मुशलं सलिलैः पल्लवेच्छया ॥ १४ ॥
विप्रेभ्यो भोजने दत्ते प्रीयन्ते पितरो यदि ।
एकस्मिन् भुक्तवत्यन्यः पुष्टः किं न भवेदिह ? ॥ १५ ॥
अपत्यदत्तं चेद्दानं पितृणां पापमुक्तये ।
पुत्रेण तप्ते तपसि तदा मुक्तिं पिताऽऽप्नुयात् ॥ १६ ॥
गङ्गागयादौ दानेन तरन्ति पितरो यदि ।
[1]तत्तोक्षन्तां प्ररोहाय [2]गृहे दग्धा द्रुमास्तदा ॥ १७ ॥
गतानुगतिकैः दत्तं न दद्यादुपयाचितम् ।
फलन्ति हन्त ! पुण्यानि पुण्याभावे मुधैव तत् ॥ १८ ॥

---

(१) क ख ग तत्तोक्षन्तां । (२) ख वह्निदग्धाः ।

न कोऽपि शक्ष्यति त्रातुं पूर्णे काले सुरैरपि ।
दत्तोपयाचितैस्तेषां बिम्बैस्त्राणं महाद्भुतम् ॥ १९ ॥
महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयन् ।
दाताऽऽत्मानं च पात्रं च पातयेन्नरकावटे ॥ २० ॥
दृढधर्मधिया दाता न तथाऽऽद्येन लिप्यते ।
जानन्नपि यथा दोषं ग्रहीता मांसलोलुपः ॥ २१ ॥
अपात्रप्राणिनो हत्वा पात्रं पुष्णन्ति ये पुनः ।
अनेकभेकघातेन ते प्रीणन्ति भुजङ्गमम् ॥ २२ ॥
न स्वर्णादीनि दानानि देयानीत्यर्हतां मतम् ।
अन्नादीन्यपि पात्रेभ्यो दातव्यानि विपश्चिता ॥ २३ ॥
ज्ञानदर्शनचारित्ररूपरत्नत्रयान्विताः ।
समितीः पञ्च बिभ्राणा गुप्तित्रितयशालिनः ॥ २४ ॥
महाव्रतमहाभारधरणैकधुरन्धराः ।
परीषहोपसर्गारिचमूजयमहाभटाः ॥ २५ ॥
निर्ममत्वाः शरीरेऽपि किमुतान्येषु वस्तुषु ? ।
धर्मोपकरणं मुक्त्वा परित्यक्तपरिग्रहाः ॥ २६ ॥
द्विचत्वारिंशता दोषैरदुष्टं भैक्षमात्रकम् ।
आददाना वपुर्धर्मयात्रामात्रप्रवृत्तये ॥ २७ ॥
नवगुप्तिसनाथेन ब्रह्मचर्येण भूषिताः ।
दन्तशोधनमात्रेऽपि परस्वे विगतस्पृहाः ॥ २८ ॥
मानापमानयोर्लाभालाभयोः सुखदुःखयोः ।
प्रशंसानिन्दयोर्हर्षशोकयोस्तुल्यवृत्तयः ॥ २९ ॥

कृतकारितानुमतिप्रभेदारम्भवर्जिताः ।
मोक्षैकतानमनसो यतयः पात्रमुत्तमम् ॥ ३० ॥
सम्यग्दर्शनवन्तस्तु देशचारित्रयोगिनः ।
यतिधर्मेच्छवः पात्रं मध्यमं गृहमेधिनः ॥ ३१ ॥
सम्यक्त्वमात्रसन्तुष्टा व्रतशीलेषु [1]निःसहाः ।
तीर्थप्रभावनोद्युक्ता जघन्यं पात्रमुच्यते ॥ ३२ ॥
कुशास्त्रश्रवणोत्पन्नवैराग्याश्चिरपरिग्रहाः ।
ब्रह्मचर्यरताः स्तेयमृषाहिंसापराङ्मुखाः ॥ ३३ ॥
घोरव्रता मौनजुषः कन्दमूलफलाशिनः ।
शिलोञ्छवृत्तयः पत्रभोजिनो भैक्षजीविनः ॥ ३४ ॥
कषायवस्त्रा निर्वस्त्राः शिखामौण्ड्यजटाधराः ।
एकदण्डास्त्रिदण्डा वा गृहारण्यनिवासिनः ॥ ३५ ॥
पञ्चाग्निसाधका ग्रीष्मे गलन्तीधारिणो हिमे ।
भस्माङ्गरागाः खट्वाङ्गकपालास्थिविभूषणाः ॥ ३६ ॥
स्वबुद्ध्या धर्मवन्तोऽपि मिथ्यादर्शनदूषिताः ।
जिनधर्मद्विषो मूढाः कुपात्रं स्युः [2]कुतीर्थिनः ॥ ३७ ॥
प्राणिप्राणापहरणा मृषावादपरायणाः ।
परस्वहरणोद्युक्ताः प्रकामं कामगर्दभाः ॥ ३८ ॥
परिग्रहारम्भरता न सन्तुष्टाः कदाचन ।
मांसाशिनो मद्यरताः कोपनाः कलहप्रियाः ॥ ३९ ॥

---

(१) ग घ निःस्पृहाः ।　　(२) ख घ ञ कुतीर्थिकाः ।

कुशास्त्रमात्रपाठेन सदा पण्डितमानिनः।
तत्त्वतो नास्तिकप्राया अपात्रमिति शंसिताः॥ ४०॥

इत्यपात्रं कुपात्रं च परिहृत्य विवेकिनः।
पात्रदाने प्रवर्त्तन्ते सुधियो मोक्षकाङ्क्षिणः॥ ४१॥

दानं स्यात्सफलं पात्रे [1]कुपात्रापात्रयोरपि।
पात्रे धर्माय तच्च स्यादधर्माय तदन्ययोः॥ ४२॥

पयःपानं भुजङ्गानां यथा विषविवृद्धये।
कुपात्रापात्रयोर्दानं तद्[2]भववृद्धये॥ ४३॥

स्वादु क्षीरं यथा क्षिप्तं कटुतुम्बुनि दुष्यति।
दानं दत्तं शुद्धमपि कुपात्रापात्रयोस्तथा॥ ४४॥

दत्ता कुपात्रापात्राभ्यां सर्वोर्व्यपि फलाय न।
पात्राय दत्तो ग्रासोऽपि श्रद्धया स्यान्महाफलः॥ ४५॥

इयं मोक्षफले दाने पात्रापात्रविचारणा।
दयादानं तु तत्त्वज्ञैः कुत्रापि न निषिध्यते॥ ४६॥

शुद्धाशुद्धिकृता भङ्गाश्चत्वारः पात्रदातृयोः।
आद्यः शुद्धो द्वितीयो [3]वैकल्पिकोऽन्त्यौ तु निष्फलौ॥४७॥

दानेन भोगानाप्नोतीत्यविमृश्यैव भाष्यते।
अनर्घ्यपात्रदानस्य तुच्छा भोगाः कियत्फलम्?॥ ४८॥

पात्रदाने फलं मुख्यं मोक्षः सस्यं कृषेरिव।
पलालमिव भोगास्तु फलं स्यादानुषङ्गिकम्॥ ४९॥

---

(१) अ ब नत्वपात्रकुपात्रयो। (३) ग ब द्वितीयस्तु पार्क्षिको।

(२) क -द्भवति पापने।

जिनानां दानदातारः प्रथमे मोक्षगामिनः ।
धनादयो दानधर्माद्बोधिबीजमुपार्जयन् ॥ ५० ॥
जिनानां पारणे भिक्षादातॄणां मन्दिराजिरे ।
हर्षोत्कर्षपराः सद्यः पुष्पवृष्टिं व्यधुः सुराः ॥ ५१ ॥
इत्यतिथिसंविभागव्रतमेतदुदीरितं प्रपञ्चेन ।
देयादेये पात्रापात्रे ज्ञात्वा यथोचितं कुर्यात् ॥ ५२ ॥ ८७ ॥

यद्यपि विवेकिनः श्रद्धावतः सत्पात्रदाने साक्षात्पारम्पर्येण वा मोक्षः फलं, तथापि मुग्धजनानुग्रहार्थं पात्रदानस्य प्रासङ्गिकं फलमाह—

पश्य सङ्गमको नाम सम्पदं वत्सपालकः ।
चमत्कारकरीं प्राप मुनिदानप्रभावतः ॥ ८८ ॥

पश्येत्यनेन मुग्धबुद्धिमभिमुखयति। सङ्गमको नामेति सङ्गमकाभिधानः, वत्सपालो वत्सपालनजीवकः, चमत्कारकरीं सम्पदं प्राप ; कुतः, मुनिदानप्रभावतः । अत्र सङ्गमकस्य पारम्पर्येण मोक्षोऽपि फलमस्ति, तथापि प्रासङ्गिकफलाभिधानरभसेन स नोक्तः। सङ्गमकचरितं च सम्प्रदायगम्यम् ।

स चायम्—

मगधेष्वस्ति निःसीमरत्नप्राग्भारभासुरम् ।
पुरं समुद्रवद्राजगृहं कुलगृहं श्रियः ॥ १ ॥

(१) क ग अ ड थ सुगन्ध्युदकपुष्पप्रकरत्र- ।

राजा पुरं तदपरैरनुल्लङ्घितशासनः।
शशास श्रेणिकः पाकशासनः स्वःपुरीमिव ॥ २ ॥
शालिग्रामेऽथ धन्येति काचिदुच्छिन्नवंशिका।
बालं सङ्गमकं नाम समादाय समाययौ ॥ ३ ॥
वसंस्तत्र स पौराणां वत्सरूपाण्यचारयत्।
अनुरूपा ह्यसौ रोरबालानां मृदुजीविका ॥ ४ ॥
अथापरेद्युः संजाते तत्र कस्मिंश्चिदुत्सवे।
पायसं सङ्गमोऽपश्यद्‌ भुज्यमानं गृहे गृहे ॥ ५ ॥
गत्वा स्वगेहे जननीं ययाचे सोऽपि पायसम्।
साऽप्युवाच दरिद्राऽस्मि मद्गेहे पायसं कुतः ? ॥ ६ ॥
बालेन तेनाग्रतया याच्यमाना मुहुर्मुहुः।
स्मरन्ती पूर्वविभवं [1]तारतारं रुरोद सा ॥ ७ ॥
तस्या रुदितदुःखेनानुविद्धहृदया इव।
आगत्य [2]प्रतिवेशिन्यः पप्रच्छुर्दुःखकारणम् ॥ ८ ॥
ताभ्योऽभ्यधत्त सा दुःखकारणं गद्गदाक्षरैः।
क्षीराद्यदुस्तास्तस्यै साऽपचत् पायसं ततः ॥ ९ ॥
खण्डाज्यपायसैर्भृत्वा स्थालं बालस्य तस्य सा।
आर्पयत्प्रययौ चान्तर्गृहं कार्येण केनचित् ॥ १० ॥
अत्रान्तरे च कोऽप्यागान्मुनिर्मासमुपोषितः।
पारणाय भवोदन्वत्तारणायास्य नौरिव ॥ ११ ॥

---

(१) ख ग घ ङ तारं तारं। (२) क ख घ प्रातिवेश्मिकाभ्यः।

सोऽचिन्त्यदिदं चिन्तामाणिक्यमिव चेतनम् ।
जङ्गमः कल्पशाखीव कामधेनुरिवापशुः ॥ १२ ॥
साधु साधु महासाधुर्मद्भाग्यैरयमाययौ ।
कुतोऽन्यथा वराकस्य ममेदृक्पात्रसङ्गमः ? ॥ १३ ॥
भाग्योदयेन केनापि ममाद्य समपद्यत ।
चित्तं वित्तं च पात्रं च त्रिवेणीसङ्गमो ह्ययम् ॥ १४ ॥
इत्यसौ स्थालमुत्पाट्य पायसं साधवे ददौ ।
जग्राहानुग्रहायास्य महाकारुणिको मुनिः ॥ १५ ॥
ययौ च स मुनिर्गेहान्मध्याद् धन्याऽपि निर्ययौ ।
मन्ये भुक्तमनेनेति ददौ सा पायसं पुनः ॥ १६ ॥
तत्पायसमलम्पः सङ्गाकण्ठं बुभुजेऽथ सः ।
तदजीर्णेन यामिन्यां स्मरन् साधुं व्यपद्यत ॥ १७ ॥
तेन दानप्रभावेण सोऽथ राजगृहे पुरे ।
गोभद्रेभ्यस्य भार्याया भद्राया उदरेऽभवत् ॥ १८ ॥
शालिक्षेत्रं सुनिष्पन्नं स्वप्नेऽपश्यच्च सा ततः ।
भर्तुः शशंस, सोऽप्यस्याः सूनुः स्यादित्यचीकथत् ॥ १९ ॥
चेद्दानधर्मकर्माणि करोमीति बभार सा ।
दोहदं. तं तु गोभद्रः पूरयामास भद्रधीः ॥ २० ॥
पूर्णे काले ततो भद्रा द्युतिद्योतितदिङ्मुखम् ।
असूत तनयं रत्नं विदूरं गिरिभूरिव ॥ २१ ॥
दृष्टस्वप्नानुसारेण सूनोस्तस्य शुभे दिने ।
चक्रतुः पितरौ शालिभद्र इत्यभिधां शुभाम् ॥ २२ ॥

[1]धात्रीभिः पञ्चभिः पाल्यमानः स ववृधे क्रमात् ।
किञ्चिदूनाष्टवर्षः सन् पित्राऽप्यध्यापितः कलाः ॥ २३ ॥
संप्राप्तयौवनश्चासौ युवतीजनवल्लभः ।
सवयोभिः समं रेमे प्रद्युम्न इव नूतनः ॥ २४ ॥
तत्पुरश्रेष्ठिनोऽर्थेत्य कन्या द्वात्रिंशतं निजाः ।
प्रदातुं शालिभद्राय भद्राना॑थं ययाचिरे ॥ २५ ॥
अथ प्रहृष्टो गोभद्रः शालिभद्रेण सादरम् ।
सर्वलक्षणसम्पूर्णाः कन्यकाः पर्यणाययत् ॥ २६ ॥
शालिभद्रस्ततो रम्ये विमान इव मन्दिरे ।
विललास समं ताभिः पतिर्दिविषदामिव ॥ २७ ॥
विवेदानन्दमग्नोऽयं न रात्रिं न च वासरम् ।
तस्यापूरयतां भोगसामग्रीं पितरौ स्वयम् ॥ २८ ॥
श्रीवीरपादमूलेऽथ गोभद्रो व्रतमग्रहीत् ।
कृत्वा चानशनं मृत्वा देवलोकं जगाम [2]च ॥ २९ ॥
अवधिज्ञानतो ज्ञात्वा शालिभद्रं निजात्मजम् ।
तत्पुण्यावर्जितः सोऽभूत्पुत्रवात्सल्यतत्परः ॥ ३० ॥
दिव्यानि वस्त्रनेपथ्यादीन्यस्य प्रतिवासरम् ।
सभार्यस्यार्पयामास कल्पशाखीव सोऽमरः ॥ ३१ ॥
यद्यद्भद्रोचितं कार्यं भद्रा तत्तदसाधयत् ।
पूर्वदानप्रभावेण भोगान् सोऽभुङ्क्त केवलम् ॥ ३२ ॥

---

(१) ख ग घ ङ पाल्यमानः स धात्रीभिः पञ्चभिर्व- । (२) क खः ।

वणिग्भिः कैश्चिदन्येद्युर्गृहीत्वा रत्नकम्बलान् ।
शिश्रिये श्रेणिकस्तांश्च महार्घत्वेन नाग्रहीत् ॥ ३३ ॥
ततस्ते वणिजो जग्मुः शालिभद्रनिकेतनम् ।
तद्दुक्तार्घेण तान् भद्राऽप्यग्रहीद्रत्नकम्बलान् ॥ ३४ ॥
मद्योग्यो गृह्यतामेको महामूल्योऽपि कम्बलः ।
इत्यूचे चेल्लणादेव्या तदा च श्रेणिको नृपः ॥ ३५ ॥
राज्ञाऽपि मूल्यपूर्वं तं कम्बलं वणिजोऽर्थिताः ।
भद्रा जग्राह तान् सर्वान् कम्बलानित्यचीकथन् ॥ ३६ ॥
श्रेणिकः प्राहिणोदेकं प्रवीणं पुरुषं ततः ।
भद्रापार्श्वे मूल्यदानात्कम्बलादानहेतवे ॥ ३७ ॥
याचिता तेन भद्रोचे छित्त्वा तान् रत्नकम्बलान् ।
शालिभद्रप्रियापादप्रोञ्छनीकृतवत्यहम् ॥ ३८ ॥
कार्यं निष्पद्यते किञ्चिज्जीर्णैश्चेद्रत्नकम्बलैः ।
तदृत्वाऽऽपृच्छ्य राजानमागच्छामून् गृहाण च ॥ ३९ ॥
आख्यद्गत्वा स तद्राज्ञे राज्ञ्यूचे चेल्लणाऽप्यदः ।
पश्यास्माकं वणिजां च रीतिहेम्नोरिवान्तरम् ॥ ४० ॥
तमेव पुरुषं प्रेष्य श्रेणिकेन कुतूहलात् ।
आकारिते शालिभद्रे भद्रोपेत्य व्यजिज्ञपत् ॥ ४१ ॥
बहिर्नहि महीनाथ ! जातु याति मदात्मजः ।
प्रसादः क्रियतां देव ! मद्गृहागमनेन मे ॥ ४२ ॥
कौतूहलाच्छ्रेणिकोऽपि तत्तथा प्रत्यपद्यत ।
तं च क्षणं प्रतीक्ष्याथ साऽग्रे भूत्वा गृहं ययौ ॥ ४३ ॥

विचित्रवस्त्रमाणिक्यचित्रकल्पमयीं ततः ।
आराजहर्म्यं स्वगृहाद्‌हट्टशोभां व्यधत्त सा ॥ ४४ ॥
तयाऽऽहूतस्ततो राजा कृतां सद्यः सुरैरिव ।
विभावयन् हट्टशोभां शालिभद्रगृहं ययौ ॥ ४५ ॥
स्वर्णस्तम्भोपरि प्रेङ्खदिन्द्रनीलाश्मतोरणम् ।
मौक्तिकस्वस्तिकश्रेणिदन्तुरद्वारभूतलम् ॥ ४६ ॥
दिव्यवस्त्रकृतोल्लोचं सुगन्धिद्रव्यधूपितम् ।
भुवि दिव्यविमानानां प्रतिमानमिव स्थितम् ॥ ४७ ॥
तद्विवेश विशामीशो विस्मयस्मेरलोचनः ।
भूमिकायां चतुर्थ्यां तु सिंहासन उपाविशत् ॥ ४८ ॥
सप्तम्यां भुवि भद्रेत्य शालिभद्रं ततोऽवदत् ।
इहायातः श्रेणिकोऽस्ति तं द्रष्टुं क्षणमेहि तत् ॥ ४९ ॥
अम्ब ! त्वमेव यद्वेत्सि तमर्थं कारय स्वयम् ।
किं मया तत्र कर्त्तव्यं स भद्रामित्यभाषत ? ॥ ५० ॥
ततो भद्राऽप्युवाचैनं[१] क्रेतव्यं वस्तु न ह्यदः ।
किन्त्वसौ सर्वलोकानां युष्माकमपि च प्रभुः ॥ ५१ ॥
तच्छ्रुत्वा शालिभद्रोऽपि सविषादमचिन्तयत् ।
धिक् सांसारिकमैश्वर्यं यन्ममाप्यपरः प्रभुः ॥ ५२ ॥
भोगिभोगैरिवैभिर्मे भोगैरलमतः परम् ।
दीक्षां सद्यस्तु ग्रहीष्यामि श्रीवीरचरणान्तिके ॥ ५३ ॥

---

(१) ख च -प्युवाचैवं ।

एवं संवेगयुक्तोऽपि स मातुरुपरोधतः ।
सभार्योऽभ्येत्य राजानमनमद्विनयान्वितः ॥ ५४ ॥
सस्वजे श्रेणिकेनाथ स्वाङ्के सुत इवासितः ।
स्नेहाच्छिरसि चाघ्रातः क्षणाच्चाश्रूणि सोऽमुचत् ॥ ५५ ॥
ततो भद्रा जगादैवं देवायं मुच्यतां यतः ।
मानुष्यमाल्यगन्धेन मनुष्योऽप्येष बाध्यते ॥ ५६ ॥
देवभूयं गतः श्रेष्ठी सभार्यस्यास्य यच्छति ।
दिव्यनैपथ्यवस्त्राङ्गरागादीन् प्रतिवासरम् ॥ ५७ ॥
ततो राज्ञा विसृष्टोऽसौ ययौ सप्तमभूमिकाम् ।
इहैव भोक्तव्यमिति विज्ञप्तो भद्रया नृपः ॥ ५८ ॥
भद्राद्याक्षिप्ततो राजा प्रत्यपद्यत तत्तथा ।
सद्यः साऽसाधयत्सर्वं श्रीमतां किं न सिध्यति ? ॥ ५९ ॥
सस्नौ स्नानीयतैलाद्यैश्चूर्णैस्तूर्णं ततो नृपः ।
चाङ्गुलीयं तदङ्गुल्याः क्रीडावाप्यां पपात च ॥ ६० ॥
यावदन्वेषयामास भूपतिस्तदितस्ततः ।
तावद्भद्राऽऽदिशद्दासीं वाप्यम्भोऽन्यत्र नाय्यताम् ॥ ६१ ॥
तथाकृते तया चित्रदिव्याभरणमध्यगम् ।
अङ्गाराभं स्वाङ्गुलीयं दृष्ट्वा राजा विसिस्मिये ॥ ६२ ॥
किमेतदिति राज्ञोक्ता दास्यवोचदिदान्वहम्[1] ।
निर्माल्यं शालिभद्रस्य सभार्यस्य निधीयते ॥ ६३ ॥

---

(१) क तद् ।

सर्वथा धन्य एवैष धन्योऽहमपि संप्रति।
राज्ये यस्येदृशाः सन्ति विमृशन्निति भूपतिः॥ ६४॥
बुभुजे सपरीवारो भूभुजामग्रणीस्ततः।
चित्रालङ्कारवस्त्राद्यैरर्चितश्च गृहं ययौ॥ ६५॥
शालिभद्रोऽपि संसारविमोक्षं यावदिच्छति।
अभ्येत्य धर्मसुहृदा विज्ञप्तस्तावदीदृशम्॥ ६६॥
आगाच्चतुर्ज्ञानधरः सुरासुरनमस्कृतः।
मूर्त्तो धर्म इवोद्याने धर्मघोषाभिधो मुनिः॥ ६७॥
शालिभद्रस्ततो हर्षादधिरुह्य रथं ययौ।
आचार्यपादान् वन्दित्वा सार्धं सोपाविशत्पुरः॥ ६८॥
स सूरिर्देशना कुर्वन् नत्वा तेनेत्यपृच्छ्यत।
भगवन्! कर्मणा केन प्रभुरन्यो न जायते?॥ ६९॥
भगवानप्युवाचेदं दीक्षां गृह्णन्ति ये (१)जनाः।
अशेषस्यापि जगतः स्वामिभावं भजन्ति ते॥ ७०॥
यद्येवं नाथ! तद्गत्वा निजामापृच्छ्य मातरम्।
ग्रहीष्यामि व्रतमिति शालिभद्रो व्यजिज्ञपत्॥ ७१॥
न प्रमादो विधातव्य इत्युक्तः सूरिणा ततः।
शालिभद्रो गृहं गत्वा भद्रां नत्वेत्यभाषत॥ ७२॥
धर्मः श्रीधर्मघोषस्य सूरेरद्य मुखाम्बुजात्।
विश्वदुःखविमोक्षस्योपायभूतो मया श्रुतः॥ ७३॥

---

(१) च च नराः।

अकार्षीः साध्विदं वत्स ! पितुस्तस्यासि नन्दनः ।
प्रशशंसेति भद्राऽपि शालिभद्रं प्रमोदतः ॥ ७४ ॥
सोऽप्यवोचदिदं मातरेवं चेत्तत् प्रसीद मे ।
गृहीष्यामि व्रतमहं ननु तस्य पितुः सुतः ॥ ७५ ॥
साऽप्यवादीदिदं वत्स ! युक्तस्तेऽसौ व्रतोद्यमः ।
किन्त्वत्र लोहचणकाश्चर्वणीया निरन्तरम् ॥ ७६ ॥
सुकुमारः प्रकृत्याऽपि दिव्यभोगैश्च लालितः ।
स्यन्दनं तर्णक इव कथं त्वं वक्ष्यसि व्रतम् ? ॥ ७७ ॥
शालिभद्रोऽप्युवाचैवं पुमांसो भोगलालिताः ।
असहा व्रतकष्टानां कातरा एव नेतरे ॥ ७८ ॥
त्यज भोगान् क्रमात्मर्त्यमाल्यगन्धान् सहस्व च ।
इत्यभ्यासाद्व्रतं वत्स ! गृह्णीया इत्युवाच सा ॥ ७९ ॥
शालिभद्रस्ततो भद्रावचनं प्रतिपद्य तत् ।
भार्यामेकां तूलिकां च मुञ्चति स्म दिने दिने ॥ ८० ॥
इतश्च तस्मिन् नगरे धन्यो नाम महाधनः ।
बभूव शालिभद्रस्य कनिष्ठभगिनीपतिः ॥ ८१ ॥
शालिभद्रस्वसा [1]साश्रु स्नपयन्ती तु तं तदा ।
किं रोदिषीति तेनोक्ता जगादेति सगद्गदम् ? ॥ ८२ ॥
व्रतं गृहीतुं मे भ्राता त्यजत्येकां दिने दिने ।
भार्यां च तूलिकां चाहं हेतुना तेन रोदिमि ॥ ८३ ॥

---

(१) ख च साश्रुः । ङ धन्यं ।

य एवं कुरुते फेरुरिव भीरुस्तपस्त्यसौ ।
हीनसत्त्वस्तव भ्रातेत्यूचे धन्यः सनर्मकम् ॥ ८४ ॥
सुकरं चेदिदं नाथ ! क्रियते किं न हि त्वया ? ।
एवं सहासमन्याभिर्भार्याभिर्जगदेऽथ सः ॥ ८५ ॥
धन्योऽप्यूचे व्रते विघ्नो भवत्यस्ताश्च पुण्यतः ।
अनुमन्तारोऽद्य मेऽभूवन् प्रव्रजिष्यामि तद् द्रुतम् ॥ ८६ ॥
ता अप्यूचुः प्रसीदेदमस्माभिर्नर्मणोदितम् ।
मा स्म त्याक्षीः प्रियोऽस्मांश्च मनस्विन् ! नित्यलालिताः ॥८७॥
अनित्यं स्त्रीधनाद्येतत्रोऽ'ज्झा नित्यपदेच्छया ।
अवश्यं प्रव्रजिष्यामीत्यालपन् धन्य उत्थितः ॥ ८८ ॥
त्वामनु प्रव्रजिष्याम एवमूचुर्वर्तीश्च ताः ।
अन्वमन्यत धन्योऽपि धन्यंमन्यो महामनाः ॥ ८९ ॥
इतश्च वैभारगिरौ श्रीवीरः समवासरत् ।
विदाञ्चकार तं मर्त्यो धन्यो धर्मसुहृद्गिरा ॥ ९० ॥
दत्तदानः सदारोऽसावारुह्य शिबिकां ततः ।
भवभीतो महावीरचरणौ शरणं ययौ ॥ ९१ ॥
सदारः सोऽग्रहीद् दीक्षा ततो भगवदन्तिके ।
तच्छ्रुत्वा शालिभद्रोऽपि जितंमन्यः प्रतत्वरे ॥ ९२ ॥
सोऽन्वीयमानस्तदनु श्रेणिकेन महीभुजा ।
उपेत्य श्रीमहावीरपादमूलेऽग्रहीद् व्रतम् ॥ ९३ ॥

---

(१) ख च मोज्झामि- ।

ततः सपरिवारोऽपि स्वामी सिद्धार्थनन्दनः ।
विहरन्नन्यतोऽगच्छत् सयूथ इव हस्तिराट् ॥ ९४ ॥
धन्यश्च शालिभद्रश्च तावभूतां बहुश्रुतौ ।
महत्तपश्च तेपाते खड्गधारासहोदरम् ॥ ९५ ॥
पक्षाद् मासाद् द्विमास्यास्त्रिमास्या मासचतुष्टयात् ।
शरीरनिरपेक्षौ तौ चक्रतुः पारणं मुनी ॥ ९६ ॥
तपसा समजायेतां निर्मांसरुधिराङ्गकौ ।
चर्मभस्त्रोपमौ शालिभद्रधन्यौ महामुनी ॥ ९७ ॥
अन्येद्युः श्रीमहावीरस्वामिना सह तौ मुनी ।
आजग्मतू राजगृहं पुरं जन्मभुवं निजाम् ॥ ९८ ॥
ततः समवसरणस्थितं नन्तुं जगत्पतिम् ।
श्रद्धाऽतिशययोगेनाच्छिन्नमीयुर्जनाः पुरात् ॥ ९९ ॥
मासपारणके शालिभद्रधन्यावुभावपि ।
काले विहर्तुं भिक्षार्थं भगवन्तं प्रणेमतुः ॥ १०० ॥
मातृपार्श्वात्पारणं तेऽद्येत्युक्तः स्वामिना ततः ।
इच्छामीति भणन् शालिभद्रो धन्ययुतो ययौ ॥ १ ॥
गत्वा भद्रागृहद्वारि तावुभावपि तस्थतुः ।
तपःक्षामतया तौ च न केनाप्युपलक्षितौ ॥ २ ॥
श्रीवीरं शालिभद्रं च धन्यमप्यद्य वन्दितुम् ।
यामीति व्याकुला भद्राऽप्यभूत्सोत्सुका न तौ ॥ ३ ॥
क्षणमेकमवस्थाय तत्र तौ जग्मतुस्ततः ।
महर्षी नगरद्वारप्रतोल्या च निरीयतुः ॥ ४ ॥

तदाऽऽयान्ती पुरे तस्मिन्विक्रेतुं दधिसर्पिषी ।
शालिभद्रस्य प्राग्जन्ममाता धन्याऽभवत्पुरः ॥ ५ ॥

शालिभद्रं तु सा प्रेक्ष्य सञ्जात[1]प्रस्रवस्तनी ।
वन्दित्वा चरणौ भक्त्या द्वाभ्यामपि ददौ दधि ॥ ६ ॥

श्रीवीरस्वामिके गत्वा तदालोच्य कृताञ्जलिः ।
शालिभद्रोऽवदत्स्वामिन्माहतः पारणं कथम् ? ॥ ७ ॥

सर्वज्ञोऽप्याचचक्षेऽथ शालिभद्र ! महामुने ! ।
प्राग्जन्ममातरं धन्यामन्यदप्यन्यजन्मजम् ॥ ८ ॥

कृत्वा पारणकं दध्नाऽऽपृच्छ्य च स्वामिनं ततः ।
वैभाराद्रिं ययौ शालिभद्रो धन्यसमन्वितः ॥ ९ ॥

शिलातले शालिभद्रः सधन्यः प्रतिलेखिते ।
पादपोपगमं नाम तत्रानशनमाश्रयत् ॥ १० ॥

तदा च भद्रा तन्माता श्रेणिकश्च महीपतिः ।
आजग्मतुर्भक्तियुक्तौ श्रीवीरचरणान्तिकम् ॥ ११ ॥

ततो भद्राऽवदद्धन्यशालिभद्रौ क्व तौ मुनी ? ।
भिक्षार्थं नागतौ कस्मादस्मद्वेश्म जगत्पते ! ॥ १२ ॥

सर्वज्ञोऽपि बभाषे तौ त्वद्वेश्मनि मुनी गतौ ।
ज्ञातौ न तु भवत्येहागमनव्यग्रचित्तया ॥ १३ ॥

प्राग्जन्ममाता त्वत्सूनोर्धन्या यान्ती पुरं प्रति ।
ददौ दधि तयोस्तेन पारणं चक्रतुश्च तौ ॥ १४ ॥

---

(१) ख -प्रस्रव- ।

उभावथ महासत्त्वौ [1]सत्वरौ भवमुज्झितुम् ।
वैभारपर्वते गत्वाऽनशनं तौ प्रचक्रतुः ॥ १५ ॥
श्रेणिकेन समं भद्रा वैभाराद्रिं ययौ ततः ।
तथास्थितावपश्यच्च तावश्मघटिताविव ॥ १६ ॥
तत्कष्टमथ पश्यन्ती स्मरन्ती तत्सुखानि च ।
माऽरोदीद्रोदयन्तीव वैभाराद्रिं प्रतिस्वनैः ॥ १७ ॥
आयातोऽपि गृहं वत्स ! मया तु स्वल्पभाग्यया ।
न ज्ञातोऽसि प्रमादेनाप्रसादं मा कृथा मयि ॥ १८ ॥
यद्यपि त्यक्तवानस्त्वं तथापि निजदर्शनात् ।
आनन्दयिष्यसि दृशौ पुरेत्यासीन्मनोरथः ॥ १९ ॥
आरब्धेणामुना पुत्र ! शरीरत्यागहेतुना ।
मनोरथं तमपि मे भङ्क्तुमभ्युद्यतोऽधुना ॥ २० ॥
प्रारब्धं यत्तपस्तत्र न ते विघ्नीभवाम्यहम् ।
किन्त्वेतत्कार्कश्यतमं शिलातलमितो भव ॥ २१ ॥
अथोचे श्रेणिको हर्षस्थाने [2]किमम्ब ! रोदिषि ? ।
ईदृग् यस्याः सुतः स्त्रीषु [3]त्वमेका पुत्रवत्यसि ॥ २२ ॥
तत्त्वज्ञोऽयं महासत्त्वस्त्यक्त्वा तृणमिव श्रियम् ।
प्रपेदे स्वामिनः पादान् साक्षादिव परं पदम् ॥ २३ ॥

---

(१) ख घ सत्वरं । (३) ख ङ त्वं चैका ।
(२) क ग घ किं नाम ।

असौ जगत्स्वामिशिष्यानुरूपं तप्यते तपः ।
मुधाऽनुतप्यते मुग्धे ! किं त्वया स्त्रीस्वभावतः ? ॥ २४ ॥
भद्रैवं बोधिता राज्ञा वन्दित्वा तौ महामुनी ।
विमनस्का निजं धाम जगाम श्रेणिकस्तथा ॥ २५ ॥
मृत्वा ततस्तौ सर्वार्थसिद्धस्वर्गं बभूवतुः ।
सुरोत्तमौ त्रयस्त्रिंशत्सागरप्रमितायुषौ ॥ २६ ॥

सत्पात्रदानफलसम्पदमद्वितीयां
स प्राप सङ्गमक आयतिवर्द्धमानाम् ।
कार्यो नरैरवितथातिथिसंविभागे
भाग्यार्थिभिर्ननु ततः सततं प्रयत्नः ॥ १२७ ॥

॥ इति सङ्गमककथानकम् ॥ ८८ ॥

उक्तानि द्वादशव्रतानि, अथ तच्छेषमतिचाररक्षणलक्षणं प्रस्तोतुमाह -

व्रतानि सातिचाराणि सुकृताय भवन्ति न ।
अतिचारास्ततो हेयाः पञ्च पञ्च व्रते व्रते ॥ ८९ ॥

अतिचारो मालिन्यं तद्युक्तानि व्रतानि न सुकृताय भवन्ति, तदर्थमेवैकैकस्मिन् व्रते पञ्च पञ्चातिचाराः परिहरणीयाः । ननु सर्वविरतावेवातिचारा भवन्ति, संज्वलनोदय एव तेषामभिधानात् ।

यदाह—

'सव्वेवि य अइआरा संजलणाणं तु उदयतो हुंति ।

मूलच्छिज्जं पुण होइ बारसण्हं कसायाणं ॥ १ ॥

संज्वलनोदयश्च सर्वविरतानामेव, देशविरताना तु प्रत्याख्याना-वरणोदय इति न देशविरतावतिचारसम्भवः । युज्यते चैतत्, अल्पीयस्त्वात्तस्याः, कुन्थुशरीरे व्रणाद्यभाववत् ।

तथाहि—

प्रथमाणुव्रते स्थूलं सङ्कल्पं निरपराधं द्विविधं त्रिविधेनेत्यादि-विकल्पैर्विशेषितत्वेनातिसूक्ष्मतां गते देशाभावात्कथं देशविराधना-रूपा अतिचारा भवन्तु, अतः सर्वनाश एव तस्योपपद्यते । महा-व्रतेषु तु ते संभवन्ति, महत्त्वादेव ; हस्तिशरीरे व्रणपट्टबन्धादि-वदिति । उच्यते । देशविरतावतिचारा न संभवन्तीत्यसङ्गतम् । उपासकदशादिषु प्रतिव्रतमतिचारपञ्चकाभिधानात् । अथ भङ्गा एव ते, न त्वतिचाराः । नैवम् । भङ्गाद्भेदेनातिचारस्यागमे संमतत्वात् । यच्चोक्तम् । सर्वेऽप्यतिचाराः संज्वलनोदय एव । तत्सत्यम् । केवलं सर्वविरतिचारित्रमेवाश्रित्य तदुच्यते, न तु सम्यक्त्वदेशविरती । यतः—सव्वेवि य अइयारा इत्यादि गाथाया एवं व्याख्या—संज्वलनानामेवोदये सर्वविरतावतिचारा भवन्ति, शेषोदये तु मूलच्छेद्यमेव तस्याम् । एवं च न देशविरतावति-चाराभावः ॥ ८८ ॥

(१) सर्वेऽपि च अतिचाराः संज्वलनानां तु उदयतो भवन्ति ।

मूलच्छेद्यं पुनर्भवति द्वादशानां कषायाणाम् ॥ १ ॥

तत्र प्रथमव्रते तानाह –

क्रोधाद्बन्धच्छविच्छेदोऽधिकभाराधिरोपणम् ।
प्रहारोऽन्नादिरोधश्चाहिंसायां परिकीर्त्तिताः ॥९०॥

अहिंसायां प्रथमाणुव्रते अमी पञ्चातिचाराः बन्धो रज्ज्वादिना गोमहिष्यादीनां नियन्त्रणम्; स्वपुत्रादीनामपि विनयग्राहणार्थं क्रियते, अतः क्रोधादित्युक्तम्; क्रोधात् प्रबलकषायोदयाद्यो बन्धः स प्रथमोऽतिचारः १। छविः शरीरं त्वग्वा, तस्याः छेदो द्वैधीकरणम्; स च पादवल्मीकोपहतपादस्य पुत्रादेरपि क्रियते इति क्रोधादित्यनुवर्त्तते। क्रोधाद्यः छविच्छेदः स द्वितीयोऽतिचारः २। अधिकस्य वोढुमशक्यस्य भारस्यारोपणं गो-करभ-रासभ-मनुष्यादेः स्कन्धे पृष्ठे शिरसि वा वाहनायाधिरोपणम्; इहापि क्रोधादित्यनुवर्त्तते, [1]तेन क्रोधात्तदुपलक्षिताल्लोभाद्वा यदधिकभारारोपणं स तृतीयोऽतिचारः ३। प्रहारो लगुडादिना ताडनं क्रोधादेवेति चतुर्थोऽतिचारः ४। अन्नादिरोधो भोजनपानादेर्निषेधः क्रोधादेवेति पञ्चमोऽतिचारः ५। अत्र चायमावश्यकचूर्ण्याद्युक्तो विधिः। बन्धो द्विपदानां चतुष्पदानां वा स्यात्, सोऽपि सार्थकोऽनर्थको वा, तत्रानर्थकस्तावद् विधातुं न युज्यते, सार्थकः पुनरसौ द्विविधः, सापेक्षो निरपेक्षश्च, तत्र सापेक्षो यो दामग्रन्थिना शिथिलेन, यश्च प्रदीपनादिषु मोचयितुं छेत्तुं वा शक्यते। निरपेक्षो यत् निश्चलमत्यर्थञ्च बध्यते। एवं तावत्

([1]) क तत् ।

चतुष्पदानां बन्धो द्विपदानामपि दासदासीचौरपाठादिप्रमत्त-पुत्रादीनां यदि बन्धस्तदा सविक्रमणा एव बन्धनीया रक्षणीयाश्च, यथाऽग्निभयादिषु न विनश्यन्ति ; तथा द्विपदचतुष्पदाः श्रावकेण त एव संग्रहीतव्या ये अबद्धा एवासते इति, छविच्छेदोऽपि तथैव । नवरम । निरपेक्षो हस्तपादकर्णनासिकादि यन्निर्दयं छिनत्ति, सापेक्षः पुनर्गण्डं वा अरुर्वा छिन्द्याद्वा दहेद्वेति ; तथाऽधिक-भारोऽपि नारोपयितव्यः, पूर्वमेव हि या द्विपदादिवाहनेन जीविका सा श्रावकेण मोक्तव्या, अथान्याऽसौ न भवेत् ; तदा द्विपदोऽयं भारं स्वयमुत्क्षिपति, अवतारयति च तं वाह्यते, चतुष्पदस्य तु यथोचितभारः किञ्चिदूनः क्रियते, हलशकटादिषु पुनरुचितवेलायामसौ मुच्यत इति ; प्रहारोऽपि तथैव । नवरम । निरपेक्षः प्रहारो निर्दयताडना, सापेक्षः पुनः श्रावकेणादित एव भीतपर्षदा भवितव्यं, यदि पुनः कोऽपि न करोति विनयं तदा तं मर्माणि मुक्त्वा लतया दवरकेण वा सकृद् द्विर्वा ताडयेदिति । तथा अन्नपानादिरोधो न कस्यापि कर्त्तव्यस्तीव्रबुभुक्षो ह्येवं सति [1]म्रियते ; स्वभोजनवेलायां तु ज्वरितादीन् विना नियमत एवान्यान् विभृतान् भोजयित्वा स्वयं भुञ्जीत ; अन्नादिरोधोऽपि सार्थकानर्थकभेदो बन्धवत् द्रष्टव्यः । नवरम् । सापेक्षो रोग-चिकित्सार्थं स्यात्, अपराधकारिणि च [2]वाचैव वदेद्—अद्य ते न दास्यते भोजनादि । शान्तिनिमित्तं चोपवासादि कारयेत् ।

(१) ङ म्रियेत । (२) क वाचैवं ।

किं बहुना ? मूलगुणस्याहिंसालक्षणस्यातिचारो यथा न भवति तथा यतनया वर्त्तनीयम् । ननु हिंसैव श्रावकेण प्रत्याख्याता ततो बन्धादिकरणेऽपि न दोषो हिंसाविरतेरखण्डितत्वात् ; अथ बन्धादयोऽपि प्रत्याख्यातास्तदा तत्करणे व्रतभङ्ग एव, विरतिखण्डनात् । किञ्च । बन्धादीनां प्रत्याख्येयत्वे व्रतयत्ता [1]विशीर्येत ; प्रतिव्रतमतिचारव्रतानामाधिक्यादिति । एवं च न बन्धादीनामतिचारतेति । उच्यते सत्यं हिंसैव प्रत्याख्याता न बन्धादयः, केवलं तत्प्रत्याख्याने अर्थतस्तेऽपि प्रत्याख्याता द्रष्टव्याः, हिंसोपायत्वात्तेषाम् । न च बन्धादिकरणेऽपि व्रतभङ्गः किन्त्वतिचार एव । कथम् ! इह द्विविधं व्रतम् अन्तर्वृत्त्या बहिर्वृत्त्या च ; तत्र मारयामीति विकल्पाभावेन यदा कोपाद्यावेशात्परप्राणप्रहाणमविगणयन् बन्धादौ प्रवर्त्तते न च हिंसा भवति, तदा निर्दयताविरत्यनपेक्षप्रवृत्तत्वेनान्तर्वृत्त्या व्रतस्य भङ्गः, हिंसाया अभावाच्च बहिर्वृत्त्या पालनमिति । देशस्य भञ्जनाद्देशस्यैव पालनादतिचारव्यपदेशः प्रवर्त्तते ।

तदुक्तम्—

न मारयामीति कृतव्रतस्य विनैव मृत्युं क इहातिचारः ? ।
निगद्यते यः कुपितो वधादीन् करोत्यसौ स्यान्नियमाऽनपेक्षः ॥१॥
मृत्योरभावान्नियमोऽस्ति तस्य कोपाद्दयाहीनतया तु भग्नः ।
देशस्य भङ्गादनुपालनाच्च पूज्या अतीचारमुदाहरन्ति ॥ २ ॥

---

(१) क विशीर्यते ।

यच्चोक्तम्—व्रतैरस्ता [1]'विशीर्येत इति। तदयुक्तम्। विशुद्धाहिंसा-सद्भावे हि बन्धादीनामभाव एव। तत् स्थितमेतद्बन्धादयोऽति-चारा एव। बन्धादिग्रहणस्य चोपलक्षणत्वान्मन्त्रतन्त्रप्रयोगादयोऽ-न्येऽप्यतिचारतया ज्ञेयाः ॥ ९० ॥

अथ द्वितीयस्य व्रतस्यातिचारानाह—

मिथ्योपदेशः सहसाऽभ्याख्यानं गुह्यभाषणम्।
विश्वस्तमन्त्रभेदश्च कूटलेखश्च सूनृते ॥ ९१ ॥

मिथ्योपदेशोऽसदुपदेशः, प्रतिपन्नसत्यव्रतस्य हि परपीडाकरं वचन-मसत्यमेव, ततः प्रमादात्परपीडाकरणे उपदेशे अतिचारो यथा, वाह्यन्तां खरोष्ट्रादयो हन्यन्तां दस्यव इति। यद्वा। यथास्थितोऽर्थ-स्तथोपदेशः साधीयान्, विपरीतस्तु अयथार्थोपदेशो यथा—परेण सन्देहापन्नेन पृष्टे न तथोपदेशः। यद्वा। विवादे स्वयं परेण वा अन्यतराभिसन्धानोपायोपदेश इति प्रथमोऽतिचारः १। सहसा अनालोच्याभ्याख्यानमसद्दोषाध्यारोपणं यथा—चौरस्त्वं पारदारिको वेत्यादि। अन्ये तु सहसाऽभ्याख्यानस्थाने रहस्याभ्याख्यानं पठन्ति; व्याचक्षते च - रह एकान्तस्तत्र भवं रहस्यं रहस्येनाभ्याख्यानमभि-शंसनमसदध्यारोपणं, रहस्याभ्याख्यानं यथा—यदि वृद्धा स्त्री ततस्तस्यै कथयति,—अयं तव भर्ता तरुण्यामतिप्रसक्तः, अथ तरुणी तत एवमाह—अयं ते भर्ता प्रौढचेष्टितायां मध्यमवयसि योषिति प्रसक्तः, तथाऽयं खरकामो मृदुकाम इति वा परिहसति,

(1) क ङ विशीर्येत-।

तथा स्त्रियमभ्याख्याति भर्त्तुः पुरः यथा पत्नी ते कथयति एवमयं मां रहसि कामगर्दभः खलीकरोति, अथवा दम्पत्योरन्यस्य वा पुंसः स्त्रिया वा येन रागप्रकर्ष उत्पद्यते तेन तादृशा रहस्येनानेक-प्रकारेणाभिशंसनं हास्यक्रीडादिना नत्वभिनिवेशेन ; तथा सति व्रतभङ्ग एव स्यात्।

यदाह

'सहसाभक्खाणाई जाणंतो जइ करेज्ज तो भंगो।

जइ पुण णाभोगाईहिंतो तो होइ अइयारो ॥ १ ॥

इति द्वितीयोऽतिचारः २। तथा गुह्यं गूहनीयं न सर्वस्मै यत्कथनीयं राजादिकार्य्यसंबद्धं तस्यानधिकृतेनैवाकारेङ्गितादिभिर्ज्ञात्वा-ऽन्यस्मै प्रकाशनं गुह्यभाषणं यथा—एते हीदमिदं च राज-विरुद्धादिकं मन्त्रयन्ते, अथवा गुह्यभाषणं पैशुन्यं यथा—द्वयोः प्रीतौ सत्यामेकस्याकारादिनोपलभ्याभिप्रायमितरस्य तथा कथयति यथा प्रीतिः प्रणश्यति। इति तृतीयोऽतिचारः ३। तथा विश्वस्ता विश्वासमुपगता ये मित्रकलत्रादयस्तेषां मन्त्रो मन्त्रणं तस्य भेदः प्रकाशनं तस्यानुवादरूपत्वेन, सत्यत्वात् यद्यपि नाति-चारता घटते तथापि मन्त्रितार्थप्रकाशनजनितलज्जादितो मित्र-कलत्रादेर्मरणादिसम्भवेन परमार्थतोऽस्यासत्यत्वात् कथञ्चिद्भङ्ग-रूपत्वेनातिचारतैव। गुह्यभाषणे गुह्यमाकारादिना विज्ञायानधि-

---

(१) सहसाभ्याख्यानादीन् जानन् यदि कुर्यात् ततो भङ्गः।
यदि पुनरनाभोगादिभ्यस्ततो भवत्यतिचारः ॥ १ ॥

ज्ञात एव गुह्यं प्रकाशयति, इह तु स्वयं मन्त्रयित्वैव मन्त्रं भिनत्ती-त्यनयोर्भेदः। इति चतुर्थोऽतिचारः ४। तथा कूटमसद्भूतं तस्य लेखो लेखनं कूटलेखः, अन्यस्वरूपाक्षरमुद्राकरणम्, एतच्च यद्यपि कायेनासत्यां वाचं न वदामीत्यस्य न वदामि न वादयामीत्यस्य वा व्रतस्य भङ्ग एव, तथापि सहसाकारानाभोगादिना अति-क्रमादिना वाऽतिचारः; अथवा असत्यमित्यसत्यभणनं मया प्रत्याख्यातमिदं पुनर्लेखनमिति भावनया व्रतसापेक्षस्याति-चार एवेति पञ्चमोऽतिचारः ५॥ ९१॥

अथ तृतीयव्रतातिचारानाह—

स्तेनानुज्ञा-तदानीतादानं द्विड्राज्यलङ्घनम्।
प्रतिरूपक्रिया मानान्यत्वं चास्तेयसंश्रिताः॥ ९२॥

स्तेनाश्चौरास्तेषामनुज्ञा-हरत यूयमिति हरणक्रियायां प्रेरणा, अथवा स्तेनोपकरणानि कुशिकाकर्तरिकाघर्घरिकादीनि तेषा मर्पणं विक्रयणं वा स्तेनानुज्ञा। अत्र च यद्यपि चौर्यं न करोमि न कारयामीत्येवं प्रतिपन्नव्रतस्य स्तेनानुज्ञाव्रतभङ्ग एव, तथापि किमधुना यूयं निर्व्यापारास्तिष्ठत?, यदि वो भक्तादि नास्ति तदाऽहं तद्ददामि?, भवदानीतमोषस्य वा यदि विक्रायको न विद्यते तदाऽहं विक्रेष्ये? इत्येवंविधवचनैश्चौरान् व्यापारयतः स्वकल्पनया तद्व्यापारणं परिहरतो व्रतसापेक्षस्याभावतिचारः। इति प्रथमोऽतिचारः १। तथा तच्छब्देन स्तेनपरामर्शः स्तेनै-रानीतमाहृतं कनकवस्त्रादि तस्यादानं ग्रहणं मूल्येन मुधिकया

वा तदानीतादानं, स्तेनानीतं हि काणक्रयेण मुधिकया वा प्रच्छन्नं गृह्णंश्चौरो भवति, ततश्चौर्यकरणाद्व्रतभङ्गः, वाणिज्यमेव मया क्रियते न चौरिकेत्यध्यवसायेन व्रतसापेक्षत्वान्न व्रतभङ्ग इति भङ्गाभङ्गरूपोऽतिचारः । इति द्वितीयः २ । तथा द्विषोर्विरुद्धयो-राज्ञोरिति शेषः, राज्य नियमिता भूमिः कटकं वा तस्य लङ्घनं व्यवस्थाऽतिक्रमः ; व्यवस्था च परस्परविरुद्धराजकृतैव, तल्लङ्घनं चान्यतरराज्यनिवासिन इतरराज्ये प्रवेशः, इतरराज्य-निवासिनो वा अन्यतरराज्ये प्रवेशः, द्विड्राज्यलङ्घनस्य यद्यपि स्वस्वामिना अननुज्ञातस्य 'सामिजीवादत्तं तित्थयरेणं तहेव य गुरूहिं' इत्यदत्तादानलक्षणयोगेन तत्कारिणां च चौर्यदण्ड-योगेन अदत्तादानरूपत्वाद्व्रतभङ्ग एव, तथापि द्विड्राज्यलङ्घनं कुर्वता मया वाणिज्यमेव कृतं न चौर्यमिति भावनया व्रतसापेक्षत्वाल्लोके च चौरोऽयमिति व्यपदेशाभावादतिचारता । इति तृतीयः ३ । तथा प्रतिरूपं सदृशं व्रीहीणां पलञ्जिः, घृतस्य वसा, हिङ्गोः खदिरादिवेष्टः, तैलस्य मूत्रं, जात्यसुवर्णरूप्ययो-र्युक्तिसुवर्णरूप्ये, इत्यादिप्रतिरूपेण क्रियाव्यवहारः, व्रीह्यादिषु पलञ्ज्यादि प्रक्षिप्य तत्तद्विक्रीणीते । यद्वा, अपहृतानां गवादीनां सशृङ्गाणामग्निपक्वकालिङ्गीफलस्वेदादिना शृङ्गाण्यधोमुखानि प्रगुणानि तिर्यग्वलितानि वा यथारुचि विधाया'न्यविधत्वमिव तेषामापाद्य सुखेन धारणविक्रयादि करोति । इति चतुर्थः ४ ।

---

(१) ख ग वा भ- । (२) क ड -यान्यत्वमिव ।

तथा मीयतेऽनेनेति मानं कुडवादि, पलादि, हस्तादि, तस्यान्यत्वं हीनाधिकत्वं, हीनमानेन ददाति, अधिकमानेन गृह्णाति। इति पञ्चमः ५। प्रतिरूपक्रिया मानान्यत्वं च परव्यसनेन परधनग्रहणरूपत्वाद्भङ्ग एव, केवलं खात्रखननादिकमेव चौर्य्यं प्रसिद्धं, मया तु वणिक्कलैव कृतेति भावनया व्रतरक्षणोद्यतत्वादतिचारावेवेति। अथवा स्तेनानुज्ञादयः पञ्चाप्यमी व्यक्तचौर्य्यरूपा एव, केवलं सहसाकारादिना अतिक्रमव्यतिक्रमादिना वा प्रकारेण विधीयमाना अतिचारतया व्यपदिश्यन्ते। न चैते राजसेवकादीनां न सम्भवन्ति, तथाहि—आद्ययोः स्पष्ट एव सम्भवः, विरुद्धराज्यलङ्घनं तु यदा सामन्तादिः कश्चित् स्वस्वामिनो वृत्तिमुपजीवति, तद्विरुद्धस्य च सहायो भवति, तदाऽस्यातिचारो भवति, प्रतिरूपक्रिया मानान्यत्वं च यदा राजा भाण्डागारे द्रव्याणां विनिमयं मानान्यत्वं च कारयति, तदा राज्ञोऽप्यतिचारो भवति। एते च पञ्चाप्यस्तेयव्रताश्रिता अतिचाराः ॥ ९३ ॥

अथ चतुर्थव्रतातिचारानाह—

इत्वरात्तागमोऽनात्तागतिरन्यविवाहनम्।
मदनात्याग्रहोऽनङ्गक्रीडा च ब्रह्मणि स्मृताः ॥ ९४ ॥

ब्रह्मणि ब्रह्मचर्यव्रते, एतेऽतिचाराः स्मृताः। इत्वरी प्रतिपुरुषगमनशीला, वेश्या इत्यर्थः; सा चासावात्ता च कञ्चित्कालं भाटीप्रदानादिना संगृहीता, पुंवद्भावे इत्वरात्ता। अथवा इत्वरं

स्तोकमप्युच्यते, इत्वरं स्तोकमल्पमात्ता इत्वरात्ता, विस्पष्टपटु-वत् समासः । अथवा इत्वरकालमात्ता इत्वरात्ता, मयूरव्यंस-कादित्वात् समासः, कालशब्दलोपश्च । तस्यां गम आसेवनम् । इयं चात्र भावना-भाटीप्रदानादित्वरकालस्वीकारेण स्वकलत्री-कृत्य वेश्यां सेवमानस्य स्वबुद्धिकल्पनया स्वदारत्वेन व्रतसापेक्ष-चित्तत्वान्न भङ्गः, अल्पकालपरिग्रहाच्च वस्तुतोऽन्यकलत्रत्वाद्भङ्गः, इति भङ्गाभङ्गरूपत्वादित्वरात्तागमोऽतिचारः । इति प्रथमः १ । तथा अनात्ता अपरिगृहीता वेश्या स्वैरिणी, प्रोषितभर्तृका कुलाङ्गना वाऽनाथा तस्यां गतिरासेवनम् । इयं चानाभोगा-दिना अतिक्रमादिना वा अतिचारः । इमौ चातिचारौ स्वदा-रसन्तोषिण एव, न तु परदारवर्जकस्य ; इत्वरात्ताया वेश्यात्वेन अनात्तायाः स्वनाथतयैवापरदारत्वात्, शेषास्त्वतिचारा द्वयोरपि ; इदं च सूत्राऽनुपाति ।

यदाहुः --

'सदारसंतोसस्स इमे पञ्च अइयारा जाणियव्वा न समायरिअव्वा ।

[1] अन्ये त्वाहुः—इत्वरात्तागमः स्वदारसन्तोषवतोऽतिचारस्तत्र भावना कृतैव, अनात्तागतिस्तु परदारवर्जिनः । अनात्ता हि वेश्या यदा तां गृहीतान्यसत्कभाटिकामभिगच्छति, तदा परदार-गमनजन्यदोषसम्भवात् कथञ्चित् परदारत्वाच्चाभङ्गत्वेन भङ्गाभङ्ग-रूपोऽतिचारः । इति द्वितीयः २ । तथाऽन्येषां स्वस्वापत्यव्यतिरि-

(१) स्वदारसन्तोषस्येमे पञ्चातिचारा ज्ञातव्याः, न समाचरितव्याः ।

ज्ञानां विवाहनं विवाहकरणं कन्याफललिप्सया, स्नेहसम्बन्धादिना वा परिणयनविधानम्। इदं च स्वदारसन्तोषवता स्वकलत्रात् परदारवर्जकेन च स्वकलत्रवेश्याभ्यामन्यत्र मनोवाक्कायैर्मैथुनं न कार्य्यं न च कारणीयमिति यदा प्रतिपन्नं व्रतं भवति, तदा अन्यविवाहकरणं मैथुनकारणमर्थतः प्रतिषिद्धमेव भवति, तद्व्रती तु मन्यते—विवाह एवाऽयं मया विधीयते न मैथुनं कार्य्यते इति व्रतसापेक्षत्वादतिचार इति कन्याफललिप्सा च सम्यग्‌दृष्टेरव्युत्पन्नाऽवस्थायां सम्भवति, मिथ्यादृष्टेस्तु भद्रकावस्थायामनुग्रहार्थं व्रतादाने सा सम्भवति। नन्वन्यविवाहनवत् स्वापत्यविवाहनेऽपि समान एव दोषः। सत्यम्। यदि स्वकन्याया विवाहो न कार्यते, तदा स्वच्छन्दचारिणी स्यात्, ततश्च शासनोपघातः स्यात्; विहितविवाहा तु पतिनियन्त्रितत्वेन न तथा स्यात्।

परेऽप्याहुः—

पिता रक्षति कौमारे भर्ता रक्षति यौवने।

पुत्रस्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति॥ १॥

यत्तु दाशार्हस्य कृष्णस्य चेटकराजस्य च स्वापत्येष्वपि विवाहनियमः श्रूयते, स चिन्तकान्तरसद्भावे द्रष्टव्यः। अन्ये त्वाहुः—अन्यस्य कलत्राऽन्तरस्य विशिष्टसन्तोषाभावात् स्वयं विवाहनमन्यविवाहनम्। अयं स्वदारसन्तुष्टस्याऽतिचारः। इति तृतीयः ३।

मदने कामेऽत्याग्रहः परित्यक्तान्यसकलव्यापारस्य तदध्यवसायतः योषामुखकक्षोपस्थान्तरेष्वविलम्बतया प्रक्षिप्य प्रजननं महतीं वेलां निश्चलो मृत एवास्ते, चटक इव चटकायां मुहु-

र्मुहुर्योषायामारोहति, जातबलक्षयश्च वाजीकरणान्युपयुङ्क्ते; अनेन खल्वौषधप्रयोगेण गजप्रसेकी तुरगावमर्दीव पुरुषो भवतीति बुद्ध्या। इति चतुर्थः ४। तथा अनङ्गः कामः, स च पुंसः स्त्रीपुंनपुंसकेषु सेवनेच्छा, हस्तकर्मादीच्छा वा वेदोदयात्। योषितोऽपि योषिन्नपुंसकपुरुषासेवनेच्छा हस्तकर्मादीच्छा वा, नपुंसकस्यापि नपुंसकपुरुषस्त्रीसेवनेच्छा हस्तकर्मादीच्छा वा। एषोऽनङ्गो नान्यः कश्चित् तेन तस्मिन् वा क्रीडा रमणमनङ्गक्रीडा। यद्वा। आहार्य्यैः काष्ठपुस्तफलमृत्तिकाचर्मादिभिर्घटितैः प्रजननैः स्वलिङ्गेन कृतकृत्योऽपि योषितामवाच्यदेशं भूयो भूयः कुथ्नाति, केशाकर्षणप्रहारदानदन्तनखकदर्थनाऽऽदिप्रकारैश्च मोहनीयकर्मावेशात् तथा क्रीडति यथा बलवान् रागः प्रसूयते। अथवाऽङ्गं देहावयवो मैथुनापेक्षया योनिर्मेहनं वा तद्व्यतिरिक्तान्यङ्गानि कुचकक्षोरुवदनादीनि तेषु क्रीडा अनङ्गक्रीडा। इह च श्रावकाऽत्यन्तपापभीरुतया ब्रह्मचर्य्यं चिकीर्षुरपि यदा वेदोदयासहिष्णुतया तद्विधातुं न शक्नोति, तदा यापनामात्रार्थं स्वदारसन्तोषादि प्रतिपद्यते। मैथुनमात्रेणैव च यापनायां सम्भवन्त्या मदनात्याग्रहानङ्गक्रीडे अर्थतः प्रतिषिद्धे। तत्सेवने न च कश्चिद्गुणः, प्रत्युत तात्कालिकी छिदा राजयक्ष्मादयश्च रोगा दोषा एव भवन्ति। एवं प्रतिषिद्धाचरणाद्भङ्गो नियमाबाधनाच्चाभङ्ग इत्यतिचारावेतौ। अन्ये त्वन्यथाऽतिचारद्वयमपि भावयन्ति—स हि स्वदारसन्तोषी मैथुनमेव मया प्रत्याख्यातमिति स्वकल्पनया वेश्यादौ तत् परिहरति, नालिङ्गनादि; परदारविवर्जकोऽपि

परदारेषु मैथुनं परिहरति, नालिङ्गनादि ; इति कथञ्चिद्व्रतसापेक्षत्वादतिचारौ। एव स्वदारसन्तोषिणः पञ्चातिचाराः परदारवर्जकस्य तूत्तरे त्रय एवेति स्थितम्। अन्ये त्वन्यथाऽतिचारान् विचारयन्ति—

यथा—

'परदारवज्जिणो पञ्च हुन्ति तिन्नि उ सदारसंतुट्ठे।

इत्थीउ तिन्नि पञ्च व भंगविगप्पेहि अइयारा॥ १॥

इत्वरकालं या परेण भाट्यादिना परिगृहीता वेश्या तां गच्छतः परदारवर्जिनो भङ्गः कथञ्चित् परदारत्वात्तस्याः, लोके तु परदारत्वारूढेर्न भङ्ग इति भङ्गाभङ्गरूपोऽतिचारः। अपरिगृहीतायामनाथकुलाङ्गनायां या गतिः परदारवर्जिनः सोऽप्यतिचारः ; तत्कल्पनयाऽपरस्य भर्तुरभावेनापरदारत्वादभङ्गः, लोके च परदारतया रूढेर्भङ्ग इति पूर्ववदतिचारः। शेषास्तु त्रयो द्वयोरपि भवेयुः, स्त्रियास्तु स्वपुरुषसन्तोषपरपुरुषवर्जनयोर्न भेदः ; स्वपुरुषव्यतिरेकेणाऽन्येषां परपुरुषत्वात्। अन्यविवाहनादयस्तु त्रयः स्वदारसन्तोषिण इव स्वपुरुषविषयाः स्युरिति पञ्च वा। कथम्। आद्यस्तावद्यदा स्वकीयपतिर्वारकदिने सपत्न्या परिगृहीतो भवति, तदा सपत्नीवारकं विलुप्य तं परिभुञ्जानाया अतिचारः, द्वितीयस्त्वतिक्रमादिना परपुरुषमभिसरन्त्या अतिचारः, ब्रह्म-

(१) परदारवर्जिनः पञ्च भवन्ति त्रयस्तु स्वदारसन्तुष्टे।
स्त्रियास्त्रय पञ्च वा भङ्गविकल्पैरतिचाराः॥ १॥

चारिणं वा स्वपतिमतिक्रमादिनाऽभिसरन्त्या अतिचारः । शेषा-स्वयः स्त्रियाः पूर्ववत् ॥ ८४ ॥

अथ पञ्चमव्रतस्याऽतिचारानाह—

धनधान्यस्य कुप्यस्य गवादेः क्षेत्रवास्तुनः ।
हिरण्यहेम्नश्च संख्याऽतिक्रमोऽत्र परिग्रहे ॥८५॥

अत्र श्रावकधर्मोचिते परिग्रहव्रते यः संख्याऽतिक्रमः सोऽतिचारः कस्य कस्येत्याह—धनं गणिमधरिममेयपरीक्ष्यलक्षणम् ।

यदाह—

'गणिमं जाईफलफोप्फलाइ धरिमं तु कुङ्कुमगुडाइ ।
मेज्जं चोप्पडलोणाइ रयणवत्थाइ परिच्छेज्जं ॥ १ ॥

धान्यं सप्तदशविधम् ।

यदाह—

व्रीहिर्यवो मसूरो गोधूममुद्गमाषतिलचणकाः ।
अणवः प्रियङ्गुकोद्रवमकुष्टकाः शालिराढक्यः ॥ १ ॥
किञ्च कलायकुलत्थौ शणसप्तदशानि धान्यानि ।

धनं च धान्यं च धनधान्यं तस्य धनधान्यस्य । अत्रोत्तरत्र च समाहारनिर्देशः परिग्रहस्य पञ्चविधत्वज्ञापनार्थः । तथा सति ह्यतिचारपञ्चकं सुयोजं भवति । कुप्यं रूप्यसुवर्णव्यतिरिक्तं कांस्य-

(१) गणिमं जातिफलपूगफलादि धरिमं तु कुङ्कुमगुडादि ।
मेयं स्नेहलवणादि रत्नवस्त्रादि परिच्छेद्यम् ॥ १ ॥

लोहताम्रसीसकत्रपुमृद्भाण्डत्वचिसारविकारोदञ्चिकाष्ठमञ्चकम---ञ्चिकामसूरकरथशकटहलप्रभृति द्रव्यं, तस्य कुप्यस्य । गौरनड्वान-ऽनड्वाही च, स आदिर्यस्य द्विपदचतुष्पदवर्गस्य स गवादि: । आदिशब्दान्महिषमेषाऽविककरभरासभतुरगहस्त्यादिचतुष्पदानां हंसमयूरकुर्कुटशुकसारिकापारापतचकोरादिपक्षिद्विपदानां पत्नी-उपरुद्धादासीदासकर्मकरपदात्यादिमनुष्याणां च संग्रह: । क्षेत्रं सस्योत्पत्तिभूमि:, तत् त्रिविधं, सेतुकेतूभयभेदात् । तत्र सेतुक्षेत्रं यदरघट्टादिजलेन सिच्यते, केतुक्षेत्रमाकाशोदकपातनिष्पाद्यसस्यम् ; उभयमुभयजलनिष्पाद्यसस्यम् । वास्तु गृहादि ग्रामनगरादि च । तत्र गृहादि त्रिविधं ; खातं भूमिगृहादि, उच्छ्रितं प्रासादादि, खातोच्छ्रितं भूमिगृहस्योपरि गृहादिसन्निवेश: । क्षेत्रं च वास्तु चेति समाहारद्वन्द्व: । तथा हिरण्यं रजतं, घटितं अघटितं चाऽनेकप्रकारं पात्रादि, एवं सुवर्णमपि, हिरण्यं च हेम चेत्यत्रा-ऽपि समाहार: । संख्या व्रतकाले यावज्जीवं चतुर्मासादिकालावधि वा यत्परिमाणं गृहीतं तस्या अतिक्रम उल्लङ्घन संख्यातिक्रमो-ऽतिचार: ॥ ९५ ॥

ननु प्रतिपन्नव्रतसंख्याऽतिक्रमो भङ्ग एव स्यात्, कथमतिचार: ?

इत्याह—

बन्धनाद्भावतो गर्भाद्योजनाद् दानतस्तथा ।
प्रतिपन्नव्रतस्यैष पञ्चधाऽपि न युज्यते ॥ ९६ ॥

न साक्षात् संख्याऽतिक्रम:, किन्तु व्रतसापेक्षस्य बन्धनादिभि:

पञ्चभिर्हेतुभिः स्वबुद्ध्या व्रतभङ्गमकुर्वत एवातिचारो भवति; बन्धनादयश्च यथासंख्येन धनधान्यादीनां परिग्रहविषयाणां सम्बध्यन्ते। तत्र धनधान्यस्य बन्धनात् संख्याऽतिक्रमो यथा— कृतधनधान्यपरिमाणस्य कोऽपि लभ्यमन्यद्वा धनं धान्यं वा ददाति, तच्च व्रतभङ्गभयाच्चतुर्मास्यादिपरतो गृहगतधनादि-विक्रये वा कृते ग्रहीष्यामीति भावनया बन्धनात्, यन्त्रणात्, रज्ज्वादिसंयमनात्, सत्यङ्कारदानादिरूपाद्वा स्वीकृत्य तद् गृह एव तत् स्थापयतोऽतिचारः १। कुप्यस्य भावतः संख्याऽतिक्रमो यथा—कुप्यस्य या संख्या कृता तस्याः कथञ्चिद् द्विगुणत्वे सति व्रतभङ्गभयाद् भावतो द्वयोर्द्वयोर्मीलनेन एकीकरणरूपात् पर्यायान्तरात् स्वाभाविकसंख्याबाधनात् संख्यामात्रपूरणाच्चाति-चारः। अथवा भावतोऽभिप्रायादर्थित्वलक्षणाद्विवक्षितकालावधेः परतो ग्रहीष्यामि अतो नान्यस्मै देयमिति पराप्रदेयतया व्यवस्था-पयतोऽतिचारः २। तथा गोमहिषीवडवादेर्विवक्षितसंवत्सराद्य-वधिमध्य एव प्रसवे अधिकगवादिभावाद् व्रतभङ्गः स्यादिति तद्भयात् कियत्यपि काले गते गर्भतो गर्भग्रहणाद्गर्भस्थगवादि-भावेन बहिस्तदभावेन कथञ्चिद्व्रतभङ्गाद् व्रतिनोऽतिचारः ३। तथा क्षेत्रवास्तुनो योजनात् क्षेत्रवास्त्वन्तरमीलनाद्गृहीतसंख्याया-अतिक्रमोऽतिचारः। तथाहि – किलैकमेव क्षेत्रं वास्तु चेत्यभिग्रह-वतोऽधिकतरतदभिलाषे सति व्रतभङ्गभयात् प्राक्तनक्षेत्रवास्तु-प्रत्यासन्नं तद् गृहीत्वा पूर्वेण सह तदेकत्वकरणार्थं वृत्तिभित्त्या-द्यपनयनेन तत्तत्र योजयतो व्रतसापेक्षत्वात् कथञ्चिद्विरति-

बाधनाश्चातिचारः ४। तथा हिरण्यहेमोदीनादितरणाद् गृहीतसंख्याया अतिक्रमः। यथा केनापि चतुर्मासाद्यवधिना हिरण्यादिसंख्या प्रतिपन्ना, तेन च तुष्टराजादेः सकाशात् तदधिकं तल्लब्धं तदन्यस्मै व्रतभङ्गभयाद् ददाति पूर्णेऽवधौ ग्रहीष्यामीत्यभिप्रायेणेति व्रतसापेक्षत्वादतिचारः। एष गृहीत-संख्याऽतिक्रमः, पञ्चधाऽपि पञ्चभिरपि प्रकारैः, प्रतिपन्नव्रतस्य श्रावकस्य न युज्यते, कर्तुमिति शेषः, व्रतमालिन्यहेतुत्वात्। पञ्चधेत्युपलक्षणमन्येषां सहसाकारानाभोगादीनाम्। उक्ता अणु-व्रतानां प्रत्येक पञ्च पञ्चातिचाराः ५ ॥ ९६ ॥

अथ गुणव्रतानामवसरः, तत्राऽपि प्रथमगुणव्रतस्य दिग्विरति-लक्षणस्याऽतिचारानाह--

स्मृत्यन्तर्धानमूर्ध्वाधस्तिर्यग्भागव्यतिक्रमः।
क्षेत्रवृद्धिश्च पञ्चेति स्मृता दिग्विरतिव्रते ॥९७॥

दिग्विरतिव्रते पञ्चातिचाराः, इत्यनेन रूपेण, स्मृताः पूर्वाचार्यैः। तद्यथा—स्मृतेर्योजनशतादिरूपदिक्परिमाणविषयाया अति-व्याकुलत्वप्रमादित्वमत्यपाटवादिनाऽन्तर्धानं भ्रंशः। तथाहि— केनचित् पूर्वस्यां दिशि योजनशतरूपं परिमाणं कृतमासीत्, गमनकाले च स्पष्टतया न स्मरति, किं शतं परिमाणं कृतमुत पञ्चाशत्? तस्य चैवं पञ्चाशतमतिक्रामतोऽतिचारः, शत मतिक्रामतो भङ्गः, सापेक्षत्वान्निरपेक्षत्वाच्चेति। तस्मात् स्मर्त-व्यमेव गृहीतव्रतं, स्मृतिमूलं हि सर्वमनुष्ठानमिति प्रथमो-

ऽतिचारः १। तथा ऊर्द्ध्वं पर्वततरुशिखरादेः, अधो ग्रामभूमिगृहकूपादेः, तिर्यक् पूर्वादिदिक्षु, योऽसौ भागो नियमितः प्रदेशः, तस्य व्यतिक्रमः; एते त्रयोऽतिचाराः। यत्सूत्रम्—

[1]'उड्ढदिसिपमाणाइक्कमे अहोदिसिपमाणाइक्कमे तिरियदिसिपमाणाइक्कमे इति॥

एते च अनाभोगातिक्रमादिभिरेवाऽतिचारा भवन्ति, अन्यथाप्रवृत्तौ तु भङ्गा एव। यस्तु न करोमि न कारयामीति वा नियमं करोति, स विवक्षितक्षेत्रात् परतः स्वयं गमनतः परेण नयनानयनाभ्यां च दिक्प्रमाणातिक्रमं परिहरति, तदन्यस्य तु तथाविधप्रत्याख्यानाऽभावात् परेण नयनानयनयोर्न दोषः २। ३। ४। तथा क्षेत्रस्य पूर्वादिदेशस्य दिग्व्रतविषयस्य ह्रस्वस्य सतः, वृद्धिर्वर्धनं पश्चिमादिक्षेत्रान्तरपरिमाणप्रक्षेपेण दीर्घीकरणं, क्षेत्रवृद्धिरिति पञ्चमोऽतिचारः। तथाहि—केनापि पूर्वापरदिशोः प्रत्येकं योजनशतं गमनपरिमाणं कृतं, स चोत्पन्नप्रयोजन एकस्यां दिशि नवतिं योजनानि व्यवस्थाप्य अन्यस्यां दिशि तु दशोत्तरयोजनशतं करोति, उभाभ्यामपि प्रकाराभ्यां योजनशतद्वयरूपस्य परिमाणस्याऽव्याहतत्वादित्येवमेकतः क्षेत्रं वर्धयतो व्रतसापेक्षत्वादतिचार इति। यदि वाऽनाभोगात् क्षेत्रपरिमाणमतिक्रान्तो भवति तदा निवर्तितव्यं, ज्ञाते वा न

(१) ऊर्द्ध्वदिक्प्रमाणातिक्रमोऽधोदिक्प्रमाणातिक्रमस्तिर्यग्दिक्प्रमाणातिक्रमः॥

गन्तव्यम्, अन्योऽपि न विसर्जनीयः। अथानाभोगात् कोऽपि गतो भवेत् तदा यत् तेन लब्धं, स्वयं वा विस्मृतितो गतेन लब्धं तत् परिहर्तव्यम् ॥ ९७ ॥

अथ द्वितीयगुणव्रतस्य भोगोपभोगमानरूपस्यातिचारानाह—

सचित्तस्तेन सम्बद्धः सन्मिश्रोऽभिषवस्तथा।
दुष्पक्वाहार इत्येते भोगोपभोगमानगाः ॥ ९८ ॥

सह चित्तेन चेतनया वर्तते यः स सचित्तः आहार एव, आहारस्तु दुष्पक्वाहार इत्यस्मादाकृष्य सम्बध्यते, एवमुत्तरेष्वप्याहारशब्दो योजनीयः। सचित्तस्तु कन्दमूलफलादिः पृथ्वीकायादिर्वा। इह च निवृत्तिविषयीकृतप्रवृत्तौ भङ्गसद्भावेऽप्यतिचाराभिधानं व्रतसापेक्षस्यानाभोगातिक्रमादिना प्रवृत्तौ द्रष्टव्यम् १। तेन सचित्तेन सम्बद्धः प्रतिबद्धः सचित्तसंबद्धः, सचेतनवृक्षादिना सम्बद्धो गुन्दादिः पक्वफलादिर्वा, सचित्तान्तर्बीजः खर्जूराम्रादिः, तदाहारो हि सचित्ताहारवर्जकस्यानाभोगादिना सावद्याहारप्रवृत्तिरूपत्वादतिचारः। अथवा बीजं त्यक्ष्यामि तस्यैव सचेतनत्वात्, कटाहं तु भक्षयिष्यामि तस्याचेतनत्वादिति बुद्ध्या पक्वं खर्जूरादिफलं मुखे प्रक्षिपतः सचित्तवर्जकस्य सचित्तप्रतिबद्धाहारो द्वितीयः २। तथा सचित्तेन मिश्रः शबलः आहारः सन्मिश्राहारः। यथा—आर्द्रकदाडिमबीजकुलिकाचिर्भटिकादिमिश्रः पूरणादिः, तिलमिश्रो यवधानादिर्वा, अयमप्यनाभोगातिक्रमादिनाऽतिचारः। अथवा सम्भवत्सचित्तावयवस्यापक्वकणिक्कादेः पिष्टत्वादिना अचे-

तनमिति बुद्ध्या आहारः सन्मिश्राहारः व्रतसापेक्षत्वादतिचार इति तृतीयः ३ । अभिषवोऽनेकद्रव्यसंधाननिष्पन्नः सुरासौवीरकादिः, मांसप्रकारखण्डादिर्वा. सुरामध्वाद्यभिष्यन्दिवृष्यद्रव्योपयोगो वा, अयमपि सावद्याहारवर्जकस्यानाभोगातिक्रमादिनाऽतिचार इति चतुर्थः ४ । तथा दुष्पक्वो मन्दपक्वः स चासावाहारश्च दुष्पक्काहारः, स चार्धस्विन्नपृथुकतन्दुलयवगोधूमस्थूलमण्डक[1]कर्कटकफलादिरैहिकप्रत्यवायकारी यावता चांशेन सचेतनस्तावता परलोकमप्युपहन्ति पृथुकादेर्दुष्पक्वतया सम्भवत्सचेतनावयवत्वात् पक्वत्वेनाचेतनइति भुञ्जानस्याऽतिचार इति पञ्चमः ५ । केचित् त्वपक्वाहारमप्यतिचारत्वेन वर्णयन्ति । अपक्वं चाग्न्यादिना यदसंस्कृतम् । एष च सचित्ताहारे प्रथमातिचारेऽन्तर्भवति । तुच्छौषधिभक्षणमपि केचिदतिचारमाहुः । तुच्छौषधयश्च मुद्गादिकोमलशिम्बीरूपास्ताश्च यदि सचित्तास्तदा सचित्तातिचार एवान्तर्भवन्ति, अथ अग्निपाकादिना अचित्तास्तर्हि को दोषः ? इति । एवं रात्रिभोजनमद्यादिनिवृत्तिष्वपि अनाभोगातिक्रमादिभिरतिचारा भावनीयाः । एते पञ्चातिचारा भोगाभोगपरिमाणगता बोद्धव्याः ॥ ९८ ॥

अथ भोगोपभोगातिचारानुपसंहरन् भोगोपभोगव्रतस्य लक्षणान्तरं तद्व्रतांश्चातिचारानुपदर्शयितुमाह—

अमी भोजनतस्त्याज्याः कर्मतः खरकर्म तु ।
तस्मिन् पञ्चदश मलान् कर्मादानानि संत्यजेत् ॥९९॥

---

(१) क -कटुकफल- ।

अमी उक्तस्वरूपाः पञ्चातिचाराः, भोजनतो भोजनमाश्रित्य, त्याज्या वर्जनीयाः। भोगोपभोगमानस्य च व्याख्यानान्तरं—भोगोपभोगसाधनं यद्द्रव्यं तदुपार्जनाय यत्कर्म व्यापारस्तदपि भोगोपभोगशब्देनोच्यते, कारणे कार्योपचारात्। ततश्च कर्मतः कर्माश्रित्य, खरं कठोरं प्राणिबाधकं यत्कर्म कोट्टपालनगुप्तिपालनवीतपालनादिरूपं तत्त्याज्यं, तस्मिन् खरकर्मत्यागलक्षणे भोगोपभोगव्रते, पञ्चदश मलानतिचारान् संत्यजेत्। ते च कर्मादानशब्देनोच्यन्ते, कर्मणां पापप्रकृतीनामादानानि कारणानीति कृत्वा ॥ ९९ ॥

तानेव नामतः श्लोकद्वयेन दर्शयति—

अङ्गारवनशकटभाटकस्फोटजीविका।
दन्तलाक्षारसकेशविषवाणिज्यकानि च ॥ १०० ॥
यन्त्रपीडा निर्लाञ्छनमसतीपोषणं तथा।
दवदानं सरःशोष इति पञ्चदश त्यजेत् ॥ १०१ ॥

जीविकाशब्दः प्रत्येकं सम्बध्यते। अङ्गारजीविका १ वनजीविका २ शकटजीविका ३ भाटकजीविका ४ स्फोटजीविका ५। उत्तरार्धेऽपि वाणिज्यशब्दः प्रत्येकमभिसम्बध्यते। दन्तवाणिज्यं ६ लाक्षावाणिज्यं ७ रसवाणिज्यं ८ केशवाणिज्यं ९ विषवाणिज्यं १०; यन्त्रपीडा ११ निर्लाञ्छनं १२ असतीपोषणं १३ दवदानं १४ सरःशोषः १५ इत्येतान् पञ्चदशातिचारान् त्यजेत् ॥ १०० ॥ १०१ ॥

क्रमेण पञ्चदशाप्यतिचारान् व्याचष्टे, तत्राङ्गारजीविकामाह—

अङ्गारभ्राष्ट्रकरणं कुम्भायःस्वर्णकारिता ।
ठठारत्वेष्टकापाकाविति ह्यङ्गारजीविका ॥ १०२ ॥

अङ्गारकरणं काष्ठदाहेनाऽङ्गारनिष्पादनं तद्विक्रयश्च, अङ्गारकरणे हि षण्णां जीवनिकायानां विराधनासम्भवः। एवं च ये येऽग्निविराधनारूपा आरम्भास्ते तेऽङ्गारकर्मण्यन्तर्भवन्ति; प्रपञ्चार्थं तु भेद उक्तः। भ्राष्ट्रस्य चणकादिभर्जनस्थानस्य करणं भ्राष्ट्रकरणं, भ्राष्ट्रजीविकेत्यर्थः। तथा कुम्भकारिता कुम्भकरणपाचनविक्रयनिमित्ता जीविका। तथा अयो लोहं तस्य करणघटनादिना जीविका। स्वर्णकारिता सुवर्णरूप्ययोर्गालनघटनादिना जीविका। कुम्भायःस्वर्णानि करोतीत्येवं शीलस्तस्य भावस्तत्ता। तथा ठठारत्वं शुल्बनागवङ्गकांसपित्तलादीनां करणघटनादिना जीविका। इष्टकापाकः इष्टकाकवेलुकादीनां पाकस्तेन जीविका। इत्येवंप्रकारा अङ्गारजीविका ॥ १०२ ॥

अथ वनजीविकामाह—

छिन्नाच्छिन्नवनपत्रप्रसूनफलविक्रयः ।
कणानां दलनात् पेषाद् वृत्तिश्च वनजीविका ॥१०३॥

छिन्नस्य द्विधाकृतस्य अच्छिन्नस्य च वनस्य वनस्पतिसमूहस्य पत्राणां प्रसूनानां फलानां च छिन्नाच्छिन्नानां विक्रयो वनजीविकेत्युत्तरेण सम्बन्धः। कणानां च घरट्टादिना दलनाद् द्विधी-

करणात्, शिलाशिलापुत्रकादिना पेषात् चूर्णीकरणाद्या वृत्तिः सा वनजीविका। वनजीविका च वनस्पतिकायादिघातसम्भवा ॥ १०३ ॥

अथ शकटजीविकामाह—

शकटानां तदङ्गानां घटनं खेटनं तथा।
विक्रयश्चेति शकटजीविका परिकीर्तिता ॥१०४॥

शकटानां चतुष्पदवाह्यानां वाहनानां, तदङ्गानां शकटाङ्गानां चक्रादीनां, घटनं स्वयं परेण वा निष्पादनं, खेटनं वाहनं, तच्च शकटानामेव सम्भवति स्वयं परेण वा; विक्रयश्च शकटानां तदङ्गानां च, इति सकलभूतोपमर्दजननी गवादीनां च वधबन्धादिहेतुः शकटजीविका प्रकीर्तिता ॥ १०४ ॥

अथ भाटकजीविकामाह—

शकटोक्षलुलायोष्ट्रखराश्वतरवाजिनाम्।
भारस्य वाहनाद् वृत्तिर्भवेद्भाटकजीविका ॥१०५॥

शकटशब्द उक्षार्थः, उक्षाणो बलीवर्दाः, लुलाया महिषाः, उष्ट्राः करभाः, खरा रासभाः, अश्वतरा वेसराः, वाजिनोऽश्वाः, एतेषां भाटकनिमित्तं यद्भारवाहनं, तस्माद् या वृत्तिः सा भाटकजीविका ॥ १०५ ॥

अथ स्फोटजीविकामाह—

सरःकूपादिखननशिलाकुट्टनकर्मभिः ।
पृथिव्यारम्भसम्भूतैर्जीवनं स्फोटजीविका ॥१०६॥

सरसः कूपस्य आदिग्रहणाद् वापीदीर्घिकादेः खननमोड्डकर्म, हलादिना वा क्षेत्रादेर्भूविदारणं ; शिलाकुट्टनकर्म पाषाणघटनकर्म ; एतैः पृथिव्याः पृथिवीकायस्य य आरम्भ उपमर्द स्तस्य सम्भूतं सम्भवो येभ्यस्तैः पृथिव्यारम्भसम्भूतैः ; उपलक्षणं चैतद् भूमिखननं वनस्पतित्रसादिजन्तुघातानाम् । एभिर्जीवनं स्फोटजीविका ; स्फोटः पृथिव्या विदारणं तेन जीविका स्फोट जीविका ॥ १०६ ॥

अथ दन्तवाणिज्यमाह—

दन्तकेशनखास्थित्वग्रोम्णो ग्रहणमाकरे ।
त्रसाङ्गस्य वणिज्यार्थं दन्तवाणिज्यमुच्यते ॥१०७॥

दन्ता हस्तिनां उपलक्षणत्वादन्येऽपि त्रसजीवावयवा दन्तग्रहणेन गृह्यन्ते । तदेवाह · केशाश्चमर्यादीनां, नखा घूकादीनां, अस्थीनि शङ्खादीनां, त्वक् चित्रकादीनां, रोमाणि हंसादीनां, तेषां ग्रहणं मूल्यादिना स्वीकारः, रोम्ण इत्येकवचनं प्राण्यङ्गत्वात् । आकरे तदुत्पत्तिस्थाने, त्रसाङ्गस्य त्रसजीवावयवस्य, वणिज्यार्थं वाणिज्यनिमित्तं ; आकरे हि दन्तादिग्रहणाय पुलिन्दानां यदा द्रव्यं ददाति तदा *तत्प्रतिक्रयार्थं हस्त्यादिवधं ते कुर्वन्ति,*

आकरग्रहणं चानाकरे दन्तादेर्ग्रहणे विक्रये च न दोष इति ज्ञापनार्थम्॥ १०७॥

अथ लाक्षावाणिज्यमाह—

लाक्षामनःशिलानीलीधातकीटङ्कणादिनः।
विक्रयः पापसदनं लाक्षावाणिज्यमुच्यते॥ १०८॥

लाक्षा जतु अत्रापि लाक्षाग्रहणमुपलक्षणमन्येषां सावद्यानां मनःशिलादीनाम्। तान्येवाह—मनःशिला कुनटी, नीली गुलिका, धातकी वृक्षविशेषः तस्याः त्वक् पुष्पं च मद्यसन्धानहेतुर्धातकी, टङ्कणः क्षारविशेषः; आदिशब्दात् संकूटादयो गृह्यन्ते, तेषां विक्रयः। स च पापसदनं टङ्कणमनःशिलयोर्बाह्यजीवघातकत्वेन, नील्या जन्तुघाताविनाभावेन, धातक्या मद्यहेतुत्वेन तत्कल्कस्य च कृमिहेतुत्वेन पापसदनत्वं ततस्तद्विक्रयस्याऽपि पापसदनत्वम्। तदेतद् लाक्षावाणिज्यमुच्यते॥ १०८॥

अथ रसकेशवाणिज्ये एकेनैव श्लोकेनाह—

नवनीतवसाक्षौद्रमद्यप्रभृतिविक्रयः।
द्विपाच्चतुष्पाद्विक्रयो वाणिज्यं रसकेशयोः॥ १०९॥

नवनीतं दधिसारं, वसा मेदः, क्षौद्रं मधु, मद्यं सुरा प्रभृतिग्रहणात् मज्जादिग्रहः। एषां विक्रयो रसवाणिज्यम्, द्विपदां मनुष्यादीनां चतुष्पदां गवाश्वादीनां विक्रयः केशवाणिज्यम्, सजीवानां विक्रयः केशवाणिज्यमजीवानां तु जीवाङ्गानां

विक्रयो दन्तवाणिज्यमिति विवेकः । रसकेशयोरिति यथा-संख्येन योगः । दोषास्तु नवनीते जन्तुसंमूर्च्छनं, वसाक्षौद्रयो-र्जन्तुघातोद्भवत्वं, मद्यस्य मदनजननं तद्गतकृमिविघातश्चेति ; द्विपाच्चतुष्पाद्विक्रये तु तेषां पारवश्यं वधबन्धादयः क्षुत्पिपासा-पीडा चेति ॥ १०९ ॥

अथ विषवाणिज्यमाह--

विषास्त्रहलयन्त्रायोहरितालादिवस्तुनः ।
विक्रयो जीवितघ्नस्य विषवाणिज्यमुच्यते ॥११०॥

विषं शृङ्गिकादि तच्चोपलक्षणं जीवघातहेतूनामस्त्रादीनाम् । तान्येवाह—अस्त्रं खड्गादि, हलं लाङ्गलं, यन्त्रमरघट्टादि, अयः कुशीकुद्दालादिरूपं, हरितालं वर्णकविशेषः । आदिशब्दादन्येषा-मुपविषाणां ग्रहणम् । एवमादिवस्तुनो विक्रयो विषवाणिज्यं विषादेर्विशेषणं जीवितघ्नस्य अमीषां जीवितघ्नत्वं प्रसिद्ध-मेव ॥ ११० ॥

अथ यन्त्रपीडाकर्माह—

तिलेक्षुसर्षपैरण्डजलयन्त्रादिपीडनम् ।
दलतैलस्य च कृतिर्यन्त्रपीडा प्रकीर्तिता ॥१११॥

यन्त्रशब्दः प्रत्येकमभिसम्बध्यते । तिलयन्त्रं तिलपीलनोपकरणम्, इक्षुयन्त्रं कोल्हुकादि, सर्षपैरण्डयन्त्रे तत्पीलनोपकरणे, जलयन्त्र-मरघट्टादि, दलतैलं यत्र दलं तिलादि दीयते तैलं च प्रति-

गच्छति तद्दलतैलं तस्य कृतिर्विधानमिति, यन्त्रपीडा यन्त्र-पीडनं यन्त्रपीडाकर्मणश्च पीडनीयतिलादिक्षोदात्तद्गतत्रसजीव-वधाच्च सदोषत्वम्। लौकिका अपि ह्याचचते—दशसूनासमं चक्रमिति ॥ १११ ॥

अथ निर्लाञ्छनकर्माह—

नासावेधोऽङ्कनं मुष्कच्छेदनं पृष्ठगालनम्।
कर्णकम्बलविच्छेदो निर्लाञ्छनमुदीरितम् ॥११२॥

नितरां लाञ्छनमङ्गावयवच्छेदः, तेन कर्म जीविका निर्लाञ्छनकर्म। तद्भेदानाह—नासावेधो गोमहिषादीनाम्, अङ्कनं गवाश्वादीनां चिह्नकरणं, मुष्कोऽण्डस्तस्य च्छेदनं वर्धितकीकरणं गवाश्वादीनामेव, पृष्ठगालनं करभाणां, गवां च कर्णकम्बलविच्छेदः। एषु जन्तुबाधा व्यक्तैव ॥ ११२ ॥

अथासतीपोषणमाह —

सारिकाशुकमार्जारश्वकुर्कुटकलापिनाम्।
पोषो दास्याश्च वित्तार्थमसतीपोषणं विदुः ॥११३॥

असत्यो दुःशीलास्तासां पोषणं, लिङ्गमतन्त्रम्, शुकादीनां पुंसामपि पोषणमसतीपोषणं, सारिका व्यक्तवाक् पक्षिविशेषः, शुकः कीरः, मार्जारो बिडालः, श्वा कुक्कुरः, कुर्कुटस्ताम्रचूडः, कलापी मयूरः, एतेषां तिरश्चां पोषः पोषणं, दास्याश्च पोष इति वर्तते, स च भाटीग्रहणार्थमसतीपोषः। एषां च दुःशीलानां पोषणं पापहेतुरेव ॥ ११३ ॥

अथ दवदानसर:शोषाविकेन श्लोकेनाह—

व्यसनात् पुण्यबुद्ध्या वा दवदानं भवेद् द्विधा ।
सर:शोष: सर:सिन्धुह्रदादेरम्बुसंप्लव: ॥ ११४ ॥

दवस्य दवाग्ने: तृणादिदहननिमित्तं दानं वितरणं दवदानं, तच्च द्विधा संभवति-व्यसनात् फलनिरपेक्षतात्पर्य्यात्, यथा वनेचरा एव-मेवाऽग्निं ज्वालयन्ति; पुण्यबुद्ध्या वा यथा मे दवा देया मरणकाले इयन्तो मम श्रेयोऽर्थं धर्मदीपोत्सवा: करणीया इति, अथवा तृणदाहे सति नवतृणाङ्कुरोद्भेदाद् गावश्चरन्तीति क्षेत्रे वा सस्य-सम्पत्तिवृद्धयेऽग्निज्वालनम् । अत्र जीवकोटीनां वध: स्यात् । सरस: शोष: सर:शोष: सरोग्रहणमुपलक्षणं जलाशयान्तराणाम् । तदेवाह—सर:सिन्धुह्रदादिभ्यो योऽम्बुनो जलस्य संप्लव: सारणी-कर्षणं धान्यवपनार्थं, आदिशब्दात् तडागादिपरिग्रह: । तत्राऽखातं सर:, खातं तडागम् । सर:शोषे च जलस्य तद्गतानां त्रसानां तत्-प्लावितानां च षण्णां जीवनिकायानां वध इति सर:शोषदोष: । इत्युक्तानि पञ्चदशकर्मादानानि, दिङ्मात्रं चेदम्, एवंजातीयानां बहूनां सावद्यकर्मणां न पुन: परिगणनमिति । इह चैवं विंशति-संख्याऽतिचाराभिधानमन्यत्राऽपि पञ्चातिचारसंख्यया तज्जाती-यानां व्रतपरिणामकालुष्यनिबन्धनविधीनामपरेषां संग्रह इति ज्ञापनार्थम् । तेन स्मृत्यन्तर्धानादयो यथासम्भवं सर्वव्रतेष्वतिचारा द्रष्टव्या: । नन्वङ्गारकर्मादय: कथं खरकर्मण्यतिचारा: ?, खर-कर्मरूपा एव ह्येते । सत्यम् । खरकर्मरूपा एवैते, किन्त्वना-

भोगादिना क्रियमाणा अतिचाराः, उपेत्य क्रियमाणास्तु भङ्गा-
एवेति ॥ ११४ ॥

अथानर्थदण्डविरतिव्रतस्याऽतिचारानाह—

संयुक्ताधिकरणत्वमुपभोगातिरिक्तता ।
मौखर्य्यमथ कौत्कुच्यं कन्दर्पोऽनर्थदण्डगाः ॥११५॥

अनर्थदण्डगा इत्यनर्थदण्डविरतिव्रतगामिन एते पञ्चातिचाराः।
तद्यथा—अधिक्रियते दुर्गतावात्माऽनेनेत्यधिकरणमुदूखलादिसं-
युक्तम्, उदूखलेन मुशलं, हलेन फालः, शकटेन युगं, धनुषा शराः,
एवमेकमधिकरणमधिकरणान्तरेण संयुक्तं संयुक्ताऽधिकरणं तस्य
भावस्तत्त्वम्। इह च श्रावकेण सयुक्तमधिकरणं न धारणीयम्।
तथा सति हि यः कश्चित् संयुक्तमधिकरणमाददीत, वियुक्ताधि
करणतायां तु सुखेन परः प्रतिषेधयितुं शक्यते। एतच्च हिंस्रप्रदान-
रूपस्यानर्थदण्डस्यातिचारः १। तथा उपभोगस्योपलक्षणत्वाद्भोगस्य
चोक्तनिर्वचनस्य यदतिरिक्तत्वमतिरेकः सा उपभोगातिरिक्तता।
अयं प्रमादाचरितस्याऽतिचारः। इह च स्नानपानभोजनचन्दन-
कुङ्कुमकस्तूरिकावस्त्राभरणादीनामतिरिक्तानामारम्भोऽनर्थदण्डः।
अत्राऽपि वृद्धसम्प्रदायः—अतिरिक्तानि बहूनि तैलामलकानि यदि
गृह्णाति, तदा तल्लौल्येन बहवः स्नानार्थं तडागादौ व्रजन्ति, ततश्च
पूतरकाप्कायादिवधोऽधिकः स्यात्; न चैवं कल्पते, ततः को
विधिः? तत्र स्नानेच्छुना तावद्गृह एव स्नातव्यम्, तदभावे तु
तैलामलकैर्गृह एव शिरो घर्षयित्वा तानि सर्वाणि शाटयित्वा

तडागादीनां तटे निविष्टोऽञ्जलिभिः स्नाति। तथा येषु पुष्पादिषु संसक्तिः सम्भवति तानि परिहरति, एवं सर्वत्र वाच्यमिति द्वितीयोऽतिचारः २। तथा मुखमस्याऽस्तीति मुखरोऽनालोचितभाषी वाचाटः तस्य भावो मौखर्य्यं धाष्टर्यप्रायमसभ्यासम्बद्धबहुप्रलापित्वम्, अयं च पापोपदेशस्यातिचारः, मौखर्य्ये सति पापोपदेशसम्भवादिति तृतीयः ३। तथा कुदिति कुत्सायां निपातो, निपातानामानन्त्यात्। कुत् कुत्सितं कुचति भ्रूनयनोष्ठनासाकरचरणमुखविकारैः सङ्कुचतीति कुत्कुचस्तस्य भावः कौत्कुच्यम्, अनेकप्रकारा भण्डादिविडम्बनक्रिया इत्यर्थः। अथवा कौकुच्यमिति पाठः, तत्र कुत्सितः कुचः कुकुचः सङ्कोचादिक्रियाभाक् तद्भावः कौकुच्यम्, अत्र च येन परो हसति, आत्मनश्च लाघवं भवति, न तादृशं वक्तुं चेष्टितुं वा कल्पते, प्रमादात्तथाचरणे चातिचार इति चतुर्थः ४। तथा कन्दर्पः कामस्तद्धेतुस्तत्प्रधानो वा वाक्प्रयोगोऽपि कन्दर्पः। इह च सामाचारी—श्रावकेण न तादृशं वक्तव्यं येन स्वस्य परस्य वा मोहोद्रेको भवतीति पञ्चमः ५। एतौ द्वावपि प्रमादाचरितस्यातिचारौ, इत्यवसिता गुणव्रतातिचाराः ॥ ११५ ॥

अथ शिक्षाव्रतातिचारावसरः। तत्रापि सामायिकस्य तावदतिचारानाह—

कायवाङ्मनसां दुष्टप्रणिधानमनादरः।
स्मृत्यनुपस्थापनं च स्मृताः सामायिकव्रते ॥ ११६ ॥

कायस्य वाचो मनसश्च प्रणिहितिः प्रणिधानम्, दुष्टं च तत्प्रणिधानं दुष्टप्रणिधानं सावद्ये प्रवर्तनं कायदुष्प्रणिधानं, वाग्दुष्प्रणिधानं, मनोदुष्प्रणिधानं चेत्यर्थः। तत्र शरीरावयवानां पाणिपादादीनामनिभृतताऽवस्थापनं कायदुष्प्रणिधानम्, वर्णसंस्काराभावोऽर्थानवगमश्चापलं च वाग्दुष्प्रणिधानम्, क्रोधलोभद्रोहाऽभिमानेर्ष्यादयः कार्यव्यासङ्गसम्भ्रमश्च मनोदुष्प्रणिधानम्; एते त्रयोऽतिचाराः।

यदाहुः—

'अनिरिक्खियापमज्जियथण्डिल्ले ठाणमाइ सेवन्तो।
हिंसाभावे वि न सो कडसामाइओ पमायाउ॥ १॥
कडसामाइउ पुव्विं बुद्धीए पेहिऊण भासिज्जा।
सइ निरवज्जं वयणं अन्नह सामाइयं न हवे॥ २॥
सामाइयं तु काउं घरचिन्तं जो उ चिन्तए सड्ढो।
अट्टवसट्टोवगओ निरत्थयं तस्स सामाइयं॥ ३॥

तथाऽनादरोऽनुत्साहः प्रतिनियतवेलायां सामायिकस्याकरणम्,

---

(१) अनिरीक्षिताऽप्रमार्जितस्थण्डिले स्थानादि सेवमानः।
हिंसाभावेऽपि न स कृतसामायिकः प्रमादात्॥ १॥
कृतसामायिकः पूर्वं बुद्ध्या प्रेक्ष्य भाषेत।
सदा निरवद्यं वचनमन्यथा सामायिकं न भवेत्॥ २॥
सामायिकं तु कृत्वा गृहचिन्तां यस्तु चिन्तयेत् श्राद्धः।
आर्तवशार्तोपगतो निरर्थकं तस्य सामायिकम्॥ ३॥

यथा कथञ्चिद्वा करणम्, प्रबलप्रमादादिदोषात् करणानन्तरमेव पारणं च ।

यदाहुः—

[1]'काऊण तक्खणं चिय पारेइ करेइ वा जहिच्छाए ।

अणवट्ठियसामाइयं अणायराओ न तं सुद्धं ॥ १ ॥

इति चतुर्थः ॥ ४ ॥ स्मृतौ स्मरणे सामायिकस्याऽनुपस्थापनं स्मृत्यनुपस्थापनं सामायिकं मया कर्तव्यं न कर्तव्यमिति वा, सामायिकं मया कृतं न कृतमिति वा, प्रबलप्रमादाद्यदा न स्मरति तदा अतिचारः, स्मृतिमूलत्वान्मोक्षसाधनाऽनुष्ठानस्य ।

यदाहुः—

[2]'न सरइ पमायजुत्तो जो सामाइयं कया य कायव्वं ।

कयमकयं वा तस्स हु कयं पि विहलं तयं नेयं ॥ १ ॥

ननु कायदुष्प्रणिधानादौ सामायिकस्य निरर्थकत्वादिप्रतिपादने न वस्तुतोऽभाव एवोक्तः, अतिचारश्च मालिन्यरूप एव भवतीति कथं समायिकाभावे स भवेत् ?, अतो भङ्गा एवैते नातिचारा इति चेत्? उच्यते । अनाभोगतोऽतिचारत्वम् । ननु द्विविधं त्रिविधेन सावद्यप्रत्याख्यानं सामायिकं, तत्र च कायदुष्प्रणिधानादौ प्रत्याख्यानभङ्गात् सामायिकाभाव एव, तद्भङ्गजनितं च प्रायश्चित्तं

---

(१) कृत्वा तत्क्षणमेव पारयति करोति वा यथेच्छम् ।
अनवस्थितसामायिकमनादराद् न तत् शुद्धम् ॥ १ ॥

(२) न स्मरति प्रमादयुक्तो यः सामायिकं कदा च कर्तव्यम् ।
कृतमकृतं वा तस्य खलु कृतमपि विफलं तज्ज्ञेयम् ॥ १ ॥

विधेयं स्यात् मनोदुष्प्रणिधानं चाशक्यपरिहारं मनसोऽनवस्थित-त्वादतः सामायिकप्रतिपत्तेः सकाशात्तदप्रतिपत्तिरेव श्रेयसी। यदाहुः—अविधिकृतादवरमकृतमिति। नैवम्। यतः सामायिकं द्विविधं त्रिविधेन प्रतिपन्नम्, तत्र च मनसा वाचा कायेन सावद्यं न करोमि न कारयामीति षट् प्रत्याख्यानानि इत्येकतर-प्रत्याख्यानभङ्गेऽपि शेषसद्भावान्मिथ्यादुष्कृतेन मनोदुष्प्रणिधान-मात्रशुद्धेश्च न सामायिकस्यात्यन्ताभावः, सर्वविरतिसामायि-केऽपि च तथाऽभ्युपगतम्; यतो गुप्तिभङ्गे मिथ्यादुष्कृतं प्राय-श्चित्तमुक्तम्। किञ्च सातिचारादप्यनुष्ठानादभ्यासतः कालेन निरतिचारमनुष्ठानं भवति।

यदाहुर्बाह्या अपि—

अभ्यासो हि कर्मणां कौशलमावहति, न हि सकृन्निपात-मात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधाति।

न चाविधिकृताद् वरमकृतमिति युक्तम्, असूयावचन-त्वादस्य।

यदाहुः—

[1]"अविहिकया वरमकयं असूयवयणं भणन्ति समयन्नू।
पायच्छित्तं जम्हा अकए गुरुअं कए लहुअं॥ १॥

केचित्तु पोषधशालायां सामायिकमेकेनैव कार्यं न बहुभिः, 'एगो

(१) अविधिकृताद् वरमकृतमसूयावचनं भणन्ति समयज्ञाः।
प्रायश्चित्तं यस्मादकृते गुरुकं कृते लघुकम्॥ १॥

सवीए' इति वचनप्रामाण्यादित्याहुः । नायमेकान्तो वचनान्तरस्याऽपि श्रवणात् । व्यवहारभाष्येऽप्युक्तम्—

'रायसुयाई पञ्च वि पोसहसालाइ संमिलिश्रा ।

इत्यलं प्रसङ्गेन ॥ ११६ ॥

एते पञ्चातिचाराः सामायिकव्रते उक्ताः, इदानीं देशावकाशिकव्रतातिचारानाह—

प्रेष्यप्रयोगानयने पुद्गलक्षेपणं तथा ।

शब्दरूपाऽनुपातौ च व्रते देशावकाशिके ॥ ११७ ॥

दिग्व्रतविशेष एव देशावकाशिकव्रतम्, इयांस्तु विशेषः—दिग्व्रतं यावज्जीवं संवत्सरचतुर्मासीपरिमाणं वा, देशावकाशिकं तु दिवसप्रहरमुहूर्तादिपरिमाणम् । तस्य च पञ्चातिचाराः । तद्यथा—प्रेष्यस्याऽऽदेश्यस्य प्रयोगो विवक्षितक्षेत्राद्बहिष्प्रयोजनाय व्यापारणम्, स्वयं गमने हि व्रतभङ्गः स्यादिति प्रेष्यप्रयोगः । देशावकाशिकव्रतं हि मा भूद् गमनागमनादिव्यापारजनितप्राण्युपमर्द इत्यभिप्रायेण गृह्यते, स तु स्वयं कृतोऽन्येन कारित इति न कश्चित् फले विशेषः ; प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुणः, परस्य पुनरनिपुणत्वादीर्यासमित्यभावे दोष इति प्रथमोऽतिचारः १ । आनयनं विवक्षितक्षेत्राद् बहिः स्थितस्य सचेतनादिद्रव्यस्य विवक्षितक्षेत्रे प्रापणं सामर्थ्यात् प्रेष्येण ; स्वयं गमने हि व्रतभङ्गः स्यात्, परेण तु आनयने न व्रतभङ्गः स्यादिति

(१) राजसुतादयः पञ्चाऽपि पोषधशालायां संमिलिताः ।

बुद्ध्या प्रेष्येण यदाऽऽनाययति सचेतनादि द्रव्यं तदाऽतिचार इति द्वितीयः २। तथा पुद्गलाः परमाणवस्तत्संघातसमुद्भवा बादर-परिणामं प्राप्ता लोष्टेष्टकाः काष्ठशलाकादयोऽपि पुद्गलास्तेषां क्षेपणं प्रेरणम्। विशिष्टदेशावग्रहे हि सति कार्यार्थी परतो गमन-निषेधाद्यदा लोष्टादीन् परेषां बोधनाय क्षिपति, तदा लोष्टादिपात-समनन्तरमेव ते तत्समीपमनुधावन्ति ; ततश्च तान् व्यापारयतः स्वयमनुपमर्दकस्यातिचारो भवतीति तृतीयः ३। शब्दरूपानु-पातौ चेति शब्दानुपातो रूपानुपातश्च। तत्र स्वगृहवृत्तिप्राका-रादिव्यवच्छिन्नभूदेशाभिग्रहः प्रयोजने उत्पन्ने स्वयमगमनाद् वृत्तिप्राकारप्रत्यासन्नवर्ती भूत्वा अभ्युत्कासितादिशब्दं करोति, आह्वानीयानां श्रोत्रेऽनुपातयति, ते च तच्छब्दश्रवणात्तत्समीप-मागच्छन्ति इति शब्दानुपातोऽतिचारः। तथा रूपं स्वशरीर-सम्बन्धि उत्पन्नप्रयोजनः शब्दमनुच्चारयन्, आह्वानीयानां दृष्टावनु-पातयति, तद्दर्शनाच्च ते तत्समीपमागच्छन्तीति रूपानुपातः। इयमत्र भावना – विवक्षितक्षेत्राद्बहिःस्थितं कञ्चन नरं व्रतभङ्गभया-दाह्वातुमशक्नुवन् यदा स्वकीयशब्दश्रावणरूपदर्शनव्याजेन तमा-कारयति, तदा व्रतसापेक्षत्वाच्छब्दानुपातरूपानुपातावतिचारा-विति चतुर्थपञ्चमौ ४। ५। इह चाद्यातिचारद्वयमव्युत्पन्नबुद्धि-तया, सहसाकारादिना वा ; अन्त्यत्रयं तु मायावितया अति-चारतां याति। अत्र दिग्व्रतसंक्षेपकरणवद् व्रतान्तराणामपि संक्षेपकरणं देशावकाशिकव्रतमिति वृद्धाः। अतिचाराश्च दिग्-व्रतकरणस्यैव श्रूयन्ते न व्रतान्तरसंक्षेपकरणस्य, तत्कथं व्रतान्तर-

संक्षेपकरणं देशावकाशिकव्रतम् ? । अत्रोच्यते । प्राणातिपातादिविरमणव्रतान्तरसंक्षेपकरणेषु वधबन्धादय एवातिचाराः, दिग्व्रतसंक्षेपकरणे तु संक्षिप्तत्वात् क्षेत्रस्य, प्रेष्यप्रयोगादयोऽतिचाराः । भिन्नातिचारसम्भवाच्च दिग्व्रतसंक्षेपकरणस्यैव देशावकाशिकत्वं साक्षादुक्तमिति ॥ ११७ ॥

अथ पौषधव्रतस्यातिचारानाह—

उत्सर्गादानसंस्ताराननवेक्ष्याप्रमृज्य च ।
अनादरः स्मृत्यनुपस्थापनं चेति पौषधे ॥ ११८ ॥

उत्सर्जनमुत्सर्गस्त्याग उच्चारप्रस्रवणखेलसिंघाणकादीनामवेक्ष्य प्रमृज्य च स्थण्डिलादौ उत्सर्गः कार्यः । अवेक्षणं चक्षुषा निरीक्षणम् । प्रमार्जनं वस्त्रप्रान्तादिना स्थण्डिलादेरेव विशुद्धीकरणम् । अथानवेक्ष्याप्रमृज्य चोत्सर्गं करोति तदा पौषधव्रतमतिचरतीति प्रथमोऽतिचारः १ । आदानं ग्रहणं यष्टिपीठफलकादीनाम्, तदप्यवेक्ष्य प्रमृज्य च कार्यम्, अनवेक्षितस्याप्रमार्जितस्य चादानमतिचारः । आदानग्रहणेन निक्षेपोऽप्युपलक्ष्यते यष्ट्यादीनाम्, तत्र सोऽप्यवेक्ष्य प्रमार्ज्य च कार्यः; अनवेक्ष्याप्रमृज्य च निक्षेपोऽतिचार इति द्वितीयः २ । तथा संस्तीर्यते यः प्रतिपन्नपौषधव्रतेन दर्भकुशकम्बलिवस्त्रादिः स संस्तारः, स चावेक्ष्य प्रमार्ज्य च कर्तव्यः, अनवेक्ष्याप्रमार्ज्य च करणेऽतिचारः । इह चानवेक्षणेन दुरवेक्षणम्, अप्रमार्जनेन दुष्प्रमार्जनं संगृह्यते, नञः कुत्सार्थस्यापि दर्शनात्, यथा कुत्सितो ब्राह्मणोऽब्राह्मणः ।

यत् सूत्रम्—'[1]अप्पडिलेहिअदुप्पडिलेहिअसिज्जासंथारए, अप्पमज्जिअदुप्पमज्जिअसिज्जासंथारए, अप्पडिलेहिअदुप्पडिलेहिअ-उच्चारपासवणभूमीए, अप्पमज्जिअदुप्पमज्जिअउच्चारपासवणभूमि ॥

इति तृतीयः ३। तथा अनादरः पोषधव्रतप्रतिपत्तिकर्तव्यतायामिति चतुर्थः ४। तथा स्मृत्यनुपस्थापनं तद्विषयमेवेति पञ्चमः, पोषधे सर्वतः पोषधे, देशतः पोषधे तु नायं विधिः ५ ॥ ११८ ॥

अथातिथिसंविभागव्रतस्यातिचारानाह—

सचित्ते क्षेपणं तेन पिधानं काललङ्घनम् ।
मत्सरोऽन्यापदेशश्च तुर्यशिक्षाव्रते स्मृताः ॥११९॥

सचित्ते सजीवे पृथ्वीजलकुम्भीपचुल्लीधान्यादौ, क्षेपणं निक्षेपो देयस्य वस्तुनः, तच्च अदानबुद्धा निक्षिपति, एतज्ज्ञानात्यसौ तुच्छबुद्धिः यत् सचित्तनिक्षिप्तं न गृह्णन्ति साधव इत्यतो देयं चोपस्थाप्यते न चाददते साधव इति लाभोऽयं ममेति प्रथमोऽतिचारः १। तथा तेन सचित्तेन सूरणकन्दपत्रपुष्पफलादिना तथाविधयैव बुद्धा पिधत्ते, इति द्वितीयः २। तथा कालस्य साधूनामुचितभिक्षासमयस्य लङ्घनमतिक्रमः, अयमर्थः—उचितो यो भिक्षाकालः साधूनां तं लङ्घयित्वा, अनागतं वा भुङ्क्ते

---

(१) अप्रतिलेखितदुष्प्रतिलेखितशय्यासंस्तारके, अप्रमार्जितदुष्प्रमार्जितशय्यासंस्तारके, अप्रतिलेखितदुष्प्रतिलेखितोच्चारप्रस्रवणभूमौ, अप्रमार्जितदुष्प्रमार्जितोच्चारप्रस्रवणभूमौ ।

पोषधव्रती। इति तृतीयः ३। तथा मत्सरः कोपः यथा मार्गितः सन् कुप्यति, सदपि मार्गितं न ददाति। अथवाऽनेन तावद् द्रमकेण मार्गितेन दत्तम्, किमहं ततोऽपि हीन इति मात्सर्य्याद्ददाति; अत्र परोन्नतिवैमनस्यं मात्सर्य्यम्, यदुक्त-मस्माभिरेवाऽनेकार्थसंग्रहे—मत्सरः परसम्पत्त्यक्षमायां तद्वति क्रुधि। इति चतुर्थः ४। तथा अन्यस्य परस्य सम्बन्धीदं गुड-खण्डादीति व्यपदेशो व्याजोऽन्यापदेशः, यदनेकार्थसंग्रहे—अपदेशस्तु कारणे व्याजे लक्ष्येऽपि। इति पञ्चमः ५। एते पञ्चातिचारास्तुर्यशिक्षाव्रते अतिथिसंविभागनाम्नि स्मृताः। अति-चारभावना पुनरियम्—यदा अनाभोगादिना अतिचरन्ति तदा अतिचाराः, अन्यथा तु भङ्गाः; इत्यवसितानि सम्यक्त्वमूलानि द्वादशव्रतानि, तदतिचाराश्चाभिहिताः॥ ११९॥

इदानीमुक्तशेषं निर्दिशन् श्रावकस्य महाश्रावकत्वमाह—

एवं व्रतस्थितो भक्त्या सप्तक्षेत्र्यां धनं वपन्।
दयया चातिदीनेषु महाश्रावक उच्यते॥ १२०॥

एवं पूर्वोक्तप्रकारेण सम्यक्त्वमूलेष्वतिचारविशुद्धेषु द्वादशसु व्रतेषु स्थितो निश्चलचित्तत्वेन निलीनः, सप्तानां क्षेत्राणां समा-हारः सप्तक्षेत्री जैनबिम्बभवनागमसाधुसाध्वीश्रावकश्राविकालक्षणा तस्यां, न्यायोपात्तं धनं वपन् निक्षिपन्; क्षेत्रे हि बीजस्य वपन-मुचितमित्युक्तं वपन्निति, वपनमपि क्षेत्रे उचितं नाऽक्षेत्रे इति सप्तक्षेत्र्यामित्युक्तम्। क्षेत्रत्वं च सप्तानां रूढमेव। वपनं च

सप्तक्षेत्र्यां यथोचितस्य द्रव्यस्य भक्त्या श्रद्धया, तथाहि—जिन-बिम्बस्य तावद्विशिष्टलक्षणलक्षितस्य प्रसादनीयस्य वज्रेन्द्रनीलाऽञ्जनचन्द्रकान्तसूर्यकान्तरिष्टाङ्ककर्केतनविद्रुमसुवर्णरूप्यचन्दनोपल-मृदादिभिः सारद्रव्यैर्विधापनम्।

यदाह—

सन्मृत्तिकामलशिलातलरूप्यदारु-
सौवर्णरत्नमणिचन्दनचारुबिम्बम्।
कुर्वन्ति जैनमिह ये स्वधनानुरूपं
ते प्राप्नुवन्ति नृसुरेषु महासुखानि ॥ १ ॥

तथाहि—

[1]पासाइआ पडिमा लक्खणजुत्ता समत्तलङ्करणा।
जह पल्हाएइ मणं तह निज्जरमो विआणाहि ॥ १ ॥

तथा निर्मितस्य जिनबिम्बस्य शास्त्रोक्तविधिना प्रतिष्ठापनम्, अष्टाभिश्च प्रकारैरभ्यर्चनं, यात्राविधानं, विशिष्टाभरणभूषणं, विचित्रवस्त्रैः परिधापनमिति जिनबिम्बे धनवपनम्।

यदाह—

गन्धैर्माल्यैर्विनिर्यद्बहलपरिमलैरक्षतैर्धूपदीपैः
सान्नाय्यैः प्राज्यभेदैश्चरुभिरुपहृतैः पाकपूतैः फलैश्च।
अम्भःसम्पूर्णपात्रैरिति हि जिनपतेरर्चनामष्टभेदां
कुर्वाणा वेश्मभाजः परमपदसुखस्तोममाराल्लभन्ते ॥ १ ॥

(१) प्रासादिता प्रतिमा लक्षणयुक्ता समस्तालङ्करणा।
यथा प्रह्लादयति मनस्तथा निर्जरां विजानीहि ॥

ननु जिनबिम्बानां पूजादिकरणे न कश्चिदुपयोगः, न हि पूजादिभिस्तानि तृप्यन्ति तुष्यन्ति वा, न चातृप्ततुष्टाभ्यो देवताभ्यः फलमाप्यते । नैवम् । चिन्तामण्यादिभ्य इवाऽतृप्त-तुष्टेभ्योऽपि फलप्राप्त्यविरोधात् ।

यदुक्तं वीतरागस्तोत्रेऽस्माभिः —

अप्रसन्नात् कथं प्राप्यं फलमेतदसङ्गतम् ।
चिन्तामण्यादयः किं न फलन्त्यपि विचेतनाः ॥ १ ॥

तथा —

'उवगाराभावम्मि वि पुज्जाणं पूयगस्स उवगारो ।
मन्ताइसरणजलणादिसेवणे जह तहेहं पि ॥ १ ॥

एष तावत् स्वकारितानां बिम्बानां पूजादिविधिरुक्तः, अन्य-कारितानामपि । अकारितानां च शाश्वतप्रतिमानां यथार्हं पूजनार्चनादिविधिरनुष्ठेयः । त्रिविधा हि जिनप्रतिमाः—भक्ति-कारिताः स्वयं परेण वा चैत्येषु कारिताः, या इदानीमपि मनुष्या-दिभिर्विधाप्यन्ते ; मङ्गल्यकारिता या गृहेषु द्वारपत्रेषु मङ्गलाय कार्यन्ते, शाश्वत्यस्तु अकारिता एव अधस्तिर्यगूर्ध्वलोकावस्थितेषु जिनभवनेषु वर्तन्त इति । न हि लोकत्रयेऽपि तत्स्थानमस्ति यत्र पारमेश्वरीभिः प्रतिमाभिः पवित्रितमिति । जिनप्रतिमानां च वीतरागस्वरूपाध्यारोपेण पूजादिविधिरुचित इति । जिनभवनक्षेत्रे स्वधनवपनं यथा—शल्यादिरहितभूमौ स्वयंसिद्धस्योपलकाष्ठादि-

(१) उपकाराभावेऽपि पूज्यानां पूजकस्योपकारः ।
मन्त्रादिस्मरणज्वलनादिसेवने यथा तथेहापि ॥ १ ॥

दलस्य ग्रहणेन सूत्रकारादिभृतकानतिसन्धानेन भृत्यानामधिका-
मूल्यवितरणेन षड्जीवनिकाययतनापूर्वकं जिनभवनस्य विधा-
पनम्, सति विभवे भरतादिवद् रत्नशिलाभिर्बद्धचामीकरकुट्टिमस्य
मणिमयस्तम्भसोपानस्य रत्नमयतोरणशतालङ्कारकृतस्य विशाल-
शालातलानकस्य शालभञ्जिकाभङ्गिभूषितस्तम्भादिप्रदेशस्य दह्य-
मानकर्पूरकस्तूरिकागुरुप्रभृतिधूपसमुच्छलद्धूमपटलजातजलदश-
ङ्कानृत्यत्कलकण्ठकुलकोलाहलस्य चतुर्विधाऽऽतोद्यनान्दीनिनाद-
नादितरोदसीकस्य देवाङ्गप्रभृतिविचित्रवस्त्रोल्लोचखचितमुक्तावचू-
लालङ्कृतस्य उत्पतन्निपतद्वायनृत्यद्दर्शसिंहादिमादितवलुरसमूह-
महिमानुमोदनप्रमोदमानजनस्य विचित्रचित्रचित्रीयितसकल-
लोकस्य चामरध्वजच्छत्राद्यलङ्कारविभूषितस्य मूर्धारोपितविजय-
वैजयन्तीनिबद्धकिङ्किणीरणत्कारमुखरितदिगन्तस्य कौतुकामिल-
सुरासुरकिन्नरीनिवहाऽऽरब्धसङ्गीतस्य गन्धर्वगीत-
ध्वनितिरस्कृततुम्बुरुमहिम्नो निरन्तरतालारसरासकहल्लीसक-
प्रमुखप्रबन्धनानाभिनयनव्यग्रकुलाङ्गनाचमत्कारितभव्यलोकस्या-
ऽभिनीयमाननाटककोटिरसाक्षिप्तरसिकजनस्य जिनभवनस्यो-
त्तुङ्गगिरिशृङ्गेषु जिनानां जन्मदीक्षाज्ञाननिर्वाणस्थानेषु सम्प्रति-
राजवच्च प्रतिपुरं प्रतिग्रामं पदे पदे विधापनम्; असति तु
विभवे तृणकुट्यादिरूपस्याऽपि।

यदाह—

यस्तृणमयीमपि कुटीं कुर्याद्दद्यात्तथैकपुष्पमपि।
भक्त्या परमगुरुभ्यः पुण्योन्मानं कुतस्तस्य?॥ १॥

किं पुनरुपचितदृढघनशिलासमुद्घातघटितजिनभवनम्।
ये कारयन्ति शुभमतिविमानिनस्ते महाधन्याः ॥ २ ॥

राजादेस्तु विधापयितुः प्रचुरतरभाण्डागारग्रामनगरमण्डलगोकुलादिप्रदानं जिनभवनक्षेत्रे वपनम्, तथा जीर्णशीर्णानां चैत्यानां समारचनम्, नष्टभ्रष्टानां समुद्धरणं चेति। ननु निरवद्यजिनधर्मसमाचरणचतुराणां जिनभवनबिम्बपूजादिकरणमनुचितमिव प्रतिभासते षड्जीवनिकायविराधनाहेतुत्वात्तस्य, भूमीखननदलपाटकानयनगर्तापूरणेष्टकाचयनजलप्लावनवनस्पतित्रसकायविराधनामन्तरेण न हि तद्भवति। उच्यते। य आरम्भपरिग्रहप्रसक्तः कुटुम्बपरिपालननिमित्तं धनोपार्जनं करोति, तस्य धनोपार्जनं विफलं मा भूदिति जिनभवनादौ धनव्ययः श्रेयानेव। न च धर्मार्थं धनोपार्जनं युक्तम्।

यतः—

धर्मार्थं यस्य वित्तेहा तस्यानीहा गरीयसी।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ १ ॥

इत्युक्तमेव। न च वापीकूपतडागादिखननवदशुभोदर्कं जिनभवनादिकरणम्, अपि तु सद्गुरुसमागमधर्मदेशनाकरणव्रतप्रतिपत्त्यादिकरणेन शुभोदर्कमेव। षड्जीवनिकायविराधना च यतनाकारिणामगारिणां कृपापरवशत्वेन सूक्ष्मानपि जन्तून् रक्षयतामविराधनैव।

यदाहुः—

¹जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स ।
सा होइ निज्जरफला अज्झत्थविसोहिजुत्तस्स ॥ १ ॥
²परमरहस्समिसीणं समत्तगणिपिडगझरिअसाराणं ।
परिणामिअं पमाणं निच्छयमवलम्बमाणाणं ॥ २ ॥

यस्तु निजकुटुम्बार्थमपि नारम्भं करोति प्रतिमाप्रतिपन्नादिः, तस्य मा भूज्जिनबिम्बादिविधापनमपि ।

यदाहुः—

³देहाइनिमित्तं पि हु जे कायवहम्मि इह पयट्टन्ति ।
जिणपूआकायवहम्मि तेसिमपवत्तणं मोहो ॥ १ ॥

इत्यलं प्रसङ्गेन । जिनागमक्षेत्रे च स्वधनवपनं यथा—जिनागमो हि कुशास्त्रजनितसंस्कारविषमुच्छेदनमहामन्त्रायमाणो धर्माधर्मकृत्याकृत्यभक्ष्याभक्ष्यपेयापेयगम्यागम्यसारासारादिविवेचनहेतुः संतमसे दीप इव, समुद्रे द्वीपमिव, मरौ कल्पतरुरिव, संसारे दुरापः । जिनादयोऽप्येतत्प्रामाण्यादेव निर्णीयन्ते । यदवोचाम स्तुतिषु—

यदीयसम्यक्त्वबलात् प्रतीमो भवादृशानां परमात्मभावम् ।
कुवासनापाशविनाशनाय नमोऽस्तु तस्मै तव शासनाय ॥१॥

---

(१) या यतमानस्य भवेद् विराधना सूत्रविधिसमग्रस्य ।
सा भवति निर्जरफलाऽध्यात्मविशोधियुक्तस्य ॥ १ ॥

(२) परमरहस्यमृषीणां समस्तगणिपिटकक्षरितसाराणाम् ।
परिणामितं प्रमाणं निश्चयमवलम्बमानानाम् ॥ २ ॥

(३) देहादिनिमित्तमपि खलु ये कायवधे इह प्रवर्तन्ते ।
जिनपूजाकायवधे तेषामप्रवर्तनं मोहः ॥ १ ॥

जिनागमबहुमानिना च देवगुरुधर्मादयोऽपि बहुमता भवन्ति । किं च केवलज्ञानादपि जिनागम एव प्रामाण्येनाऽतिरिच्यते ।

यदाहुः—

'ओहे सुओवउत्तो सुयनाणी जइ हु गिह्णइ असुद्धं ।
तं केवली वि भुञ्जइ अपमाणं सुअं भवे इहरा ॥ १ ॥

एकमपि जिनागमवचनं भविनां भवनाशहेतुः ।

यदाहुः –

एकमपि च जिनवचनाद्यस्मान्निर्वाहकं पदं भवति ।
श्रूयन्ते चानन्ताः सामायिकमात्रपदसिद्धाः ॥ १ ॥ इति ॥

यद्यपि च मिथ्यादृष्टिभ्य आतुरेभ्य इव पथ्यान्नं न रोचते जिनवचनम्, तथापि नान्यत् स्वर्गापवर्गमार्गप्रकाशनसमर्थम् ; इति सम्यग्दृष्टिभिस्तदादरेण श्रद्धातव्यम्, यतः कल्याणभाजिन एव जिनवचनं भावतो भावयन्ति । इतरेषां तु कर्णशूलकारित्वेनामृतमपि विषायते । यदि चेदं जिनवचनं नाभविष्यत्, तदा धर्माऽधर्मव्यवस्थाशून्यं भवान्धकूपे भुवनमपतिष्यत् । यथा च हरीतकीं भक्षयेद् विरेककामः इति वचनाद्धरीतकीभक्षणप्रभवविरेकलक्षणेन प्रत्ययेन सकलस्याऽप्यायुर्वेदस्य प्रामाण्यमवसीयते, तथा अष्टाङ्गनिमित्तकेवलिकाचन्द्रार्कग्रहचारधातुवादरसरसायनादिभिरप्यागमोपदिष्टैर्दृष्टार्थवाक्यानां प्रामाण्यनिश्चयेनाऽदृष्टार्थानामपि

---

(१) ओघे श्रुतोपयुक्तः श्रुतज्ञानी यदि खलु गृह्णात्यशुद्धम् ।
तद् केवल्यपि भुङ्क्तेऽप्रमाणं श्रुतं भवेदितरथा ॥ १ ॥

वाक्यानां प्रामाण्यं मन्दधीभिर्निश्चेतव्यम्। जिनवचनं च दुःषमाकालवशादुच्छिन्नप्रायमिति मत्वा भगवद्भिर्नागार्जुन-स्कन्दिलाचार्यप्रभृतिभिः पुस्तकेषु न्यस्तम्। ततो जिनवचनबहु-मानिना तत् पुस्तकेषु लेखनीयं वस्त्रादिभिरभ्यर्चनीयम्।

यदाह—

न ते नरा दुर्गतिमाप्नुवन्ति न मूकतां नैव जडस्वभावम्।
न चान्धतां बुद्धिविहीनतां च ये लेखयन्तीह जिनस्य वाक्यम्॥१॥

लेखयन्ति नरा धन्या ये जिनागमपुस्तकम्।
ते सर्वं वाङ्मयं ज्ञात्वा सिद्धिं यान्ति न संशयः॥ २॥

जिनागमपाठकानां वस्त्रादिभिरभ्यर्चनं भक्तिपूर्वं संमाननं च।

यदाह—

पठति पाठयते पठतामसौ वसनभोजनपुस्तकवस्तुभिः।
प्रतिदिनं कुरुते य उपग्रहं स इह सर्वविदेव भवेन्नरः॥ १॥

लिखितानां च पुस्तकानां संविग्नगीतार्थेभ्यो बहुमानपूर्वकं व्याख्यानार्थं दानम्, व्याख्यायमानानां च प्रतिदिनं पूजापूर्वकं श्रवणं चेति। साधूनां च जिनवचनानुसारेण सम्यक् चारित्र-मनुपालयतां दुर्लभं मनुष्यजन्म सफलीकुर्वतां स्वयं तीर्णानां परं तारयितुमुद्यतानामातीर्थङ्करगणधरेभ्य आ चैतद्दिनदीक्षितेभ्यः सामायिकसंयतेभ्यो यथोचितप्रतिपत्त्या स्वधनवपनम्, यथा—उपकारिणां प्रासुकैषणीयानां कल्पनीयानां चाशनादीनां, रोगापहारिणां च भेषजादीनां, शीतादिवारणार्थानां च वस्त्रादीनां, प्रतिलेखनाहेतो रजोहरणादीनां, भोजनाद्यर्थं

पात्राणां, औपग्राहिकाणां च दण्डकादीनां, निवासार्थमाश्रयाणां दानम्। न हि तदस्ति यद्द्रव्यक्षेत्रकालभावापेक्षयाऽनुपकारकं नाम, तत्सर्वस्वस्याऽपि दानम्, साधुधर्मोद्यतस्य स्वपुत्रपुत्र्यादेरपि समर्पणं च। किं बहुना ? यथा यथा मुनयो निराबाधवृत्त्या स्वयमनुष्ठानमनुतिष्ठन्ति, तथा तथा महता प्रयत्नेन सम्पादनम्, जिनप्रवचनप्रत्यनीकानां च साधुधर्मनिन्दापराणां यथाशक्ति निवारणम्।

यदाह—

'तम्हा सइ सामत्थे आणाभट्ठम्मि नो खलु उवेहा ।

अणुकूलगेयरे हि अ अणुसट्ठी होइ दायव्वा ॥ १ ॥

तथा रत्नत्रयधारिणीषु साध्वीषु साधुष्विव यथोचिताहारादिदानं स्वधनवपनम्। ननु स्त्रीणां निःसत्त्वतया दुःशीलत्वादिना च मोक्षेऽनधिकारः, तत्कथमेताभ्यो दानं साधुदानतुल्यम् ?। उच्यते। निःसत्त्वमसिद्धम्, ब्राह्मीप्रभृतीनां साध्वीनां गृहवासपरित्यागेन यतिधर्ममनुतिष्ठन्तीनां महासत्त्वानां नाऽसत्त्वसम्भवः।

यदाह—

ब्राह्मी सुन्दर्यार्या राजीमती चन्दना गणधराऽन्या ।

अपि देवमनुजमहिता विख्याताः शीलसत्त्वाभ्याम् ॥ १ ॥

गार्हस्थ्येऽपि सुसत्त्वा विख्याताः शीलवतीतमा जगति ।

सीतादयः कथं तास्तपसि 'विशीला विसत्त्वाश्च ? ॥ २ ॥

---

(१) तस्मात् सति सामर्थ्येऽऽज्ञाभ्रष्टे नो खलूपेक्षा ।

अनुकूलेतरे हि चानुशिष्टिर्भवति दातव्या ॥ १ ॥

(२) क ख ग, विसत्त्वा विशीलाश्च ।

संत्यज्य राज्यलक्ष्मीं पतिपुत्रभ्रातृबन्धुसम्बन्धम् ।

पारिव्राज्यवृहायाः किमसत्त्वं सत्यभामादेः ? ॥ २ ॥

ननु महापापेन मिथ्यात्वसहायेन स्त्रीत्वमर्ज्यते ; न हि सम्यग्दृष्टिः स्त्रीत्वं कदाचिद् बध्नाति इति कथं स्त्रीशरीरवर्तिन आत्मनो मुक्तिः स्यात् ?। मैवं वोचः, सम्यक्त्वप्रतिपत्तिकाल एवाऽन्तःकोटी-कोटिस्थितिकानां सर्वकर्मणां भावेन मिथ्यात्वमोहनीयादीनां क्षयादिसम्भवान्मिथ्यात्वसहितपापकर्मसम्भवत्वमकारणम्, मोक्ष-कारणवैकल्यं तु तासु वक्तुमुचितम् । तच्च नास्ति ।

यतः—

जानीते जिनवचनं श्रद्धत्ते चरति चाऽऽर्यिका शबलम् ।

नाऽस्यास्त्यसम्भवोऽस्यां नादृष्टविरोधगतिरस्ति ॥१॥ इति ॥

तस्मिद्धमेतन्मुक्तिसाधनधनासु साध्वीषु साधुवद् धनवपनमुचित-मिति । एतच्चाधिकं यत् साध्वीनां दुःशीलेभ्यो नास्तिकेभ्यो गोपनम्, स्वगृहप्रत्यासत्तौ च समन्ततो गुप्तायां गुप्तद्वारायां वसतेर्दानम्, स्वस्त्रीभिश्च तासां परिचर्याविधापनम्, स्वपुत्रिकाणां च तत्सन्निधौ धारणम्, व्रतोद्यतानां स्वपुत्र्यादीनां प्रत्यर्पणं च, तथा विस्मृतकरणीयानां तत्स्मारणम्, अन्यायप्रवृत्तिसम्भवे तन्निवारणम्, सकृदन्यायप्रवृत्तौ शिक्षणम्, पुनः पुनः प्रवृत्तौ निष्ठुरभाषणादिना ताडनम्, उचितेन वस्तुनो'पचारणं चेति श्रावकेषु स्वधनवपनं यथा—साधर्मिकाः खलु श्रावकस्य श्रावकाः,

---

(१) च-पकरणं ।